**मृगी मुद्रा**—पाणि के सङ्कोच करने से शूकरी, उसी में कनिष्ठा को हटा देने से हंसी तथा जिसमें कनिष्ठा तर्जनी का सम्बन्ध न हो उसे मृगी मुद्रा कहते हैं।

**मृद्वासन**—छह मास से पहले जो गर्भ गिर गया हो, कौल उसे ही 'मृदु' कहते हैं। इससे निर्मित आसन ही मृद्वासन कहा जाता है।

**मृदुचूडक**—छह मास से पहले जो गर्भ गिर गया हो, चूडाकर्म तथा उपनयन से रहित ऐसे मृदु को 'मृदुचूडक' भी कहा जाता है।

**योनिमुद्रा**—हठयोग की एक क्रिया। इसमें मूलाधार चक्र में स्थित कुण्डलिनी शक्ति का सुषुम्णा नाडी द्वारा ब्रह्मरन्ध्र तक प्राणशक्ति से आरोहण तथा ब्रह्मरन्ध्र से मूलाधार (या ब्रह्मयोनि) तक अवरोहण की क्रिया होती है।

**लता**—कुलस्त्री। जिसके आलिङ्गन मात्र से साधक का शरीर अमृत के समान स्वच्छ हो जाता है।

**लतागृह**—स्मरमन्दिर।

**लुकी विद्या**—अदृश्य होने की विद्या।

**वीरद्रव्य**—मद्य ।

**शिववाक्य**—कौलाचार ।

**शिवाम्बु**—स्वमूत्र ।

**शौच**—आन्तरिक और बाह्य शुद्धता । इनके पाँच प्रकार कहे गए हैं—१. मनः शौच, २. कर्मशौच, ३. कुलशौच, ४. वाक्शौच, ५. आभ्यन्तर शौच ।

**श्रीयन्त्र**—इस तान्त्रिक यन्त्र की नाप ९६ इकाइयों पर रखी गई है । मध्य बिन्दु बीजशक्ति स्वरूप है । प्रथम केन्द्रीय त्रिकोण, शम्भु का स्थान है । अष्टकोण वसुगण का स्थान है । आन्तर और दश-दश त्रिकोण दस प्राणों के द्योतक है । षोडश दल चन्द्रमा की विशुद्ध सोलह कलाएँ हैं तथा आठ दलों में सोलह कलाओं का समावेश है । तीन बाह्य रेखाएँ त्रैलोक्य, चार द्वार ऋद्धिसिद्धियों के प्रवेशद्वार, इस यन्त्र में चार सीधे और पाँच उल्टे त्रिकोणों से मिलकर ४३ त्रिकोणों की सृष्टि होती है । इसकी आराधना का जपमन्त्र 'ॐ श्री क्लीं ह्रीं श्रीं महालक्ष्म्यै नमः' है ।

**संवित्**—विजया (भाँग)। संवित् और आसव दोनों में जो साधक विजया का ग्रहण कर ध्यान करता है, उसको उसी समय ध्यान में मूर्ति का प्रत्यक्ष हो जाता है ।

**संवृत्त मुद्रा**—दोनों हाथ की मुट्ठियों को अधोमुख स्थापित करे तो संवृत्त मुद्रा हो जाती है ।

**सन्धिवर्ण**—ए ऐ ओ औ ।

**सन्ध्या**—एक वर्ष की कन्या ।

**समयाचार**—तन्त्रमार्ग का एक प्रकार । अपर संज्ञा कौल मार्ग । तान्त्रिक श्रीचक्र की मानसपूजा या ध्यानात्मक उपासना ।

**सम्पुट मुद्रा**—दोनों हाथों को परस्पर सम्मुख कर पुट के आकार में संयुक्त कर बनावे तो वह सम्पुट नामक मुद्रा बन जाती है । नमस्कार कर्म में इसका प्रयोग किया जाता है ।

**सम्पुटाञ्जलि मुद्रा**—इसी मुद्रा को बनाकर दोनों कनिष्ठा अङ्गुली के मूल प्रदेश में दोनों अङ्गूठों को लगा देवे तो वह सम्पुटाञ्जलि मुद्रा कही जाती है ।

**सारस्वत मन्त्र**—ऐं ।

**स्वयम्भूकुसुम**—रज ।

**हंसविद्या**—सोऽहं, हंसः—इस मन्त्र का श्वास एवं उच्छ्वास के साथ जप या मनन करते हुए आत्मानुभव पाने की साधना ।

**हेतु**—मद्य ।

# वर्णसंकेतसूची

अंकुशबीज—क्रों
अमृतत्रय—ऐं ह्रीं श्रीं
अर्घीश—ह
अर्धचन्द्र—अनुस्वार
अस्त्रमन्त्र—अस्त्राय फट्
आद्याबीज—श्रीं
इन्दु—स
ईश—य
एकादश स्वर—ए
कठिनबीज—श्रीं
कन्दर्पबीज—क्लीं
कमलाबीज—श्रीं
कवचबीज—हुं
कामकला—ई
कामबाण—द्रां द्रीं
कामबीज—क्लीं
कामराज—क्लीं
कामेशी—क्लीं, ह्रीं
कूर्चबीज—हुं
क्षिति (बीज)—ल
जल—व
ठ द्वय—स्वाहा
तार—ॐ
तृतीयबीज—सौः
त्रितार—ऐं ह्रीं श्रीं

त्रिपुरा मन्त्र—श्रीं ह्रीं क्लीं
त्र्यक्षरी—ऐं क्लीं सौः
दक्षकर्ण—उ
दक्षश्रोत्र—उ
देवराज—ल
धरा—ल
पञ्चबाण—द्रां द्रीं क्लीं ब्लूं सः
पञ्चम—व
पञ्चान्तक—म
पराबीज—श्रीं
पाश—आं
प्राणविद्या—हं
प्रेतबीज—हं
फलपाक—सिद्धि
बिन्दु—अनुस्वार
भान्त—म
भुवनेशी—ह्रीं
भू बीज—लं
भृगु—स
मद—क
महाकाल—श
माया (बीज)—ह्रीं
मुखवृत्त—ऊ
रमाबीज—श्रीं
लक्ष्मीबीज—श्रीं

लज्जाबीज—ह्रीं
वधूबीज—स्त्रीं
वर्म—हुं
वह्नि—र
वह्निजाया—स्वाहा
वागीश—ऐं
वाग्भव—ऐं
वाणी—ऐं
वान्त—श
वामनेत्र—ई
वामपाद—ह
वायु—य
वारुणबीज—व
वियत्—ह
विश—म
विष—म
वेदादि—ॐ
व्योम—ह

शक्र—ल
शक्रस्वर—औ
शक्तिबीज—ह्रीं
शवर्ग—शं षं सं
शिव—ह
शीतल—व
श्रीबीज—श्रीं
श्वेत—ष
सदाशिव—ह
सनयन—ई
सरस्वतीबीज—ऐं
सान्त—ह
सूर्यस्वर—ऐं
स्मरबीज—क्लीं
हृत्—नमः
हृदय—नमः
हृल्लेखा—ह्रीं
हंसः—सः

॥ श्रीः ॥

श्रीमज्ज्ञानानन्दपरमहंसविरचितः

# कौलावलीनिर्णयः

## प्रथम उल्लासः

मङ्गलाचरणम्

नत्वा श्रीगुरुपादपद्मयुगलं सिद्धैः सदा सेवितं
शाक्तानां परिभावमोक्षजनकं कौलावलीनिर्णयम् ।
वक्ष्येऽहं कुलवर्धनं सुकृतिभिः सेव्यं सदा कौलिकै-
र्भावैरेव मनोहरैश्च चरणाब्जैकप्रसादालयम् ॥ १ ॥
वाञ्छाकल्पतरुं तनोति शिवयोर्वाक्यानुसारार्थतो ।
ज्ञानानन्दगिरिर्महेशचरणाब्जैकप्रसादालयः ॥ २ ॥

✻ निरञ्जन ✻

मञ्जुसिञ्जितमञ्जीर वाममर्द्ध महेशितुः ।
आश्रयामि जगन्मूलं यन्मूलं वचसामपि ॥ १ ॥
सुखदा सर्वभूतानां सच्चिदानन्दरूपिणी ।
स भूत्यै मम सम्भूयात् शङ्करार्द्धशरीरिणी ॥ २ ॥
सहस्रविद्युदामानं कान्त्या दीप्तां मनोहराम् ।
मूलाधारस्थितां वन्दे कौलानां कुलदेवताम् ॥ ३ ॥
स्वयम्भुवं त्रिः संवेष्ट्य स्फुरन्ती सर्पिणीमिव ।
तां स्यन्दमानां सुधास्रोतः कुलकुण्डलिनीं श्रये ॥ ४ ॥
विश्वमूलामनाद्यन्तां भक्तानामार्त्तिनाशिनीम् ।
उपासितुः कामदुघां वन्दे वर्णस्वरूपिणीम् ॥ ५ ॥
कौलावली निर्णयोऽयं कौलमार्गप्रवर्त्तकः ।
ग्रन्थः सर्वैर्दुराराध्यः आचारेणापि दुर्गमः ॥ ६ ॥

टीकाकर्तुं प्रवृत्तोऽहमनुज्ञातो मनीषिभिः ।
निर्विघ्नं कुरु मे मातः सुबुद्धिं देहि शाङ्करि ॥ ७ ॥

महेश्वर के चरण कमलों के प्रसन्नता का एकमात्र पात्र मैं (महेश्वरगिरि) अपने श्रीगुरु के चरणकमलों को नमस्कार कर सिद्धों के द्वारा सुसेवित शाक्त सम्प्रदाय वालों को आदर देने वाले तथा उन्हें मोक्ष देने वाले कौलावली निर्णय नामक ग्रन्थ का निर्माण कर रहा हूँ । यह कुलमार्ग की वृद्धि करने वाला है । अतः पुण्यात्मा कौलमार्ग वालों के लिये यह नित्य मनोहर भावों से सेवनीय है । शिव तथा शक्ति के कथनानुसार यह अर्थ के द्वारा वाञ्छा कल्पतरु का विस्तार करता है और भगवान् के कमल सदृश चरणों की प्रसन्नता ही जिसका एकमात्र स्थान है ॥१-२॥

**यस्याः प्रसादतो लेभे शास्त्रार्थं तत्त्वनिर्णयम् ।**
**तां नमामि महादेवीं वाणीं वाग्विभवप्रदाम् ॥ ३ ॥**

वाग्विभव प्रदान करने वाली; जिन महादेवी वाणी के द्वारा तत्त्व निर्णय नामक इस शास्त्र के अर्थ को मैंने प्राप्त किया है सर्वप्रथम उन्हें मैं (महेश्वरगिरि) नमस्कार करता हूँ ॥ ३ ॥

### संग्रहार्थे तन्त्रग्रन्थनिरूपणम्

**संवीक्ष्य यामलं रुद्रब्रह्मविष्णुकसञ्ज्ञकम् ।**
**यामलं शक्तिसञ्ज्ञञ्च भावचूडामणिं तथा ॥ ४ ॥**
**तन्त्रचूडामणिञ्चैव कुलचूडामणिं तथा ।**
**कुलसारं कुलोड्डीशं कुलामृतकुलार्णवम् ॥ ५ ॥**
**कालिकाकुलसर्वस्वं कुलसद्भावमेव च ।**
**कालीतन्त्रकुलानन्दं कुलचक्रं तथैव च ॥ ६ ॥**
**कालीकल्पं महाकौलं कुमारीतन्त्रमेव च ।**
**समयाख्य कालीतन्त्रं फेत्कारीं फेरवीं तथा ॥ ७ ॥**
**श्रीक्रमं योगिनीतन्त्रं श्रीहंसपरमेश्वरम् ।**
**स्वतन्त्रं तन्त्रराजञ्च ज्ञानमालां ततः परम् ॥ ८ ॥**
**वायवीं हंसतन्त्रञ्च ताराकल्पञ्च मालिनीम् ।**
**मन्त्रनिर्णयतन्त्रञ्च योगिनीहृदयं तथा ॥ ९ ॥**
**कुलार्णवञ्च गान्धर्वमुड्डीयानञ्च तोडलम् ।**
**शिवशासनतन्त्रञ्च मन्दरं प्लावनीं तथा ॥ १० ॥**
**वीरावलिञ्च वाराहीं वीरतन्त्रञ्च कुब्जिकाम् ।**
**नीलतन्त्रं मत्स्यसूक्तं ललितातन्त्रमेव च ॥ ११ ॥**

**शम्भुनिर्णयतन्त्रञ्च वामकेश्वरतन्त्रकम् ।**
**वटुकसंहिताञ्चैव तारार्णवं ततः परम् ॥ १२ ॥**
**गुप्तार्णवं चण्डरोषं मायां नीलमणिं तथा ।**
**समयाख्यं तन्त्रसारं ततो मन्त्रविमर्शिनीम् ॥ १३ ॥**
**ज्ञानसारं योगवतीं भैरवीतन्त्रमेव च ।**
**भैरवाख्यं महातन्त्रं सिद्धसारस्वतं ततः ॥ १४ ॥**
**त्रिपुरार्णवतन्त्रञ्च उत्तरं तन्त्रमेव च ।**
**छिन्नातन्त्रं वातुलञ्च दक्षिणामूर्त्तिसंहिताम् ॥ १५ ॥**
**नयोत्तरं ह्येकवीरां दृष्ट्वा विविधसंग्रहान् ।**
**गुरुणाञ्च मतं ज्ञात्वा सारात्सारतरं महत् ॥ १६ ॥**

मैंने रुद्रयामल, ब्रह्मयामल, विष्णुयामल, शक्तियामल, भावचूडामणितन्त्र, चूडामणि, कुलचूडामणि, कुलसार, कुलोड्डीश, कुलामृत, कुलार्णव, कालिका-कुलसर्वस्व, कुलसद्भाव, कालीतन्त्र, कुलानन्द, कुलचक्र, कालीकल्प, महाकौल, कुमारीतन्त्र, समयाख्य कालीतन्त्र, फेत्कारीतन्त्र, फेरवीतन्त्र, श्रीक्रमतन्त्र, योगिनीतन्त्र, श्रीहंसपरमेश्वरतन्त्र, स्वतन्त्र तन्त्रराजतन्त्र, ज्ञानमालतन्त्र, इसके बाद वायवी हंसतन्त्र, ताराकल्प, मालिनीतन्त्र, मन्त्रनिर्णयतन्त्र, योगिनीहृदयतन्त्र, कुलार्णवतन्त्र, गान्धर्वउड्डीयानतन्त्र, तोडलतन्त्र शिवशासनतन्त्र, मन्दरतन्त्र, प्लावनीतन्त्र, वीरावलीतन्त्र, वाराहीतन्त्र, वीरतन्त्र, कुब्जिकातन्त्र, नीलतन्त्र, मत्स्यसूक्ततन्त्र, ललितातन्त्र, शम्भुनिर्णयतन्त्र, वामकेश्वरतन्त्र, बटुकसंहिता, तारार्णवतन्त्र, इसके बाद गुप्तार्णवतन्त्र, चण्डरोषतन्त्र, मायातन्त्र, नीलमणितन्त्र, समया नामक तन्त्र, तन्त्रसार, इसके बाद मन्त्रविमर्शिनी, ज्ञानसार व योगवतीतन्त्र, भैरवीतन्त्र, भैरवमहातन्त्र, सिद्धसारतन्त्र, इसके बाद त्रिपुरार्णवतन्त्र, उत्तरतन्त्र, छिन्नातन्त्र, वातुलतन्त्र, दक्षिणामूर्तिसंहिता, नयोत्तरतन्त्र तथा एकवीरातन्त्र आदि अनेक संग्रहों को देखकर एवं अपने गुरुओं से इस मार्ग के सिद्धान्त को ज्ञात कर सभी ग्रन्थों के महान् सारों से कौलशास्त्र के सिद्धान्त की गवेषणा कर इस ग्रन्थ की रचना की गई है ॥ ४-१६ ॥

**तन्त्रशास्त्रगोपनीयत्वे युक्तिः**

**द्वैतज्ञानविहीनानां मनोऽभीष्टप्रदायकम् ।**
**अतियत्नेन गोप्तव्यं मातृमैथुनवत् सदा ॥ १७ ॥**

यह ग्रन्थ अद्वैतवादियों के अभीष्टों को प्रदान करने वाला है । अतः इसे मातृमैथुन के समान अत्यन्त यत्न से गोपनीय रखना चाहिये ॥ १७ ॥

**यस्मै कस्मै न दातव्यं न दुष्टाय कथञ्चन ।**

**न दद्यात् परशिष्याय वञ्चकाय तथैव च ॥ १८ ॥**
**सर्वथा गोपयेदेनं यदीच्छेच्छुभमात्मनः ।**

इस तन्त्र निर्णय को जिस किसी को नहीं देना चाहिये । दुष्ट को तो किसी प्रकार भी न देवे, दूसरों के शिष्यों को भी न देवे । इसी प्रकार वञ्चक (कपटी) को भी न देवे । यदि साधक अपना कल्याण चाहे तो इस शास्त्र को उसे सब प्रकार से गोपनीय रखना चाहिए ॥ १८-१९ ॥

### योग्यशिष्यायदेयम्

**प्रकृताचारयुक्ताय गुरुसेवापराय च ॥ १९ ॥**
**कुलीनाय महोच्छाय देवीभक्तपराय च ।**
**शिष्याय भक्तियुक्ताय साधकाय प्रदापयेत् ॥ २० ॥**

जो इसके अनुसार आचरण करने वाला हो, गुरु सेवा परायण हो, कुलीन एवं उत्साही हो, देवी का भक्त हो तथा गुरु में भक्ति रखने वाला शिष्य साधक हो तो उसे ही प्रदान करे ॥ १९-२० ॥

**विना परीक्ष्य यो दद्यात् यस्मै कस्मै कथञ्चन ।**
**स भक्ष्यो योगिनीवृन्दैर्मृते च नरकं व्रजेत् ॥ २१ ॥**
**तस्माच्च साधकश्रेष्ठो गोपयेत् सर्वथा पुनः ।**

जो मन्त्रज्ञ बिना परीक्षा किये हुये; जैसे-तैसे शिष्य को यह तत्त्वनिर्णय प्रदान करता है, वह योगिनी समूहों का भक्ष्य हो जाता है और मरने पर नरकगामी हो जाता है । इसलिये श्रेष्ठ साधक इसे सर्वथा गुप्त रखे ॥ २१-२२ ॥

**पुस्तकं वीक्ष्य यो मूढो न लब्ध्वो गुरुवक्त्रतः ॥ २२ ॥**
**कुर्याल्लोभवशेनैव सोऽपि नश्यति निश्चितम् ।**
**तस्य कर्माणि सर्वाणि नरकाय भवन्ति हि ॥ २३ ॥**

जो मूर्ख साधक पुस्तक मात्र को देखकर; गुरु के मुख से बिना दीक्षा लिये लोभवश इसका अनुष्ठान करता है, वह निश्चित रूप से विनष्ट हो जाता है और उसके सारे कर्म नरक जाने में कारण बन जाते हैं ॥ २२-२३ ॥

**योगिनीनां भवेद् भक्ष्यो नारकी ब्रह्मघातकः ।**
**तस्माज्ज्ञात्वा गुरोर्वक्त्रात् साधने यत्नमाचरेत् ॥ २४ ॥**

वह योगिनियों का भक्ष्य बन जाता है, नरकगामी तथा ब्रह्महत्या का पाप तो उसे लगता ही है । इसलिये गुरुमुख द्वारा दीक्षा लेकर ही इसके अनुष्ठान के लिये प्रयत्न करे ॥ २४ ॥

### शिवः ब्रह्मस्वरूपी

**अस्ति देवः परब्रह्मस्वरूपी निष्कलः शिवः ।**
**सर्वज्ञः सर्वकर्त्ता च सर्वेशो निर्मलोदयः ॥ २५ ॥**
**स्वयंज्योतिरनाद्यन्तो निर्विकारः परात्परः ।**
**निर्गुणः सच्चिदानन्दस्तदंशा जीवसञ्ज्ञकाः ॥ २६ ॥**

साधक विचार करे कि निष्कल परब्रह्मरूप शिव नामक एक ही तत्त्व है, जो सर्वज्ञ, सर्वकर्त्ता, सर्वेश, निर्मल ज्ञानस्वरूप, स्वयं ज्योति, अनादि, अनन्त, निर्विकार और परात्पर एवं निर्गुण सच्चिदानन्द है और ये समस्त जीव उसी के अंश हैं ॥ २५-२६ ॥

**अनाद्यविद्योपहिता यथाग्नौ विस्फुलिङ्गकाः ।**
**सर्वेप्युपाधिसंभिन्नास्ते कर्मभिरनादिभिः ॥ २७ ॥**

जिस प्रकार अग्नि से उत्पन्न विस्फुलिङ्ग (चिंगारी) उपाधियुक्त होता है, उसी प्रकार शिवतत्त्व से उत्पन्न हुए सभी जीव अनादि अविद्या से उपहृत हैं और वे सभी जीव अपने-अपने अनादि कर्मों के कारण ही नाना उपाधियों से संयुक्त बतलाये गये हैं ॥ २७ ॥

### मानवकर्त्तव्यकथनम्

**चतुर्विधशरीराणि धृत्वा धृत्वा सहस्रशः ।**
**सुकृतैर्मानवो भूत्वा ज्ञानी चेन्मोक्षमाप्नुयात् ॥ २८ ॥**
**चतुरशीतिलक्षेषु शरीरेषु शरीरिणाम् ।**
**न मानुष्यं विनाऽन्यत्र तत्त्वज्ञानं तु लभ्यते ॥ २९ ॥**

ये जीव सहस्रों बार (अण्डज, पिण्डज, उद्भिज और स्वेदज) चार प्रकार के शरीर धारण करते रहते हैं और पुनः पुण्योदय होने पर मनुष्य शरीर प्राप्त करते हैं । उसमें भी जब वे ज्ञान प्राप्त करते हैं; तब उन्हें मोक्ष की प्राप्ति होती है । इन जीवों को; जो चौरासी लाख योनियों में अनेक बार भटकते रहते हैं, उन्हें मनुष्य योनि प्राप्त किये बिना अन्यत्र तत्त्वज्ञान की प्राप्ति नहीं होती ॥ २८-२९ ॥

**तत्र जन्मसहस्रेषु जन्मैकमपि भाग्यतः ।**
**कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् ॥ ३० ॥**

यह जीव हजारों बार जन्म लेता रहता है । तदनन्तर पुण्य सञ्चय होने पर यदा-कदा उसे मनुष्य जन्म की प्राप्ति होती है ॥ ३० ॥

**सोपानभूतं मोक्षस्य मानुष्यं प्राप्य दुर्लभम् ।**

**यस्तारयति नात्मानं तस्मात् पापतरोऽत्र कः ॥ ३१ ॥**

जो मोक्ष के सोपानभूत इस दुर्लभ मनुष्य जन्म को प्राप्त करके भी; अपने को तरण-तारण के योग्य नहीं बना पाता, उससे बढ़कर भला और पापी कौन हो सकता है ॥ ३१ ॥

**ततश्चाप्युत्तमं जन्म लब्ध्वा चेन्द्रियसौष्ठवम् ।**
**न वेत्तात्महितं यस्तु स भवेदात्मघातकः ॥ ३२ ॥**

इन रूप, रस, गन्ध, स्पर्श और शब्द ग्रहण करने वाली इन्द्रियों के सौष्ठव से युक्त मनुष्य जन्म प्राप्त कर जो अपने हित का साधन नहीं करता; उससे बढ़कर आत्मघाती कौन हो सकता है? ॥ ३२ ॥

**विना देहेन कस्यापि पुरुषार्थो न विद्यते ।**
**तस्माद् देहधनं रक्षन् पुण्यकर्माणि साधयेत् ॥ ३३ ॥**

धर्म, अर्थ, काम तथा मोक्ष रूप पुरुषार्थों की प्राप्ति बिना मनुष्य देह प्राप्त किये नहीं होती । इसलिये शरीर रूप सम्पत्ति की रक्षा करते हुये पुण्यकर्म का अर्जन करते रहना चाहिये ॥ ३३ ॥

### ज्ञानप्राप्त्यर्थं कर्मकर्त्तव्यम्

**तावत् कर्माणि कुर्वीत यावज्ज्ञानं न जायते ।**
**ज्ञानिनोऽज्ञानिनो वापि यावद् देहस्य रक्षणम् ॥ ३४ ॥**

ज्ञानी अथवा अज्ञानी जीव का जब तक शरीर सुरक्षित है; तभी तक वह कर्म करे और वह कर्म भी तब तक करे; जब तक उसे (आत्म) ज्ञान की प्राप्ति नहीं हो जाती ॥ ३४ ॥

**तावद्वर्णसमाचारः कर्त्तव्यः कर्ममुक्तये ।**
**कर्मणोन्मीलिते ज्ञाने ज्ञानेन शिवतां व्रजेत् ॥ ३५ ॥**

कर्म से छुटकारा प्राप्त करने के लिये ही वर्णाश्रम धर्म पालन रूप कर्म की आवश्यकता है, क्योंकि कर्म के द्वारा ज्ञान हो जाता है और ज्ञान हो जाने पर यह जीव शिवस्वरूप हो जाता है ॥ ३५ ॥

### तत्त्वज्ञाननिरूपणम्

**कुर्यादनित्यकर्माणि नित्यकर्माणि वा चरेत् ।**
**सर्वकर्माणि सन्त्यक्तुं न शक्यं देहधारिणा ॥ ३६ ॥**

जीव को नित्य अथवा अनित्य कर्म सदैव करते रहना चाहिये । क्योंकि देह

धारण करने वाले लोग सर्वथा कर्म का त्याग नहीं कर सकते ॥ ३६ ॥

**स्वकार्येषु प्रवर्तन्ते करणानीति चिन्तयन् ।**
**अहम्भावमपास्यैवं यः कुर्यात् स न लिप्यते ॥ ३७ ॥**

इन्द्रियाँ अपने-अपने कार्यों में लगी रहती हैं । इसलिये अपने अहम्भाव का त्याग कर जो कार्य में लिप्त रहता है, वह उस कर्म से लिप्त नहीं होता ॥ ३७ ॥

**त्यजेत् कर्मफलं यो वा स त्यागीत्यभिधीयते ।**
**क्रियमाणानि कर्माणि ज्ञानप्राप्तेरनन्तरम् ॥ ३८ ॥**
**न च स्पृशन्ति तत्त्वज्ञं जलं पद्मदलं यथा ।**
**तत्त्वनिष्ठस्य कर्माणि पुण्यापुण्यानि सङ्क्षयम् ॥ ३९ ॥**

त्यागी वही है जो कर्मफल का त्याग करता है । ज्ञान प्राप्ति के अनन्तर किये जाने वाले समस्त कर्म उस तत्त्वज्ञ को इस प्रकार स्पर्श नहीं करते, जैसे कमल पत्र को जल स्पर्श नहीं करता । तत्त्वनिष्ठ के पाप पुण्ययुक्त समस्त कर्म अपने आप नष्ट हो जाते हैं ॥ ३८-३९ ॥

**प्रयान्ति नैव नरकं तत्त्वनिष्ठाः कदाचन ।**
**उत्पन्नसहजानन्दतत्त्वज्ञानरताः सदा ॥ ४० ॥**

जिन्हें स्वाभाविक रूप से आनन्द एवं तत्त्वज्ञान सदैव के लिये उत्पन्न हो जाता है, ऐसे तत्त्वनिष्ठ कभी भी नरक में नहीं जा सकते ॥ ४० ॥

**सर्वसङ्कल्पसन्त्यक्तः स विद्वान् कर्म सन्त्यजेत् ।**
**वृथैव यैः परित्यक्तं कर्मकाण्डमपण्डितैः ॥ ४१ ॥**
**पाषण्डाः पण्डितम्मन्यास्ते यान्ति नरकं किल ।**

जिसने अपने सारे सङ्कल्पों का त्याग कर दिया है वहीं विद्वान् कर्म का त्याग करे । किन्तु जिन मूर्खों ने अपने सङ्कल्प का त्याग किये बिना ही कर्मकाण्ड का त्याग कर दिया है ऐसे पाखण्डी अपने को पण्डित मानने वाले निश्चय ही नरक प्राप्त करते हैं ॥ ४१-४२ ॥

### प्राप्तज्ञानस्य कर्मकाण्डे अनधिकारित्व कथनम्

**फलं प्राप्य यथा वृक्षः पुष्पं त्यजति निस्पृहः ॥ ४२ ॥**
**तत्त्वं प्राप्य तथा योगी त्यजेत् कर्मपरिग्रहम् ।**

जिस प्रकार फल प्राप्त कर लेने पर वृक्ष निःस्पृह होकर अपने पुष्पों का परित्याग कर देते हैं, उसी प्रकार योगी भी तत्त्वज्ञान प्राप्त कर लेने पर कर्म का परित्याग कर देते हैं ॥ ४२-४३ ॥

**अश्वमेधशतेनापि ब्रह्महत्याशतेन च ॥ ४३ ॥**
**पुण्यपापैर्न लिप्यन्ते येषां ब्रह्म हृदि स्थितम् ।**

योगी भले ही सैकड़ों अश्वमेध यज्ञ करे; अथवा सैकड़ों ब्रह्महत्या का पाप करे; किन्तु जिनके हृदय में ब्रह्मज्ञान उत्पन्न हो गया है ऐसे योगी पुण्य और पाप से लिप्त नहीं होते ॥ ४३-४४ ॥

**पृथिव्यां यानि कर्माणि जिह्वोपस्थनिमित्ततः ॥ ४४ ॥**
**जिह्वोपस्थपरित्यागी कर्मणा किं करिष्यति ।**

इस पृथ्वी में जितने भी कर्म हैं; उनमें जिह्वा और उपस्थ ही निमित्त है । किन्तु जिसने जिह्वा और उपस्थ के लिये कर्म छोड़ दिया है वह किस निमित्त पुनः कर्म करेगा ॥ ४४-४५ ॥

### ज्ञानस्य द्वैविध्यम्

**आगमोत्थं विवेकोत्थं द्विधा ज्ञानं प्रचक्षते ॥ ४५ ॥**
**शब्दब्रह्मागममयं परं ब्रह्म विवेकजम् ।**

ज्ञान दो प्रकार का होता है । एक आगमोत्थ ज्ञान तथा दूसरा विवेकजन्य ज्ञान । शब्दब्रह्म का ज्ञान आगमजन्य ज्ञान है और परब्रह्म का ज्ञान विवेकजन्य ज्ञान है ॥ ४५-४६ ॥

**अद्वैतं केचिदिच्छन्ति द्वैतमिच्छन्ति चापरे ॥ ४६ ॥**
**परं तत्त्वं न जानन्ति द्वैताद्वैतविवर्जितम् ।**

कोई अद्वैत मानते हैं और कोई द्वैत मानते हैं । ऐसे लोग द्वैताद्वैत से विवर्जित परतत्त्व को जानने में समर्थ नहीं होते ॥ ४६ ॥

**द्वे पदे बन्धमोक्षाय ममेति निर्ममेति च ॥ ४७ ॥**
**ममेति बध्यते जन्तुर्विमुक्तिर्निर्ममेति च ।**

'मम' और 'न मम'—ये दो पद ही क्रमशः बन्ध और मोक्ष में कारण होते हैं। 'मम' से जन्तु संसार में बन्धन प्राप्त करता है और ' न मम' इससे मोक्ष प्राप्त करता है ॥ ४७-४८ ॥

### विद्याऽविद्यालक्षणम्

**विद्याऽविद्याद्वयोर्योगात् पक्षद्वयमुदीरितम् ॥ ४८ ॥**
**तत् कर्म यच्च बन्धाय साऽविद्या परिकीर्त्तिता ।**
**यन्न बन्धाय तत् कर्म सा विद्या परिकीर्त्तिता ॥ ४९ ॥**

इसी प्रकार विद्या और अविद्या—ये दो पद कहे गये हैं । जो कर्म संसार में बाँधने वाला है; उसे अविद्या कहते हैं और जो संसार में बाँधने के लिये न होकर संसार से छुटकारा पाने के लिये किया जाता है उसे विद्या कहते हैं ॥ ४८-४९ ॥

**यावत् सङ्कल्पकर्मास्ति तावदेव हि बन्धनम् ।**
**यावत्तदेव नैवास्ति तावदेव हि मोक्षणम् ॥ ५० ॥**

जब तक सङ्कल्पपूर्वक कर्म (काम्यकर्म) किया जाता है; उतनी ही देर तक बन्धन है । जब सङ्कल्प का परित्याग कर कर्म किया जाता है; उसी समय मोक्ष प्राप्ति हो जाती है ॥ ५० ॥

**जपहोमार्चनं तीर्थं वेदशास्त्रागमादिकम् ।**
**तावदेव हि सर्वज्ञ यावत्तत्त्वं न विन्दति ॥ ५१ ॥**

जप, होम, अर्चन, तीर्थ एवं वेदशास्त्रादि प्रतिपादित कर्म तभी तक है; जब तक तत्त्व का ज्ञान नहीं होता ॥ ५१ ॥

**अतः प्रयत्नतो धीरः सर्वावस्थासु सर्वदा ।**
**तत्त्वनिष्ठो भवेच्चैव यदीच्छेन्मोक्षमात्मनः ॥ ५२ ॥**

इसलिये धीर पुरुष सभी अवस्थाओं में (चारो आश्रमों में रहकर) सर्वदा तत्त्व ज्ञान की प्राप्ति के लिये प्रयत्न करे । यदि अपने को मोक्ष की इच्छा हो तो तत्त्वनिष्ठ होना आवश्यक है ॥ ५२ ॥

**तत्कारणमहं वक्ष्ये क्षिप्रं येन प्रजायते ।**
**यथाविधि गुरोर्वक्त्राद्विद्या संगृह्य साधनम् ॥ ५३ ॥**

जिन कारणों से शीघ्र मोक्ष की प्राप्ति सम्भव है उन कारणों को यहाँ मैं कहता हूँ । साधक विधि के अनुसार मोक्ष के साधनभूत गुरु के मुख से विद्या (मन्त्र) ग्रहण करे ॥ ५३ ॥

**नित्यं नैमित्तिकं काम्यं सापेक्षं पूर्वपूर्वतः ।**
**अन्यथा न भजेदित्थं करोत्यापत्परम्परा ॥ ५४ ॥**

नित्य, नैमित्तिक और काम्य कर्म पूर्व की अपेक्षा परस्पर सापेक्ष हैं । उन्हें सापेक्ष न माने । क्योंकि उन कर्मों के अनुष्ठान से आपत्ति की परम्परा प्राप्त होती रहती है ॥ ५४ ॥

**इति ज्ञात्वा महाप्राज्ञः क्रमेण समुपाचरेत् ।**
**प्रातरुत्थाय शिरसि सहस्रदलपङ्कजे ॥ ५५ ॥**

तरुणादित्यकिञ्जल्कविधोर्मण्डलसंयुते ।
ध्यायेन्निजगुरुं धीरो रजताचलसन्निभम् ॥ ५६ ॥

(आचार से) महान् एवं विद्वान् लोगों को ऐसा समझकर क्रम प्राप्त इन कर्मों को करना चाहिये । प्रातःकाल उठकर शिर में स्थित सहस्रदल वाले कमल में मध्याह्नकालीन सूर्य के समान तेजस्वी केशरों वाले चन्द्रमण्डल में बुद्धिमान् साधक चाँदी के समान चमकीले अपने गुरु का ध्यान करे ॥ ५५-५६ ॥

### गुरुध्यानकथनम्

वीरासनसमासीनं शुक्लाभरणभूषितम् ।
शुक्लमाल्याम्बरधरं वरदाभयपाणिकम् ॥ ५७ ॥
वामोरुशक्तिसहितं कारुण्येनावलोकितम् ।
प्रियया सव्यहस्तेन धृतचारुकलेवरम् ॥ ५८ ॥
वामेनोत्पलधारिण्या रक्ताभरणभूषया ।
ज्ञानानन्दसमायुक्तं स्मरेत्तन्नामपूर्वकम् ॥ ५९ ॥

जो गुरु वीरासन से बैठे हुये स्वच्छ आभरणों से विभूषित, श्वेत वर्ण की माला धारण किये हुये, वर और अभयमुद्रा से युक्त हाथों वाले हैं । जो बाँये ऊरू पर अपनी शक्ति को बैठाये हुये हैं और उसके द्वारा करुणापूर्वक देखे जा रहे हैं। जिनके रत्नाभरणभूषित बाँये हाथ से कमल धारण किये हुये अपनी प्रिया के दाहिने हाथ से जिनका मनोहर शरीर संगृहीत है । ऐसे ज्ञानी एवं आनन्द से संयुक्त अपने गुरु का नाम स्मरण करते हुये साधक उनका ध्यान करे ॥५७-५९॥

### गुरुपूजानिरूपणम्

मानसैरुपचारैस्तु सम्पूज्य कल्पयेत् सुधीः ।
गन्धं भूम्यात्मकं दद्याद् भावपुष्पं ततः परम् ॥ ६० ॥
धूपं वाय्वात्मकं देयं तेजसा दीपमेव च ।
नैवेद्यममृतं दद्यात् पानीयं वरुणात्मकम् ॥ ६१ ॥
तत्तन्मुद्राविधानेन सम्पूज्याऽथ गुरुं यजेत् ।
दर्शयित्वा योनिमुद्रां गुरुमन्त्रं जपेत्ततः ॥ ६२ ॥

तदनन्तर मानस उपचारों से उनकी पूजा करनी चाहिए । यथा 'श्रीगुरवे नमः' भूम्यात्मकं गन्धं समर्पयामि, भावपुष्पं समर्पयामि, वाय्वात्मकं धूपं समर्पयामि, तैजसं दीपं समर्पयामि, वरुणात्मकं जलं समर्पयामि अमृतरूपं नैवेद्यं समर्पयामि, तदनन्तर आकाशात्मकं मुकुटं वसनं च समर्पयामि । इसके बाद तत्तन्मुद्राओं के द्वारा चामर, पादुका, छत्र तथा अलङ्कार समर्पित करे । इस प्रकार गुरुदेव का

पूजन कर गुरुदैवत याग सम्पादन करे। तदनन्तर 'योनिमुद्रा' प्रदर्शित कर गुरुमन्त्र का जप करे ॥ ६०-६२ ॥

### गुरुमन्त्रविधानम्

**ह्सौः पदं समालिख्य सहक्षमलवरानिलान् ।**
**वह्नियुक्तांस्त्रिधा लिख्य आद्यदीर्घत्रयान्वितान् ॥ ६३ ॥**
**विन्दुनादकलायुक्तान् श्रीपरान्ते च पावकम् ।**
**अथाराध्यपदं चैव सर्वमूर्ध्वपदं ततः ॥ ६४ ॥**
**नाथ सर्वगुरुप्रान्ते गुरुः स्वयं ततो गुरुः ।**
**श्रीगुरुनाथशब्दान्ते सहक्षमलवरानिलान् ॥ ६५ ॥**
**वह्निदीर्घप्रतियुतान् नादविन्दुकलान्वितान् ।**
**पिण्डीकृतं लिखेदाद्यं चतुर्थञ्च ततो लिखेत् ॥ ६६ ॥**
**तृतीयं पूर्ववल्लेख्यं द्वितीयञ्च तथैव च ।**
**ततः श्रीशम्भुगुर्वन्ते नराद्यं समालिखेत् ॥ ६७ ॥**
**आद्यकूटं चतुर्थञ्च पुनराद्यं तृतीयकम् ।**
**चत्वारिंशन्मार्गवर्णैर्मण्डितोऽयं गुरोर्मनुः ॥ ६८ ॥**

**गुरु मन्त्र का विधान**—'ह्सौ' पद लिखकर आद्य दीर्घत्रय समन्वित वह्नि (रेफ) से युक्त (रां री रूं) से युक्त स ह क्ष म ल व र य इन्हें विन्दुनाद से युक्त (सं हं क्षं मं लं वं रं यं) लिखकर श्री परपावकमाराध्यं सर्वमूर्ध्वनाथ सर्वगुरुगुरुः स्वयं गुरुः श्रीगुरुनाथ सं हं क्षं मं लं वं रं यं फिर नाद, विन्दु कलान्वित तीन दीर्घयुक्त वह्नि (रां रीं रूं) इन्हें एक में पिण्डी कृत् अर्थात् मिलाकर लिखे। सर्वप्रथम आद्य लिखना चाहिए फिर चतुर्थ लिखे तदनन्तर तृतीय पूर्ववत् लिखे। उसी प्रकार द्वितीय लिखे, फिर श्रीशम्भुगुरु लिखकर आद्य कूट, फिर चतुर्थ, फिर आद्य, फिर तृतीय कूट लिखना चाहिए। इस प्रकार यह गुरु मन्त्र चालीस मार्ग रूप वर्णों से मण्डित है ॥ ६३-६८ ॥

**यथाशक्तिजपं कुर्य्यादथवा वाग्भवं जपेत् ।**
**दक्षकर्णयुतो गौरो वह्निरुद्रेण भूषितः ॥ ६९ ॥**

ऊपर कहे गये मन्त्र का यथाशक्ति जप करे; अथवा वाग्भव (ऐं) मन्त्र का जप करे। ग और र इन दो वर्णों को दक्ष कर्ण (उकर) से विभूषित करे ॥ ६९ ॥

**वर्णद्वयात्मको मन्त्रश्चतुर्वर्गफलप्रदः ।**
**गकारः सिद्धिदः प्रोक्तो रेफः पापस्य हारकः ॥ ७० ॥**

गुरु, मकार, वह्नि और रुद्र से विभूषित हो। 'गुरु' यह दो वर्ण वाला मन्त्र

धर्म, अर्थ, काम और मोक्ष चारों वर्गों को देने वाला है । 'ग'कार सिद्धि देने वाला तथा 'र'कार पाप का विनाशक है ॥ ७० ॥

**उकारो विष्णुरव्यक्तस्त्रितयात्मा गुरुः परः ।**
**गुरोर्वामकरे तत्तु समर्प्याथ स्तुतिं पठेत् ॥ ७१ ॥**

इसमें रहने वाला 'उकार' अव्यक्त (गुप्त) रूप से विष्णु है । इस प्रकार गुरु शब्द त्रितयात्मा है । फिर जप करने के पश्चात् गुरु के वाम हाथ में उस जप को समर्पण कर उनकी स्तुति करे ॥ ७१ ॥

गुरुस्तुतिम्

**अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।**
**चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ ७२ ॥**

**गुरु स्तुति**—जिन्होंने अज्ञान रूप अन्धकार से अन्धे लोगों की आँखों में ज्ञान रूप अञ्जन की शलाका से प्रकाश उत्पन्न किया है; उन श्रीगुरु को मैं नमस्कार करता हूँ ॥ ७२ ॥

**अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।**
**तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ७३ ॥**

अखण्डमण्डलाकार जिस 'तत्' पद (परंब्रह्म) से सारा जगत् व्याप्त है उस तत् स्वरूप ब्रह्म का जिन्होंने ज्ञान चक्षु से दर्शन सम्भव करा दिया है; उन श्रीगुरु को मेरा नमस्कार है ॥ ७३ ॥

**विश्वात्मकः परः शम्भुर्विश्वोत्तीर्णोऽस्म्यहं दृढम् ।**
**इति यस्याज्ञया तस्मात्तस्य श्रीपादुकास्मृतिः ॥ ७४ ॥**

जो विश्वात्मक पर सदाशिव हैं; जिनकी आज्ञा से मैंने दृढतापूर्वक इस संसार सागर को पार कर लिया है । इस कारण उन गुरुचरणों की पादुका का स्मरण करता हूँ ॥ ७४ ॥

**सहस्रारे पद्मे विगतशठशास्त्रान्तरगतं**
**सदा देवैर्वन्द्यं भवभयविनाशैककरणम् ।**
**वराभी पाणिभ्यां प्रकटितसमन्दस्मितमुखं**
**नमामीदृग्रूपं परमगुरुरूपं सकरुणम् ॥ ७५ ॥**

जो सहस्रारपद्म में प्रकाशरूप से स्थित हैं । देवताओं से वन्दनीय हैं और संसार के भय को विनाश करने के लिये एकमात्र शरण (रक्षक) हैं । अपने हाथ में वर और अभय मुद्रा धारण किये हुये हैं और जिनका मुख मन्द-मन्द स्मित से

युक्त है। इस प्रकार के स्वरूप वाले करुणायुक्त परमगुरु के स्वरूप को मैं नमस्कार करता हूँ ॥ ७५ ॥

**शान्तं शुक्लकलेवरं त्रिनयनं कान्ताङ्गभूषं शिवं**
**वाञ्छाभीतिकरं प्रचण्डतिमिराज्ञानप्रकाशं रविम् ।**
**नित्यं नौमि रविं तथाब्धितरणे तं कर्णधारं गुरुं**
**यस्य श्रीपदपङ्कजोद्भवसुधा सिद्धैः सदा पीयते ॥ ७६ ॥**

मैं उन शान्त शुक्ल कलेवर वाले, त्रिनेत्र, अर्द्धनारीश्वर स्वरूप सदाशिव को नमस्कार करता हूँ; जो हाथ में वर और अभयमुद्रा धारण किये हुये हैं, जो प्रचण्ड अन्धकार स्वरूप अज्ञान को हटाकर सूर्य के समान प्रकाश करने वाले हैं, जो संसार सागर से पार करने के लिये कर्णधार स्वरूप हैं, जिनके चरण कमलों से उत्पन हुई सुधा का सिद्ध लोग पान करते हैं ॥ ७६ ॥

**सदा विधोर्मण्डलमध्यसंस्थं नमामि नित्यं गुरुपादपद्मम् ।**
**प्रसादतो यस्य मया प्रलब्धं सवासनाज्ञानविनाशबीजम् ॥ ७७ ॥**

सहस्रारपद्म स्वरूप चन्द्रमण्डल के मध्य में सदा निवास करने वाले उन गुरु के चरण कमलों में मैं नमस्कार करता हूँ । जिनकी कृपा से मैंने वासनायुक्त अज्ञान के विनाश का बीज (मूलकारण) प्राप्त कर लिया है ॥ ७७ ॥

**पद्मोद्भवे समकलापतयोऽपि नित्यं**
**यस्याङ्घ्रिपद्ममलं परिभावयन्ति ।**
**कारुण्यवारिधिरशेषगुणैकराशिः**
**सोऽयं गुरुः शिरसि शुक्लसरोजमध्ये ॥ ७८ ॥**

सहस्रारदल वाले कमल में कमलापति श्री विष्णु सहित समस्त देवगण जिनके चरण कमलों की उपासना करते हैं और जो करुणा के सागर एवं सम्पूर्ण गुणों की राशि हैं । इस प्रकार से वह मेरे गुरु शिर में रहने वाले शुक्लवर्ण के सहस्रारदल में निवास करते हैं ॥ ७८ ॥

**प्रवद्धानां पाशैः सकलगुणमायामयरसै-**
**र्निमग्नानां नित्यं भवजलनिधेरन्तरगतः ।**
**कृपालेशो बन्धं परिहरति यस्याङ्घ्रितरगः**
**प्रवन्दे सानन्दं तमपि गुरुरूपं सकरुणम् ॥ ७९ ॥**

सम्पूर्ण गुणों से युक्त मायामय रस्सी से बँधे हुये तथा संसार समुद्र के जल में सर्वथा निरन्तर डूबते हुये समस्त जीव जिनके चरण कमलों को प्राप्त करते ही

उनकी कृपा के लेश से सारे बन्धन काट देते हैं, ऐसे करुणायुक्त आनन्द स्वरूप गुरु रूप की मैं वन्दना करता हूँ ॥ ७९ ॥

**कवित्वं पाण्डित्यं त्रिभुवनपतित्वं न हि कदा**
**न वा स्वर्गसिद्धिं न सुरवरसाम्यञ्च नियतम् ।**
**न वाञ्छामो मोक्षं पुरहरपदं नैव शिवतां**
**यदि स्याच्चेतो मे निरवधि गुरोःपादकमलम् ॥ ८० ॥**

यदि मेरा चित्त निरन्तर गुरु के चरण कमलों में लगा रहे तो मैं कवित्व नहीं चाहता, पाण्डित्य एवं त्रिभुवनपतित्व भी कदापि नहीं चाहता, स्वर्गसिद्धि, निरन्तर इन्द्र की समता भी नहीं चाहता, किं बहुना मोक्ष और शिवपद तथा शिवता भी नहीं चाहता ॥ ८० ॥

**स्तवेनानेन संस्तुत्यं गुरोराज्ञां लभेत्ततः ।**
**ध्यायेत् कुण्डलिनी शक्तिं मूलाधारनिवासिनीम् ॥ ८१ ॥**

इस प्रकार की स्तुति से स्तवन कर साधक गुरु की आज्ञा प्राप्त करे । तदनन्तर मूलाधार में निवास करने वाली कुण्डलिनी का अपनी इष्टदेवता स्वरूप में ध्यान करे ॥ ८१ ॥

### कुण्डलिनी निरूपणम्

**निजेष्टदेवतारूपां विषतन्तुतनीयसीम् ।**
**सुप्ताहिसादृशाकारां सार्धत्रिवलयान्विताम् ॥ ८२ ॥**

जो विसतन्तु (मृणाल) के सदृश अत्यन्त सूक्ष्म है और सोई हुई सर्पिणी के सदृश है, जो साढ़े तीन हाथ गोलाकार रूप से स्थित है ॥ ८२ ॥

**कोटिसौदामिनीभासां स्वयम्भूलिङ्गवेष्टिनीम् ।**
**समुत्थाप्य महादेवीं प्राणमन्त्रेण साधकः ॥ ८३ ॥**

जो करोड़ों विद्युत् के समान प्रकाश वाली है और स्वयम्भू लिङ्ग को साढ़े तीन हाथ वलयाकार रूप में घेर कर स्थित है । साधक उस कुण्डलिनी को प्राणमन्त्र (हाँ) मन्त्र से ऊपर की ओर उठावे ॥ ८३ ॥

**भेदयित्वा च षट्चक्रं सहस्रारस्थितेश्वरे ।**
**स्थापयित्वा च तस्योर्ध्वं ध्यायेत् कुलगुरून् क्रमात् ॥ ८४ ॥**

पुनः षट्चक्र का भेदन कर उसे सहस्रार में स्थित सदाशिव के साथ स्थापित कर उसके ऊपर क्रमशः कुलगुरुओं का ध्यान करे ॥ ८४ ॥

कुलगुरुनामानि

**प्रह्लादानन्दनाथञ्च सनकानन्दनाथकम् ।**
**कुमारानन्दनाथञ्च वशिष्ठानन्दनाथकम् ॥ ८५ ॥**
**क्रोधानन्दसुखानन्दौ ज्ञानानन्दं ततः परम् ।**
**बोधानन्दमथाभ्यर्च्य क्रमेणानेन साधकः ॥ ८६ ॥**

प्रह्लादानन्दनाथ, सनकानन्दनाथ, कुमारानन्दनाथ, वशिष्ठानन्दनाथ, क्रोधानन्दनाथ, सुखानन्दनाथ, ज्ञानानन्दनाथ फिर इसके बाद बोधानन्दनाथ का क्रमपूर्वक साधक अर्चन करे ॥ ८५-८६ ॥

**परामृतरसोल्लासहृदयान् घूर्णलोचनान् ।**
**परालिङ्गनसम्भिन्नचूर्णिताशेषतामसान् ॥ ८७ ॥**

ये सभी गुरु परामृत रस के पान के उल्लास युक्त हृदय वाले होकर अपने मदमत्त नेत्रों से (मेरे पापों को) घूर रहे हैं । पराशक्ति के आलिङ्गन से इनके सारे तामस (पाप) नष्ट हो गये हैं ॥ ८७ ॥

**कुलशिष्यैः परिवृतान् सुखान्तःकरणोद्यतान् ।**
**वराभयकराशेषकुलतत्त्वार्थवेदिनः ॥ ८८ ॥**

ये सभी कुल मार्ग के शिष्यों से घिरे रहने वाले बतलाये गये हैं । इनका समस्त अन्तःकरण सुख से परिपूर्ण बतलाया गया है । ये अपने हाथों में बर और अभयमुद्रा को धारण किये हुये हैं तथा ये कुल मार्ग के समस्त तत्त्वों के जानकार कहे गये हैं ॥ ८८ ॥

**सशक्तिं सकुलञ्चैव कथितञ्च सुखावहम् ।**
**एवं कुलगुरून् नत्वाऽमृतवृष्टिं विधाय च ॥ ८९ ॥**
**तर्पयित्वा च तां देवीं पुनर्मूले समानयेत् ।**
**तस्याः प्रभासमूहैश्च व्याप्तं देहं विभावयेत् ॥ ९० ॥**

इस प्रकार मैंने शक्ति और कुल के सहित गुरुओं का सुखावह वर्णन किया । अतः विज्ञ साधक इस प्रकार अपने कुलगुरुओं को नमस्कार कर वहाँ अमृतवृष्टि के द्वारा उस कुण्डलिनी को सन्तृप्त कर पुनः अपने मूल स्थान पर ले आकर स्थापित करे । तदनन्तर उसके प्रभासमूह से अपने शरीर में व्याप्त होने का उसे ध्यान करना चाहिए ॥ ८९-९० ॥

**अहं देवी न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक् ।**
**सच्चिदानन्दरूपोऽहमित्यात्मानं विभावयेत् ॥ ९१ ॥**

इतना ही नहीं मैं ही देवी हूँ, अन्य नहीं । मैं ही ब्रह्म हूँ, मुझे किसी प्रकार का शोक नहीं । मैं ही सच्चिदानन्द स्वरूप हूँ । इस प्रकार का सङ्कल्प अपनी आत्मा में करे ॥ ९१ ॥

**बहिर्गत्वा यदा पश्येत् कुलवृक्षं सुसाधकः ।**
**नमस्कुर्यात् प्रयत्नेन कुलं कुलपतिं तथा ॥ ९२ ॥**

इसके बाद साधक बाहर जाकर कुलवृक्ष का दर्शन करे, तदनन्तर कुल तथा कुलपति को नमस्कार करे ॥ ९२ ॥

कुलवृक्षनामानि

**अशोकः केशरः कर्णिकारश्चूतस्तिलस्तथा ।**
**नमेरुश्च पियालश्च सिन्धुवारकदम्बकौ ॥ ९३ ॥**
**मरुवकश्चम्पकशाखी कुलवृक्षाश्च द्वादश ।**
**अथवा कुलवृक्षांश्च कथयामि सुसिद्धये ॥ ९४ ॥**

अशोक, केशर, कर्णिकार, आम, तिलक, नमेरू, प्रियाल, सिन्धुवार, कदम्बक, मरुवक, चम्पक, साख—इस प्रकार कुल बारह वृक्ष कुलवृक्ष कहे गये हैं अथवा अच्छी प्रकार की सिद्धि के लिये मैं कुलवृक्षों को कहता हूँ ॥ ९३-९४॥

**श्लेष्मातककरञ्जानि निम्बाश्वत्थकदम्बकाः ।**
**बिल्वो वटोदुम्बरश्च चिञ्चेति दशमी स्मृता ॥ ९५ ॥**
**तिष्ठन्ति कुलयोगिन्यः कुलवृक्षेषु सर्वदा ।**
**न स्वपेत् कुलवृक्षाधो न चोपद्रवमाचरेत् ॥ ९६ ॥**

श्लेष्मातक, करञ्ज, निम्ब, अश्वत्थ, कदम्ब, बिल्व, वट, गूलर और चिञ्चा इन दस कुलवृक्षों पर सदैव योगिनियों का निवास रहता है । इन कुलवृक्षों के नीचे न सोवे और न कोई उत्पात करे ॥ ९५-९६ ॥

**दृष्ट्वा भक्त्या नमस्कुर्यात् छेदयेन्न कदाचन ।**
**कामबीजं कामदेवं सर्वान्ते जनमालिखेत् ॥ ९७ ॥**
**प्रियाय हृदयान्तोऽयं मनुर्दन्तविशुद्धये ।**
**दन्तादिकं विशुध्याथ स्वकल्पोक्तं समाचरेत् ॥ ९८ ॥**

इन्हें देखते ही नमस्कार करे, इनका छेदन कदापि न करे, तदनन्तर कामबीज (क्लीं), फिर कामदेव सर्व, फिर जन लिखे, इसके बाद 'प्रियाय', फिर हृत् (नमः) यह मन्त्र दन्तशुद्धि के लिये लिखे । 'ॐ क्लीं कामदेवसर्वजनप्रियाय नमः' तदनन्तर दन्तादि के शोधन के लिये अपने सम्प्रदाय के अनुसार प्रयत्न करना चाहिए ॥ ९७-९८ ॥

**प्रातःकृत्यमकृत्वा तु यो देवीं भक्तितोऽर्चयेत् ।**
**तस्य पूजा तु विफला शौचहीना यथा क्रिया ॥ ९९ ॥**

**॥ इति श्रीमज्ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये प्रथमोल्लासः ॥ १ ॥**

जो साधक इस प्रकार ऊपर कहे गये प्रातःकृत्य को बिना किये भक्तिपूर्वक अर्चना करता है; उसकी सारी पूजा निष्फल हो जाती है, वैसे ही जिस प्रकार शौचरहित क्रिया निष्फल हो जाती है ॥ ९९ ॥

**महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय के ज्येष्ठ पुत्र पण्डित रामरञ्जन मालवीय कृत श्रीमज्ज्ञानानन्द परमहंस विरचित कौलावलीनिर्णय नामक तन्त्र के प्रथम उल्लास की निरञ्जन हिन्दी व्याख्या पूर्ण हुई ॥ १ ॥**

# द्वितीय उल्लासः

आत्मशुद्धिनिरूपणम्

अथ स्नानं प्रवक्ष्यामि शाक्तानां सिद्धिहेतवे ।

स्नानविधिः

यथाविध जलं प्राप्य आत्मानं देवतालयम् ॥ १ ॥
विचिन्त्य प्रणमेद्धीरो वरुणं वारिदैवतम् ।
उन्मज्य तत उत्थाय कुलदर्भं विधारयेत् ॥ २ ॥

स्नानविधि—अब मैं शाक्तों की सिद्धि के लिये स्नान का विधान कहता हूँ। शास्त्र के कहे गये वचनों के अनुसार जल प्राप्त कर धीर पुरुष उसे अपने देवता का स्थान समझकर प्रणाम करे । पुनः उस जल में डुबकी लगाकर कुल सम्प्रदायानुसार कुशा धारण करे ॥ १-२ ॥

पवित्रीधारणम्

अशून्यौ च करौ कुर्य्यात् सुवर्ण रजतैः कुशैः ।
तत्र शाक्तैः स्वयं ग्राह्यं न च वन्याः कुशाः कुशाः ॥ ३ ॥

सुवर्ण निर्मित कुशाओं (पवित्री अँगूठी) से अथवा चाँदी की बनी हुई अङ्गूठी हाथ में धारण करे, हाथ को शून्य न रखे । शाक्त उसे स्वयं ग्रहण करे । शाक्त सम्प्रदाय के अनुसार वन में होने वाले कुशा, कुशा नहीं कहे जाते ॥ ३ ॥

अनामयोर्भवेत् स्वर्णं तर्जन्यो रजतं तथा ।
एष ·एव भवेद्दर्भो न दर्भो वनसम्भवः ॥ ४ ॥

दोनों अनामिका में सुवर्ण की बनी हुई अङ्गूठी धारण करे तथा दोनों तर्जनी में चाँदी की बनी हुई अङ्गूठी धारण करे । शाक्तमत में इसी को दर्भ कहते हैं । वन में उत्पन्न होने वाले दर्भ, दर्भ नहीं कहे जाते ॥ ४ ॥

विनैव दूर्वया देव्याः पूजा नास्ति कदाचन ।
तस्माद्दूर्वा ग्रहीतव्या सर्वपुष्पमयी यतः ॥ ५ ॥

यतः बिना दूर्वा के देवी की पूजा नहीं होती, अतः दूर्वा ग्रहण अवश्य करे क्योंकि वह सर्वपुष्पमयी होती है ॥ ५ ॥

**हस्ते दूर्वाङ्कुरं कृत्वा सर्वकर्म समाचरेत् ।**
**आचामेदात्मतत्त्वाद्यैः प्रणवाद्यैः स्वधान्तिकैः ॥ ६ ॥**

हाथ में दूर्वांकुर लेकर साधक सारा कर्म सम्पादन करे । पूर्व में प्रणव, तदनन्तर आत्मतत्त्वादि, तदनन्तर स्वधा कहकर आचमन करे ॥ ६ ॥

**मन्त्रैस्त्रिधा तथा वक्त्रं नासाक्षिश्रोत्रनाभिहृन् ।**
**मस्तकानि स्पृशेन् मन्त्री कुर्याच्छ्रोत्राक्षिबन्धनम् ॥ ७ ॥**
**भूत्वा पूर्वमुखो मन्त्री उत्तराभिमुखोऽपि वा ।**
**मूलान्ते चात्मतत्त्वाय विद्यातत्त्वाय तत्परम् ॥ ८ ॥**
**शिवतत्त्वाय च प्रोक्त्वा क्रमेण साधकोत्तमः ।**
**स्वाहान्तमद्भिराचामेत् पूर्वोत्तरमुखः सुधीः ॥ ९ ॥**

आगे के वक्ष्यमाण मन्त्र से साधक पूर्वाभिमुख अथवा उत्तराभिमुख होकर नासिका, नेत्र, कान, नाभि, हृदय तथा मस्तक का तीन बार स्पर्श कर कान, नेत्र को बन्द कर लेवे । मूल (ॐ), उसके अन्त में आत्मतत्त्वाय, विद्यातत्त्वाय, उसके बाद शिवतत्त्वाय कहकर अन्त में स्वाहा कर आचमन करे ॥ ७-९ ॥

**विमर्श**—'ॐ आत्मतत्त्वाय विद्यातत्त्वाय, शिवतत्त्वाय स्वाहा' ॥ ७-९ ॥

**कुलपात्रं सदूर्वञ्च सतिलं सजलं ततः ।**
**एभिः सङ्कल्प्य वीरेन्द्रः समन्त्रं वारिणि न्यसेत् ॥ १० ॥**

साधक दूर्वा तिल और जल सहित कुलपात्र स्थापित करे और उससे सङ्कल्प करे । सङ्कल्प का स्वरूप—सदूर्वं, सजलं, सतिलं कुलपात्रं स्थापयामि । फिर इस मन्त्र के साथ उसके जल में न्यास करे ॥ १० ॥

**सूर्यस्य मण्डलात्तीर्थमावाह्याऽङ्कुशमुद्रया ।**
**सञ्जप्य दशधा मूलं तत्तोयं मूर्ध्नि संक्षिपेत् ॥ ११ ॥**

अङ्कुशमुद्रा दिखाकर सूर्यमण्डल से तीर्थों का आवाहन करे, फिर दश बार मूलमन्त्र का जाप कर उस जल से अपने शिर को अभिषिक्त करे ॥ ११ ॥

**कुम्भाख्यमुद्रया मूलं स्मरन् साधकपुङ्गवः ।**
**अङ्गुलीभिर्मुखं श्रोत्रं नासां नेत्रे च रोधयन् ॥ १२ ॥**

फिर उत्तम साधक कुम्भमुद्रा प्रदर्शित कर, मूलमन्त्र (ॐ) का स्मरण कर, अपनी अङ्गुलियों से मुख, श्रोत्र, नासा और नेत्र को बन्द करे ॥ १२ ॥

**मूलं स्मरन् त्रिधोन्मज्य गात्राणि परिमार्जयेत् ।**
**तिलकं मूलमन्त्रेण शिखाञ्च परिकल्पयेत् ॥ १३ ॥**

तदनन्तर पुनः मूल मन्त्र का स्मरण कर, तीन बार जल में डुबकी लगाकर अपने शरीर का प्रोक्षण करे । मूलमन्त्र (ॐ) से तिलक लगावे, पुनः शिखा बन्धन करे ॥ १३ ॥

**त्रिराचम्य ततो मन्त्री षडङ्गानि न्यसेत्ततः ।**
**गृहीत्वा वामहस्ते तु जलं दक्षिणपाणिना ॥ १४ ॥**
**समाच्छाद्य ततो व्योम वायुवह्निस्ततः परम् ।**
**क्षौणीवरुणबीजञ्च त्रिवारमभिमन्त्रयेत् ॥ १५ ॥**

**शक्तिसन्ध्या**—पुनः तीन बार आचमन कर मन्त्रज्ञ षडङ्ग न्यास करे । दाहिने हाथ से जल लेकर बायें हाथ में स्थापित करे, फिर उसे व्योम (हं), वायु (यं), वह्नि (रं), क्षोणी (लं) और वरुण के बीज (वं) से अभिमन्त्रित करे ॥ १४-१५ ॥

**मूलेन सप्तवारन्तु मुद्रया तत्त्वसञ्ज्ञया ।**
**स्वमूर्ध्नि च क्षिपेत्तोयं शेषं दक्षे निधाय च ॥ १६ ॥**
**ध्यात्वा तेजोमयं तोयं सव्यनासापुटेन च ।**
**तत उत्तोल्य देहस्थं पापं प्रक्षाल्य वामया ॥ १७ ॥**
**प्रोत्सार्य कल्पिते वज्रशिलायां संक्षिपेत् सुधीः ।**
**प्रक्षाल्य हस्तयुगलमाचमेत्तदनन्तरम् ॥ १८ ॥**

फिर मूल मन्त्र सात बार पढ़कर तत्त्वमुद्रा प्रदर्शित करते हुये, उस जल को अपने शिर पर प्रक्षिप्त करे । शेष जल दाहिने हाथ में रखकर, उस जल में तेज का ध्यान कर, दाहिनी नासिका के पुट से स्पर्श कर, वाम नासिका से देह में रहने वाले पाप का प्रक्षालन कर, उसे ऊपर उठाकर किसी कल्पित वज्रशिला पर पटक देवे । फिर दोनों हाथों का प्रक्षालन कर आचमन करे ॥ १६-१८ ॥

**मायाप्राणात्मकं मन्त्रं मार्तण्डभैरवाय च ।**
**प्रकाशशक्तियुक्ताय अर्घ्यं स्वाहा ततो वदेत् ॥ १९ ॥**
**सूर्यायाऽर्घ्यं विधायाथ शक्तिसन्ध्या प्रकीर्तिता ।**
**विभाव्य पुरतो यन्त्रं तत्र देवीं गणान्विताम् ॥ २० ॥**

श्री माया (ह्रीं), प्राण (हं) मन्त्र का उच्चारण करते हुये 'मार्त्तण्डभैरवाय प्रकाशशक्तियुक्ताय अर्घ्यं स्वाहा' कहकर सूर्यनारायण को अर्घ्य प्रदान करे । यहाँ तक हमने शक्ति सन्ध्या कही । फिर अपने आगे यन्त्र स्थापित कर, उस पर गणेश के सहित देवी का ध्यान करे ॥ १९-२० ॥

गृहीत्वा गन्धतोयञ्च कुलपात्रात्ततः परम् ।
तर्पयेद् देवतावक्त्रे विधिवत् साधकोत्तमः ॥ २१ ॥
मूलमन्त्रं समुच्चार्य तदन्ते देवताभिधाम् ।
द्वितीयान्तामहं पश्चात् तर्पयामि नमः पदम् ॥ २२ ॥
मूलान्ते तर्पयामीति स्वाहान्तं तर्पणं भवेत् ।

**पूजाविधि**—फिर साधकोत्तम अर्घ्यपात्र से कर्पूरादि से युक्त गन्धजल लेकर देवता के मुख में तर्पण करे । उसकी विधि इस प्रकार है—मूल मन्त्र का उच्चारण कर, उसके बाद देवता का द्वितीयान्त नाम लेकर 'तर्पयामि' तथा 'नमः' पद कहे । प्रथम मूल मन्त्र अन्त में 'तर्पयामि स्वाहा' यही तर्पण की विधि है । जैसे—'ॐ अमुक देवतां तर्पयामि नमः स्वाहा' ॥ २१-२२ ॥

गुरुं सपरिवारञ्च आयुधं वाहनं तथा ॥ २३ ॥
शक्तितस्तर्पयित्वा च गायत्रीं शक्तितो जपेत् ।
ध्यात्वा सावरणां देवीं सूर्यमण्डलवासिनीम् ॥ २४ ॥

फिर सपरिवार गुरु, आयुध, वाहन इनका शक्ति के साथ तर्पण कर यथाशक्ति गायत्री का जप करे । उसकी विधि इस प्रकार है—प्रथम सूर्य मण्डल में रहने वाली गायत्री का उनके आवरण के साथ ध्यान करे ॥ २३-२४ ॥

मूलान्ते उद्यदादित्यवर्तिन्यैस्तदनन्तरम् ।
शिवचैतन्य तस्यान्ते मय्यै स्वाहेति संस्मरन् ॥ २५ ॥
अर्घ्यं दत्त्वा ततस्तस्यै तामानीयाङ्कुशेन च ।
मुद्रया हृदि संस्थाप्य जलादुत्थाय साधकः ॥ २६ ॥

**वस्त्रधारणम्**

मूलेन कुलवस्त्रे द्वे परिधाय कुलेन च ।
मोक्षार्थी रक्तवस्त्रेण भोगार्थी श्वेतवाससा ॥ २७ ॥

मूल (ॐ) इसके बाद उद्यदादित्यवर्तिन्यैः, उसके बाद 'शिवचैतन्यमय्यै स्वाहा', इस मन्त्र को स्मरण कर गायत्री को अर्घ्य प्रदान करे । फिर अङ्कुशमुद्रा से उनका आवाहन कर उन्हें अपने हृदय में स्थापित करे । साधक जल से बाहर हो जावे । फिर कुल मन्त्र से दो कुलवस्त्र धारण करे । मोक्षार्थी रक्तवस्त्र से तथा भोगार्थी श्वेत वस्त्र से अपने को आच्छादित करे ॥ २५-२७ ॥

मारणे कृष्णवासस्तु वश्ये रक्तं सदा गृही ।
उच्चाटने व्याघ्रचर्मं वृक्षत्वक् शुभकर्मणि ॥ २८ ॥

मारण में कृष्ण वस्त्र, वश्य में रक्तवस्त्र, उच्चाटन में व्याघ्रचर्म तथा शुभकर्म में वृक्ष के वल्कल धारण करने का विधान है ॥ २८ ॥

**परिधाय ततो मौनी हृदि मन्त्रं परामृशन् ।**
**प्रक्षाल्य हस्तपादौ च पूजास्थानं समाविशेत् ॥ २९ ॥**

इस प्रकार वस्त्र धारण करने के उपरान्त साधक मौन होकर मन्त्र का ध्यान करे । तदनन्तर अपना हाथ पैर प्रक्षालन कर पूजास्थान में जावे ॥ २९ ॥

स्नानं विना पूजा विफला

**इति स्नानं समुद्दिष्टमधिकारप्रदायकम् ।**
**स्नानतर्पणशून्यस्य नाधिकारश्च पूजने ॥ ३० ॥**

यहाँ तक हमने पूजा में अधिकार प्राप्त करने के लिये स्नान की विधि कही । क्योंकि स्नान तर्पण से रहित व्यक्ति का पूजा में अधिकार नहीं होता ॥ ३० ॥

**विविधैरुपचारैश्च भक्तिभावसमन्वितः ।**
**विना स्नानेन या पूजा विफला सिद्धिहानिदा ॥ ३१ ॥**
**तस्मात् स्नानादिकं कृत्वा रक्तवस्त्रं ततः परम् ।**

स्नान के बिना भक्तिभाव से समन्वित होकर भी साधक; यदि नाना प्रकार के उपचारों से पूजा भी करे तो वह आराधना निष्फल होती है, इतना ही नहीं; अपितु सिद्धि में हानिप्रद भी होती है । इस कारण स्नानादि क्रिया सम्पन्न करने के बाद ही रक्त वस्त्र धारण करना चाहिये ॥ ३१-३२ ॥

पूजास्थाननिरूपणम्

**एकलिङ्गे श्मशाने च शून्यागारे चतुष्पथे ॥ ३२ ॥**
**बिल्वमूले प्रान्तरे वा नद्यां पर्वतमस्तके ।**
**उज्जटे निर्जने वापि भूगृहे देवतालये ॥ ३३ ॥**
**अश्वत्थसन्निधौ वापि वटमूले त्रिशूलके ।**
**हट्टागारे निजागारे पशुदृष्टिविवर्जिते ॥ ३४ ॥**
**नृपालमण्डपे वापि गह्वरे वापि यन्त्रिते ।**
**निश्छिद्रमण्डपे वापि कर्तव्यं पूजनं सदा ॥ ३५ ॥**

**पूजा स्थान का विधान**—अब अर्चन का स्थान कहते हैं । एकलिङ्ग (वक्ष्यमाण स्थान द्र. २.३६.) श्मशान, शून्यागार, चतुष्पथ, बिल्वमूल, सर्वथा एकान्त, नदी का तट, पर्वत का ऊपरी भाग, उज्जट, निर्जन, पृथ्वी के भीतर में (खोह), देवालय, पीपलवृक्ष का सन्निधान, वटमूल, त्रिशूल, हट्टागार, निजागार

(अपना घर), जहाँ पशुओं की दृष्टि न पहुँचे, नृपाल, मण्डप (कन्दरा), सर्वथा जहाँ किसी का आना-जाना सम्भव न हो, ऐसे नियन्त्रित स्थान में अथवा सर्वथा बन्द मण्डप में पूजा करनी चाहिये ॥ ३२-३५ ॥

एकलिङ्गनिरुक्तिः

पूजास्थानं महादेव्याः कथितं पीठमुत्तमम् ।
पञ्चकोशान्तरे यत्र न लिङ्गान्तरमीक्षते ॥ ३६ ॥
तदेकलिङ्गमित्याहुस्तत्र सिद्धिरनुत्तमा ।

चतुष्पथनिरुक्तिः

चतुष्पथं विजानीयात् यत्रास्ते चण्डिकाशिला ॥ ३७ ॥

**एकलिङ्ग एवं चतुष्पथ का लक्षण**—महादेवी के पूजा के लिये उत्तम स्थान सिद्धपीठ भी कहा गया है । पाँच कोश के भीतर जहाँ एक लिङ्ग के अतिरिक्त और कोई लिङ्ग न हो उस स्थान को एकलिङ्ग कहा जाता है । वहाँ महादेवी की पूजा करने से उत्तम सिद्धि प्राप्त होती है। जहाँ चण्डिका की शिला (प्रतिमा) हो उसे चतुष्पथ जानना चाहिए ॥ ३६-३७ ॥

तत्र यत्नेन गन्तव्यं जप्तव्यं सिद्धिकाङ्क्षिभिः ।
द्वारदेशे ततो गत्वा पूजयेद्द्वारदेवताः ॥ ३८ ॥

सिद्धि की इच्छा रखने वालों को वहाँ प्रयत्नपूर्वक जाना चाहिये और जप करना चाहिये । इसके बाद मण्डल के द्वारदेश में जाकर सर्वप्रथम द्वारदेवता का पूजन करना चाहिये ॥ ३८ ॥

कारयेत्तत्र वाद्यादिनृत्यगीतं तथैव च ।
सिद्धार्थाक्षतदूर्वाभिस्तिलमिश्रैः सुसाधकः ॥ ३९ ॥
अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ ४० ॥
वाग्भवाद्यं समुच्चार्य नाराचमुद्रया सुधीः ।
कुलभूतं समुत्सार्य यागभूमिं ततो विशेत् ॥ ४१ ॥

द्वारदेवता के पूजन के समय बाजा-गाजा तथा नृत्यादि भी कराना चाहिये । उत्तम साधक सिद्धार्थ (सफेद सरसों), अक्षत और दूर्वा, जिसके साथ तिल भी हो; हाथ में लेकर 'अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया' यह श्लोक मन्त्र पढ़कर; तदनन्तर पहले 'वाग्भव' ऐं कहकर; नाराच मुद्रा दिखाकर; कुलमार्ग के भूतों को बाहर निकाल कर यागभूमि में प्रवेश करना चाहिये ॥ ३९-४१ ॥

**कूर्मचक्रं प्रकुर्वीत यथातन्त्रविधानतः ।**
**रेखाचतुष्टयं कार्यं इन्द्रवारुणयोगतः ॥ ४२ ॥**

**कूर्मचक्र विधान**—तदनन्तर तन्त्र में कही गई विधि के अनुसार कूर्मचक्र का निर्माण करना चाहिये । पूर्व से पश्चिम तक चार रेखा खींचे ॥ ४२ ॥

**उत्तराद् याम्यपर्यन्तं नवकोष्ठं यथा भवेत् ।**
**इन्द्राग्नियाम्यनैर्ऋत्यप्रतीच्यां पञ्चवर्गकम् ॥ ४३ ॥**
**वायुकुबेरशम्भौ च यादिवर्णाश्चतुश्चतुः ।**
**लक्षौ क्रमात् समालिख्य साधकः सिद्धिहेतवे ॥ ४४ ॥**

फिर जिस प्रकार नवकोष्ठ बन जावे; उस प्रकार उत्तर से दक्षिण दिशा पर्यन्त रेखा खींचे । फिर पूर्व, आग्नेयकोण, दक्षिण, नैर्ऋत्यकोण तथा पश्चिम में कवर्ग, चवर्ग, टवर्ग, तवर्ग और पवर्ग—इन पाँच वर्गों को लिखे । वायुकोण पश्चिम तथा ईशान में य र ल व फिर श ष स ह फिर ळ और क्ष वर्णों को क्रमशः साधक अपनी सिद्धि के लिये लिखे । (द्र. शारदातिलक २.१३३-१३४) ॥ ४३-४४ ॥

**मध्ये कोष्ठे ततः कुर्यात् पूर्ववन्नवकोष्ठकम् ।**
**पूर्वादीशानपर्यन्तं षोडशस्वरमालिखेत् ॥ ४५ ॥**
**अकारादिक्रमेणैव युग्मयुग्मप्रभेदतः ।**
**क्षेत्राद्यर्णस्तु यत्रास्ते शीर्षं तस्य विनिश्चितम् ॥ ४६ ॥**
**दीपस्थानं तदेव स्यात्तत्र सिद्धिरनुत्तमा ।**

फिर मध्य के कोष्ठ में नवकोष्ठ निर्माण करे । उसमें पूर्व से ईशानकोण पर्यन्त सोलह स्वरों को अकारादि से आरम्भ कर दो-दो स्वरों को प्रत्येक कोष्ठों में लिखे । जहाँ साधक के ग्राम के नाम का आदि अक्षर पड़े; वहीं कूर्म का शिर समझना चाहिये । अतः उसी स्थान पर दीप रखना चाहिए । इससे साधक को उत्तम सिद्धि की प्राप्ति होती है ॥ ४५-४७ ॥

**निर्धनो जायते पत्सु पार्श्वयोर्व्याधिरेव च ॥ ४७ ॥**

कूर्म के पाद स्थान में दीपक रखने से साधक निर्धन होता है । पार्श्वभाग में दीपक रखने से व्याधि होती है ॥ ४७ ॥

**पुच्छे हानिः सदा ज्ञेया दीपस्थानं सदाश्रयेत् ।**

पुच्छस्थान में दीपक स्थापित करने से हानि होती है । इसलिये शीर्ष स्थान में ही दीपक स्थापित करना चाहिये ॥ ४८ ॥

**कूर्मचक्रं विना यो हि जपहोमं समाचरेत् ॥ ४८ ॥**

**तत्सर्वं निष्फलं विन्द्यात् अभिचाराय कल्पते।**

**पञ्चशुद्धिकथनम्**

**पञ्चशुद्धिविहीनेन यत्कृतं न च तत् कृतम् ॥ ४९ ॥**

जो कूर्मचक्र के बिना जप होम करते हैं; उनका वह सारा जप होम निष्फल हो जाता है और साधक की मृत्यु का कारण बन जाता है। इसी प्रकार पञ्चशुद्धि के बिना जो जप होम किया जाता है; वह भी बेकार हो जाता है ॥ ४८-४९ ॥

**यावन्न कुरुते तत्तु तावद् देवार्चनं कुतः।**
**पञ्चशुद्धिं विना पूजा अभिचाराय कल्पते ॥ ५० ॥**

जब तक पञ्चशुद्धि न करे; तब तक देवार्चन से कोई लाभ नहीं होता। पञ्चशुद्धि किये बिना पूजा मृत्यु का कारण बन जाती है ॥ ५० ॥

**भूमिशुद्धिरात्मशुद्धिर्द्रव्यानां शोधनं तथा।**
**मन्त्रशुद्धिर्देवशुद्धिः पञ्चशुद्धिरितीरिता ॥ ५१ ॥**

भूमिशुद्धि, आत्मशुद्धि, द्रव्यशुद्धि, मन्त्रशुद्धि तथा देवशुद्धि—इसे पञ्चशुद्धि कहते हैं ॥ ५१ ॥

**पञ्चशुद्धिं प्रवक्ष्यामि यथाक्रमविधानतः।**
**सामान्यार्घ्यं ततः कुर्यात् प्रोक्षणार्थं च साधकः ॥ ५२ ॥**

अब मैं यथाक्रम विधान से पञ्चशुद्धि कहता हूँ। साधक सर्वप्रथम समस्त वस्तुओं के प्रोक्षण के लिये सामान्य अर्घ्य स्थापित करे ॥ ५२ ॥

**चतुरस्रं ततो वृत्तं त्रिकोणं वामतो लिखेत्।**
**आधारं स्थापयेतत्र सम्पूज्य वह्निमण्डलम् ॥ ५३ ॥**

उसके बाद दाहिनी ओर चतुरस्र वृत्त निर्माण करे तथा बाएँ ओर त्रिकोण की रचना करे। फिर वह्निमण्डल का पूजन कर आधार स्थापित करे ॥ ५३ ॥

**अस्त्रेण प्रोक्षितं पात्रं स्थापयित्वा च पूजयेत्।**
**सूर्यमंण्डलमुच्चार्य हृन्मन्त्रेण प्रपूजयेत् ॥ ५४ ॥**

उस आधार पर अस्त्र मन्त्र (हुं फट्) से प्रोक्षित पात्र रखकर उसका पूजन करे। फिर 'सूर्यमण्डलाय नमः' इस मन्त्र से सूर्यपात्र का पूजन करे ॥ ५४ ॥

**विलिख्य मण्डलं तोये पूर्ववत् पूजयेत्ततः।**
**इन्दुमण्डलमभ्यर्च्य प्रक्षिपेद् गन्धपुष्पके ॥ ५५ ॥**

फिर उस पात्र के जल में मण्डल बनाकर पूर्ववत् उसकी भी पूजा करे। इसी

प्रकार जल में इन्दु मण्डल की पूजा कर उसमें गन्ध पुष्प प्रक्षिप्त करे ॥ ५५ ॥

**पूर्ववत्तीर्थमावाह्य षडङ्गानि यजेत्ततः ।**
**अग्नीशासुरवायव्यमध्ये दिक्ष्वङ्गपूजनम् ॥ ५६ ॥**

फिर उसमें तीर्थों का पूर्ववत् आवाहन कर षडङ्गों का पूजन करे । आग्नेय, ईशान, नैर्ऋत्य और वायव्य कोणों में तथा पूर्वादि दिशाओं में षडङ्ग की पूजा का विधान विहित है ॥ ५६ ॥

**मूलमन्त्रं जपेदष्टौ तज्जलेन प्रसेचयेत् ।**
**अस्त्रान्तमूलमुच्चार्य आत्मानं यागभूमिषु ॥ ५७ ॥**

**भूमि शुद्धि विधान**—उस जल को लेकर मूल मन्त्र का आठ बार जप करे । फिर उस जल से अस्त्रान्तमूल मन्त्र (ॐ हुँ फट्) पढ़कर अपने को तथा यज्ञभूमि को अभिषिक्त करे ॥ ५७ ॥

**पृथिव्यर्घ्यं ततो दत्त्वा नैर्ऋत्यां साधकोत्तमः ।**
**प्रणवं भगवत्येव धरणीं ङेयुतां वदेत् ॥ ५८ ॥**
**धरणीवेधसे स्वाहा अनेनार्घ्यं विधाय च ।**
**ब्रह्माणं पूजयित्वा च पुरुषं वास्तुसञ्ज्ञकम् ॥ ५९ ॥**

तदनन्तर उत्तम साधक पृथ्वी को नैर्ऋत्यकोण में अर्घ्य प्रदान कर 'ॐ भगवत्यै धरण्यै धरणीवेधसे स्वाहा' इस मन्त्र का उच्चारण करे । इस प्रकार अर्घ्य प्रदान कर ब्रह्मदेव का पूजन कर वास्तु पुरुष का पूजन करे ॥ ५८-५९ ॥

**सम्मार्जनानुलेपाद्यैर्दर्पणोदरवत्प्रभम् ।**
**वितानं धूपदीपाद्यैः पुष्पमालाऽभिशोभितम् ॥ ६० ॥**
**पञ्चवर्णरजश्चित्रं भूमेः शुद्धिरितीरिता ।**
**विलिख्य मण्डलं भूमौ पूर्ववत् साधकाग्रणीः ॥ ६१ ॥**

पुनः पृथ्वी का सम्मार्जन एवं अनुलेपन कर दर्पण के उदर के समान स्वच्छ वितान (चँदोवा); जो धूप, दीप तथा पुष्पमाला से सुशोभित हो; उसे स्थापित करे तथा भूमि को पाँच वर्णों वाले रङ्ग से रङ्गकर चित्र बना देवे । यहाँ तक हमने भूमिशुद्धि का विधान आपको बतलाया । फिर साधकाग्रणी भूमि पर पूर्ववत् मण्डल निर्माण करे ॥ ६०-६१ ॥

**आसनं स्थापयेत्तत्र यथा तन्त्रानुसारतः ।**
**अथासनं प्रवक्ष्यामि शाक्तानां स्थितिकाम्यया ॥ ६२ ॥**

उस मण्डल पर तन्त्रशास्त्र के अनुसार आसन स्थापित करे । अब मैं शाक्त

सम्प्रदाय के उपासक को बैठने के लिये आसन की विधि कहता हूँ ॥ ६२ ॥

मृद्वादिविविधासनकथनम्

**मृदुचूडकमासीनः अन्येषु कोमलेषु वा ।**
**विष्टरे वा समासीनः साधयेत् सिद्धिमुत्तमाम् ॥ ६३ ॥**

**आसनविधान**—मृदुचूडक पर बैठकर अथवा अन्य कोमल आसन पर अथवा विष्टर (कुशासन) पर बैठकर साधक उत्तम सिद्धि प्राप्त करता है ॥ ६३ ॥

**अर्वाक् षण्मासतो गर्भच्युतमाहुर्मृदुं बुधाः ।**
**चूडोपनयनैर्हीनं मृदुमचूडकं विदुः ॥ ६४ ॥**

६ मास से पहले जो गर्भ गिर गया हो, उसे बुद्धिमान कौल 'मृदु' कहते हैं । चूडाकर्म तथा उपनयन से रहित ऐसे मृदु को 'मृदुचूडक' कहा जाता है ॥ ६४ ॥

**निवृत्तचूडको बालो हीनोपनयनः पुमान् ।**
**यो मृतः पञ्चमे वर्षे तमेव कोमलं विदुः ॥ ६५ ॥**

जिसका चूडाकर्म हो गया हो, ऐसे बालक को तथा जिसका उपनयन न हुआ हो ऐसे पुरुष को, अथवा जो पाँच वर्ष की अवस्था में मर गया हो, उसे भी 'कोमल' कहा जाता है ॥ ६५ ॥

विविधासनफलकथनम्

**मृद्वासनं विना यो हि पूजयेच्चण्डिकां शिवाम् ।**
**तावत् कालं नारकी स्याद् यावदाहूतसंप्लवम् ॥ ६६ ॥**

जो साधक मृदु आसन पर बिना बैठे शिवा चण्डिका की पूजा करता है; वह तब तक नरक में निवास करता है जब तक प्रलयकाल रहता है ॥ ६६ ॥

**पञ्चाशद्भिः कुशैर्ब्रह्म तदर्धेन तु विष्टरः ।**
**कौशेयं भोगदं रक्तकम्बलं सिद्धिदं स्मृतम् ॥ ६७ ॥**

पचास कुशा का ब्रह्म कहा जाता है । उसके आधे भाग वाले कुशा का आसन 'विष्टर' होता है । कुशा का बना आसन भोग प्रदान करता है और रक्त कम्बल का आसन सिद्धि प्रदान करता है ॥ ६७ ॥

**वस्त्रं रोगहरं ज्ञेयं मोक्षं श्रीर्व्याघ्रचर्मणि ।**
**ऊर्णा दुःखहरी प्रोक्ता ज्ञानसिद्धिर्मृगाजिने ॥ ६८ ॥**

वस्त्र का आसन रोगों का हरण करता है और बाघम्बर मोक्ष एवं सम्मृद्धि प्रदान करता है, ऊन का आसन दुःख दूर करता है और मृगचर्म का आसन

ज्ञानसिद्धि प्रदान करता है ॥ ६८ ॥

**सन्यासी ब्रह्मचारी तु विशेषः कृष्णाचर्मणि ।**
**काष्ठासनं न कुर्वीत यत्र दौर्भाग्यवान् भवेत् ॥ ६९ ॥**

सन्यासी एवं ब्रह्मचारी के लिये कृष्ण मृग के चर्म का आसन विहित है । काष्ठ के आसन पर कदापि न बैठे क्योंकि उससे दौर्भाग्यवान् होता है ॥ ६९ ॥

**अत्युच्चं चातिनीचञ्च मग्नञ्च परिवर्जयेत् ।**
**मनोहरं मृदु श्लक्ष्णमासनं परिकीर्तितम् ॥ ७० ॥**

अत्यन्त ऊँचा, अत्यन्त नीचा तथा सर्वथा जमीन में गड़ जाने वाला आसन सर्वथा वर्जित करे । आसन के लिये मनोहर, कोमल और चिकना आसन प्रशस्त कहा गया है ॥ ७० ॥

### आसनशोधनम्

**एषामन्यतमं प्राप्य प्रोक्षयेत्तदनन्तरम् ।**
**सामान्यार्घ्यस्य तोयेन पुटाञ्जलिविधानतः ॥ ७१ ॥**

इन विहित आसनों में कोई भी आसन प्राप्त कर उस पर सामान्य अर्घ्य के जल का छींटा देकर पवित्र करे ॥ ७१ ॥

**मेरुपृष्ठ ऋषिः प्रोक्तः सुतलं छन्द ईरितम् ।**
**कूर्मोऽधिदेवता चात्र आसनस्थापनाय च ॥ ७२ ॥**
**विनियोगः परिज्ञेयोऽप्यभिलप्य पठेत्ततः ।**
**पृथ्वि त्वया धृता लोका देविपदं ततो बदेत् ॥ ७३ ॥**
**त्वं विष्णुना धृता त्वञ्च धारय मां ततः परम् ।**
**नित्यं पवित्रं कुरु च आसनञ्च समुच्चरेत् ॥ ७४ ॥**
**अनेन प्रणवाद्येन तत्र कुशत्रयं क्षिपेत् ।**
**आधारशक्तिं सम्प्रोच्य ङेयुतं कमलासनम् ॥ ७५ ॥**
**हृदन्तं मनुमुच्चार्य मायाद्येन प्रपूजयेत् ।**
**आसने संविशेत् पश्चात् वीरासनेन साधकः ॥ ७६ ॥**

इस आसन का 'मेरुपृष्ठ' ऋषि और 'सुतल' छन्द कहा गया है और कूर्म इसके देवता बतलाये गये हैं । इसलिये आसन स्थापित करने के लिये ऋषि, छन्द और देवता का स्मरण कर विनियोग करना चाहिये । तदनन्तर 'ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम्' इस श्लोक मन्त्र से आसन पर तीन कुशा प्रक्षिप्त करे । फिर 'ॐ ह्रीं

कमलासनाय नमः' पढ़कर आसन की पूजा करे। फिर साधक वीरासन लगाकर उस सिद्धासन पर बैठे ॥ ७२-७६ ॥

**दक्षगुल्फं हि वामोरौ तदधो वामगुल्फकम्।**
**कुर्यादृजुवपुर्ग्रीवः शरीरं ऋजुवच्चरेत् ॥ ७७ ॥**
**समग्रीवं विधायाथ प्रोक्तं वीरासनं परम्।**

दाहिना गुल्फ बायें ऊरू पर, उसके नीचे बायाँ गुल्फ रहे। उस पर सीधा शिर, ग्रीवा और शरीर करके बैठे। इसे वीरासन कहते हैं ॥ ७७-७८ ॥

**कामाख्यादिङ्मुखः सुस्थः प्राङ्मुखो वा प्रपूजयेत् ॥ ७८ ॥**

आसन पर कामाख्या जिस दिशा में हों उस दिशा में अथवा पूर्व दिशा में बैठकर पूजा करनी चाहिये ॥ ७८ ॥

**सामान्यार्घ्यस्य तोयेन प्रोक्षयेद्यागभूमिषु।**
**इति ते कथितो ह्यत्र आसनविधिः पूजने ॥ ७९ ॥**

तदनन्तर पुनः सामान्य अर्घ्य के जल से यज्ञभूमि का प्रोक्षण करे। इस प्रकार आसन विधि का विधान कहा गया ॥ ७९ ॥

**स्नातो निच्छिद्रगेहे कुलविमलजलैरर्घ्यपात्रं विधाय**
**भक्तिश्रद्धान्वितोऽसौ निजकुलकमले यन्त्रराजं विलिख्य।**
**सिन्दूरैर्भूषिताभिः सुकुलयुवतिभिः पूजयित्वा जपेद्य-**
**स्तस्य श्रीर्नेत्रपद्मे विलसति सततं वक्त्र चन्द्रे च वाणी॥ ८० ॥**

स्नान कर उत्तम बन्द गृह में बैठकर कौलशास्त्र के अनुसार विमल जल से अर्घ्यपात्र बनाकर भक्ति श्रद्धा से युक्त साधक अपने कुल कमल में यन्त्रराज निर्माण कर सिन्दूर से विभूषित उत्तम कुलीन सौभाग्यवती युवतियों के साथ भगवती का पूजन कर जो शाक्त मन्त्र का जप करता है, उसके नेत्रों में शोभा और मुख में वाणी नित्य विलास करती है ॥ ८० ॥

**दीक्षिताभिः कुलीनाभिर्युवतीभिः कुलात्मभिः।**
**देवतागुरुभक्ताभिः सञ्चितं यागभूमिषु ॥ ८१ ॥**

या भूमि में कुलमार्ग की उपासना वाली देवता और गुरुओं में भक्ति रखने वाली, दीक्षित, कुलीन एवं सौभाग्यवती नवयुवतियों को एकत्रित करे ॥ ८१ ॥

**नानाविधानि पुष्पाणि गन्धानि विविधानि च।**
**कर्पूरागुरुधूपादिवासितं पटवासितम् ॥ ८२ ॥**

ताम्बूलं पेयद्रव्यञ्च धूपदीपादिकञ्च यत् ।
सर्वालङ्कारभूषाभिर्भूषितः साधकोत्तमः ॥ ८३ ॥

इसी प्रकार अनेक प्रकार के पुष्प, अनेक प्रकार के सुगन्धित द्रव्य, कपूर, अङ्गुर, धूपादि तथा सुवासित वस्त्रादि, ताम्बूल, पेयद्रव्य और धूपादि भी एकत्रित कर अलङ्कारयुक्त सुशोभित वस्त्रों से युक्त होकर साधक को यागमण्डप में प्रवेश करना चाहिए ॥ ८२-८३ ॥

मूलविद्याजप्ततोयैः प्रोक्षयेत् यागवस्तु च ।
सर्वं स्वदक्षिणे स्थाप्य वामे कुम्भं निवेशयेत् ॥ ८४ ॥

फिर मूलविद्या से जपे हुये जल के द्वारा यज्ञीय वस्तुओं का प्रोक्षण करे । सब कुछ पूजा द्रव्य दाहिने रखे और बायें कलश रखे ॥ ८४ ॥

पश्चिमे देवतायाश्च कुल द्रव्याणि धारयेत् ।
(अथवा) नैवेद्यं दक्षिणे वामे पुरतो वा न पृष्ठतः ॥ ८५ ॥

कुलदेवता के द्रव्य को अपने पश्चिम बाएँ ओर रखे । नैवेद्य दाहिने, चाहे बायें अथवा आगे रक्खे । किन्तु पीछे न रखे ॥ ८५ ॥

अथवा वामतो दद्यान्नतु पृष्ठे कदाचन ।
दीपं दक्षिणतो दद्यात् पुरतो वा न वामतः ॥ ८६ ॥

अथवा बाईं ओर से नैवेद्य देवे । किन्तु पृष्ठ भाग से नैवेद्य कदापि न देवे । दीपक दाहिने रखे । अपने आगे अथवा बाईं ओर कदापि न रखे ॥ ८६ ॥

वामहस्ततले धूपमग्रतो वा न दक्षिणे ।
निवेदयेत् पुरोभागे गन्धपुष्पादिभूषणम् ॥ ८७ ॥

देवी के बायें हाथ के तलवे में धूप प्रदान करे, आगे अथवा दाहिने कदापि न देवे । गन्ध, पुष्प एवं भूषणादि आगे प्रदान करे ॥ ८७ ॥

मलिनं भूमिसंस्पृष्टं कृमिकेशादिदूषितम् ।
अङ्गसंस्पृष्टमाघ्रातं त्यजेत् पुष्पं सदा बुधः ॥ ८८ ॥

बुद्धिमान् साधक मलिन, भूमि पर गिरे हुये, कृमि केशादि से दूषित, अङ्ग संस्पृष्ट, आघ्रात (सूँघे हुये) ऐसे पुष्पों को पूजा मे सर्वथा त्याग देवे ॥ ८८ ॥

नैव पुष्पं द्विधा कृत्वा न दद्यात् कलिकामपि ।
रक्तमर्घ्यं श्वेतदूर्वां नीलकण्ठं कुरुण्टकम् ॥ ८९ ॥
न दद्याच्च महादेव्यै यदीच्छेच्छुभमात्मनः ।

**सुगन्धिश्वेतलौहित्यकुसुमैरर्चयेत् कुशैः ॥ ९० ॥**

एक पुष्प को कई भागों में तोड़कर न दे और इसी प्रकार कलिका भी न प्रदान करे। इसी प्रकार रक्तवर्ण का अर्घ्य एवं श्वेतदूर्वा, नीलकण्ठ एवं कुरण्टक का पुष्प भी यदि अपना कल्याण चाहे तो महादेवी को न देवे। सुगन्धित श्वेत और लाल वर्ण वाले पुष्पों से एवं कुशों से देवी की अर्चना करे ॥ ८९-९० ॥

**विल्वैर्मरुवकाद्यैश्च तुलसीवर्जितैः शुभैः ।**
**पत्रैर्न चार्चयेद् देवीं विल्वपत्रविवर्जितैः ॥ ९१ ॥**

बिल्व एवं मरुवक आदि पुष्पों से भी देवी की अर्चना करनी चाहिए। किन्तु बिल्वपत्र तथा तुलसी पत्र को छोड़कर अन्य किसी वृक्ष के पत्रों से भगवती की पूजा कदापि न करे ॥ ९१ ॥

**निर्गन्धैर्नार्चयेत् पुष्पैः सुगन्धैः सर्ववस्तुभिः ।**
**जवाबन्धूकमन्दारैः सिन्दूरैश्च महोत्पलैः ॥ ९२ ॥**
**सम्पूजयेच्च निर्गन्धैस्तथा च रक्तचन्दनैः ।**

गन्धरहित पुष्पों से महादेवी की पूजा अर्चना न करे। सभी सुगन्धित वस्तुओं से ही पूजा करनी चाहिये। जवा, बन्धूक, मदार, सिन्दूर एवं कमल पुष्पों से तथा रक्त चन्दन से साधक महादेवी की पूजा करे ॥ ९२-९३ ॥

**नन्द्यावर्त्तं तिलपत्रं तथा केशरपत्रकम् ॥ ९३ ॥**
**मदनं मरुवकञ्चैव दाडिमं कुन्दपुष्पकम् ।**
**नानोपहारबलिभिर्नानापुष्पैमनोहरैः ॥ ९४ ॥**
**अपामार्गदलैर्भृङ्गैस्तुलसीवर्जितैः शुभैः ।**
**कुलपुष्पेण धूपेन कुलदीपेन तां सुधीः ॥ ९५ ॥**
**चण्डिकां पूजयेद्धीमानन्यथा सिद्धिरोधकृत् ।**
**न दद्यान्मालतीपुष्पं ताराकालीप्रपूजकः ॥ ९६ ॥**

नन्द्यावर्त्त, तिलपत्र, केशरपत्र, मदन, मरुवक, अनार, कुन्दपुष्प—इस प्रकार के अनेक पुष्पों से, अनेक प्रकार के भक्ष्य, भोज्यों एवं बलियों से, अपामार्ग और भड़रैया के पत्तों से पूजा करे। किन्तु शुभ तुलसीपत्र न प्रदान करे। कुलमार्ग के पुष्पों से, धूप से, कुलदीप से धीमान् साधक चण्डिका की पूजा करे; अन्यथा हानि ही होती है। तारा और काली की पूजा करने वाला साधक उन्हें मालती पुष्प न चढ़ावे ॥ ९३-९६ ॥

**उन्मत्तञ्च न दातव्यं साधकेन महात्मना ।**
**न पर्युषितदोषोऽस्ति जलजोत्पलचम्पके ॥ ९७ ॥**

उत्तम साधक भगवती को धत्तूर का पुष्प न चढ़ावे । जल में उत्पन्न होने वाले कमल तथा चम्पा पुष्प में पर्युषित (बासी होने का) दोष नहीं लगता । अतः पर्युषित होने पर भी उससे पूजा की जा सकती है ॥ ९७ ॥

**अगस्त्यवकुले चैव विल्वगङ्गाजले तथा ।**
**निजदेवस्य पुष्पाणि पृथक्पात्रे निधापयेत् ॥ ९८ ॥**

अगस्त्य के पुष्प में, बिल्वपत्र में एवं गङ्गाजल में पर्युषित दोष नहीं लगता । अपने देवता की पूजा के लिये पुष्प किसी दूसरे पात्र में रखना चाहिये ॥ ९८ ॥

**एकीभावं न कर्त्तव्यं यदीच्छेच्छुभमात्मनः ।**
**नैवेद्यादीनि सर्वाणि तथा जानीहि निश्चितम् ॥ ९९ ॥**

यदि साधक अपना कल्याण चाहे तो अपने इष्टदेव की पूजा के लिये लाये गये पुष्पों को चण्डिका के पुष्पों में सम्मिलित न करे । इसी प्रकार नैवेद्यादि भी पृथक् रखे । निश्चित रूप से यह पृथक्करण कार्य करे ॥ ९९ ॥

**पूजाकाले तु सम्प्राप्ते वासुदेवं स्मरेत्तु यः ।**
**पूजाफलं न चाप्नोति नरकं प्रतिपद्यते ॥ १०० ॥**

चण्डिका के पूजाकाल में जो वासुदेव का स्मरण करता है उसे पूजाफल प्राप्त करना तो दूर वह सर्वथा नरक का भागी होता है ॥ १०० ॥

**वैष्णवं कुसुमं स्पृष्ट्वा पूजाकाले च सर्वदा ।**
**हस्तप्रक्षालनाच्छौचमाचामस्तु तदाचरेत् ॥ १०१ ॥**

चण्डिका के पूजनकाल में यदि विष्णु के निमित्त चढ़ाये जाने वाले पुष्पों का स्पर्श हो जावे तो साधक हस्त प्रक्षालन कर पुनः आचमन करने पर ही शुद्ध होता है ॥ १०१ ॥

### शक्तिं विना पूजा विफला

**शुचिः सावहितो भूत्वा भक्तिश्रद्धासमन्वितः ।**
**संस्थाप्य वामभागे तु शक्तिं स्वामिपरायणाम् ॥ १०२ ॥**

अत्यन्त पवित्र, सावधान तथा भक्ति एवं श्रद्धा से समन्वित होकर अपने वामभाग में पतिव्रता अपनी शक्तिभूता स्त्री को रखे ॥ १०२ ॥

**रक्तवस्त्रपरीधानां दीक्षितां चारुहासिनीम् ।**
**विना शक्त्या तु या पूजा विफला नात्र संशयः ॥ १०३ ॥**

जो रक्तवस्त्र धारण की हुई हो, दीक्षित हो, मन्दस्मितयुक्त हो, ऐसी अपनी शक्ति को स्थापित किये बिना पूजा निष्फल होती है, इसमें संशय नहीं ॥ १०३॥

**तस्माच्छक्तियुतो वीरो भवेच्च यत्नपूर्वकम् ।**
**या शक्तिः सा महादेवी हररूपस्तु साधकः ॥ १०४ ॥**

इसलिये महादेवी के भक्त को पूजा काल में अपनी शक्ति से संयुक्त अवश्य होना चाहिये । क्योंकि पूजा काल में शक्ति महादेवी का स्वरूप और साधक महादेव का स्वरूप होता है ॥ १०४ ॥

**अन्योन्यचिन्तनाच्चैव देवत्वमुपजायते ।**
**प्राणं बिना यथा देही स्पन्दितुं नैव शक्यते ॥ १०५ ॥**
**शक्तिं विनापि पूजायां नाधिकारी भवेत्तदा ।**

एक दूसरे का ध्यान करने से ही देवत्व की प्राप्ति होती है । जिस प्रकार प्राण के बिना जीव कोई चेष्टा नहीं कर सकता; उसी प्रकार शक्ति के बिना कोई महादेवी की पूजा का अधिकारी नहीं हो सकता ॥ १०५-१०६ ॥

हेतुयुक्तेन पूजा कार्या

**विना द्रव्याधिवासेन न जपेन्न स्मरेत् सदा ॥ १०६ ॥**
**विना हेतुकमास्वाद्य क्षोभयुक्तो भवेन्नरः ।**
**न पूजां न जपं कुर्यान्न ध्यानं न च चिन्तनम् ॥ १०७ ॥**

बिना द्रव्याधिवासन के न जप करना चाहिये, न ही स्मरण करना चाहिये। अकारण (मद्यपूर्वक) भोजन कर लेने पर मनुष्य को क्षोभ उत्पन्न हो जाता है। इसलिये भोजन के अनन्तर न पूजा करे, न जप करे, न ध्यान करे और न ही चिन्तन करे ॥ १०७ ॥

**तस्माद् भुक्त्वा च पीत्वा च पूजयेत् परमेश्वरीम् ।**
**सत्यमेतद् विजानीयाद्वाक्यं शङ्करभाषितम् ॥ १०८ ॥**

किन्तु परमेश्वरी का पूजन भोजन और जल पीकर ही करे, यह शङ्कर का वचन है । इसे सर्वथा सत्य मानना चाहिये ॥ १०८ ॥

**न क्रमच्युतिदोषोऽस्ति नाचारदोषदूषणम् ।**
**न भुक्त्वा च न पीत्वा च न स्मरेन्न जपेत्तदा ॥ १०९ ॥**
**ये स्मरन्ति नरा मूढास्तेषां दुःखं पदे पदे ।**
**आनन्देन विना यस्तु चण्डिकां परिपूजयेत् ॥ ११० ॥**
**रोगी दुःखी भवेत् सोऽपि मृते च नरकं व्रजेत् ।**
**तस्मादादौ प्रकर्त्तव्यं सम्विदासवयोजनम् ॥ १११ ॥**

यतः शङ्कर का वचन है; अतएव इसमें क्रमच्युति दोष नहीं लगता; न तो

आचार दोष (पाप) ही लगता है । जो लोग यह कहते हैं कि भोजन तथा जल पीकर न स्मरण करे और न जप करे; वे मूर्ख हैं । उन्हें पद-पद पर दुःख भोगना पड़ता है । जो आनन्दरहित होकर चण्डिका का पूजन करते हैं, वे जीवन में रोगी और दुःखी तो रहते ही हैं; मरने पर भी उन्हें नरक ही प्राप्त होता है । इसलिये सर्वप्रथम विजया, संवित् और आसव एकत्रित करना चाहिये ॥ १०९-१११ ॥

### संविदः श्रेष्ठत्वम्

**सम्विदासवयोर्मध्ये सम्विदेव गरीयसी ।**
**विजयाग्रहणं कृत्वा ध्यानं यः कुरुते नरः ॥ ११२ ॥**
**तदा ध्यानमयी मूर्त्तिः प्रत्यक्षा तस्य जायते ।**
**सम्वित्प्रयोगस्तेनेह पूजादौ साधकोत्तमैः ॥ ११३ ॥**

संवित् और आसव दोनों में संवित् ही श्रेष्ठ है । जो विजया का ग्रहण कर ध्यान करता है, उसको उसी समय ध्यान में मूर्त्ति का प्रत्यक्ष हो जाता है । इसलिये उत्तम साधक को पूजा के आदि में संवित् (विजया) का प्रयोग अवश्य करना चाहिये ॥ ११२-११३ ॥

**कर्त्तव्या च महापूजा करुणामयनन्दितैः ।**
**तस्या भेदं प्रवक्ष्यामि यथार्थं तन्त्रवर्त्मना ॥ ११४ ॥**

### तस्या चातुर्विध्यम्

**श्वेतपुष्पा च ब्रह्माणी रक्ता तु क्षत्रिया स्मृता ।**
**वैश्या पीतप्रसूना च शूद्रा कृष्णप्रसूनिका ॥ ११५ ॥**

करुणा और आनन्द में परिपूर्ण होकर ही महादेवी की पूजा करनी चाहिये । अब तन्त्र मार्ग से प्रतिपादित यथार्थ वचनों द्वारा विजया पूजा की विधि कहता हूँ—श्वेत पुष्पों वाली विजया ब्रह्माणी है । रक्त पुष्पों वाली क्षत्रिया, पीत पुष्पों वाली वैश्या और कृष्ण पुष्पों वाली विजया शूद्रा कही जाती है ॥ ११४-११५ ॥

### तासां शोधनमन्त्राः

**आसां शोधनमन्त्रञ्च कथयामि पृथक् पृथक् ।**
**सम्विदे ब्रह्मसम्भूते ब्रह्मपुत्रि सदानघे ॥ ११६ ॥**
**भैरवाणाञ्च तृप्त्यर्थं प्रसन्ना भव सर्वदा ।**
**ॐ ब्रह्माण्यै नमः स्वाहा ब्रह्माणीं शोधयेदिति ॥ ११७ ॥**

अब इनके शोधन का प्रकार पृथक्-पृथक् कहता हूँ । 'सम्विदे ब्रह्मसम्भूते ब्रह्मपुत्रि सदानघे भैरवाणाञ्च तृप्त्यर्थं प्रसन्ना भव सर्वदा ॐ ब्रह्माण्यै नमः स्वाहा' इस प्रकार मन्त्र पढ़कर ब्रह्माणी विजया का शोधन करे ॥ ११६-११७ ॥

सिद्धिमूलक्रिये देवि हीनबाधप्रबाधिनि ।
राजप्रजावशङ्करि शत्रु कण्ठत्रिशूलिनि ॥ ११८ ॥
ॐ ऐँ क्षत्रियायै नमः स्वाहा क्षत्रियायाः स्मृतो मनुः ।
अज्ञानेन्धनदीप्ताग्ने ज्ञानाग्ने ज्ञानरूपिणि ॥ ११९ ॥
आनन्दस्याहुतिं प्रीतिं सम्यग्ज्ञानं प्रयच्छ मे ।
ह्रीँ वैश्यायै नमः स्वाहा शूद्रां संशोधयेदथ ॥ १२० ॥
ॐ नमस्यामि नमस्यामि योगमार्गप्रदर्शिनि ।
त्रैलोक्यविजये मातः समाधिफलदा भव ॥ १२१॥
क्लीँ (श्रीँ) शूद्रायै नमः स्वाहा कथितं मन्त्रमुत्तमम् ।
ॐ अमृते अमृतोद्भवे अमृतवर्षिणि पदन्ततः ॥ १२२ ॥
अमृतमाकर्षयद्वन्द्वं सिद्धिं देहि ततः परम् ।
त्रैलोक्यं मे ततो ब्रूयाद्वशमानय तत्परम् ॥ १२३ ॥
द्विठान्तोऽयं मनुः प्रोक्तश्चतुष्काणाञ्च शोधने ।
(अथवा) हसक्षमलवरयूँ हसरौञ्च ततः परम् ॥ १२४ ॥
आनन्दभैरवायेति वषडन्तः परो मनुः ।
अनयोरेकतरेणैव विशोध्य विजयां ततः ॥ १२५ ॥

सिद्धिमूलक्रिये...........क्षत्रियायै नमः स्वाहा पर्यन्त क्षत्रिया विजया शोधन का मन्त्र है । अज्ञानेन्धन दीप्ताग्ने...........ह्रीँ वैश्यायै नमः स्वाहा । इससे वैश्या विजया का शोधन करे ।

अब शूद्रा के शोधन का प्रकार कहते हैं—ॐ नमस्यामि .........श्री शूद्रायै नमः स्वाहा । यह शूद्रा विजया शोधन का मन्त्र है । ॐ अमृते............द्विठान्तः (स्वाहा) पर्यन्त यह मन्त्र चारो प्रकार की विजया शोधन का मन्त्र है । अथवा हं सं क्षं मं लं वं रं यं.............आनन्द भैरवाय वषट् पर्यन्त मन्त्र भी चारों प्रकार के विजया का संशोधन करता है । इन दोनों में से किसी एक मन्त्र द्वारा भाँग को शुद्ध करना चाहिए ॥ ११८-१२५ ॥

### विजयाग्रहणविधिः

सप्तधा मूलमन्त्रञ्च तासामुपरि सञ्जपेत् ।
आवाहन्यादिमुद्राञ्च धेनुयोनिञ्च दर्शयेत् ॥ १२६ ॥

विजया का संशोधन कर उसके ऊपर सात बार मूलमन्त्र का जप करे और आवाहनी मुद्रा तथा धेनु एवं योनि मुद्रा प्रदर्शित करे ॥ १२६ ॥

त्रितालछोटिकाभिश्च दिग्बन्धनं समाचरेत् ।

**दिव्यदृष्ट्या पदाघातैर्विघ्नांश्च विनिवारयेत् ॥ १२७ ॥**

तीन ताल तथा तीन बार चुटकी बजाकर दिग्बन्धन करे और दिव्य दृष्टि से देखते हुये पैर को पृथ्वी पर पटक कर विघ्नों का उत्सारण करे ॥ १२७ ॥

**सप्तधा तर्पयेन् मूर्द्धिन गुरुवर्ग सुसाधकः ।**
**तत्त्वमुद्राविधानेन हृदि देवीं गणान्विताम् ॥ १२८ ॥**

उत्तम साधक सात बार गुरुवर्ग के मस्तक पर तर्पण करे । फिर तत्त्वमुद्रा प्रदर्शित कर गणेश सहित श्री भगवती का हृदय में ध्यान करे ॥ १२८ ॥

**तर्पयित्वा महादेवीं शक्तिभ्योऽपि ददेत्ततः ।**
**गृहीत्वा वामहस्तेन पठेदमुं मनुं ततः ॥**

इस प्रकार महादेवी का तर्पण कर उनकी शक्तियों का भी तर्पण करे । फिर बायें हाथ से विजया ग्रहण कर इस मन्त्र को पढ़े ॥ १२९ ॥

**ऐं वदवदपदं प्रोक्त्वा वाग्वादिनि ततः परम् ।**
**मम जिह्वाग्रे स्थिरेति भव सर्वपदं लिखेत् ॥ १३० ॥**
**सत्त्ववशङ्करि स्वाहा मन्त्रेण तदनन्तरम् ।**
**स्वीकुर्यात् साधकश्रेष्ठो मुमुक्षुः प्रसमीक्षया ॥ १३१ ॥**

'ऐं वदवद' पद कहकर 'वाग्वादिनि', उसके बाद 'जिह्वाग्रे स्थिराभव', इसके बाद 'सर्व' पद, फिर 'सत्त्व वशङ्करि स्वाहा' तदनन्तर मुमुक्षु साधक इस मन्त्र को पढ़कर श्रेष्ठ विजया को देखते हुये उसे ग्रहण करे । मन्त्र का स्वरूप—'ऐं वद वद वाग्वादिनि मम जिह्वाग्रे स्थिरा भव सर्वसत्त्ववशङ्करि स्वाहा' ॥ १३०-१३१ ॥

### विजयासेवनस्यानुकल्पकथनम्

**मार्गशीर्षादिभिर्मासैः क्रमात् संसेव्यतां त्रिभिः ।**
**दुग्धघृतमधुसुरावर्णानामनुपानकम् ॥ १३२ ॥**

मार्गशीर्षादि मासों से लेकर तीन मासों में इस विजया का सेवन प्रारम्भ करे । घृत, दुग्ध, मधु और सुरा उसके अनुपान हैं ॥ १३२ ॥

**एककालं द्विकालं वा त्रिकालं पञ्चकालकम् ।**
**क्रमात् संसेवनीया च सिद्धिदा सिद्धिमूलिका ॥ १३३ ॥**

एक काल, दो काल, तीन काल अथवा पाँच बार इसका क्रमशः सेवन करना चाहिये । क्योंकि यह सिद्धि देने वाली कही गयी है तथा सिद्धि का मूल बतलाया गया है ॥ १३३ ॥

विजयासेवनस्यमन्त्रगुप्तिः

**तथा तथा प्रकर्तव्यं सम्विदासवभोजनम् ।**
**यथा यथा न हि भवेत् प्राकट्यं पशुमेलके ॥ १३४ ॥**

संवित् (विजया) तथा आसव का भोजन उन-उन प्रकारों से छिपाकर करे जिससे पशुसाधकों तक को भी पता न चले ॥ १३४ ॥

**निर्जने चैव कर्तव्यं सदैव गुरुसन्निधौ ।**
**न पितुः सन्निधाने वा न मातुः सन्निधौ तथा ॥ १३५ ॥**

सर्वथा एकान्त स्थान में इसका सेवन करना चाहिये । किन्तु गुरु के सन्निधान में सदैव सेवन करे । (शिव-शक्ति रूप) माता और पिता के सन्निधान में कदापि इसका सेवन न करे ॥ १३५ ॥

**किम्वा पक्षिपतङ्गानां दर्शने नैव कारयेत् ।**
**कुलपुष्पं कुलद्रव्यं कुलपूजां कुलं जपम् ॥ १३६ ॥**
**गुरुं कुलपतिञ्चैव कुलमालां कुलाकुलम् ।**
**कुलचक्रं कुलध्यानं सर्वथा न प्रकाशयेत् ॥ १३७ ॥**

अथवा पक्षि पतङ्गों के द्वारा देखे जाने पर भी विजयादि का सेवन न करे । कुलपुष्प, कुलद्रव्य, कुलपूजा, कुलजप, गुरु कुलपति, कुलमाला, कुलाकुल, कुलचक्र और कुलध्यान सर्वथा प्रकाशित न करे ॥ १३६-१३७ ॥

**प्रकाशात्सिद्धिहानिः स्यात् प्रकाशाद्बन्धनादिकम् ।**
**प्रकाशान्मन्त्रनाशः स्यात् प्रकाशाद्देवहिंसनम् ॥ १३८ ॥**

इनके प्रकाशित होने पर सिद्धि में विघ्न होता है । प्रकाशित होने पर बन्धन भी प्राप्त हो सकता है, मन्त्र का नाश भी हो सकता है । किं बहुना, प्रकाश से देव के द्वारा हिंसा भी सम्भव है ॥ १३८ ॥

**प्रकाशान्मृत्युलाभः स्यान्न प्रकाश्यं कदाचन ।**
**पूजाकाले तु सम्प्राप्ते यदि कोऽप्यत्र गच्छति ॥ १३९ ॥**
**दर्शयेद्वैष्णवीं मुद्रां विष्णुन्यासं तथा स्तवम् ।**
**प्रकाशाद्यदि गुप्तिः स्यात्तत्प्रकाशं न दूषणम् ॥ १४० ॥**

प्रकाश से मृत्यु भी हो सकती है । अतः कदापि मन्त्र प्रकाशित न करे । पूजाकाल के सम्प्राप्त हो जाने पर यदि कोई आ जावे; तब वैष्णवी मुद्रा प्रदर्शित कर विष्णु न्यास तथा स्तुति करे । यदि प्रकाशित करने से अपनी रक्षा हो तो वह प्रकाश दूषण नहीं कहा जाता ॥ १३९-१४० ॥

**गोपनाद्यदि व्यक्तिः स्यान्न च व्यक्तिः कदाचन ।**
**वरं पूजा न कर्त्तव्या न च व्यक्तिः कदाचन ॥ १४१ ॥**

गुप्त रहने पर भी यदि प्रकाशित हो जावे तो उसे प्रकाश नहीं कहा जाता; भले पूजा न कर सके, किन्तु इन सब को प्रकाशित कदापि न करे ॥ १४१ ॥

## पूजाविधानम्

**रक्तमाल्याम्बरधरो योषिद्युक्तो महाशयः ।**
**ताम्बूलपूरितमुखो धूपामोदसुगन्धितः ॥ १४२ ॥**

साधक पूजा करते समय रक्त वर्ण की माला धारण करे । अन्तःकरण शुद्ध रखे । अपनी स्त्री को साथ लेकर पूजा करे । मुख ताम्बूल से परिपूर्ण रहे और धूपादि के आमोद द्रव्यों से सुगन्धित रहे ॥ १४२ ॥

**देवो भूत्वा यजेद्देवं नादेवो देवमर्चयेत् ।**
**अस्त्रेण गन्धपुष्पाभ्यां सुरभीकृतहस्तकः ॥ १४३ ॥**

यतः देव बनकर ही देवता की अर्चना करनी चाहिये । अतः बिना देवस्वरूप बनाये अदेव होकर कदापि देवार्चन न करे । अस्त्र मन्त्र पढ़कर गन्ध (इत्रादि) तथा पुष्पों से अपने हाथ को सुगन्धित कर लेवें ॥ १४३ ॥

**मार्जयेत् साधकश्रेष्ठो मूलमन्त्रं परस्परम् ।**
**निर्मञ्छनं त्रिधा कृत्वा अस्त्रेण वामपाणिना ॥ १४४ ॥**

श्रेष्ठ साधक मूलमन्त्र को पढ़कर परस्पर (स्त्री और पुरुष) मार्जन करे । फिर निर्मञ्छन (मक्खन) को अस्त्र मन्त्र पढ़कर बायें हाथ से तीन भागों में प्रविभक्त करना चाहिए ॥ १४४ ॥

**क्षिपेत्तद्दूरतः पुष्पं मन्त्री नाराचमुद्रया ।**
**अङ्गुष्ठाग्रे तु तर्जन्या संयोज्याधोर्ध्वरेखया ॥ १४५ ॥**
**अन्याङ्गुलीस्तथोर्ध्वञ्च नाराचः स्यात् प्रसार्यति ।**
**ध्यात्वा गुरुं न्यसेद्वामे दक्षिणे गणपतिं तथा ॥ १४६ ॥**

फिर नाराच मुद्रा प्रदर्शित करते हुये पुष्प को दूर फेंक देवे । अधःरेखा एवं ऊर्ध्वरेखा सहित तर्जनी से अङ्गुष्ठ के अग्र भाग में संयुक्त करे । अन्य अङ्गुलियों को ऊपर उठाये रहे तो नाराच मुद्रा हो जाती है । फिर गुरु का ध्यान कर बाईं ओर तथा गणपति का ध्यान कर दाहिनी ओर न्यास करे ॥ १४५-१४६ ॥

**निजदेवीं ततः पश्चान्मध्यदेशे च साधकः ।**
**पार्ष्णिघातकरास्फोट समुदञ्चितवक्त्रकैः ॥ १४७ ॥**

**तत्र तालत्रयं दद्यात् सशब्दं सम्प्रदायतः ।**

इसके बाद साधक अपनी इष्टदेवी का ध्यान कर मध्यदेश में न्यास करे । फिर साधक पार्ष्णिघात (=पदप्रहार) तथा करास्फोट (चुटकी) वक्र (टेढ़ा) होकर करे । अपने सम्प्रदाय के अनुसार शब्द युक्त तीन बार वहीं पर ताली (थपोड़ी) बजावे ॥ १४७-१४८ ॥

### प्राणायामविधानम्

**प्राणायामैर्विना यस्य जपहोमार्चनादिकाः ॥ १४८ ॥**
**न भवन्त्येव सफला यत्नेनापि कृताः क्रियाः ।**
**जपस्य पुरतः कार्यं प्राणायामं समाहितैः ॥ १४९ ॥**

जिसका हवन कर्म एवं अर्चन प्राणायाम के बिना होता है, वह सफल क्रिया नहीं होती; चाहे जितना भी प्रयत्नपूर्वक वह सम्पन्न की जाय । इसलिये जप से पहले सावधान साधक प्राणायाम अवश्य करे ॥ १४८-१४९ ॥

**अन्यथा निष्फलाः सर्वा जपहोमार्चनादिकाः ।**
**ऋतुचन्द्रैर्वेदरसैर्नेत्ररामैर्यथाक्रमम् ॥ १५० ॥**
**मात्राभिः प्रणवं जप्त्वा पूरकुम्भकरेचकैः ।**
**वामा च मध्यमा चैव तथा दक्षिणनाडिभिः ॥ १५१ ॥**
**कनिष्ठानामिकाङ्गुष्ठैर्यन्नासापुटधारणम् ।**
**प्राणायामः स विज्ञेयस्तर्जनीमध्यमे विना ॥ १५२ ॥**

अन्यथा साधक द्वारा की गई सारी जप, होम एवं अर्चन की क्रिया निष्फल हो जाती है । ऋतु (छह) चन्द्र (एक) वेद (चार) रस (छह) नेत्र (दो) राम (तीन), क्रमशः इतनी मात्राओं में प्रणव का जप कर प्राणायाम करना चाहिए । वाम एवं दक्षिण नासिका का पुट कनिष्ठा, अनामिका तथा अङ्गुष्ठ अङ्गुलियों से पकड़ना चाहिये । किन्तु साधक तर्जनी मध्यमा का प्रयोग न करे । इसी को प्रणायाम कहते हैं ॥ १५०-१५२ ॥

(यद्वा) **प्राणायामं ततः कुर्यान्मूलेन प्रणवेन वा ।**
**उच्चारयंस्तु प्रणवं वामेनैकेन मन्त्रवित् ॥ १५३ ॥**
**उदरं पूरयित्वा तु वायुना यावदास्थितिः ।**
**प्राणायामो भवत्येवं पूरको देहपूरकः ॥ १५४ ॥**
**पिधाय सर्वगात्राणि निश्वासोच्छ्वासवर्जितः ।**
**सम्पूर्णकुम्भवत्तिष्ठेत् प्राणायाम स कुम्भकः ॥ १५५ ॥**
**मुञ्चेद्वायुं तथैकेन श्वासेनैकेन मन्त्रवित् ।**

**निश्वासयोगयुक्तस्तु वायुं वाह्येन रेचयेत् ॥ १५६ ॥**

मूल मन्त्र से अथवा प्रणव से प्राणायाम इस प्रकार करना चाहिए । मन्त्रवेत्ता साधक प्रणव का उच्चारण करते हुये बाईं नासिका पुट से जितनी वायु से उदर पूर्ण हो जाय उतनी वायु खींच कर उदर को पूर्ण करे । इस प्रकार सारे शरीर को पूर्ण करने के कारण वह **पूरक** प्राणायाम हो जाता है । फिर साधक निश्वास-उच्छ्वास बिना लिये समस्त गात्र में उस वायु को रोककर किसी भरे हुये घड़े के समान निश्चल हो जावे; तो उसे **कुम्भक** प्राणायाम कहा जाता है । फिर मन्त्रवेत्ता साधक निःश्वास योग से युक्त होकर एक श्वास से ही सारी वायु बाहरी वायु के सहारे बाहर निकाल देवे तो उसे **रेचक** प्राणायाम कहते हैं; इसमें कोई संशय नहीं ॥ १५३-१५६ ॥

**रेचकस्त्वेव सम्प्रोक्तः प्राणायामो न संशयः ।**
**जानुप्रदक्षिणीकृत्य न द्रुतं न विलम्बितम् ॥ १५७ ॥**
**क्रियते चाङ्गुलिस्फोटं सा मात्रा परिकीर्तिता ।**
**ततो द्वादशमात्राभिः पूरकः क्रियते बुधैः ॥ १५८ ॥**

बिना शीघ्रता के अथवा बिना विलम्ब किये जानु की प्रदक्षिणा कर अङ्गुलि विस्फोट करे तो उसे मात्रा कहते हैं । इस प्रकार बारह मात्रा में किया गया प्राणायाम पूरक कहा जाता है ॥ १५७-१५८ ॥

**तस्माद् द्विगुणमात्राभिः क्रियते रेचकः शुचिः ।**
**तस्माद् द्विगुणमात्राभिः क्रियते कुम्भकस्तथा ॥ १५९ ॥**

उसे दूनी मात्रा में (चौबीस मात्रा) रेचक प्राणायाम किया जाता है; उससे भी दूनी (अड़तालिस) मात्रा में कुम्भक प्राणायाम किया जाता है ॥ १५९ ॥

### भूतशुद्धिकथनम्

**प्राणायामत्रयेणैवमेकैकं त्रितयात्मकम् ।**
**लिङ्गं कार्यं हृदिस्थं तु चैतन्यं सर्वसाक्षिणम् ॥ १६० ॥**

इस प्रकार पूरक, कुम्भक तथा रेचक इन तीन-तीन प्राणायामों का एक-एक प्राणायाम होता है । इसके बाद साधक को सर्वसाक्षी चैतन्य लिङ्ग का हृदय में ध्यान करना चाहिए ॥ १६० ॥

**प्रणवेन विनिःसार्य ब्रह्मरन्ध्राद्बहिर्बुधः ।**
**तेनैव सम्पुटीकृत्य मस्तकोपरि विन्यसेत् ॥ १६१ ॥**

**भूतशुद्धि**—फिर प्रणव मन्त्र के द्वारा उसे ब्रह्मरन्ध्र के मार्ग से बाहर निकाल देवे । फिर प्रणव के सम्पुट से उसे मस्तक के ऊपर स्थापित करे ॥ १६१ ॥

**चैतन्यरहितं देहं बाह्यञ्चाभ्यन्तरं तथा ।**
**नाभिमण्डलमध्यस्थं वायुमण्डलमध्यगम् ॥ १६२ ॥**
**यं बीजं धूषरं तप्तं ध्यात्वा तं तं विशोधयेत् ।**
**अग्निमण्डलसंस्थेन रंबीजेनाग्निरूपिणा ॥ १६३ ॥**
**निर्दहेदथ तद्भस्मराशिदेहाकृतिर्भवेत् ।**
**भ्रूमध्यस्थं हृदिस्थं वा ध्यायेद्वरुणमण्डलम् ॥ १६४ ॥**
**अर्धचन्द्राकृतिं श्वेतं पद्मद्वयसदक्षिणम् ।**
**तत्रस्थेन वकारेण प्लावयेन्मधुरूपिणा ॥ १६५ ॥**

इस प्रकार बाहर और भीतर शरीर जब चैतन्यरहित हो जावे, तब नाभि मण्डल में रहने वाले वायुमण्डल के मध्य में स्थित धवल वर्ण वाले तप्त यं बीज से उसे सुखा देवे । तदनन्तर साधक अग्नि मण्डल के मध्य में निवास करने वाले अग्नि स्वरूप 'रं' बीज से उसे जला देवे । इस प्रकार देह के भस्माराशि हो जाने पर भ्रूमध्य में अथवा हृदय के मध्य में रहने वाले वरुणालय के बीज 'वं' का ध्यान करना चाहिए । जो श्वेत वर्ण वाला, अर्द्धचन्द्राकृति दक्षिण सहित वाम हाथ में दो पद्म धारण किये हुये हैं; उसमें रहने वाले मधु स्वरूप उस 'वं' बीज से उस भस्मराशि को बहा देवे ॥ १६२-१६५ ॥

**जीवं पार्थिवं न्यस्य चिन्तयेद्धेममण्डलम् ।**
**प्रणवेण द्विधाकृत्य तत्र चैतन्यरूपिणा ॥ १६६ ॥**
**मस्तकोपरि विन्यस्य चैतन्येन नियोजयेत् ।**
**अमृतप्लावितः पिण्डः स मर्त्यो धौतकल्मषः ॥ १६७ ॥**

फिर उस पार्थिव शरीर में जीव को स्थापित कर हेममण्डल के समान उसका ध्यान करे । फिर उसे चैतन्य रूप प्रणव से दो भागों में प्रविभक्त करे और उसे मस्तक पर स्थापित कर चैतन्य युक्त करे । इस प्रकार अमृत से संप्लावित वह जीव पापरहित हो जाता है ॥ १६६-१६७ ॥

**आत्मानं चिन्तयेत् पश्चाद्देवतारूपिणं ततः ।**
**प्राणायामश्च कथितं भूतशुद्धिं तथापरम् ॥ १६८ ॥**

तब साधक अपने को देवतारूप समझे । ग्रन्थकार कहते हैं कि प्राणायाम का वर्णन हमने पहले कर दिया है उसके बाद भूतशुद्धि भी कह दिया ॥ १६८ ॥

**अथवान्यप्रकारेण भूतशुद्धिश्च कथ्यते ।**
**प्राणायामत्रयं कृत्वा भूतशुद्धिं ततश्चरेत् ॥ १६९ ॥**

अब अन्य प्रकार से भूतशुद्धि कहते हैं । तीन प्राणायाम करने के पश्चात्

भूतशुद्धि करनी चाहिये ॥ १६९ ॥

### भूतशुद्धिं विना पूजा विफला

**भूतशुद्धिं विना कर्म जपहोमार्चनादिकम् ।**
**तावत्तद्विफलं सर्वं प्रकाशेनाप्यनुष्ठितम् ॥ १७० ॥**

भूतशुद्धि किये बिना जप, होम और अर्चन प्रत्यक्ष रूप से किये जाने पर भी सभी व्यर्थ हो जाते हैं ॥ १७० ॥

**भूतशुद्धिं विना यस्तु न्यासपूजां करोति हि ।**
**न्यासजालं वृथा तस्य पूजा सा विफला भवेत् ॥ १७१ ॥**

जो भूतशुद्धि बिना किये ही न्यास और पूजा करता है; उसका समस्त न्यास जाल व्यर्थ होता है और पूजा भी निष्फल हो जाती है ॥ १७१ ॥

**तस्मात्तु साधकश्रेष्ठो भूतशुद्धिं समाचरेत् ।**
**मूलाधारात्ततः प्राणं ब्रह्ममार्गेण तान्त्रिकः ॥ १७२ ॥**
**हंसेन पुष्करस्थाने परमात्मनि योजयेत् ।**
**संहारक्रमयोगेन पञ्चतत्त्वं समुद्धरेत् ॥ १७३ ॥**

इसलिये श्रेष्ठ साधक को भूतशुद्धि अवश्य करनी चाहिए । तान्त्रिक मूलाधार से प्राणतत्त्व को ऊपर उठाकर ब्रह्ममार्ग से हंस मन्त्र से सहस्रार कमल पर रहने वाले परमात्मा में संयुक्त करे । फिर संहार क्रम के योग से पञ्च तत्त्व का उद्धार करना चाहिए ॥ १७२-१७३ ॥

**शोषदाहप्लवान् कृत्वा वाय्वग्निसलिलाक्षरैः ।**
**अनेन विधिना मन्त्री भूतशुद्धिं समाचरेत् ॥ १७४ ॥**

फिर वायु मन्त्र (यं) से शोषण करे । अग्नि मन्त्र (रं) से उसका दाह करे । वरुणमन्त्र (वं) से उसका प्लावन करे । इस प्रकार साधक को इस विधि से भूतशुद्धि करनी चाहिये ॥ १७४ ॥

### स्वदेहे देवताजीवन्यासः

**आत्मानं देवतारूपं विभाव्य साधकोत्तमः ।**
**स्वदेहे देवताजीवं विन्यसेत्तदनन्तरम् ॥ १७५ ॥**

उत्तम साधक इस प्रकार अपने को देवतारूप समझकर अपने में देवता रूप जीव का न्यास करे ॥ १७५ ॥

**पुष्पैर्वानामया वापि मनसा वा न्यसेद्बुधः ।**

**जीवन्यासे मनुः प्रोक्तो जीवन्यासेषु योजयेत् ॥ १७६ ॥**

पुष्पों से अथवा अनामिका से अथवा मन से बुद्धिमान् न्यास करे। जीवन्यास में जो मन्त्र हमने कहा है उसे जीव न्यास में प्रयुक्त करे ॥ १७६ ॥

जीवन्यासमन्त्रः

**मुखवृत्तं समुच्चार्य हंसस्तु विपरीतकः।**
**क्रमात् प्राणा इह प्राणास्तथा जीव इह स्थितः ॥ १७७ ॥**
**अमुष्याः सर्वेन्द्रियाणि भूयोऽमुष्याः पदन्ततः।**
**वाङ्मनोनयनश्रोत्रघ्राणप्राणपदान्यथ ॥ १७८ ॥**
**पश्चादिहागत्य सुखं चिरं तिष्ठन्तु ठद्वयम् ।**

मुखवृत्तं (ॐ) का उच्चारण कर हंसः का विपरीत (सोऽहं), अमुष्याः प्राणा इह प्राणाः अमुष्या जीव इह स्थितः अमुष्याः सर्वेन्द्रियाणि अमुष्याः वाङ्मनोनयन श्रोत्र घ्राणप्राणपदानि इहागत्य सुखं चिरं तिष्ठन्तु, फिर दो (स्वाहा) यह मन्त्र प्राणप्रतिष्ठा मन्त्र है। प्राण प्रतिष्ठा मन्त्र का स्वरूप—'ॐ सोऽहं अमुष्या प्राणा इह प्राणा अमुष्या जीव इह च स्थितः अमुष्याः सर्वेन्द्रियाणि वाङ्मनस्त्वक् चक्षुः श्रोत्र घ्राण पाद प्राणाः इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा' है ॥ १७७-१७९ ॥

**अथवा पाशबीजञ्च लज्जा चाङ्कुशमेव च ॥ १७९ ॥**
**प्राणमन्त्रं ततः पश्चाच्छेषं पूर्ववदाचरेत् ।**
**जीवन्यासमनुः प्रोक्तो जीवन्यासेषु योजयेत् ॥ १८० ॥**

प्राण प्रतिष्ठा का दूसरा मन्त्र—अथवा पाशबीज (आं), लज्जा (ह्रीं), अङ्कुश क्रों और प्राणमन्त्र हं शेष पूर्ववत् यह प्राण प्रतिष्ठा का मन्त्र है (आं ह्रीं क्रों हं शेष पूर्ववत्)। जीवन्यास में कहा गया मन्त्र जीवन्यास में प्रयुक्त करे। मन्त्र का स्वरूप—ॐ आं ह्रीं क्रों हं सोऽहं अमुष्याः प्राणा इह प्राणाः अमुष्या जीव इह च स्थितः अमुष्याः सर्वेन्द्रियाणि वाङ्मनस्त्वक् चक्षुः श्रोत्रघ्राणपादप्राणाः इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ १७९-१८० ॥

**ततः कुर्यात् स्वकल्पोक्तं न्यासादिकं सुसाधकः।**
**षडङ्गानाञ्च मुद्राञ्च स्थानञ्च मन्त्रमुच्यते ॥ १८१ ॥**

इसके बाद साधक अपने सम्प्रदायानुसार न्यास करे। अब षडङ्गों की मुद्रा स्थान और मन्त्र कहते हैं ॥ १८१ ॥

**त्रिद्व्येकदशरात्रिद्विसंख्याङ्गुलिगतक्रमात् ।**
**हृदि मस्ते शिखायाञ्च कवचे लोचनास्त्रके ॥ १८२ ॥**

नमः स्वाहा वषट् हुञ्च वौषट् फट् योजयेत् क्रमात् ।
ऋषिश्छन्दश्च संयुक्तं देवताबीजशक्तिकम् ॥ १८३ ॥
कीलितं ङेयुतं सर्वं विन्यसेदेषु साधकः ।
शिरोवदनहृद्गुह्यपादसर्वाङ्गके न्यसेत् ॥ १८४ ॥

**षडङ्गन्यास**—तीन, दो, एक, दस रात्रि (३) और दो संख्या में अङ्गुलियों पर न्यास करे । इसके बाद हृदयाय नमः शिरसे स्वाहा शिखयै वषट्, कवचाय हुं, नेत्रत्रयाय वौषट्, अस्त्राय फट् से अङ्ग न्यास करे । ऋषि, छन्द, देवता, बीज शक्ति और चतुर्थ्यन्त सभी कीलित मन्त्रों से शिर, मुख, हृदय, गुह्य, पाद एवं सर्वाङ्ग में न्यास करे ॥ १८२-१८४ ॥

अङ्गषट्कं ततः कुर्यात् पूर्वोक्तेनैव वर्त्मना ।
पञ्चाशदक्षरन्यासे यद्विशेषस्तदुच्यते ॥ १८५ ॥
ललाटेऽनामिकामध्ये विन्यसेन्मुखवर्त्मके ।
तर्जनीमध्यमानामा वृद्धानामा च नेत्रयोः ॥ १८६ ॥

इसके बाद पूर्वोक्त विधि से षडङ्ग न्यास करे । पचास अक्षर के न्यास में जो विशेष है उसे कहता हूँ । ललाट में अनामिका मध्यमा से, मुख में तर्जनी मध्यमा से, नेत्र में वृद्धा (अङ्गुष्ठ) और अनामिका से न्यास करे ॥ १८५-१८६ ॥

अङ्गुष्ठं कर्णयोर्न्यस्य कनिष्ठाङ्गुष्ठकौ नसोः ।
मध्यास्तिस्रो गण्डयोश्च मध्यमामोष्ठयोर्न्यसेत् ॥ १८७ ॥

दोनों कानों में अङ्गूठों से, कनिष्ठा और अङ्गुष्ठ से दोनों नासिका में मध्यमायुक्त तीन (तर्जनी एवं अङ्गुष्ठ) अङ्गुलियों से गण्डस्थल में तथा केवल मध्यमा से दोनों ओष्ठों में न्यास करे ॥ १८७ ॥

अनामां दन्तयोर्न्यस्य मध्यमामुत्तमाङ्गके ।
मुखेऽनामां मध्यमाञ्च हस्ते पादे च पार्श्वयोः ॥ १८८ ॥

अनामा से दातों में, मध्यमा से शिर में, मुख में अनामिका से, मध्यमा से हाथ पैर और पार्श्व भाग में न्यास करे ॥ १८८ ॥

कनिष्ठानामिकामध्यास्तास्तु पृष्ठे च विन्यसेत् ।
ताः साङ्गुष्ठा नाभिदेशे सर्वाः कुक्षौ च विन्यसेत् ॥ १८९ ॥

कनिष्ठिका, अनामिका और मध्यमा अङ्गुलियों से पीठ में न्यास करे । फिर अङ्गुष्ठ से युक्त उन कनिष्ठिका, अनामिका और मध्यमा अङ्गुलियों से नाभि देश में तथा सभी अङ्गुलियों से कुक्षि में न्यास करे ॥ १८९ ॥

**हृदये च तलं पूर्वं अंशयोश्च ककुत्स्थले ।**
**हृत्पूर्वं हस्तपत्कुक्षिमुखेषु तलमेव च ॥ १९० ॥**

हृदय, दोनों कन्धे तथा ककुत् में हाथ के तलवे से, हृदय के पूर्वभाग में, हृदय में, पैर में, कुक्षि एवं मुख में भी हाथ के तलवे से न्यास करे ॥ १९० ॥

**एतास्तु मातृकामुद्राः क्रमेण परिकीर्त्तिताः ।**
**अज्ञात्वा विन्यसेद्यस्तु न्यासः स्यात्तस्य निष्फलः ॥ १९१ ॥**

इतनी मातृका मुद्रायें हैं जिन्हें हमने क्रमशः कहा है । जो बिना जाने मनमानी न्यास करता है उसका न्यास निष्फल हो जाता है ॥ १९१ ॥

**पञ्चाशदक्षरन्यासः क्रमेणैव प्रकाशितः ।**
**ओमाद्यन्त्यो नमोऽन्तो वा सबिन्दुर्बिन्दुवर्जितः ॥ १९२ ॥**

पचास अक्षरों का न्यास अन्यत्र प्रकाशित है । (द्र. ३.६७) इन मातृकाओं के आदि में तथा अन्त में ॐ लगाकर न्यास करे, अथवा केवल अन्त में नमः लगाकर सविन्दु न्यास करे अर्थात् विन्दु (विसर्ग) युक्त न करे ॥ १९२ ॥

**मायालक्ष्मीबीजपूर्वा न्यस्तव्या उच्यते बुधैः ।**
**अथवा केवलं सर्गबिन्दुयुक्तां कलान्विताम् ॥ १९३ ॥**

बुद्धिमान् लोग कहते हैं कि यह अक्षरन्यास माया बीज (ह्रीं) और लक्ष्मी बीज (श्रीं) लगाकर करना चाहिये । अथवा केवल विसर्ग कलायुक्त विन्दु अनुस्वार लगाकर ही न्यास करना चाहिये ॥ १९३ ॥

**तार्त्तीयरुद्रशक्त्यन्तां स्मरादिकेशरान्विताम् ।**
**शक्तिपूर्वां श्रिया युक्तां सुधास्यां वा तनौ न्यसेत् ॥ १९४ ॥**

स्मरादि (क्लीं) केशरान्वित तार्त्तीय (?) रुद्रशक्ति जिसके अन्त में हो उससे न्यास करे अथवा जिसके पूर्व में शक्ति (ह्रीं) हो, उसे श्रीं से युक्त सुधा मुख वाली से अपने शरीर में न्यास करे ॥ १९४ ॥

**शक्तिश्रीकामबीजान्तां वेदादिशक्तिमातृकाम् ।**
**अजपा परमात्मा च द्विठप्रपञ्चयागकः ॥ १९५ ॥**

अथवा वेदादि शक्ति मातृका (ॐ), शक्ति (ह्रीं), श्रीं, कामबीज (क्लीं) जिसके अन्त में हो (ॐ ह्रीं श्रीं क्लीं) उससे न्यास करे । अजपा परमात्मा, फिर दो ठ (स्वाहा) यह प्रपञ्च याग वाला है ॥ १९५ ॥

**रविसंख्यात्मिकां प्रोक्ता मातृकान्तस्वरूपिणीम् ।**
**यस्य यत्र रुचिर्गच्छेत्तद्रूपात्ततनौ च ताम् ॥ १९६ ॥**

किसी के मत में रवि (१२) संख्यात्मिका मातृकास्वरूपिणी कही गई है। अतः जिसकी जिसमें रुचि हो उतने रूप वाली मातृका का अपने शरीर में न्यास करनी चाहिए ॥ १९६ ॥

**विन्यस्य तन्मयो मन्त्री याति वागीश्वरीमयम्।**
**स्पृष्ट्वा वानामया वापि मनसा वा न्यसेद्बुधः ॥ १९७ ॥**
**ऋष्यादिव्यापकान्तञ्च स्वकल्पोक्तं समापयेत्।**
**प्राणायामादिभिर्न्यासैः आत्मशुद्धिश्च जायते ॥ १९८ ॥**

**॥ इति श्रीमज्ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये द्वितीयोल्लासः ॥२॥**

इस प्रकार न्यास कर मन्त्री तन्मय होकर साक्षात् वागीश्वरी स्वरूप हो जाता है। अथवा अनामिका से स्पर्श कर, अथवा मन से ध्यान कर मन्त्रज्ञ साधक न्यास करे। इस प्रकार साधक ऋष्यादि न्यास से लेकर व्यापक पर्यन्त स्वकल्पोक्त न्यास समाप्त करे। प्राणायामादि योग से तथा न्यास से विद्वान् साधक की आत्मशुद्धि होती है ॥ १९७-१९८ ॥

**महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय के ज्येष्ठ पुत्र पण्डित रामरञ्जन मालवीय कृत श्रीमज्ज्ञानानन्द परमहंस विरचित कौलावलीनिर्णय नामक तन्त्र के द्वितीय उल्लास की निरञ्जन हिन्दी व्याख्या पूर्ण हुई ॥ २ ॥**

# तृतीय उल्लासः

अन्तर्यागनिरूपणम्

**आत्मशुद्धिः समाख्याता अन्तर्यागश्च कथ्यते ।**
**अन्तर्यागविधिं कृत्वा बहिर्यागं समाचरेत् ॥ १ ॥**

यहाँ तक आत्मशुद्धि कही गई । अब अन्तर्याग कहता हूँ । अन्तर्याग करके ही बहिर्याग करना चाहिये ॥ १ ॥

**बहिर्यागे नाधिकारी अन्तर्यागविवर्जितः ।**
**बहिर्यागफलं नास्ति विनान्तर्यजनं कदा ॥ २ ॥**
**तस्मात् प्रयत्नतो वीरश्चान्तर्यागं समारभेत् ।**

जो अन्तर्याग नहीं करता उसे बहिर्याग करने का अधिकार नहीं होता । क्योंकि बिना अन्तर्याग किये बहिर्याग का फल प्राप्त नहीं होता । इसलिये वीर साधक प्रयत्नपूर्वक अन्तर्याग करे ॥ २-३ ॥

मानसपूजाकथनम्

**शिवशक्तिसमायोगात् सुधावृष्टिं विधाय च ॥ ३ ॥**
**तर्पयित्वा महादेवीं पद्मे पद्मे सुसाधकः ।**
**मूलाधारे समानीय सोऽहं सञ्चिन्तयेत्ततः ॥ ४ ॥**

शिवशक्ति का संयोग कराकर तथा सुधा वृष्टि सम्पादन कर विज्ञ साधक (आज्ञादि) प्रत्येक पद्म में तर्पण करे । फिर उन्हें अपने मूलाधार में स्थापित कर उनका ध्यान करे ॥ ३-४ ॥

**इत्यन्तर्यजनं प्रोक्तं सर्वसिद्धिप्रदायकम् ।**
**यद्वान्तर्यजनं वक्ष्ये साधकस्य सुसिद्धये ॥ ५ ॥**

यह अन्तर्यजन जिसे हमने कहा है, वह सभी प्रकार की सिद्धियों को देने वाला है । किं वा; साधक की भली प्रकार की सिद्धि के लिये दूसरे प्रकार का अन्तर्याग कह रहा हूँ ॥ ५ ॥

**स्वकीयहृदये ध्यायेत् सुधासागरमुत्तमम् ।**
**रत्नद्वीपं तु तन्मध्ये सुवर्णबालुकामयम् ॥ ६ ॥**

अपने हृदय में उस सुधा सागर का; जो सर्वश्रेष्ठ है, ध्यान करे । उसके मध्य में सुवर्ण की बालुका से युक्त रत्नद्वीप का ध्यान करे ॥ ६ ॥

**परितो भावयेन्मन्त्री पारिजातं मनोहरम् ।**
**तत्र कल्पद्रुमं ध्यायेत् पञ्चाशदक्षरात्मकम् ॥ ७ ॥**

उस रत्नद्वीप के चारों ओर पारिजात का ध्यान करे । उसमें पचास अक्षरों वाले कल्पवृक्ष का ध्यान करे ॥ ७ ॥

**तन्मूले भावयेन्मन्त्री नानारत्नोपशोभितम् ।**
**उद्यदादित्यसङ्काशं व्याप्तं ब्रह्माण्डमण्डलम् ॥ ८ ॥**
**शतयोजनविस्तीर्णं ज्योतिर्मन्दिरमुत्तमम् ।**
**चतुर्द्वारसमायुक्तं हेमप्राकारशोभितम् ॥ ९ ॥**

मन्त्रज्ञ साधक उस कल्पवृक्ष के मूल में अनेक रत्नों से परिपूर्ण उदीयमान सूर्य के समान सर्वत्र व्याप्त ब्रह्माण्ड मण्डल का ध्यान करे । जिसका विस्तार सौ योजन है, जिसमें सुवर्णयुक्त प्राकार वाला चार द्वारों से संयुक्त एक ज्योतिर्मय मन्दिर है ॥ ८-९ ॥

**बहुचामरघण्टादिवितानैरुपशोभितम् ।**
**मन्दवायुसमाक्रान्तं गन्धधूपैरलंकृतम् ॥ १० ॥**
**तन्मध्ये वेदिकां ध्यायेन्नानारत्नोपशोभिताम् ।**
**सुवर्णसूत्ररचितं चिन्तयेच्छत्रमुत्तमम् ॥ ११ ॥**

जो अनेक चामरों एवं अनेक घण्टादिकों से तथा नाना प्रकार के वितानों से सुशोभित और गन्ध धूप से सर्वदा अलंकृत है । जहाँ चारों ओर मन्द वायु का सञ्चार हो रहा है । उस मन्दिर के बीच में अनेक रत्नों से सुशोभित वेदिका का ध्यान करे । सुवर्ण सूत्र से रचित सर्वश्रेष्ठ छत्र का ध्यान करे ॥ १०-११ ॥

**विभावयेन्महायन्त्रं पीयूषपूरपूरितम् ।**
**पाद्यपात्रत्रयं कुर्यादर्घ्यपात्रत्रयं तथा ॥ १२ ॥**

पुनः पीयूष (अमृत) से परिपूर्ण महायन्त्र का ध्यान करे । तदनन्तर तीन पाद्यपात्र तथा तीन अर्घ्यपात्र स्थापित करे ॥ १२ ॥

**षडाचमनपात्राणि मधुपर्कत्रयं ततः ।**
**एकं तु भोगपात्रं तु साधकः षोडशे दले ॥ १३ ॥**

छह आचमन पात्र, मधुपर्क के लिये तीन पात्र फिर षोडशदल पर एक भोगपात्र स्थापित करे ॥ १३ ॥

**सहस्त्रारामृतेनैव पात्राणि पूरयेत्तथा ।**
**पीठपूजां ततः कुर्यात् स्वकल्पोक्तविधानतः ॥ १४ ॥**

फिर सहस्त्रदल से निकले हुये अमृत से समस्त पात्रों को पूर्ण करे, तदनन्तर अपने सम्प्रदायानुसार पीठपूजा करे ॥ १४ ॥

पीठपूजाविधानम्

**सर्वोपरि ततो ध्यायेत् पश्चिमाननपङ्कजम् ।**
**स्त्रवन्तममृतं नित्यं दिव्याङ्गकमलान्तरे ॥ १५ ॥**

उस सभी के ऊपर पश्चिमाभिमुख कमल का ध्यान करे, जिससे दिव्याङ्ग वाले कमलों के बीच रहकर अमृत का स्त्रोत झरता रहता है ॥ १५ ॥

**शिवशक्तिसमायोगादमृतानन्दनन्दिनीम् ।**
**स्वस्वरूपां समावाह्य परिवारगणैः सह ॥ १६ ॥**

फिर शिवशक्ति के समायोग से उत्पन्न अमृतानन्द से आनन्दित होने वाली अमृत स्वरूपा भगवती का परिवारगणों के साथ आवाहन करे ॥ १६ ॥

मानसपूजोपचाराः

**मानसैरुपचारैश्च दीयते द्रव्यमुत्तमम् ।**
**आसनं स्वागतं पृष्ट्वा कुशलं तदनन्तरम् ॥ १७ ॥**

तदनन्तर मानस उपचारों से उन्हें इन-इन उत्तम द्रव्यों को समर्पित करे । सर्व प्रथम आसन देकर स्वागत कहकर उनसे कुशल मङ्गल पूँछे ॥ १७ ॥

**पाद्यं चरणयोर्दद्यान्मौलौ चार्घ्यं निवेदयेत् ।**
**सहस्त्रदलभृङ्गाराल्लम्बिकानालविच्युतम् ॥ १८ ॥**
**परमामृतपानीयं भावपुष्पैः समन्वितम् ।**
**स्वर्णपात्रे जलं कृत्वा दद्यादाचमनं मुखे ॥ १९ ॥**

फिर पैर के लिये पाद्य प्रदान करे, शिर पर अर्घ्य प्रदान करे । फिर सहस्त्रदल वाले कमण्डल में लगी हुई टोंटी से झरते हुये भाव पुष्पों से समन्वित परमामृत रूप पानीय प्रदान करे । तदनन्तर स्वर्ण पात्र में पवित्र जल रखकर मुख में आचमन देवे ॥ १८-१९ ॥

**मधुपर्कं मुखे दद्यात् पुनराचमनीयकम् ।**

चतुर्विंशतितत्त्वेन गन्धं दद्याद्विचक्षणः ॥ २० ॥

तदनन्तर पुनः मुख में मधुपर्क डालकर आचमन करावे । फिर विचक्षण साधक चौबीस तत्त्वों का गन्ध प्रदान करे ॥ २० ॥

स्वयम्भूकुसुमं दद्यात् कुङ्कुमं रक्तचन्दनम् ।
सप्ताष्टभावपुष्पैश्च सम्पूज्य धूपदीपकम् ॥ २१ ॥

स्वयम्भू पुष्प, कुङ्कुम (रोरी केशर) तथा रक्तचन्दन प्रदान करे । सात या आठ की संख्या में भाव पुष्प से पूजाकर धूप और दीप प्रदान करे ॥ २१ ॥

मनःकल्पितनैवेद्यं दद्याद्देव्यै मनोरमम् ।
तर्पयेच्च त्रिधा देवीं यथोक्तविधिना ततः ॥ २२ ॥

फिर भगवती को मन से कल्पित अत्यन्त मनोहर नैवेद्य प्रदान करे । फिर शास्त्र में कही गई विधि के अनुसार भगवती का तर्पण करे ॥ २२ ॥

षडङ्गं गुरुपङ्क्तिञ्च पूजयेदङ्गदेवताः ।
पूजयित्वा प्रयत्नेन स्नानीयं दापयेद्यथा ॥ २३ ॥

षडङ्ग न्यास, गुरुपंक्ति तथा अङ्ग देवताओं का पूजन कर स्नान के लिये जल प्रदान करे ॥ २३ ॥

स्ववामे मण्डलं कृत्वा रत्नसिंहासनान्वितम् ।
तत्र देवीं समानीय नानागन्धसमन्वितम् ॥ २४ ॥
उद्वर्तनादिकं कृत्वा तैलं नारायणादिकम् ।
दत्त्वा देव्यै प्रयत्नेन स्नानीयं दापयेत्ततः ॥ २५ ॥

अपनी बाईं ओर रत्नसिंहासन युक्त मण्डल निर्माण करे, उस पर देवी का आवाहन कर नाना प्रकार के गन्धयुक्त उद्वर्त्तन (उपटन) तथा नारायणादि तैल प्रयत्नपूर्वक प्रदान कर स्नानीय जल प्रदान करे ॥ २४-२५ ॥

सुवर्णकोटिकुम्भैश्च गन्धतोयसमन्वितैः ।
नानातीर्थजलेनैव स्नापयेत् परदेवताम् ॥ २६ ॥

अनेक प्रकार के गन्धजल से मिश्रित अनेक तीर्थों के जल से परिपूर्ण करोड़ों सुवर्ण के कलशों से परदेवता भगवती को स्नान करावे ॥ २६ ॥

दुकुलैर्मार्जितं गात्रं दुकूलं परिधापयेत् ।
नयने तेजसस्तत्त्वं प्रोञ्छयेत्तेन वै तनुम् ॥ २७ ॥
आकाशतत्त्वं श्रोत्रे च तेन वस्त्रं प्रकल्पयेत् ।

**विधिवद्वन्दनं कृत्वा केशसंस्कारमाचरेत् ॥ २८ ॥**

उनके शरीर को दुकूल (क्षौम वस्त्र) से पोंछकर (अधो) वस्त्र पहिनावे । फिर नेत्र पोंछकर उसमें तेज बढ़ाने वाला अञ्जन आदि प्रदान करे । दोनों कानों में आकाशतत्त्व का कुण्डल देवे और उसी से वस्त्र की कल्पना करे । तदनन्तर विधानपूर्वक वन्दना कर उनके केशों का संस्कार करे ॥ २७-२८ ॥

**नानारत्नसमायुक्तकङ्कत्या साधकोत्तमः ।**
**पट्टगुच्छं केशपाशे नानारत्नसमाकुलम् ॥ २९ ॥**

अनेक प्रकार के रत्नजटित कङ्कति (ककही) से केश शुद्ध करे । फिर अनेक रत्नों से जटित पट्टसूत्र से उनके केश का बन्धन करे ॥ २९ ॥

**ललाटे तिलकं दद्यात् सिन्दूरं केशमध्यके ।**
**नागेन्द्रदन्तरचितं शङ्खं दद्यान्मनोहरम् ॥ ३० ॥**

ललाट में तिलक प्रदान करे । तदनन्तर केश के मध्य भाग (सीमन्त) में सिन्दूर लगावे । फिर हाथी दाँत से बनी हुई मनोहर चूड़ियाँ प्रदान करे ॥ ३० ॥

**हस्ते केयूरकञ्चैव कङ्कणं कटकं तथा ।**
**पादाङ्गुरीयकं दद्यान्नानारत्नोपशोभितम् ॥ ३१ ॥**

हाथों में केयूर, कङ्कण एवं कटक प्रदान कर अनेक रत्नजटित अङ्गूठियाँ पैरों में भी प्रदान करे ॥ ३१ ॥

**पादयोर्नूपूरं दद्यात् कट्याञ्च क्षुद्रघण्टिकाम् ।**
**शिरोरत्नं प्रदद्याच्च मुकुटं रत्ननिर्मितम् ॥ ३२ ॥**

पैरों में पायजेब, कटि में काञ्ची, शिर में चूडामणि तथा मस्तक पर रत्ननिर्मित मुकुट प्रदान करे ॥ ३२ ॥

**ताटङ्ककुण्डलं कर्णभूषणं सुपरिष्कृतम् ।**
**नयने कज्जलं दद्यान्नासाग्रे गजमौक्तिकम् ॥ ३३ ॥**

अत्यन्त चमकदार कर्णफूल कानों में देवे । नेत्र में कज्जल और नासाग्रभाग में गजमुक्ता की नथ प्रदान करे ॥ ३३ ॥

**ग्रीवापत्रं कण्ठभूषां मुक्तामणिविभूषितम् ।**
**आनन्दहारत्रितयं अङ्गुरीयकरत्नकम् ॥ ३४ ॥**

मुक्ता और मणियों से उपशोभित ग्रीवा पत्र एवं कण्ठ का आभूषण प्रदान कर तीन लरियों वाला आनन्द हार एवं रत्नजटित अङ्गूठी देवे ॥ ३४ ॥

सर्वाङ्गलेपनं कार्यं गन्धचन्दनसिह्लकैः ।
काञ्चनाञ्चितकञ्चूलीमलक्तं रदनच्छदे ॥ ३५ ॥

गन्धयुक्त चन्दन तथा सर्वाङ्गलेपन करे । स्वर्णजटित कञ्चुली, अलक्तक (लाक्षा) तथा दाँतों की शोभा के लिये विहित वस्तु प्रदान करे ॥ ३५ ॥

सुवर्णपादुकां दत्त्वा प्रवालदन्तचिह्निताम् ।
मण्डपेषु समानीय रत्ननिर्मितदोलया ॥ ३६ ॥

प्रवाल (विद्रुम) एवं हाथी दाँत से जड़ी हुई सुवर्ण की पादुका प्रदान कर रत्ननिर्मित डोली में बैठाकर उन भगवती को मण्डप में प्रवेश करावे ॥ ३६ ॥

पुनः पाद्यादिकं दत्त्वा पूजयेत्तां सनातनीम् ।
गन्धादिकं ततो दत्त्वा भावपुष्पैः प्रपूजयेत् ॥ ३७ ॥

पुनः पाद्यादि प्रदान कर उन सनातनी भगवती की पूजा करे । गन्धादि देकर भावात्मक पुष्पों से उनकी पूजा करे ॥ ३७ ॥

मानसपुष्पनामानि

अमायमनहङ्कारमरागममदं तथा ।
अमोहकमदम्भञ्च अद्वेषाक्षोभकौ तथा ॥ ३८ ॥
अमात्सर्यमलोभञ्च दशपुष्पं विदुर्बुधाः ।
अहिंसा परमं पुष्पं पुष्पमिन्द्रियनिग्रहम् ॥ ३९ ॥

अमाय, अनहङ्कार, अराग, अमद, अमोहक, अदम्भ, अद्वेष, अक्षोभक, अमात्सर्य और अलोभ—ये दश पुष्प बुद्धिमानों ने (भावात्मक) कहे हैं । इसके अतिरिक्त अहिंसा सर्वश्रेष्ठ पुष्प है । इन्द्रियनिग्रह भी पुष्प है ॥ ३८-३९ ॥

दयापुष्पं क्षमापुष्पं ज्ञानपुष्पञ्च पञ्चमम् ।
इति पञ्चदशैर्भावपुष्पैः सम्पूजयेच्छिवाम् ॥ ४० ॥

दयापुष्प, क्षमापुष्प तथा पाँचवाँ ज्ञानपुष्प है । इस प्रकार कुल पन्द्रह प्रकार के भावपुष्पों से भगवती की अर्चना करे ॥ ४० ॥

करवीरं जवा द्रोणं चम्पकं नागकेशरम् ।
अपराञ्च कदम्बञ्च पारिजातादिकं तथा ॥ ४१ ॥
दद्याद्देव्यै प्रयत्नेन माल्यं गन्धसमन्वितम् ।
सुमेखलां पद्ममालां पुष्पं नानाविधं तथा ॥ ४२ ॥

करवीर, जवा, द्रोण, चम्पक, नागकेशर, अपरा, कदम्ब, पारिजातादि पुष्पों

की सुगन्धित माला भगवती को प्रयत्नपूर्वक प्रदान करे । इसी प्रकार सुमेखला एवं पद्ममाला आदि नाना प्रकार के पुष्पों को भी समर्पित करना चाहिये ॥ ४१-४२ ॥

**सप्तद्वीपसमुद्भूतं दद्याद्देव्यै सुसाधकः ।**
**कुण्डगोलोद्भवञ्चैव धूपं दद्यात् समीरणम् ॥ ४३ ॥**

किं बहुना, सातों द्वीपों में उत्पन्न होने वाले उत्तमोत्तम पुष्प भगवती को साधक प्रदान करे । साधक कुण्डगोलक में उत्पन्न तथा समीरण क्षेत्र का धूप प्रदान करे ॥ ४३ ॥

**सहस्रारकर्णिका पात्रं तैलं स्याच्च परामृतम् ।**
**मूलाधारे वर्त्तिरूपं चिदग्निः स्यात् प्रदीपकम् ॥ ४४ ॥**

सहस्रकर्णिका रूप पात्र में परामृत रूप तैल वाले मूलाधार रूप बत्ती से युक्त चिदग्नि का प्रदीप देवे ॥ ४४ ॥

**आमूलाद्ब्रह्मरन्ध्रान्तं सुषुम्नाहतवायुना ।**
**अनाहतध्वनिमयीं घण्टामेतां निवेदयेत् ॥ ४५ ॥**

मूलाधार से ब्रह्मरन्ध्र पर्यन्त लम्बी घण्टा जो सुषुम्ना वायु से अपने आप अनाहत रूप ध्वनि करता हो, ऐसा घण्टा भगवती को निवेदन करे ॥ ४५ ॥

**नैवेद्यं षड्रसोपेतमम्बरं चामरं तथा ।**
**सूर्यञ्च दर्पणञ्चन्द्रमण्डलं छत्रमुत्तमम् ॥ ४६ ॥**

षड्रसों से युक्त नैवेद्य, अम्बर रूप चामर, सूर्य स्वरूप दर्पण तथा चन्द्रमण्डल रूप छत्र समर्पित करे ॥ ४६ ॥

**सुधाम्भोधिं मांसशैलं मत्स्यराशिं फलानि च ।**
**सुपक्वञ्चरुकञ्चैव घृताक्तं परमान्नकम् ॥ ४७ ॥**
**भक्ष्यभोज्यं तथा चोष्यं लेह्यं पेयञ्च चर्वणम् ।**
**दद्याच्छेषार्घ्यतोयेन पुनराचमनीयकम् ॥ ४८ ॥**

अमृत का समुद्र, मांस का शैल, मत्स्य राशि तथा नाना प्रकार के फल, भली प्रकार से पकाया हुआ चरु, घृत से संयुक्त परमान्न--इस प्रकार भक्ष्य, भोज्य, चोष्य, लेह्य, पेय और चर्वण भगवती को समर्पित कर अर्घ्य पात्र के शेष जल से आचमन प्रदान करे ॥ ४७-४८ ॥

**बाह्यचक्रं ततो दद्यान्मूलाधारोत्थवायुना ।**
**रजःसत्त्वगुणाढ्यञ्च कर्पूरचूर्णमिश्रितम् ॥ ४९ ॥**
**रत्नपात्रे परिष्कृत्य ताम्बूलञ्च निवेदयेत् ।**

**तर्पयित्वा पुनर्देवीं पूजयेच्चाङ्गदेवताः ॥ ५० ॥**

तदनन्तर मूलाधार से उठी हुई वायु से (शीतल एवं चञ्चल) बाह्य चक्र (पङ्खा) प्रदान करे । कर्पूर के चूर्ण से चूर्ण मिश्रित एवं सर्वथा परिष्कृत ताम्बूल को रत्नपात्र में रखकर प्रदान करे । पुनः भगवती का तर्पण कर अङ्ग देवता का पूजन करे ॥ ४९-५० ॥

**विधाय तर्पणं तेषां देवीं सम्पूजयेत् पुनः ।**
**विधिवत् पूजनं कृत्वा तर्पयेत्तदनन्तरम् ॥ ५१ ॥**

फिर अङ्गदेवता का तर्पण कर पुनः देवी का पूजन करे । इस प्रकार विधिवत् पूजन कर, तदनन्तर पुनः देवी का तर्पण करे ॥ ५१ ॥

**अन्तर्मातृकया जप्ता समर्प्य च स्तुतिं पठेत् ।**
**पुष्पशय्याञ्च संस्कुर्यात्तत्र देवीं सुरेश्वरीम् ॥ ५२ ॥**

अन्तर्मातृका वर्णों से जपकर वह जप देवी को समर्पित करे । तदनन्तर स्तुति करे । फिर वहीं पर देवी के लिये पुष्प शय्या का संस्कार करे ॥ ५२ ॥

**मनोनर्त्तकतालैश्च शृङ्गारादिरसोद्भवैः ।**
**गीतैर्नानाविधैर्देवीं तोषयेत् साधकोत्तमः ॥ ५३ ॥**

फिर श्रेष्ठ साधक शृङ्गारादि रसोत्पादक मन को आनन्दित करने वाले अनेक प्रकार के नृत्यों, तालों और गीतों से भगवती को सन्तुष्ट करे ॥ ५३ ॥

**तस्मात् कामेश्वरी देवी प्रीता कामेश्वरश्च सः ।**
**मनस्यैक्यं विभाव्याथ साधकः सिद्धिभाग् भवेत् ॥ ५४ ॥**

तब साधक अपने मन में ध्यान करे कि अब भगवती कामेश्वरी एवं कामेश्वर हमारे ऊपर प्रसन्न हो गये हैं । इस प्रकार की ऐक्य भावना करने से साधक सिद्धि का पात्र बन जाता है ॥ ५४ ॥

**इत्यन्तर्यजनं प्रोक्तं भुक्तिमुक्तिप्रदायकम् ।**
**रक्तपद्मसहस्राणि मनसा यः प्रयच्छति ॥ ५५ ॥**
**कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।**
**स्थित्वा देवीपुरे श्रीमान् ततो राजा क्षितौ भवेत् ॥ ५६ ॥**

इस प्रकार भोग और मोक्ष प्रदान करने वाले अन्तर्याग का हमने वर्णन किया । जो भक्त लालवर्ण के हजार संख्या में कमलों को मन से समर्पित करता है । वह करोड़ों सहस्र कल्प तथा सैकड़ों करोड़ कल्प तक देवी लोक में निवास करता है फिर पृथ्वी में जन्म लेकर श्रीमान् राजा होता है ॥ ५५-५६ ॥

**मनसापि महादेव्यै नैवेद्यं दातुमिच्छति ।**
**यो नरो भक्तिसंयुक्तः स दीर्घायुः सुखीभवेत् ॥ ५७ ॥**

जो भक्त साधक मानस रूप से इन महादेवी को नैवेद्य प्रदान करने की मात्र इच्छा ही करता है उसे देवी की भक्ति प्राप्त होती है और वह दीर्घायु तथा सुख प्राप्त करता है ॥ ५७ ॥

**मनसापि च यो भक्त्या देव्यै कुर्यात् प्रदक्षिणम् ।**
**देवीगृहे वसेत् सोऽपि नरकाणि न पश्यति ॥ ५८ ॥**

जो मन से भक्तिपूर्वक देवी के लिये प्रदक्षिणा का सङ्कल्प करता है वह देवी के गृह में निवास करता है और नरक में नहीं जाता ॥ ५८ ॥

**नमनं मनसा देव्यै यो भक्त्या कुरुते नरः ।**
**सोऽपि लोकान् विजित्याशु शिवलोके महीयते ॥ ५९ ॥**

जो मनुष्य भक्तिपूर्वक भगवती को नमन करता है वह सभी लोकों से ऊपर शिवलोक में निवास करता है ॥ ५९ ॥

प्रकारान्तर्यजनम्

**अथान्तर्यजनं वक्ष्ये दृष्टादृष्टफलप्रदम् ।**
**गुरुध्यानं प्रकुर्वीत यथापूर्वं विशालधीः ॥ ६० ॥**

**अन्तर्यजन विधान**—अब दृष्ट और अदृष्ट दोनों प्रकार के फलों को देने वाला दूसरे प्रकार का अन्तर्यजन कहता हूँ । विशिष्ट बुद्धि वाला साधक पूर्व कथनानुसार पहले गुरु का ध्यान करे ॥ ६० ॥

**स्नायाच्च विमले तीर्थे पुष्करे हृदयाश्रिते ।**
**बिन्दुतीर्थेऽथवा स्नायात् पुनर्जन्म न विद्यते ॥ ६१ ॥**

पुनः हृदय में निवास करने वाले पुष्कर तीर्थ में स्नान करे अथवा विन्दु तीर्थ में निवास करे । ऐसा करने से पुनर्जन्म नहीं होता ॥ ६१ ॥

**इडासुषुम्ने शिवतीर्थकेऽस्मिन्**
**ज्ञानाम्बुपूर्णे वहतः शरीरे ।**
**ब्रह्माम्बुभिः स्नाति तयोः सदा यः**
**किं तस्य गाङ्गैरपि पुष्करैर्वा ॥ ६२ ॥**

इस शिवतीर्थात्मक शरीर में ज्ञान रूप जल से परिपूर्ण इडा और सुषुम्ना नाड़ी स्वरूप दो नदियाँ बहती हैं । जो साधक उन नदियों में बहते हुये ब्रह्मजल

से स्नान करता है, उसे गङ्गाजल में स्नान अथवा पुष्कर तीर्थ में स्नान का क्या प्रयोजन है ? ॥ ६२ ॥

**इति स्नानं समुद्दिष्टमथ सन्ध्यां समाचरेत् ।**

इस प्रकार हमने ब्रह्मजल से स्नान का विधान कहा । इसके बाद साधक सन्ध्याकर्म करे ॥ ६३ ॥

सन्ध्यानिरूपणम्

**शिवशक्त्योः समायोगो यस्मिन्काले प्रवर्तते ॥ ६३ ॥**
**सा सन्ध्या कुलनिष्ठानां समाधिस्थैः प्रगीयते ।**
**चन्द्रर्कानिलसङ्घट्टाद्गलितं यत् परामृतम् ॥ ६४ ॥**
**तेनामृतेन दिव्येन तर्पयेत् परदेवताम् ।**
**तर्पणं कथितं दिव्यमर्घ्यसाधनमुच्यते ॥ ६५ ॥**

**सन्ध्या निरूपण**—जिस काल में शिवशक्ति का समायोग सम्पन्न होता है । कुलमार्ग का आचरण करने वाले समाधि में स्थित रहने वालों के लिये वही सन्ध्या प्रशस्त कही गई है । चन्द्रमा सूर्य और अग्निदेव के सङ्घर्ष से जो परामृत गलता है उस अमृतजल से परदेवता का तर्पण करे । यहाँ तक हमने दिव्य तर्पण कहा । अब अर्घ्य का साधन कहता हूँ ॥ ६४-६५ ॥

**ब्रह्मरन्ध्रादधोभागे यच्चान्द्रं पात्रमुत्तमम् ।**
**कलासारेण सम्पूर्य तर्पयेत्तेन खेचरीम् ॥ ६६ ॥**

ब्रह्मरन्ध्र के नीचे जो उत्तम चन्द्र रूप पात्र है । उसे उसकी कलाओं से परिपूर्ण कर खेचरी (आकाशचारिणी) का तर्पण करे ॥ ६६ ॥

प्रसङ्गतः षट्चक्रकथनम्

**आधारे लिङ्गनाभौ हृदयसरसिजे तालुमूले ललाटे**
**द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्द्धे चतुष्के ।**
**वासान्ते बालमध्ये डफकठसहिते कण्ठदेशे स्वरांश्च**
**हक्षौ कोदण्डमध्ये न्यसतु विमलधीर्न्याससम्पत्तिसिद्धौ॥ ६७ ॥**

मूलाधार, लिङ्ग, नाभि, हृत्कमल, तालमूल (कण्ठ) और ललाट में जहाँ क्रमशः चार, छह, दशः, बारह, सोलह और दो पङ्खुड़ियों वाले कमलों से युक्त क्रमशः मूलाधार, स्वाधिष्ठान, मणिपूर, अनाहत, विशुद्ध और आज्ञा चक्र हैं । वहाँ क्रमशः मूलाधार में वं शं षं और सं इन चार अक्षरों से, लिङ्ग स्थित स्वाधिष्ठान में बं भं मं यं रं और लं इन छह अक्षरों से नाभि में जहाँ मणिपूर चक्र है वहाँ डं ढं णं तं थं दं धं नं पं और फं इन दश अक्षरों से, हृत्कमल जहाँ

अनाहत चक्र है वहाँ कं खं गं घं ङं चं छं जं झं ञं टं ठं इन बारह अक्षरों से, तालु मूल कण्ठ में जहाँ विशुद्ध चक्र है वहाँ अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं और अः इन सोलह स्वरों से तथा ललाट (भ्रू प्रदेश) जहाँ आज्ञा चक्र है वहाँ हं क्षं इन दो वर्णों से न्यास करे। इस प्रकार अन्त के वं से लेकर सं पर्यन्त, तदनन्तर मध्य के बं से लेकर लं पर्यन्त तथा आदि के कं से लेकर ठं पर्यन्त, पुनः ढं से लेकर फं पर्यन्त वर्णों से न्यास करना चाहिये ॥ ६७ ॥

**इत्यन्तर्मातृकावर्णान् ध्यायेत् कण्ठच्छदक्रमात् ॥ ६८ ॥**
**षडङ्गमथ कुर्यात्तु येन देवीमयो भवेत् ॥ ६९ ॥**

इस प्रकार कण्ठ में रहने वाले ककारादि क्षान्त पर्यन्त अन्तर्मातृका वर्णों का ध्यान करे। तदनन्तर षडङ्ग न्यास करे जिससे देवीमय बन जावे ॥ ६८-६९ ॥

**हन्यमानहृदर्थोऽयं हृदयं स्याच्चिदात्मकम् ।**
**क्रियते तत् परत्वेन हृन्मन्त्रेण ततः परम् ॥ ७० ॥**

यतः हृत् (पमः) अर्थ वाला हृदय हन्यमान (न्यास) कर लिये जाने पर सच्चिदानन्दात्मक हो जाता है। अतः उससे ही हृन्मन्त्र द्वारा हृदय का न्यास करे। यथा—सच्चिदानन्दाय नमः, हृदयाय नमः ॥ ६९ ॥

**सर्वाङ्गादिगुणोत्तुङ्गे सम्विद्रूपे परात्मनि ।**
**क्रियते विषयाहारः शिरोमन्त्रेण देशिकैः ॥ ७० ॥**

यतः आचार्यगण सर्वाङ्गादिगुणों में सर्वोत्तम संवित् रूप परमात्मा में शिरः मन्त्र से अपने सभी विषयों को आरोपित कर देते हैं। अतः उससे शिर में न्यास करे। यथा—संवित्‌रूपे परमात्मनि स्वाहा, शिरसे स्वाहा ॥ ७० ॥

**हृच्छिवो रूपं चिद्धाम ममता भावना दृढा ।**
**क्रियते निजदेहस्य शिखामन्त्रेण देशिकैः ॥ ७१ ॥**

आचार्य लोग अपने देह की दृढ़ ममता को हृत् शिरः स्वरूप करते रहते हैं इसलिये शिखा मन्त्र द्वारा शिखा में न्यास करना चाहिये। यथा—हृच्छिरोरूप चिद्धाम्ने शिखायै वषट् ॥ ७१ ॥

**मन्त्रात्मकस्य देहस्य मन्त्रवाच्येन तेजसा ।**
**सर्वतो मन्त्रवर्णेन क्रियते तस्य संवृतिः ॥ ७२ ॥**

मन्त्र वाक्य के तेज से इस मन्त्रात्मक देह की यतः मन्त्र वर्ण द्वारा रक्षा की जाती है और शरीर को गोपनीय रखा जाता है। इसलिये उससे कवच न्यास किया जाता है। यथा—मन्त्रात्मक तेजसे नमः कवचाय हुं ॥ ७२ ॥

**यद्ददाति परं ज्ञानं संविद्रूपे परात्मनि ।**
**हृदयादिमयं तेजः स्यादेतन्नेत्रसंज्ञितम् ॥ ७३ ॥**

जो परमात्मा सर्वोत्तम तेज प्रदान करता है उस परमात्मा में हृदयादिमय तेज है, अतः उस तेज का नेत्र में न्यास करना चाहिये । यथा—ॐ संवृन्मय तेजसे नमः नेत्रयोः ॥ ७३ ॥

**आध्यात्मिकादिरूपं यत् साधकस्य विनाशयेत् ।**
**अविद्याजातमन्त्रं तत् परं धाम समीरितम् ॥ ७४ ॥**

साधक का अपना आध्यात्मिक रूप जो अविद्या से उत्पन्न अज्ञान को दूर कर देता है उसे परं धाम कहते हैं । उससे अस्त्र मन्त्र का न्यास करना चाहिये । यथा—'ॐ परं धाम अस्त्राय फट्' ॥ ७४ ॥

**इति न्यासं विधायाथ ततो ध्यायेच्चिदात्मकम् ।**
**शक्तिद्वयपुटान्तःस्थहलक्षत्रयसंस्थितम् ॥ ७५ ॥**
**ज्योतिन्तत्त्वमयं ध्यायेत् कुलाकुलनियोजनात् ।**
**अथ शृङ्गाटमध्यस्थशक्तिद्वयपुटीकृतम् ॥ ७६ ॥**
**सदा समरसं ध्येयं ध्यानं तत् कुलयोगिनाम् ।**

इस प्रकार न्यास कर साधक शक्तियों के सम्पुट में स्थित ह ल क्ष इन तीन वर्णों पर स्थित चिदात्मक ज्योतितत्त्व का ध्यान करे जो कुलाकुल सम्प्रदायानुसार कहा गया है । जो शृङ्गाटक के मध्य में दो शक्तियों से सम्पुट किये गये सर्वदा समरस रूप में ध्येय है, वह कुलयोगियों का ध्यान है ॥ ७५-७७ ॥

(यद्वा) **किरणस्थं तदग्रस्थं चन्द्रभास्करमध्यगम् ॥ ७७ ॥**
**महाशून्ये लयं कृत्वा पूर्णस्तिष्ठति योगिराट् ।**
**निरालम्बे पदे शून्ये यत्तेज उपजायते ॥ ७८ ॥**
**तद्गर्भमध्यसेन्नित्यं ध्यानमेतद्धि योगिनाम् ।**
**अथ पूजां प्रवक्ष्यामि यथातन्त्रानुसारतः ॥ ७९ ॥**

अथवा चन्द्रमा और भास्कर के मध्य में रहने वाले जो किरण, उन किरणों के अग्रभाग में रहने वाले ज्योति रूप महालय में उसे लयकर योगी पूर्णानन्द में स्थिर हो जाता है । उस निरालम्ब अवस्था में जो तेज उत्पन्न होता है उसके गर्भ में रहने वाले तेज का अभ्यास करे । यही योगियों का ध्यान है । अब तन्त्र शास्त्र के अनुसार भगवती की पूजा विधि कहता हूँ ॥ ७७-७९ ॥

### भगवती पूजाविधि

**अर्चयन् विषयैः पुष्पैस्तत्क्षणात्तन्मयो भवेत् ।**

**न्यासस्तन्मयताबुद्धिः सोऽहंभावेन पूजयेत् ॥ ८० ॥**

भगवती चण्डिका की इस प्रकार विषयात्मक पुष्पों से अर्चना करते ही साधक तत्क्षण भगवतीमय हो जाता है । उसमें तन्मयता बुद्धि जो आ जाती है उसको न्यास कहते हैं । अतः सोऽहंभाव से पूजा करनी चाहिये ॥ ८० ॥

**पूर्वोक्तभावपुष्पानि दद्याद्देव्यै सुसाधकः ।**
**अथ वक्ष्ये जपं तत्र पद्मस्थवर्णमालया ॥ ८१ ॥**

उत्तम साधक पूर्व में कहे गये भाव पुष्प भगवती को समर्पित करे । अब कमलों पर स्थित वर्णमाला से जपविधि कहता हूँ ॥ ८१ ॥

जपविधानम्

**माला पञ्चाशिका प्रोक्ता सूत्रं शक्तिशिवात्मकम् ।**
**ग्रथिता कुण्डलीशक्तिः कलान्ते मेरुसंस्थितिः ॥ ८२ ॥**

माला पञ्चाशिका कही गई है और शक्तिशिवात्मक सूत्र कहा गया है । माला का ग्रथन करने वाली कुण्डलिनीशक्ति है तथा कला के अन्त में सुमेरू का स्थान विद्यमान है ॥ ८१-८२ ॥

**सबिन्दुं वर्णमुच्चार्य्य मूलमन्त्रं स्मरेत्ततः ।**
**अनुलोमविलोमाभ्यां यथाशक्ति जपञ्चरेत् ॥ ८३ ॥**

**जपविधि**—बिन्दु के सहित वर्ण का उच्चारण कर मूल मन्त्र का स्मरण करे। फिर सीधे और उलटे उनका जप करे । 'अं से क्षं' पुनः क्षं से अं यह प्रतिलोम अनुलोम का क्रम जानना चाहिये ॥ ८३ ॥

**जप्त्वा समर्पयेत् पश्चात् स्वकल्पोक्तविधानतः ।**
**स्तुतिभिः सकलं तत्र समर्पणं पुनः पुनः ॥ ८४ ॥**

इस प्रकार जप सम्पादन करने के पश्चात अपने सम्प्रदायानुसार भगवती की स्तुति करते हुये समस्त जप समर्पित करे ॥ ८४ ॥

होमविधिकथनम्

**अथ होमविधिं वक्ष्ये येन चिन्मयतां लभेत् ।**
**आत्मानमपरिच्छिन्नं ज्ञातव्यं साधकोत्तमैः ॥ ८५ ॥**

**होमविधि**—अब होम का विधि-विधान बतलाता हूँ जिससे साधक चित्स्वरूप हो जाता है । उत्तम साधक अपने आप को देशकाल और अवस्था से सर्वथा अपरिच्छिन्न समझे ॥ ८५ ॥

आत्मान्तरात्मपरमज्ञानात्मानः प्रकीर्तिताः ।
एतद्रूपन्तु चित्कुण्डं चतुरस्रं विभावयेत् ॥ ८६ ॥

**चित् रूप कुण्ड**—आत्मा, अन्तरात्मा, परमात्मा एवं ज्ञानात्मा इस प्रकार के चौकोर समतल चित्कुण्ड का ध्यान करे ॥ ८६ ॥

आनन्दमेखलारम्यं विन्दुत्रिवलयान्वितम् ।
अर्धमात्रायोनिरूपं ब्रह्मानन्दमयं भवेत् ॥ ८७ ॥

विन्दु रूप तीन वलियों (घुमाव) से युक्त आनन्द की मेखला बनावे । अर्धमात्रा को योनिरूप में समझे और स्वयं ब्रह्मानन्द रूप में रहे ॥ ८७ ॥

परदेवमये सर्वज्ञानदीपविजृम्भिते ।
सम्विदग्नौ हुनेद्द्रव्यं साधकः स्थिरमानसः ॥ ८८ ॥

फिर स्थिर चित्त वाला साधक परदेवमय (परमात्मस्वरूप) संवित् (ज्ञान) रूप वाली उस अग्नि में; जो सर्वज्ञानरूपी दीप से अत्यन्त प्रज्वलित हो रही है; हवि का होम करे ॥ ८८ ॥

शब्दाख्यं मातृकारूपमक्षवर्णविराजितम् ।
अक्षराणि हुतान्यत्र निःशब्दं ब्रह्म जायते ॥ ८९ ॥

(उपर्युक्त त्रिवली मेखला से युक्त कुण्ड की अग्नि में) अकार से लेकर क्षान्त वर्ण समुदाय, जो मातृका स्वरूप है, उसे शब्दब्रह्म नामक हवि से होम करे । उन अक्षरों के होम से शब्दरहित एक अनिर्वचनीय ब्रह्म उत्पन्न होता है ॥ ८९ ॥

कृत्याकृत्ये पापपुण्ये सङ्कल्पांश्च विकल्पकान् ।
धर्माधर्मौ साधकेन्द्रो हविस्त्वेन प्रकल्पयेत् ॥ ९० ॥

कृत्य-अकृत्य (कर्माकर्म), पाप-पुण्य, सङ्कल्प-विकल्प, धर्म और अधर्म को भी साधक हवि समझे ॥ ८७ ॥

मानसहोमः

चिदग्नौ जुहुयान्मन्त्री मूलान्तेन यथाक्रमात् ।
नाभिमण्डलचैतन्यरूपाग्नौ मनसा स्रुचा ॥ ९१ ॥

मन्त्रज्ञ साधक मातृका के अन्त में मूल मन्त्र लगाकर उस नाभि मण्डल चैतन्य रूप चिदग्नि में मन के स्रुचा से होम करे ॥ ९१ ॥

ज्ञानप्रदीपिते नित्यमक्षवृत्तीर्जुहोम्यहम् ।
वह्निजायान्तमन्त्रेण दद्याच्च प्रथमाहुतिम् ॥ ९२ ॥

'ज्ञानप्रदीपिते नित्यमक्षवृत्तीर्जुहोम्यहं स्वाहा'—इस मन्त्र को पढ़कर प्रथम आहुति प्रदान करे ॥ ९२ ॥

धर्माधर्महविर्दीप्त आत्माग्नौ मनसा स्रुचा ।
सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यमहम् ॥ ९३ ॥
वह्निजायान्तमन्त्रेण द्वितीयाहुतिमाचरेत् ।
प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनीस्रुचा ॥ ९४ ॥
धर्माधर्मौ कलास्नेहपूर्णवह्नौ जुहोम्यहम् ।
वह्निजायान्तमन्त्रेण तृतीयामाहुतिञ्चरेत् ॥ ९५ ॥

'धर्माधर्महविर्दीप्तो आत्माग्नौ मनसा स्रुचा । सुषुम्नावर्त्मना नित्यमक्षवृत्तीः जुहोम्यहं स्वाहा'—इस श्लोक मन्त्र को पढ़कर द्वितीय आहुति देवे । 'प्रकाशाकाशहस्ताम्यामवलम्ब्योन्मनी स्रुचा । धर्माधर्मौ कलास्नेहपूर्णवह्नौ जुहोम्यहं स्वाहा' —इस मन्त्र को पढ़कर तीसरी आहुति प्रदान करे ॥ ९३-९५ ॥

अन्तर्निरन्तरनिबन्धनमेधमाने
मायान्धकारपरिपन्थिनि सम्विदग्नौ ।
कस्मिंश्चिदद्‍भुतमरीचिविकाशि भूमौ
विश्वं जुहोमि वसुधादिशि वावसानम् ॥ ९६ ॥
इदन्तु पात्रभरितं महोत्तापपरामृतम् ।
पूर्णाहुतिमये वह्नौ पूर्णहोमं जुहोम्यहम् ॥ ९७ ॥
इत्यन्तर्यजनं कृत्वा साक्षाद्ब्रह्ममयो भवेत् ॥ ९८ ॥
महान्तर्यजनं वक्ष्ये ब्रह्मयज्ञस्वरूपकम् ॥ ९९ ॥

इसके बाद 'अन्तर्निरन्तर निबन्धनमेधमाने' से लेकर 'पूर्णहोमं जुहोम्यहम्' पर्यन्त श्लोक मन्त्र पढ़कर पूर्णाहुति करे । इस प्रकार से अन्तर्याग सम्पादन कर साधक साक्षात् ब्रह्ममय हो जाता है । अब ब्रह्मयज्ञस्वरूप वाले महान् अन्तर्यजन को कहता हूँ ॥ ९६-९९ ॥

### महान्तर्यजनम्

ब्रह्मयज्ञं महायज्ञं ब्रह्मज्ञानी यजेत् सदा ।
मनसा च मनो दृष्ट्वा यथा सिन्धुगता नदी ॥ १०० ॥
तथा सर्वशरीराणि महाशून्ये नियोजयेत् ।
यज्ञकर्त्ता महायोगी सर्वमन्त्रं जपेत् पुनः ॥ १०१ ॥

ब्रह्मज्ञानी मन से इस ब्रह्मयज्ञ स्वरूप महायज्ञ को करे । जिस प्रकार समुद्र में महानदी समाविष्ट होती दिखाई पड़ती है उसी प्रकार सारे शरीर को महाशून्य में

विलीन कर देवे। फिर यज्ञकर्ता महायोगी सर्वमन्त्र का जप करे ॥ १००-१०१ ॥

**आत्मस्थः सर्वयज्ञस्तु बहिर्यज्ञविवर्जितः ।**
**कर्मयज्ञो मनोयज्ञः प्राणयज्ञो हुताशनः ॥ १०२ ॥**

बहिर्यज्ञ को छोड़कर समस्त कर्मयज्ञ या मनोयज्ञ आत्मा में ही स्थित है जिसमें प्राणयज्ञ अग्नि है ॥ १०२ ॥

**मन्त्रयज्ञः सुषुम्नान्तः सर्वयज्ञफलं लभेत् ।**
**ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ॥ १०३ ॥**
**ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ।**
**ब्रह्मवत् सर्वमार्गेषु सर्वकर्म समभ्यसेत् ॥ १०४ ॥**

मन्त्रयज्ञ सुषुम्ना के भीतर होता है जिसके ध्यान से समस्त यज्ञों का फल प्राप्त हो जाता है। 'ब्रह्मार्पणं ब्रह्महवि.............ब्रह्मकर्म समाधिना' पर्यन्त श्लोक मन्त्र सुषुम्ना के भीतर यज्ञ में विनियुक्त करे। सभी मार्गों में सारे कर्म को ब्रह्म समझकर ही साधक उसका अभ्यास करे ॥ १०३-१०४ ॥

### बहिर्यागविधानम्

**अथ वक्ष्ये बहिर्यागविधानं तन्त्रवर्त्मना ।**
**एषामन्यतमं कृत्वा यन्त्रराजं समालिखेत् ॥ १०५ ॥**

तन्त्रशास्त्र के विधानानुसार आगे चलकर बहिर्याग का वर्णन करेंगे। अन्तर्याग तथा बहिर्याग इन दो प्रकार के यज्ञों में कोई भी एक यज्ञ का सम्पादन कर यन्त्रराज (श्रीचक्र) लिखे ॥ १०५ ॥

### चक्रराजलेखनविधिः

**स्वार्णे वा राजते ताम्रे पाषाणे चाष्टधातुषु ।**
**(यद्वा) गण्डकीतीरपाषाणे तथैव रुचिपीठके ॥ १०६ ॥**
**श्रीखण्डसम्भवे पीठे रक्तचन्दनसम्भवे ।**
**यद्वा सुवर्णरूप्यादौ ताम्रे वा दर्पणे तथा ॥ १०७ ॥**
**काश्मीरप्रभवे भूमौ यन्त्रं कुर्याद् यथाविधि ।**
**गोमयेन च संलिप्ते भूप्रदेशे मनोरमे ॥ १०८ ॥**

स्वर्णपत्र, रजतपत्र, ताम्रपत्र, पाषण अथवा अष्टधातुओं पर, यद्वा गण्डकी नदी के पाषाण पर उसी प्रकार रुचिपीठ, श्रीखण्ड निर्मित पीठ, रक्तचन्दन के पीठ, सुवर्ण चाँदी एवं ताम्र तथा दर्पण काश्मीरी भूमि (कुङ्कुम केशरयुक्त भूमि) पर शास्त्र के अनुसार यथारुचि यन्त्र का निर्माण करे अथवा गोमय से उपलिप्त शुद्ध

मनोहर भू प्रदेश पर यन्त्र का लेखन करे ॥ १०६-१०८ ॥

**सिन्दूररजसा वापि रक्ताभिः कुङ्कुमस्य वा ।**
**(यद्वा) शुद्धे समे भूर्जपत्रे अथवान्ये ताम्रपट्टके ॥ १०९ ॥**

सिन्दूर के चूर्ण से, रक्तवर्ण के रङ्ग से अथवा कुङ्कुम से शुद्ध एवं समतल भूर्जपत्र पर अथवा ताम्रपट्ट पर यन्त्र लिखे ॥ १०९ ॥

**शुष्के समे भूगृहे वा स्फटिके स्वर्णपट्टके ।**
**रत्ने वा कुलशक्तौ वा यन्त्रं कुर्यात् सुसाधकः ॥ ११० ॥**

अथवा उत्तम साधक सूखे हुये समतल भूप्रदेश में, स्फटिक पर, स्वर्णपट्ट पर अथवा रत्न पर अथवा कुलशक्ति पर साधक यन्त्र लिखे ॥ ११० ॥

**पट्टालकं विलिप्येत वक्ष्यमाणैकवस्तुना ।**
**स्वयम्भू कुसुमं कुण्डगोलोत्थं रोचनागुरुम् ॥ १११ ॥**
**काश्मीरं मृगनाभिञ्च मद्यञ्च मलयोद्भवम् ।**
**एष गन्धः समाख्यातः सर्वदा चण्डिकाप्रियः ॥ ११२ ॥**

यदि काष्ठफलक पर लिखना हो तो आगे कही जाने वाली वस्तुओं में किसी एक से उसे लिम्पन करे । स्वयम्भू पुष्प अथवा कुण्ड और गोल से उत्पन्न पुष्प अथवा रोचना (हल्दी) अथवा अगुरु, काश्मीर (केशर), मृगनाभि (कस्तूरी), मद्य अथवा मलयागिरि में उत्पन्न चन्दन—यह सब गन्धद्रव्य चण्डिका को अत्यन्त प्रिय बतलाया गया है ॥ १११-११२ ॥

**एतेन गन्धयोगेन चक्रराजं समालिखेत् ।**
**(यद्वा) स्वयम्भूकुसुमेनैव कुण्डगोलेन वा पुनः ॥ ११३ ॥**

इन गन्धों से युक्त कर साधक श्रीचक्र यन्त्र लिखे अथवा केवल स्वयम्भू पुष्प से अथवा केवल कुण्डगोल से उत्पन्न गन्ध से यन्त्र लिखे ॥ ११३ ॥

**तदा तस्य सर्वसिद्धिर्जायते नात्रसंशयः ।**
**(यद्वा) चन्दनागुरुचन्द्रेण सिन्दूररजसापि वा ॥ ११४ ॥**

इस प्रकार से यन्त्र लिखने पर साधक को निश्चय ही सिद्धि प्राप्त होती है इसमें संशय नही । चन्दन, अगुरु, कपूर अथवा सिन्दूर चूर्ण से भी यन्त्र लिखा जा सकता है ॥ ११४ ॥

**कस्तूरीघुसृणैर्द्रव्यै रोचनालाक्षयापि वा ।**
**(यद्वा) कुण्डगोलोद्भवैर्द्रव्यैः स्वयम्भूकुसुमेन च ॥ ११५ ॥**

कोमल कस्तूरी के सुगन्ध से, रोचना (हल्दी) से अथवा लाक्षा से यन्त्र लिखा जा सकता है अथवा कुण्ड-गोलोद्भव द्रव्य से अथवा स्वयम्भू पुष्प से भी यन्त्र लिखा जा सकता है ॥ ११५ ॥

**रोचनालाक्षया युक्तैः कुङ्कुमागुरुचन्दनैः ।**
**सुवर्णरत्नलेखन्या सर्वकार्यार्थसिद्धये ॥ ११६ ॥**

रोचना एवं लाक्षा संमिश्रित कुङ्कुम, अगुरु और चन्दन से, सुवर्ण, अथवा रत्न की लेखनी से लिखा जाने वाला यन्त्र साधक की सभी कामनाओं की पूर्त्ति कर देता है ॥ ११६ ॥

(यद्वा) **पुष्पेण विलिखेद्वापि यन्त्रराजं सुसाधकः ।**
**चन्द्रसूर्यातपं या वा अथवा बिल्वकण्टकैः ॥ ११७ ॥**
**चन्द्रसूर्यातपहोमोद्भवया विल्वकण्टकैः ।**
**एषामेकतमं लब्ध्वा स्वीययन्त्रं समुद्धरेत् ॥ ११८ ॥**

अथवा साधक केवल पुष्पों से ही श्रीयन्त्र निर्माण करे । चन्द्रसूर्यातप से अथवा बिल्व के काँटे से भी यन्त्र लिखना चाहिये । चन्द्रमा, सूर्य तथा अग्नि के होम किये गये काष्ठ शेष की लेखनी से अथवा बिल्वकण्टक में से किसी एक से अपने इष्ट श्रीयन्त्र का उद्धार करे ॥ ११७-११८ ॥

**सार्धत्रिकोटितीर्थेषु स्नात्वा यत् फलमाप्नुयात् ।**
**तत्फलं लभते वीरः कृत्वेष्टचक्रदर्शनम् ॥ ११९ ॥**

साढ़े तीन करोड़ तीर्थों में स्नान करने से जो फल प्राप्त होता है उतना फल केवल अपने इष्ट श्रीचक्र के दर्शन से वीर साधक प्राप्त कर लेता है ॥ ११९ ॥

**नालोच्य कुलजं वर्त्म न ज्ञात्वा सूत्रधारणम् ।**
**न ज्ञात्वा सुषमां रेखां नालिख्य सुषमं मुखम् ॥ १२० ॥**
**तस्य सर्वं हरेद्देवो योऽस्मिन् यन्त्रे प्रपूजकः ।**
**अथ वक्ष्ये च शाक्तानां सामान्यं यन्त्रमुत्तमम् ॥ १२१ ॥**

कुलमार्ग को बिना जाने हुये तथा सूत्र धारण के बिना एवं सुषमा रेखा को बिना जाने हुये और सुषम मुख को बिना लिखे हुये जो यन्त्र का पूजन करता है भगवती उसका सब कुछ हर लेती हैं । अब शाक्तों के लिये सामान्य किन्तु उत्तम यन्त्र निर्माण की विधि कहता हूँ ॥ १२०-१२१ ॥

### सामान्ययन्त्रनिर्माणविधिः

**यत्रापराजितापुष्पं जवापुष्पञ्च विद्यते ।**

**करवीरे रक्तशुक्ले द्रोणे वा यन्त्रराजके ॥ १२२ ॥**
**तत्र देवी वसेन्नित्यं तद्यन्त्रे चण्डिकार्चनं ।**
**पशोरालोकनं न स्यात्तथा कुर्यात् प्रयत्नतः ॥ १२३ ॥**

जहाँ अपराजिता पुष्प अथवा जवा (गुड़हल) का पुष्प हो वहाँ तथा करवीर (कनेर) एवं रक्त शुक्ल वर्ण के द्रोण (अगस्त पुष्प) अथवा श्रीचक्र रूप यन्त्रराज जहाँ हो वहाँ देवी का निवास रहता है । उस यन्त्र में चण्डिकार्चन इस प्रकार करना चाहिये कि पशु भी देख न सके । अतः साधक प्रयत्नपूर्वक श्रीयन्त्र की पूजा करे ॥ १२२-१२३ ॥



**यदि दैवात् पशोरग्रे लिखनं विद्यते क्वचित् ।**
**देव्यङ्गक्षतिरेवात्र क्रियते पापबुद्धिना ॥ १२४ ॥**

यदि दुर्भाग्यवश कहीं पशु के आगे ही यन्त्र लिखा गया तो उस पापबुद्धि ने भगवती के अङ्ग को क्षति ही पहुँचाई यन्त्र का लिखना तो दूर रहा ॥ १२४ ॥

**उत्तराशामुखो भूत्वा यदा चक्रं समुद्धरेत् ।**
**उत्तराशा तदा सापि मूर्वशैव न संशयः ॥ १२५ ॥**

जब उत्तरदिशा में होकर यन्त्र लिखे उस समय वह उत्तर दिशा पूर्वदिशा हो जाती है इसमें संशय नहीं ॥ १२५ ॥

ईशकोणं तदेव स्यादाग्नेयञ्च न संशयः ।
पश्चिमाशामुखो मन्त्री यथाचक्रं समुद्धरेत् ॥ १२६ ॥
पश्चिमाशा तदा ज्ञेया पूर्वाशैव न संशयः ।
वायुकोणं तदाग्नेयमीशानं राक्षसं भवेत् ॥ १२७ ॥

आग्नेयकोण ईशान कोण हो जाता है इसमें संशय नहीं । जब मन्त्रज्ञ पश्चिम दिशा में मुख कर यन्त्र निर्माण करता है उस समय वह पश्चिम दिशा पूर्व दिशा हो जाती है इसमें सन्देह न करे । उस समय आग्नेयकोण वायव्यकोण हो जाता है और नैर्ऋत्यकोण ईशानकोण हो जाता है ॥ १२६-१२७ ॥

दक्षिणाभिमुखो मन्त्री यदा चक्रं समुद्धरेत् ।
पूर्वाशैव तदा सा दिक् रक्षःकोणन्तु वह्निकम् ॥ १२८ ॥

जब मन्त्री दक्षिणाभिमुख होकर यन्त्र लिखे उस समय वह भी पूर्वदिशा हो जाती है और नैर्ऋत्यकोण भी अग्निकोण हो जाता है ॥ १२८ ॥

पूर्व्वाशाभिमुखो भूत्वा यदा चक्रं समुद्धरेत् ।
पूर्व्वाशापि तदा ज्ञेया पूर्व्वाशैव न संशयः ॥ १२९ ॥
आग्नेयञ्च तथाग्नेयं ईशकोणञ्च ईशकम् ।
यदाशाभिमुखो मन्त्री पूजयेच्चण्डिकां शुभाम् ॥ १३० ॥
पूर्वाशैव सा विज्ञेया साधकेन महात्मना ।
देवीपश्चात् प्रतीची स्यात् प्राची तु चण्डिकापुरः ॥ १३१ ॥

जब पूर्वाभिमुख होकर मन्त्रज्ञ साधक यन्त्र लिखे; उस समय वह पूर्व दिशा पूर्वदिशा ही रहती है और आग्नेयकोण आग्नेय तथा ईशानकोण अपने ईशानकोण में ही रहता है । जिस दिशा में होकर मन्त्री कल्याणकारिणी चण्डिका का पूजन करता है। उस समय महात्मा साधक उसे पूर्व दिशा ही समझे । देवी के पीछे का भाग पश्चिम हो जाता है और चण्डिका के आगे का समस्त भाग पूर्व दिशा के रूप में होता है ॥ १२९-१३१ ॥

अन्येषाञ्चैव देवानां विधिश्चात्र प्रकथ्यते ।
पूज्यपूजकयोरन्तः पूर्व्वाशैव निगद्यते ॥ १३२ ॥

अन्य देवताओं के विषय में अब दिग्विचार की विधि कहता हूँ । पूज्य और पूजक के मध्य में पूर्व दिशा कही जाती है ॥ १३२ ॥

लिखित्वा पुरतो यन्त्रं स्थापयेदासनोपरि ।
सीसके कांश्यपात्रे वा रङ्गे वा साधकोत्तमः ॥ १३३ ॥

अपने सामने यन्त्र लिखकर उसे आसन पर स्थापित करे । सीसा पर, कांस्यपात्र में अथवा किसी रंग (वस्त्र) में स्थापित करे ॥ १३३ ॥

फलकायां पटे भित्तौ स्थापयेन्न कदाचन ।
स्थापितं यदि लोभेन मोहेनाज्ञानतोऽपि वा ॥ १३४ ॥
कुलं वित्तमपत्यञ्च निर्मूलं याति सर्वथा ।
पुष्पं तत्र विनिक्षिप्य गन्धचन्दनसंयुतम् ॥ १३५ ॥

फलक पट (लकड़ी) अथवा भीत पर कदापि न रखे, यदि लोभवश मोहवश अथवा अज्ञान से वहाँ स्थापित कर दिया गया तो साधक का कुल वित्त सन्तान सर्वथा निर्मूल हो जाता है । इस प्रकार यन्त्र स्थापित कर गन्ध चन्दनयुक्त पुष्प उस पर अवश्य चढ़ा देना चाहिए ॥ १३५ ॥

अशून्यं स्थापयेच्चक्रं शून्ये विघ्नसमो भवेत् ।
स्वकल्पोक्तविधानेन देवीं ध्यात्वा सुसाधकः ॥ १३६ ॥
आत्माभेदेन सम्भाव्य पुष्पं दद्यात् स्वमूर्द्धनि ॥ १३७ ॥

॥ इति श्रीमज्ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये तृतीयोल्लासः ॥३॥

श्रीचक्र को किसी भी प्रकार सर्वथा शून्य (बनाकर बिना पूजा के छोड़कर) नहीं रखना चाहिए । शून्य रखने से साधक को विघ्न होता है । साधक को अपने सम्प्रदायानुसार देवी का ध्यान कर अपनी आत्मा से उसे अभिजन समझकर यन्त्र पर चढ़ाये गये उस पुष्प को अपने मस्तक पर रखना चाहिये ॥ १३६-१३७ ॥

**महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय के ज्येष्ठ पुत्र पण्डित रामरञ्जन मालवीय कृत श्रीमज्ज्ञानानन्द परमहंस विरचित कौलावलीनिर्णय नामक तन्त्र के तृतीय उल्लास की निरञ्जन हिन्दी व्याख्या पूर्ण हुई ॥ ३ ॥**

# चतुर्थ उल्लासः

मन्त्रविधानम्

अथ वक्ष्ये च मन्त्राणां विधानं यत्र यद्भवेत् ।

देवताभेदे वामदक्षिणभेदेन पूजाविधिः

बालां वा त्रिपुरां देवीं सव्यां वाप्यथ भैरवीम् ॥ १ ॥
कामेश्वरीञ्च कामाख्यां पूजयेच्च यथेच्छया ।
दाक्षिण्याद्वामभावाद्वा सर्वथा सिद्धिमाप्नुयात् ॥ २ ॥

जहाँ जिस प्रकार का मन्त्र होना चाहिये उन मन्त्रों का विधान कहता हूँ । बाला त्रिपुरादेवी भैरवी कामेश्वरी कामाख्या इन्हें चाहे बायें चाहे दाहिने यथेच्छ पूजा करे । साधक दाहिने तथा बायें किसी प्रकार भी इनकी पूजा करने से सिद्धि प्राप्त कर लेता है ॥ १-२ ॥

महामायां शारदाञ्च शैलपुत्रीं तथाम्बिकाम् ।
यथा तथा प्रकारेण वामदक्षिणतो यजेत् ॥ ३ ॥

महामाया, शारदा, शैलपुत्री और अम्बिका इनको भी जिस किसी भी प्रकार से बायें तथा दाहिने पूजा करे ॥ ३ ॥

श्मशानभैरवीं कालीं उग्रताराञ्च पञ्चमीम् ।
उच्छिष्टभैरवीञ्चैव तारां त्रिपुरसुन्दरीम् ॥ ४ ॥
उन्मुखीञ्चैव दुर्गाञ्च मर्दिनीं स्वप्नबोधिनीम् ।
एतास्तु वामभावेन पूज्या दक्षिणतां विना ॥ ५ ॥

श्मशानभैरवी, काली, उग्रतारा, पञ्चमी उच्छिष्टभैरवी, तारा, त्रिपुरसुन्दरी, उन्मुखी, दुर्गा, (महिष)मर्दिनी, स्वप्नबोधिनी इनका पूजन बाईं ओर से करे । दक्षिण ओर से न करे ॥ ४-५ ॥

सिद्धिर्न जायते दक्षाल्लक्षजन्म यजेद् यदि ।
वामात् सर्वसमृद्धिः स्याद्देव्याः प्रियतरो भवेत् ॥ ६ ॥

इनकी दाहिनी ओर से पूजा करते रहने से सिद्धि कदापि प्राप्त नहीं होती चाहे लाखों जन्म पर्यन्त पूजा क्यों न करे ? इनकी बाईं ओर से पूजा करने पर साधक को सब प्रकार की समृद्धि प्राप्त होती है । ऐसा साधक देवी का अत्यन्त प्रियपात्र हो जाता है ॥ ६ ॥

**दक्षिणेन लभेच्छापं मृते नरकमाप्नुयात् ।**
**ब्रह्मापि च भवेद्वामो विष्णुश्चैव सदाशिवः ॥ ७ ॥**

दक्षिण भाग में इनकी पूजा करने से साधक को शाप का भागी होना पड़ता है और मरने पर नरक का भागी होना पड़ता है । इसी प्रकार ब्रह्मा, विष्णु और सदाशिव को कदापि बाईं ओर स्थापित न करे ॥ ७ ॥

**विष्णोश्च वामिका मूर्त्तिर्नारसिंहान्वयो भवेत् ।**
**सा तु दक्षिणवामाभ्यां पूजनीया प्रयत्नतः ॥ ८ ॥**

विष्णु की बाईं ओर स्थापित मूर्त्ति नृसिंह स्वरूपा हो जाती है । अतः वह बाईं अथवा दाहिनी दोनों ओर स्थापित कर प्रयत्नपूर्वक पूजा करनी चाहिये ॥ ८ ॥

**तथैव बालगोपालमूर्त्तिर्या परमात्मनः ।**
**मत्स्यमांसासवाभोगी लोलुपः स्त्रीषु सर्वदा ॥ ९ ॥**

उसी प्रकार परमात्मा की बालगोपाल मूर्त्ति है वह मत्स्य, मांस, आसव का भोग करने वाली है और स्त्रियों में सदा लोलुप रहने वाली है ॥ ९ ॥

**गणेशोऽपि च वेतालः कथितो वामनायकः ।**
**भैरवोऽपि भवेद्वामस्तथान्ये देवतादयः ॥ १० ॥**

गणेश एवं वेताल वामनायक कहे जाते हैं, अतः भैरव तथा अन्य देवता वाम भाग में स्थापित करे ॥ १० ॥

**एतास्तु वामभावेन पूजनीया विशेषतः ।**
**अन्याश्च चण्डिकादेव्या बालिकामूर्तयः स्मृताः ॥ ११ ॥**

इन सभी देवताओं को वामभाग में स्थापित कर विशेष रूप से पूजन करना चाहिये । अन्य चण्डिकादि की मूर्त्ति बालिकामूर्त्ति कही जाती है । ११ ॥

**लक्ष्म्याद्या वामिकामूर्त्ती रक्ता च दशभैरवी ।**
**वाग्भवी च सरस्वत्या बालिकामूर्तिरीरिता ॥ १२ ॥**

लक्ष्मी आदि वामिका मूर्त्ति, रक्ता, दश भैरवी वाग्भवी एवं सरस्वती की मूर्त्ति बालिकामूर्त्ति कही जाती है ॥ १२ ॥

**वामभावेन सिद्धिः स्याद्दाक्षिण्येन विना कदा ।**
**पूजकोऽपि भवेद्वामस्तथैव सततं गुरुः ॥ १३ ॥**

इनकी वामभाव से पूजा करने पर ही सिद्धि प्राप्त होती है । दक्षिणभाग में स्थापित करने से कब किस प्रकार किसी को सिद्धि प्राप्त हुई है ? इसी प्रकार पूजा करने वाला भी बाईं ओर रहे, गुरु भी बाईं ओर रहने चाहिये ॥ १३ ॥

**यजेच्च मांसमत्स्येन मैथुनाद्यैर्विशेषतः ।**
**महाभैरवरूपेण तथा च रतिसङ्गमे ॥ १४ ॥**

साधक रति सङ्गमकाल में भैरव का स्वरूप बनाकर (रहस्यात्मक) मांस, मछली तथा मैथुन से इनकी पूजा करे ॥ १४ ॥

**नान्यथा जायते सिद्धिर्मन्त्राणाञ्च सुनिश्चियतम् ।**
**अथातः सम्प्रवक्ष्यामि पञ्चतत्त्वविनिर्णयम् ॥ १५ ॥**

अन्यथा मन्त्रों की सिद्धि नहीं होती । यह सुनिश्चित है । अब पञ्चतत्त्व का निर्णय कह रहा हूँ ॥ १५ ॥

### पञ्चतत्त्वविधानम्

**अथ वक्ष्ये च पञ्चानां विधानं तन्त्रवर्त्मना ।**
**पञ्चमात्तु परं नास्ति शाक्तानां सुखमोक्षयोः ॥ १६ ॥**
**केवलैः पञ्चमैरेव सिद्धो भवति साधकः ।**
**केवलेनाद्ययोगेन साधको भैरवो भवेत् ॥ १७ ॥**

अब तन्त्र मार्गानुसार पञ्चतत्त्व का विधान कह रहा हूँ । शाक्तों के लिये सुख और मोक्ष प्रदान करने के लिये पाँचवें (मैथुन) से बढ़कर और कोई तत्त्व नहीं है। साधक केवल पञ्चम तत्त्व (मैथुन) के प्रयोग से सिद्ध हो जाता है । केवल आद्य तत्त्व मद्य के प्रयोग से साधक भैरव हो जाता है ॥ १६-१७ ॥

**द्वितीयेन च तत्त्वेन पूजको ब्रह्मरूपभाक् ।**
**केवलेन तृतीयेन महाभैरवतां व्रजेत् ॥ १८ ॥**

द्वितीय तत्त्व के प्रयोग से साधक ब्रह्मस्वरूप बन जाता है । केवल तृतीय मत्स्य तत्त्व के सेवन से महाभैरवता प्राप्त कर लेता है ॥ १८ ॥

**चतुर्थेन तु तत्त्वेन भुवि पूजकनायकः ।**
**परेण परतां याति शिवतुल्यः स साधकः ॥ १९ ॥**

चौथे तत्त्व मुद्रा के सेवन से साधक पृथ्वी पर सर्वश्रेष्ठ पूजकों का नायक बन जाता है । (शिवशक्तिसामरस्य रूप) अन्य तत्त्वों के प्रयोग से वह साधक

शिवतुल्य पर स्वरूप बन जाता है ॥ १९ ॥

**पञ्चमे न भवेद्भोगी सर्वसिद्धिपरायणः ।**
**यस्य भवेद्यदा नित्यं पञ्चतत्त्वस्य सम्भवः ॥ २० ॥**
**पञ्चतत्त्वे भवेद्वीरः शिववन्द्यः स साधकः ।**

पाँचवें मैथुन तत्त्व के प्रयोग से साधक भोगी और सभी सिद्धियाँ प्राप्त कर लेता है । जिससे उसको निरन्तर पञ्च तत्त्व की प्राप्ति होती रहती है । पाँचों तत्त्व के सेवन से साधक वीर और शिव से भी वन्दनीय हो जाता है ॥ २० ॥

**पञ्चतत्त्वविहीना पूजा निष्फला**

**पञ्चमेन विना देवीं पञ्चमीं पूजयेत्तु यः ॥ २१ ॥**
**स तु स्याड्डाकिनीभोग्यो नारकी ब्रह्मघातकः ।**
**अन्यमूर्तेस्तु दुर्गायाः पञ्चमेन विना सदा ॥ २२ ॥**
**निश्चितं नैव सिद्धिः स्याज्जपहोमाश्च तर्पणात् ।**
**तद्विहीनस्य या पूजा जपं वा तर्पणं पुनः ॥ २३ ॥**
**रौरवाय भवत्येव तस्य भ्रष्टस्य निश्चितम् ।**
**चण्डिकां पूजयेद्यस्तु विना पञ्चमकारकैः ॥ २४ ॥**
**चत्वारि तस्य नश्यन्ति आयुर्विद्या यशो धनम् ।**
**मकारपञ्चकं चैव देवताप्रीतिकारकम् ॥ २५ ॥**

पञ्चम तत्त्व के बिना जो पञ्चमी देवी का पूजन करता है, वह डाकिनियों का भोजन एवं नारकी और ब्रह्मघ्न हो जाता है । अन्य मूर्तियों की अपेक्षा दुर्गा की पञ्चम तत्त्व के बिना जप, होम और तर्पण करने पर भी निश्चित रूप से सिद्धि नहीं प्राप्त होती । पञ्चम तत्त्व से रहित जप, पूजा और तर्पण उस भ्रष्ट साधक के रौरव का कारण बन जाते हैं । जो पञ्चम तत्त्व के बिना चण्डिका की पूजा करता है उसके चारो आयु, विद्या, यश और धन नष्ट हो जाते हैं । अतः पाँचों मकार देवताओं की प्रीति करने वाले होते हैं ॥ २१-२५ ॥

**पञ्चमेन तु वीरेन्द्रः सर्वपापैः प्रमुच्यते ।**
**मद्यं मांसं तथा मत्स्यं मुद्रा मैथुनमेव च ॥ २६ ॥**
**मकारपञ्चकं देवि देवताप्रीतिदायकम् ।**
**विना पञ्चोपचारं हि देवीपूजां करोति यः ॥ २७ ॥**
**योगिनीनां भवेद्भक्ष्यः पापङ्चैव पदे पदे ।**

पञ्चम तत्त्व के सेवन से वीरेन्द्र साधक सभी पापों से मुक्त हो जाता है । मद्य, मांस, मत्स्य, मुद्रा और मैथुन—ये पञ्च मकार, हे देवि! देवताओं को प्रसन्न करने

वाले हैं। बिना पञ्चोपचार के जो देवी की पूजा करता है वह योगिनियों का भक्ष्य हो जाता है और उसे पद-पद पर पाप लगता है अतः बिना मद्य और मांस के देवी की सेवा न करे ॥ २६-२८ ॥

**विना मांसेन मद्येन ना से नं श्च वि ली व पुम् ॥ २८ ॥**
**न मन्त्रसिद्धिमाप्नोति तस्माद् यत्नपरो भवेत् ।**
**प्रमादाद्यदि लुप्येत देवताशापमाप्नुयात् ॥ २९ ॥**

यतः मद्य और मांस के बिना सिद्धि प्राप्त नहीं होती। इसलिये इसके लिये इनसे पूजा करने का प्रयत्न करना चाहिये। प्रमादवश यह पूजा यदि नही होती तो देवता का शाप प्राप्त होता है ॥ २८-२९ ॥

**यथाविधि यजेद्देवीं मकारपञ्चकैः सदा ।**
**तृप्त्यर्थं सर्वदेवानां तत्त्वज्ञानोद्भवाय च ॥ ३० ॥**

साधक पञ्चमकारों से विधानपूर्वक देवी की पूजा करे। जिससे देवताओं की तृप्ति हो और तत्त्वज्ञान भी हो ॥ ३० ॥

मद्यादिलक्षणविधानम्

**तेषाञ्च लक्षणं वक्ष्ये शोधनञ्च क्रमेण तु ।**
**मद्यस्य लक्षणं वक्ष्ये साधकानां हिताय च ॥ ३१ ॥**

अब मद्यादि का लक्षण और शोधन क्रमशः दोनों कहता हूँ। सर्वप्रथम मद्य का लक्षण साधकों के हित के लिये कहता हूँ ॥ ३१ ॥

**सत्ये क्रमाच्चतुर्वर्णैः क्षीराज्यमधुपिष्टकैः ।**
**त्रेतायां पूजिता देवी घृतेन सर्वजातिभिः ॥ ३२ ॥**
**मधुभिः सर्ववर्णैश्च पूजिता द्वापरे युगे ।**
**पूजनीया कलौ देवी केवलैरासवैश्च तैः ॥ ३३ ॥**

सतयुग में चारो वर्ण क्रमशः दूध, घी, मधु और पिष्टक (दही) से, त्रेता में चारो वर्ण केवल घृत से, द्वापर युग में समस्त वर्ण मधु से, किन्तु कलियुग में चारों वर्णों को केवल आसव से उनकी पूजा करनी चाहिये ॥ ३२-३३ ॥

**चतुर्युगेषु सम्पूज्या तुरीयैरासवैः सदा ।**
**तत्तु नानाविधं द्रव्यं कथ्यते तन्त्रवर्त्मना ॥ ३४ ॥**

अथवा चारों युगों में चौथे आसव मात्र से चारो वर्णों को पूजा करनी चाहिये यह मद्य तन्त्र के मार्ग से अनेक द्रव्यों के रूप में कहा गया है ॥ ३४ ॥

**वार्क्ष गौडं तथा पौष्पं क्षौद्रं फलसमुद्भवम् ।**

**सर्वोत्कृष्टं तु विज्ञेयं द्रव्यमन्नेन सम्भवम् ॥ ३५ ॥**

वृक्ष से उत्पन्न, गुड़ का पुष्प का, क्षौद्र (मुनक्का) एवं फलों का मद्य बताया गया है। किन्तु अन्न रूप द्रव्य का मद्य सर्वोत्तम कहा गया है ॥ ३५ ॥

(अथवा) **पत्रपुष्पाङ्कुरफलमूलवल्कलधान्यजम् ।**
**रसं वृक्षलताजातमैक्षवं दशविधं स्मृतम् ॥ ३६ ॥**

अथवा वृक्षपत्र पुष्प, अङ्कुर फल मूल वल्कल तथा धान्य से मद्य बनता है। इसी प्रकार लतासमूहों तथा ईक्षु (ऊख) के रस से भी दश प्रकार का मद्य बनाया जाता है ॥ ३६ ॥

**पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् ।**
**मधूत्थं सीधु माध्वीकं मैरेयं नारिकेलजम् ॥ ३७ ॥**
**मद्यान्येकादशैतानि भुक्तिमुक्तिकराणि च ।**
**द्वादशं तु सुरामद्यं सर्वेषामुत्तमोत्तमम् ॥ ३८ ॥**

पनस (कटहल) से, द्राक्षा (मुनक्का) से, महुआ से, खजूर से, तालवृक्ष से, ऊख से भी मद्य बनाया जाता है। मधु से उत्पन्न मद्य, सीधु माध्वीक, नारिकेलज और मैरेय इस प्रकार ग्यारह प्रकार के मद्य कहे गये हैं जो भक्ति और मुक्ति दोनों प्रदान करते हैं। किन्तु बारहवाँ सुरामद्य उत्तमोत्तम है ॥ ३७-३८ ॥

**मधुपुष्परसोद्भूतमासवं तण्डुलोद्भवम् ।**
**सर्वसिद्धिकरी पैष्टी गौडी भोगप्रदायिणी ॥ ३९ ॥**

महुवे के फूल का बना हुआ मद्य तथा चावल का बना हुआ मद्य सभी सिद्धियाँ प्रदान करता हैं। पैष्टी और गौडी मद्य भोगप्रदान करते हैं ॥ ३९ ॥

**माध्वी मुक्तिकरी प्रोक्ता खार्जूरी रिपुनाशिनी।**
**नारिकेलोद्भवा श्रीदा ऐक्षवं सुखवर्द्धनम् ॥ ४० ॥**

माध्वी मद्य मुक्ति प्रदान करने वाला कहा गया है। खार्जूरी मद्य शत्रु का नाशक है और नारिकेल का मद्य भी प्रदान करता है, ऐक्षव (गन्ने का) मद्य सुख बढ़ाता है ॥ ४० ॥

**अन्यत्रापि—**

**गौडी पिष्टकजाततालतरुजा द्राक्षी च माध्वी तथा**
**खार्जूरी नवनारिकेल तरुजा गौडी च भोगप्रदा ।**
**पैष्टी सिद्धिकरी विपक्षदलनी ताली च द्राक्षी शुभा**
**अन्या या विहिता सदा शुभकरी मोक्षप्रदाः सप्तिकाः॥ ४१ ॥**

अन्यत्र भी कहा गया है—गौड़ी, पैष्टी, तालवृक्षोद्भवा, द्राक्षा, माध्वी, खर्जूरी, नवीन नारिकेल से उत्पन्न और गौडी मद्य भोग प्रदान करते हैं; पैष्टी मद्य सिद्धि प्रदान करता है। ताड़ का मद्य विपक्ष का नाशक है और द्राक्षी (अङ्गूर) कल्याण कारक है। अन्य विहित सात प्रकार के मद्य शुभ तो करते ही हैं; मोक्ष भी प्रदान करते हैं ॥ ४१ ॥

**अपक्वैश्च सुपक्वैश्च द्रव्यैरमृतसन्निभैः ।**
**तर्पणं परमेशान्याः सर्वकामफलप्रदम् ॥ ४२ ॥**

इस प्रकार अमृत के समान पके हुये अथवा बिना पके हुये द्रव्यों से बने उपर्युक्त मद्यों द्वारा परमेशानी को किया गया तर्पण समस्त कामनाओं को पूर्ण करता है और वाञ्छित फल प्रदान करता है ॥ ४२ ॥

### पञ्चशुद्धिविधानम्

**आत्मस्थानमनुद्रव्यदेहशुद्धिञ्च पञ्चमीम् ।**
**यावन्न कुरुते मन्त्री तावद्देवार्चनं कुतः ॥ ४३ ॥**

आत्मशुद्धि, स्थानशुद्धि, मन्त्रशुद्धि, द्रव्यशुद्धि और पाँचवीं देह शुद्धि जब तक साधक न कर लेवे तब तक उसका पूजा में अधिकार नहीं होता ॥ ४३ ॥

**असंस्कृतं पिबेद् द्रव्यं बलात्कारेण मैथुनम् ।**
**स्वप्रियेण हतं मांसं रौरवं नरकं व्रजेत् ॥ ४४ ॥**
**संशोधनमनाचर्य स्त्रीषु मद्येषु साधकः ।**
**कृतेऽपि सिद्धिहानिः स्यात् क्रुद्धा भवति चण्डिका ॥ ४५ ॥**

जो साधक स्त्री के विषय में बलात्कार से मैथुन करता है तथा मद्यों के विषय में संशोधन बिना किये ही उनका प्रयोग करता है उसके प्रयोग से साधक को हानि उठानी पड़ती है। क्योंकि ऐसा करने से चण्डिका कुपित हो जाती हैं और वह अपने प्रिय के साथ रौरव नरक में जाता है ॥ ४५ ॥

### सुराशोधनकथनम्

**तस्मात् संशोधनं वक्ष्ये यथा तन्त्रानुसारतः ।**
**वामभागे च षट्कोणं तन्मध्ये ब्रह्मरन्ध्रकम् ॥ ४६ ॥**

इस कारण मैं तन्त्रशास्त्र की विधि के अनुसार उनके संशोधन का प्रकार कह रहा हूँ। वामभाग में षट्कोण का निर्माण करना चाहिए और उसके मध्य में ब्रह्मरन्ध्र निर्माण करना चाहिए ॥ ४६ ॥

**तद्बाह्ये मण्डलं कृत्वा चतुरस्रं समालिखेत् ।**

**सामान्यार्घ्यजलेनैव प्रोक्षयेन्मण्डलं ततः ॥ ४७ ॥**

उसके बाद गोला खींच कर चतुरस्र लिखे। तदनन्तर सामान्य अर्घ्य जल से उस मण्डल पर जल छिड़के ॥ ४७ ॥

**अभ्यर्च्याधारशक्तिञ्च कुम्भस्याधारमास्तरेत्।**
**तत्र सम्पूजयेद् वह्निमण्डलं तदनन्तरम् ॥ ४८ ॥**

वहाँ आधारशक्ति का पूजन कर कलश के लिये आधार स्थान आस्तृत करे। तदनन्तर वहाँ वह्निमण्डल का पूजन करे ॥ ४८ ॥

**कुम्भनिर्माणविधिः**

**तत्र संस्थापयेत् कुम्भं सौवर्णं राजतं तथा।**
**ताम्रं भूमिमयंवापि यद्वा लौहविवर्जितम् ॥ ४९ ॥**

उस आधार पर सुवर्ण, अथवा रजत, अथवा ताँबा, अथवा मिट्टी का, अथवा धातुओं में लोहा छोड़कर जिस किसी भी द्रव्य से बने हुये कलश को स्थापित करना चाहिए ॥ ४९ ॥

**सौव्वर्णं भोगदं प्रोक्तं राजतं मोक्षदं भवेत्।**
**कांस्यं शान्तिकरञ्चैव मृण्मयं पुष्टिदं तथा ॥ ५० ॥**

सुवर्ण निर्मित कलश भोग प्रदान करता है, रजत का कलश मोक्ष, कांसे का कलश शान्तिकारक तथा मिट्टी का कलश पुष्टि प्रदान करने वाला है ॥ ५० ॥

**पञ्चाशदङ्गुलायाम उत्सेधः षोडशाङ्गुलः।**
**कलसानां प्रमाणं तु मुखमष्टाङ्गुलं भवेत् ॥ ५१ ॥**

उस कलश की गोलाई पचास अङ्गुल, ऊँचाई सोलह अङ्गुल होनी चाहिये। यह कलश का प्रमाण कहा गया। किन्तु उस कलश का मुख आठ अङ्गुल का होना चाहिये ॥ ५१ ॥

**एषामेकतमं कुम्भं अस्त्रेण क्षालितं ततः।**
**आधारे स्थापयित्वा तु पूजयेत् सूर्यमण्डलम् ॥ ५२ ॥**

उपर्युक्त कहे हुये कलशों में किसी एक कलश को लेकर 'अस्त्राय फट्' इस मन्त्र से प्रक्षालन करना चाहिये। पुनः उसे आधारस्थान पर स्थापित कर सूर्यमण्डल की पूजा करे ॥ ५२ ॥

**ततश्च कारणैर्दिव्यैः पूरयेन्मूलमुच्चरन्।**
**भूषयेद्रक्तपुष्पेण रक्तमाल्येन साधकः ॥ ५३ ॥**

रक्तवस्त्रेण संवेष्ट्य लेपयेद्रक्तचन्दनैः ।
सोममण्डलमभ्यर्च्य अमृतं परिभाव्य च ॥ ५४ ॥

फिर मूल मन्त्र का उच्चारण कर, दिव्य, सर्वकारणभूत जल (मद्य) से उसे पूर्ण करे । रक्त पुष्प और रक्तमाला से विभूषित करे । फिर लाल कपड़े से उसे वेष्टित करे और रक्तचन्दन का लेप करे । फिर सोम मण्डल की पूजा कर वहाँ से अमृतत्त्व प्राप्ति का ध्यान करे ॥ ५३-५४ ॥

चतुरस्रादिका पञ्चमुद्राः

विभावयेत्ततो द्रव्यमिष्टदेवस्वरूपकम् ।
प्रणमेद् भक्तिभावेन मुद्राभिः पञ्चसञ्ज्ञकैः ॥ ५५ ॥

इसके बाद द्रव्य (मद्य) को इष्टदेव के स्वरूप में ध्यान करे और भक्तिभाव से पञ्चसञ्ज्ञक मुद्राओं से उसे प्रणाम करे ॥ ५५ ॥

अधोमुखौ समौ कृत्वा भूमौ पाणितलद्वयम् ।
सकलाङ्गुलिभिः सम्यङ्मुद्रेयं चतुरस्त्रिका ॥ ५६ ॥

**१. चतुरस्त्रिका मुद्रा**—सम्पूर्ण अङ्गुलियों के साथ दोनों हाथ के तलवों को बराबर कर अधोमुख स्थापित करे तो यह चतुरस्त्रिका मुद्रा कही जाती है । ५६ ॥

अधोमुखं मुष्टियुग्मं संवृत्तं परिकीर्त्तितम् ।
अन्योन्याभिमुखौ हस्तौ पुटाकारेण कारयेत् ॥ ५७ ॥
सम्पुटाख्यमहामुद्रा योजिता नतिकर्मणि ।
एतस्या एव मुद्रायाः कनिष्ठामूलदेशके ॥ ५८ ॥
अङ्गुष्ठौ च क्षिपेत्तत्र सम्पुटाञ्जलिरीरिता ।
मध्यमे सरले कृत्वा तर्जन्युपरि संस्थिते ॥ ५९ ॥
अनामिकामध्यगते तथैव हि कनिष्ठिके ।
सर्वा एकत्र संयोज्य अङ्गुष्ठपरिपीडिता ॥ ६० ॥
एषा तु परमा मुद्रा योनिमुद्रा प्रकीर्तिता ।

**२. संवृत्त मुद्रा**—दोनों हाथ की मुट्ठियों को अधोमुख स्थापित करे तो संवृत्त मुद्रा हो जाती है ।

**३. सम्पुट मुद्रा**—दोनों हाथों को परस्पर सम्मुख कर पुट के आकार में संयुक्त कर बनावे तो वह सम्पुट नामक मुद्रा बन जाती है । नमस्कार कर्म में इसका प्रयोग किया जाता है ।

**४. सम्पुटाञ्जलि मुद्रा**—इसी मुद्रा को बनाकर दोनों कनिष्ठा अङ्गुली के

मूल प्रदेश में दोनों अङ्गूठो को लगा देवे तो वह सम्पुटाञ्जलि मुद्रा कही जाती है।

**५. परमा मुद्रा**—दोनों मध्यमा को सीधे रखकर उस पर तर्जनी अङ्गुली लगा देवे। इसी प्रकार दोनों अनामिका के मध्य में दोनों कनिष्ठा को स्थापित कर अङ्गुष्ठ से परिपीडित कर सब को एक में मिला देवे। यह परमामुद्रा कही जाती है। योनिमुद्रा पहले कह आये हैं ॥ ५७-६१ ॥

**पञ्चमुद्रामन्त्रकथनम्**

**ह्रां नमश्चतुरस्त्रं स्यात् ह्रीं नमः संवृतस्तथा ॥ ६१ ॥**
**क्लां नमः सम्पुटं ज्ञेयं ब्लूं नमः सम्पुटाञ्जलिम् ।**
**सः नमो योनिमुद्रा स्यात् पञ्चमुद्राः प्रकीर्तिताः ॥ ६२ ॥**

चतुरस्त्र मुद्रा में 'ह्रां नमः', संवृत्त मुद्रा में 'ह्रीं नमः, सम्पुट मुद्रा में क्लीं नमः, सम्पुटाञ्जलि में 'ब्लू नमः' तथा योनि मुद्रा में सः नमः पढ़े। इस प्रकार मन्त्रों के सहित पाँचों मुद्रायें कही गई ॥ ६१-६२ ॥

**भक्त्या विलोकयेद् द्रव्यं मूलमन्त्रं समुच्चरन् ।**
**प्रणवं वरुणं सेन्दु वामदेवञ्च ङेयुतम् ॥ ६३ ॥**
**वौषडन्तं समुच्चार्य पूजयेत् यन्त्रमुत्तमम् ।**

तदनन्तर साधक मूल मन्त्र का उच्चारण करते हुये भक्तिपूर्वक मकारादि पञ्चद्रव्यों को देखे। प्रथम प्रणव (ॐ) विन्दु सहित वरुण (व) चतुर्थ्यन्त वामदेव (वामदेवाय) और अन्त में 'वौषट्' का उच्चारण करे। 'ॐ वं वामदेवाय वौषट्। इस मन्त्र से श्रीचक्र यन्त्र का पूजन करे ॥ ६३-६४ ॥

**विषं कूर्चं ततः पशुपतये तदनन्तरम् ॥ ६४ ॥**
**अस्त्राय वर्मबीजञ्च फट्कारान्तः परो मनुः ।**
**अनेनादौ प्रपूज्यैव पथिकस्य बलिं हरेत् ॥ ६५ ॥**

विषं (वं), कूर्च (हूं), तदनन्तर 'पशुपतये', तदनन्तर 'अस्त्राय', फिर वर्मबीज (हूं), तदनन्तर 'फट्' यह मन्त्र है। यथा—ॐ वं हूं पशुपतये अस्त्राय हूं फट्—यह मन्त्र है। इस मन्त्र से पूजा कर पथिक को बलि प्रदान करे ॥ ६४-६५ ॥

**त्रिकोणवृत्तभूगेहं लिखेत् कुम्भसमीपतः ।**
**सिन्दूरकुङ्कुमाभ्याञ्च सर्वपथिकदेवताः ॥ ६६ ॥**

कुम्भ के समीप पहले त्रिकोण, उसके बाद वृत्त, उसके बाद भूगेह लिखकर, सिन्दूर और कुङ्कुम से सभी पथिक देवताओं की पूजा कर, तदनन्तर उन्हें बलि प्रदान करे ॥ ६६ ॥

तत्र सम्पूजयित्वा च बलिं दद्यात्ततः परम् ।
सहेतुं सामिषान्नञ्च निधाय मनुमुद्धरेत् ॥ ६७ ॥
मायां लक्ष्मीं समुद्धृत्य सर्वपथिकदेवता ।
भ्यो हृन्मनुं समुच्चार्य अनेनोत्सृज्य साधकः ॥ ६८ ॥
उद्धृत्य वामहस्तेन भ्रामयेत् कलशोपरि ।
ततः क्षिप्त्वा बहिःस्थाने मूलमन्त्रं समुच्चरन् ॥ ६९ ॥

सहेतु 'मद्ययुक्त' सामिष अन्न स्थापित कर माया (ह्रीं), लक्ष्मी (श्रीं), फिर सर्वपथिक देवताभ्यो, फिर हृन्मन्त्र नमः उच्चारण करे । यथा—'ह्रीं श्रीं सर्वपथिक-देवताभ्यो नमः'—साधक इस मन्त्र को पढ़कर बलि देवे । फिर बायें हाथ से उस अन्न को कलश पर घुमावे । उसे किसी बाहरी स्थान में मूलमन्त्र का उच्चारण कर फेंक देवे ॥ ६७-६९ ॥

विकारहारिणीमन्त्रोद्धारः

धूपयित्वा ततो द्रव्यं विकारान्नाशयेत्ततः ।
मायां लक्ष्मीं पशुद्वन्द्वं सेन्दु दीर्घद्वयान्वितम् ॥ ७० ॥
छुरिका मेति शोभिनि विकारानस्य चान्तरम् ।
द्रव्यस्य हरयुग्मञ्च द्विठान्तं प्रजपेन्मनुम् ॥ ७१ ॥

फिर धूप देकर द्रव्य के विकारों को नष्ट कर देवे । विकारों के नाश करने का मन्त्र इस प्रकार है—माया (ह्रीं), लक्ष्मीं (श्रीं), फिर दो दीर्घ से युक्त दो बार पशु शब्द, फिर 'छुरिका मे शोभिनि', फिर विकारानस्य, फिर द्रवस्य, फिर दो बार हर शब्द, फिर द्विठान्त (स्वाहा) इस मन्त्र का जप करे । यथा—'ॐ ह्रीं श्रीं आं ईं पशु पशु छुरिका मे शोभिनि विकारानस्य द्रवस्य हर हर स्वाहा'—यह मन्त्र का स्वरूप है ॥ ७०-७१ ॥

विकारहारिणीं जप्त्वा चतुर्धा शोधनञ्चरेत् ।
अस्त्रेण ताडनं कुर्याद्वर्मणाभ्युक्षणं ततः ॥ ७२ ॥
मूलेन वीक्षणं कृत्वा प्रोक्षयेद्धृदयेन तु ।
मूलेन गन्धमादाय बहन्नासापुटे त्रिधा ॥ ७३ ॥
द्रव्यमध्ये लिखेद्योनिं तन्मध्ये च हसौर्लिखेत् ।
हसौः सहौः नमोनतेन पूजयेत् कुम्भमध्यके ॥ ७४ ॥

विकारहारिणी का जपकर चार प्रकार से शोधन करे । 'अस्त्रमन्त्र (हुंफट्) से ताडन कर, वर्म मन्त्र 'हुं' से अभ्युक्षण करे । मूल मन्त्र से देखे । 'नमः' मन्त्र से पुनः प्रोक्षण करे । मूल मन्त्र से द्रव्य का गन्ध ग्रहण कर, तीन बार उसे नासा में

लगावे फिर द्रव्य के मध्य में योनि (त्रिकोण) लिखे। उसके मध्य में 'ह्सौ' ह सौं सहौं' इसके अन्त में नमः मन्त्र से कुम्भ के मध्य में पूजा करे ॥ ७२-७४ ॥

### आनन्देश्वरगायत्रीविधानम्

**वाङ्माया कमला प्रोक्त्वा आनन्देश्वराय विद्महे ।**
**सुधादेव्यै धीमहीति तन्नोऽर्धनारीश्वरेति च ॥ ७५ ॥**
**प्रचोदयादिति जपेद् गायत्रीं दशधा सुधीः ।**

आनन्देश्वर गायत्री मन्त्र—फिर 'ॐ वाङ् (ऐं), माया (ह्रीं), कमला (श्रीं) का उच्चारण कर 'आनन्देश्वराय विद्महे सुधादेव्यै च धीमहि। तन्नो अर्धनारीश्वरः प्रचोदयात्' इस अर्धनारीश्वर गायत्री मन्त्र का सुधी साधक दश बार जप करे ॥ ७२-७६ ॥

### ब्रह्मशापविमोचनमन्त्रोद्धारः

**मायावह्नियुतं कामं रतिबिन्दुसमन्वितम् ॥ ७६ ॥**
**परमस्वामिनि पदं परमाकाश शून्य च।**
**वाहिनि चन्द्रतः प्रान्ते सूर्याग्निभक्षिणीत्यपि ॥ ७७ ॥**
**पात्रं विश पदान्ते तु विश स्वाहा ततः परम् ।**
**त्रिधा च प्रजपेन्मन्त्रं ब्रह्मशापं विमोचयेत् ॥ ७८ ॥**

**ब्रह्मशापविमोचन मन्त्र**—फिर माया (ह्रीं), वह्नि (र), इससे युक्त काम (क्लीं) रति विन्दु समन्वित परम (स्वामिनि) पद, फिर परमाकाश शून्य वाहिनि चन्द्रसूर्याग्निभक्षिणि पात्रं विश' इस पद के अन्त में, पुनः विश, फिर स्वाहा मन्त्र का जप तीन बार कर, फिर ब्रह्मशापविमोचन करे। उक्त मन्त्र का स्वरूप—'ॐ ह्रीं रं क्लीं रतिविन्दुसमन्वित परमस्वामिनि परमाकाशशून्यवाहिनि चन्द्रसूर्याग्नि-भक्षिणि पात्रं विश विश स्वाहा' ॥ ७६-७८ ॥

**वेदादि वारुणं बीजं षड्दीर्घस्वरभेदितम् ।**
**ब्रह्मशापपदस्यान्ते विमोचिताञ्च ङेयुताम् ॥ ७९ ॥**
**सुधादेव्यै नमोऽन्तञ्च दशधा प्रजपेन्मनुम् ।**
**मायां लक्ष्मीं क(म)दं सेन्दुं षड्दीर्घ स्वरवह्निमत् ॥ ८० ॥**

वेदादि (ॐ), वारुणबीज (वं), षड्दीर्घ समन्वित आं ईं ऊं ऐं औं अः फिर ब्रह्मशाप पद के अन्त में, ङे से युक्त विमोचिता (विमोचितायै), सुधा देव्यै नमः इस मन्त्र का दश बार जप करे। मन्त्र का स्वरूप—ॐ आं ईं ऊं ऐं औं अः वं फिर ब्रह्मशापविमोचितायै सुधादेव्यै नमः ॥ ७९-८० ॥

### कृष्णशापविमोचनमन्त्रोद्धारः

**सुधाकृष्णस्वरूपान्ते शापं मोचय तत् परम्।**

अमृतं स्रावयद्वन्द्वं द्विठान्तं मनुमुत्तमम् ॥ ८१ ॥
दशधा परिसञ्जप्य कृष्णांशापविमुक्तये ।

**कृष्णाशापविमोचन मन्त्र**—माया (ह्रीं), लक्ष्मी (श्रीं), काम (क्लीं), फिर वह्निमत् (रं) से युक्त षड्दीर्घ स्वर (आं ईं ऊँ ऐं औं अः) फिर सुधाकृष्णस्वरूप, फिर शापं मोचय, फिर 'अमृतं', फिर दो बार 'स्रावय', फिर दो ठान्त (स्वाहा), कृष्णशाप से विमुक्ति के लिये विज्ञ साधक इस मन्त्र का दश बार जप करे। मन्त्र का स्वरूप इस प्रकार है—'ह्रीं श्रीं क्लीं रं आं ईं ऊं ऐं औं अः अमृतं स्रावय स्रावय स्वाहा' ॥ ८१-८२ ॥

शुक्रशापविमोचनमन्त्रोद्धारः

विषं विन्दुयुतं वान्तं दीर्घषट्कसमन्वितम् ॥ ८२ ॥
शुक्रशापपदं प्रोच्य विमोचितां तु ङेयुताम् ।
सुधादेव्यै हृदन्तञ्च दशधा सञ्जपेन्मनुम् ॥ ८३ ॥

**शुक्रशापविमोचन मन्त्र**—विष (व), जो बिन्दुयुक्त हो (वं), वान्त (लं), फिर षड्दीर्घ समन्वित, फिर शुक्रशापपदं कहकर, ङे से युक्त विमोचित्त पद (विमोचितायै), फिर सुधादेव्यै, अन्त में हृत्पद नमः । इस मन्त्र का दश बार जप करे। 'वं लं आं ईं ऊं ऐं औं अः शुक्रशापविमोचितायै सुधादेव्यै नमः'—यह मन्त्र का स्वरूप है ॥ ८२-८३ ॥

अथवान्यप्रकारेण शुक्रशापं विमोचयेत् ।
मायां कामेश्वरीं वाचं अमृते अमृतोद्भवे ॥ ८४ ॥
अमृतवर्षिणि प्रोक्त्वा कामबीजं ततोऽमृतम् ।
स्रावयद्वितयं शक्तिबीजं भार्गवमुद्धरेत् ॥ ८५ ॥
शापञ्च मोचय प्रोक्त्वा ज्ञानं देहि ततो वदेत् ।
सिद्धिसामर्थ्यमाभाष्य दहयुग्मं महापदं ॥ ८६ ॥
खेचरीपदतो मुद्रां तथा प्रकटयद्वयम् ।
अस्त्राय फट् द्विठान्तञ्च उद्धृत्य दशधा जपेत् ॥ ८७ ॥

अथवा एक अन्य प्रकार से शुक्रशापविमोचन करे। माया (ह्रीं), कामेश्वरी (क्लीं ह्रीं) वाच (ऐं), अमृते अमृतोद्भवे अमृतवर्षिणि कहकर, फिर कामबीज (क्लीं) फिर अमृत, फिर दो बार स्रावय, फिर शक्ति बीज (ह्रीं), 'भार्गव शापं मोचय' कहकर 'ज्ञानं देहि' कहे। फिर सिद्धिसामर्थ्य कहकर दो बार 'दह' कहे, फिर महाखेचरी मुद्रां कहकर, दो बार प्रकटय कहे, फिर अस्त्राय फट्, तदनन्तर दो ठान्त (स्वाहा) कहे। इस प्रकार मन्त्रोद्धार कर उसका दश बार जप करे।

मन्त्र का स्वरूप—ह्रीं क्लीं ह्रीं ऐं अमृते अमृतोद्भवे अमृतवर्षिणि क्लीं अमृतं स्रावय स्रावय ह्रीं भार्गव शापं मोचय ज्ञानं देहि सिद्धिसामर्थ्य दह दह महाखेचरी मुद्रां प्रकटय प्रकटय अस्राय फट् स्वाहा ॥ ८४-८७ ॥

**अथवान्यत् प्रवक्ष्यामि शापत्रयविमोचनम् ।**
**सुराणाममृतं पूर्वं बलदेवेन धीमता ॥ ८८ ॥**
**समानीता प्रयत्नेन पानार्थं वारुणी सुरा ।**
**दत्तात्रयेण मुनिना शुक्रेण च महात्मना ॥ ८९ ॥**
**धीमता बलभद्रेण पुरा पीतोत्थितार्णवात् ।**
**वारत्रयं तु सञ्जप्य पठेदन्यतमं मनुम् ॥ ९० ॥**

अब इसके बाद तीनों शापों का विमोचन करने के लिये अन्य मन्त्र कहता हूँ। 'सुराणाममृतं पूर्वं बलदेवेन धीमता..............पीतोत्थितार्णवात्' पर्यन्त श्लोक मन्त्र तीन बार जप करे । इस प्रकार शाप विमोचन के लिये दो श्लोक मन्त्रों में कोई एक मन्त्र पढ़े ॥ ८८-९० ॥

**शिवशक्तियुतां वाणीं वरुणं क्षितिसंयुतम् ।**
**षड्दीर्घस्वरसम्भिन्नं नादविन्दुविभूषितम् ॥ ९१ ॥**
**अमृते अमृतोद्भवे अमृतवर्षिणीति च ।**
**सुराशुक्रशापं प्रोच्य मोचयद्वितयं ततः ॥ ९२ ॥**
**अमृतं स्रावयद्वन्द्वं स्वाहा शापहरो मनुः ।**
**दशधा परिसञ्जप्य शापत्रयं विमोचयेत् ॥ ९३ ॥**

अथवा शिव (हकार), शक्ति ह्रीं, वाणी (ऐं), क्षिति (ल) से संयुक्त वरुण (व), इसे षट् दीर्घ जो नाद विन्दु से विभूषित हो उसके बाद 'अमृते अमृतोद्भवे' 'अमृतवर्षिणि' इसके बाद 'सुराशुक्रशापं' पढ़कर दो बार मोचय शब्द पढ़े । फिर 'अमृतं', इसके बाद स्रावय दो बार, तदनन्तर 'स्वाहा' कहे । शाप को दूर करने वाले इस मन्त्र को दश बार पढ़कर तीनों शापों से सुरा को मुक्त करे । इस प्रकार 'हं ह्रीं ऐं लं वं आं ईं ऊं ऐं औं अः सुराशुक्रशापं मोचय मोचय अमृतं स्रावय स्रावय स्वाहा'—यह मन्त्र का स्वरूप है ॥ ९१-९३ ॥

**त्रिशापमोचनीं जप्त्वा प्रकाशयुक्तां ततो जपेत् ।**
**मायां लक्ष्मीं ततो वाचं अमृते अमृतोद्भवे ॥ ९४ ॥**
**अमृतवर्षिणि प्रोच्य महाप्रकाशयुक्तेऽपि च ।**
**द्विठान्तञ्च समुच्चार्य उच्चरेत् कुब्जिकान्ततः ॥ ९५ ॥**

इस प्रकार त्रिशापमोचनी जप कर तदनन्तर प्रकाशयुक्ता मन्त्र पढ़े । माया

(ह्रीं) लक्ष्मी (श्रीं), फिर वाच (ऐं) फिर 'अमृते अमृतोद्भवे अमृतवर्षिणि' पढ़कर फिर 'महाप्रकाशयुक्ते' पढ़कर द्विठान्त (स्वाहा) पढ़े । उसके बाद कुब्जिका मन्त्र पढ़े । प्रकाशयुक्ता मन्त्र का स्वरूप—ॐ ह्रीं श्रीं ऐं अमृते अमृतोद्भवे अमृतवर्षिणि महाप्रकाशयुक्ते स्वाहा ॥ ९४-९५ ॥

कुब्जिकामन्त्रोद्धारः

**प्रेतबीजं समुच्चार्य हसक्लीं हसरीं तथा ।**
**हसखफ्रेंञ्च हसरीं भगवति ततो वदेत् ॥ ९६ ॥**
**अनुग्रहो हसप्रान्ते कुब्जिकेऽपि ततः परम् ।**
**सहखफ्रें युगं प्रोच्य सनोरेव ततो वदेत् ॥ ९७ ॥**
**घोरखप्राञ्च खसप्रीञ्च किलद्वयसमन्वितम् ।**
**विच्चोऽपि हसखात्रञ्च हसखब्लेञ्च हसरीं ॥ ९८ ॥**
**शिवशक्तिद्वयान्ते च मायां हस्त्रें ततो वदेत् ।**
**अनेन मनुना मन्त्री अमृतं परिचिन्तयेत् ।**
**तिरस्कारिणीं ततो ध्यायेत् पशुपाश विनाशिनीम्॥ ९९ ॥**

**कुब्जिका मन्त्र**—प्रेत बीज (हं) उच्चारण कर 'हसक्लीं हसरीं हसखफ्रें हसरीं भगवतिं अनुग्रहो हसप्रान्ते कुब्जिके सहखफ्रें' इसे दो बार पढ़कर 'सन्नोरेव' तदनन्तर 'घोरे खप्राञ्च खसप्रीञ्च' फिर दो बार 'किल' फिर 'विच्चे हसखात्रं हसखब्लें हसरीं', फिर अन्त में शिव (हं), शक्ति (ह्रीं), फिर माया (ह्रीं), फिर हस्त्रें कहे । इस मन्त्र से मन्त्रज्ञ अमृत का ध्यान करे । इसके बाद पशुपाश का विनाश करने वाली तिरस्कारिणी का इस प्रकार ध्यान करे ॥ ९६-९९ ॥

तिरस्करिणीविद्याध्यानम्

**नीलं हयं समधिरुह्य पुरः प्रयान्तीं**
**नीलांशुकाभरणमाल्यविलेपनाढ्याम् ।**
**निद्रापुटेन भुवनानि तिरोदधानां**
**खड्गायुधा भगवती परिपातु भक्तान् ॥ १०० ॥**

**तिरस्करिणी विद्या का ध्यान**—जो नील वर्ण वाले घोड़े पर सवार होकर आगे-आगे जा रही है । नील वस्त्र, नीलामभरण नील माल्य और नीलवर्ण के विलेपन से विभूषित है । जिसने निद्रापुट से सारे संसार को छिपा रखा है । ऐसी खड्ग आयुध वाली भगवती संसार का पालन करे ॥ १०० ॥

**एवं ध्यात्वा जपेद्विद्याद्वयञ्च साधकोत्तम ।**
**मायां लक्ष्मीं समुद्धृत्य नमो भगवतीति च ॥ १०१ ॥**

**माहेश्वरि पदस्यान्ते सर्वपशुजनोद्धरेत् ।**
**मनश्चक्षुस्तिरस्करिणीं कुरुद्वन्द्वञ्च ठद्वयम् ॥ १०२ ॥**

इस प्रकार भगवती तिरस्करिणी का ध्यान कर उत्तम साधक दो विद्याओं का जप करे । माया (ह्रीं) लक्ष्मी (श्रीं), फिर 'नमो भगवति माहेश्वरि', फिर इस पद के अन्त में 'सर्वपशुजनमनश्चक्षुस्तिरस्करिणीं कुरु कुरु स्वाहा' ॥ १०१-१०२ ॥

तिरस्करिणीविद्या निरूपणम्

**अन्य तिरस्करिणीं वक्ष्ये मायां कामेश्वरीन्ततः ।**
**वाणीं ग्लैं तिरस्करिणि सकलेति जनेति च ॥ १०३ ॥**
**वाग्वादिनि पदस्यान्ते सकलपशु च ब्रूयात् ।**
**जनान्ते च मनश्चक्षुः श्रोत्रजिह्वापदंततः ॥ १०४ ॥**
**घ्रणोक्तिश्च तिरस्कान्ते रिणीं कुरुद्वयं ततः ।**
**ठद्वयञ्च सर्गयुतं द्विठान्तोऽयं महामनुः ॥ १०५ ॥**

अब अन्य तिरस्करिणी विद्या कहता हूँ । माया (ह्रीं), फिर कामेश्वरी ह्रीं क्लीं, फिर वाणी अर्थात् ऐं ग्लैं तिरस्करिणि सकलजन वाग्वादिनि सकलशुजन मनश्चक्षुः श्रोत्र जिह्वाघ्राणतिरस्करिणी कुरु कुरु ठः ठः स्वाहा' यह दो ठान्त वाला मन्त्र है ॥ १०३-१०५ ॥

**त्रिधा जप्त्वा च वीरेन्द्रस्त्रिकोणे चिन्तयेत्ततः ।**
**हंसपीठे मन्त्रमये स्वगुरुं शिवरूपिणम् ॥ १०६ ॥**

इस मन्त्र का तीन बार जप कर वीरेन्द्र साधक त्रिकोण में, जिसमें मन्त्रमय हंस पीठ है, उस पर शिवस्वरूप अपने गुरु का ध्यान करे ॥ १०६ ॥

**अकथादित्रिपङ्क्त्या तु हलक्ष मध्यमण्डितम् ।**
**इति सञ्चिन्त्य तत्पश्चाद्द्रव्यशुद्धिं समाचरेत् ।**
**अथवान्यप्रकारेण द्रव्यशुद्धिं समाचरेत् ॥ १०७ ॥**

आदि में जो अ क थ इन तीन पंक्तियों से युक्त है, तथा मध्य में ह ल क्ष से मण्डित है । इस प्रकार ध्यान कर द्रव्यशुद्धि करे, अथवा अन्य प्रकार से भी द्रव्यशुद्धि करे ॥ १०७ ॥

हंसवती ऋक्

**ॐ हंसः शुचिसद्वसुरन्तरीक्षसद्धोता वेदिसदतिथिर्दुरोणसत् ।**
**नृसद्वरसदृव्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥१०८॥**
**ऐं तृप्तोद्भव-सिद्धोद्भव-सर्वज्ञोद्भव-**
**सर्वजनकोद्भवाय अमृताय अमृतनाथाय**

अमृतकुलकुम्भाय ऐं फ्रें चल चल
पिव पिव कुलकुण्डलिनि अमृतकुण्डलिनि
अमृतं द्रव द्रव निर्झर निर्झर ऐं ह्रीं
कुलकुण्डलिनि अमृतं कुरु कुरु स्वाहा ॥ १०९ ॥
प्रथमं प्रणवं हंसः शुचीति तदनन्तरम् ।
सद्वसुरन्तरीक्षेति सद्धोता वेदिसत्यथ ॥ ११० ॥
अतिथिर्दुरोणसदित्यर्धमस्या ऋचो भवेत् ।
नृसद्वरसदित्युक्ता सदृतोऽतिथ्यनन्तरम् ।
सद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ।
ऋतं बृहदित्यर्द्धञ्च अस्या ऋच उदाहृतम् ॥ १११ ॥

'ॐ हंसः..............अमृतं कुरु कुरु स्वाहा (४.१०९) पर्यन्त मन्त्र पढ़कर प्रथम प्रणव (ॐ) हंसः शुचि' इसके बाद सद्वसुरन्तरिक्षसद्धोता वेदिसदतिथि-र्दुरोणसत्' यह ऋचा का आधा भाग होता है । इसके बाद 'नृसद्वरसद्' कह कर 'सदृतोऽतिथि' इसके बाद सद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् । (ऋ. ४.५८.३) यह ऋचा का शेष आधा भाग है ॥ ११०-१११ ॥

त्रिधा च सञ्जपेन्मन्त्रं अथवान्यतमं जपेत् ।
वाक् च तृप्तोद्भवस्यान्ते सिद्धोद्भव ततः परम्॥ ११२ ॥
सर्वज्ञोद्भव सर्वान्ते जनकोद्भव ङेयुतम् ।
अमृतायामृतं प्रोक्त्वा नाथाय पदतोऽमृत ॥ ११३ ॥
कुलकुम्भाय वाग्भवं फ्रें ततश्च चलयुग्मकम् ।
पिबद्वन्द्वं कुलं प्रोक्त्वा कुण्डलिनि ततो वदेत् ॥ ११४ ॥
अमृतपदतः कुण्डलिनीति अमृतं द्रव ।
द्वयं निर्झरयुग्मञ्च वाग्भवं भुवनेश्वरीम् ॥ ११५ ॥
कुलकुण्डलिनीं प्रोच्य अमृतं कुरुयुग्मकम् ।
द्विठान्तं मनुमुच्चार्य पाययित्वा च कुण्डलीम् ॥ ११६ ॥
शिवशक्तिसमायोगं चिन्तयित्वा च साधकः ।
तस्मात् सुधां समुत्पाद्य पूरयेत् पात्रमुत्तमम् ॥ ११७ ॥

इस मन्त्र का तीन बार जप करे अथवा दो में से कोई एक मन्त्र का जप करना चाहिए । इसके बाद 'वाक् च तृप्तोद्भवा' के अन्त में सिद्धोद्भव, इसके बाद सर्वज्ञोद्भव, फिर चतुर्थ्यन्त 'सर्वजनकोद्भवाय', फिर 'अमृतायामृता' कहकर नाथाय (अमृतायामृतनाथाय), फिर अमृतकुलकुम्भाय, फिर वाग्भव (ऐं) फ्रें, फिर दो बार चल चल, फिर दो बार पिब पिब, फिर कुण्डलिनि अमृत कुण्डलिनि

अमृतं द्रव द्रव निर्झर निर्झर, फिर वाग्भव (ऐं), फिर कुलकुण्डलिनी कहकर 'अमृतं कुरु कुरु स्वाहा' इस मन्त्र का उच्चारण कर कुण्डलिनी को (अमृत) पिलाकर शिवशक्ति के समायोग का ध्यान कर, कलश स्थित सुधा निकाल कर, किसी पात्र को पूरा पूरा भर देवे ॥ ११२-११८ ॥

**अनेनैव विधानेन द्रव्यशुद्धिं समाचरेत् ।**
**कालिकाया विशेषञ्च वक्ष्येऽहं तन्त्रवर्त्मना ॥ ११९ ॥**
**एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् ।**
**कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम् ॥ १२० ॥**

साधक उक्त विधान से द्रव्यशुद्धि करे । अब कालिका के विषय में तन्त्रमार्ग के अनुसार कहता हूँ—

(१) एकमेवपरं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् । कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम्—यह प्रथम श्लोक मन्त्र है ॥ ११९-१२० ॥

**सूर्यमण्डलसम्भूते वरुणालयसम्भवे ।**
**अमाबीजमये देवि शुक्रशापाद्विमुच्यताम् ॥ १२१ ॥**

(२) सूर्यमण्डलसम्भूते वरुणालयसम्भवे । अमाबीजमये देवि शुक्रशापाद्वि-मुच्यताम्—यह दूसरा श्लोक मन्त्र है ॥ १२१ ॥

**वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि ।**
**तेन सत्येन ते देवि ब्रह्महत्यां व्यपोहतु ॥ १२२ ॥**

(३) वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि । तेन सत्येन ते देवि ब्रह्महत्यां व्यपोहतु—यह तीसरा श्लोक मन्त्र है ॥ १२२ ॥

**एवं मन्त्रत्रयेणैव अभिमन्त्र्य सुरां शुभाम् ।**
**प्रदद्यात् कालिकायै च ततो नैवेद्यभुग्भवेत् ॥ १२३ ॥**

इस प्रकार इन तीन मन्त्रों से उस कल्याणकारिणी सुरा को अभिमन्त्रित करे । प्रथमतः उसे कालिका को नैवेद्य रूप में समर्पित करे । फिर स्वयं उस नैवेद्य का आस्वादन करे ॥ १२३ ॥

**इति शुद्धित्रयं ज्ञेयं शापानां मोचनं परम् ।**
**एषामेकतमं कृत्वा ध्यायेदानन्दभैरवम् ॥ १२४ ॥**

इस प्रकार हमने यहाँ तक तीन प्रकार की शुद्धि, फिर शाप विमोचन कहा । इस शुद्धि तथा शापविमोचन के मन्त्रों में किसी एक से शुद्धि एवं शापविमोचन कर साधक आनन्दभैरव का इस प्रकार ध्यान करे ॥ १२४ ॥

आनन्दभैरवध्यानम्

**सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम् ।**
**अष्टादशभुजं देवं पञ्चवक्त्रं त्रिलोचनम् ॥ १२५ ॥**

**आनन्दभैरव का ध्यान**—जिनका प्रकाश (कान्ति) करोड़ों करोड़ों सूर्य के समान उग्र है, जो करोड़ों चन्द्रमा के प्रकाश के समान शीतल हैं और जो अट्ठारह भुजाओं, पाँच मुख तथा तीन नेत्रों से विभूषित हैं ॥ १२५ ॥

**अमृतार्णवमध्यस्थं ब्रह्मपद्मोपरि स्थितम् ।**
**वृषारूढं नीलकण्ठं सर्वाभरणभूषितम् ॥ १२६ ॥**

जिनका निवास अमृत के समुद्र में है, जो ब्रह्मकमल पर स्थित हैं, बैल पर सवार हैं, नीलकण्ठ तथा सर्वाभरणभूषित हैं ॥ १२६ ॥

**आकल्पखट्वाङ्गधरं घण्टाडमरुवादिनम् ।**
**पाशाङ्कुशधरं देवं गदामुषलधारिणम् ॥ १२७ ॥**

खट्वाङ्ग धारण किये हुये हैं; घण्टा और डमरू का बाजा बजा रहे हैं । जो देव पाश, अङ्कुश, गदा और मुषल धारण किये हुये हैं ॥ १२७ ॥

**खड्गखेटकपट्टीशमुद्गरशूलदण्डधृक् ।**
**खेटकमुण्डहस्तञ्च वरदाभयविग्रहम् ॥ १२८ ॥**

खड्ग, खेटक, पट्टिश, मुद्गर, शूल, खेटक, मुण्ड और दण्ड धारण किये हुये हैं । जिनका विग्रह वर और अभय मुद्रा से युक्त है ॥ १२८ ॥

**लोहितं देवदेवेशं द्रव्यमध्ये नियोजयेत् ।**
**तस्योत्सङ्गे सुरां देवीं चन्द्रकोट्ययुतप्रभाम् ॥ १२९ ॥**

जिनके शरीर का वर्ण लोहित है इस प्रकार के देवदेवेश का ध्यान कर उन्हें द्रव्य के मध्य में स्थापित करे । उनके गोद में अयुतकोटिचन्द्रमा के समान प्रकाशवाली भगवती सुरा संस्थित हैं ॥ १२९ ॥

आनन्दभैरवीध्यानम्

**हिमकुन्देन्दुधवलां पञ्चवक्त्रां त्रिलोचनाम् ।**
**भुजाष्टदशसंयुक्तां सर्वायुधकरोद्यताम् ॥ १३० ॥**

**भगवती आनन्दभैरवी का ध्यान**—जो हिमकुन्द एवं इन्दु के समान धवल वर्ण वाली हैं । जिनके पाँच मुख तथा तीन नेत्र तथा अट्ठारह भुजायें हैं । जिनके हाथों में सभी प्रकार के आयुध हैं ॥ १३० ॥

**प्रहसन्तीं विशालाक्षीं देवदेवस्य सम्मुखीम् ।**
**अथवान्यप्रकारेण सुरादेवीञ्च चिन्तयेत् ॥ १३१ ॥**

जो विशालाक्षी देवाधिदेव के सामने स्थित होकर हँस रही हैं । इस प्रकार की सुरादेवी का ध्यान करना चाहिए । अथवा साधक को अन्य प्रकार से भी सुरा देवी का ध्यान करना चाहिए ॥ १३१ ॥

**चन्द्रांशुसदृशीं श्वेतां वारुणीं ब्रह्मरूपिणीम् ।**
**शिरश्चन्द्राद्विगलन्तीं ध्यायेत्तं परदेवताम् ॥ १३२ ॥**

वारुणी स्वरूपा जो देवी चन्द्रमा की किरणों के समान श्वेत वर्ण वाली ब्रह्मस्वरूपा है, शिरः स्थित चन्द्रमा के अमृत से आर्द्र हैं । इस प्रकार की परदेवता का सुरा में ध्यान करे ॥ १३२ ॥

**एवं ध्यात्वा ततो वीरः पूजयेन्मन्त्रमुच्चरन् ।**
**आनन्दभैरवं देवमानन्दभैरवीं तथा ॥ १३३ ॥**

इस प्रकार भगवती सुरा का ध्यान कर वीर साधक आनन्दभैरव तथा आनन्दभैरवी का मन्त्रपूर्वक इस प्रकार पूजन करे ॥ १३३ ॥

**शिवचन्द्राद्यवर्णं तु कालभूवरुणानलम् ।**
**षष्ठस्वरान्वितं वायुं विन्दुनादविभूषितम् ॥ १३४ ॥**
**आनन्दभैरवायेति शिखामन्त्रं ततो वदेत् ।**
**ततः पूर्ववदुद्धृत्य विपरीतमुखं द्वयम् ॥ १३५ ॥**
**वायुबीजं वामनेत्रत्यानन्दभैरवीं ततः ।**
**ङेयुतां नेत्रमन्त्रञ्च कथितो मनुसत्तमः ॥ १३६ ॥**

आदि में शिव वर्ण (ह), चन्द्र वर्ण सं, फिर काल (शं), भू (लं), वरुण (व), अनल (र), षष्ठ स्वर समन्वित वायु (यूं) जो बिन्दुनाद से विभूषित हो; इसके बाद आनन्दभैरवाय, फिर शिखा मन्त्र 'शिखायै वषट्', इसके बाद दोनों को विपरीत मुख कर वायु बीज यं, वामनेत्र ईं, फिर चतुर्थ्यन्त आनन्दभैरव्यै, फिर नेत्र मन्त्र नेत्रत्रयाय वौषट्, यह उत्तम मन्त्र उन दोनों की पूजा के लिये बतलाया गया है । मन्त्र का स्वरूप—हं सं शं लं वं रं यं आनन्दभैरवाय शिखायै वषट् । यं रं वं लं शं सं हं आनन्दभैरव्यै नेत्रत्रयाय वौषट् ॥ १३४-१३६ ॥

**पूजयित्वा द्रव्यमध्ये वरुणं वसुधा जपेत् ।**
**मूलञ्चोपरि सञ्जप्य अमृतं परिभावयेत् ॥ १३७ ॥**

इस प्रकार द्रव्य के मध्य में उन दोनों का पूजन कर वरुण (वं) तथा वसुधा

(लं) का जप करे । पुनः उसके ऊपर मूल मन्त्र का जप कर उस द्रव्य में अमृत की भावना करे ॥ १३७ ॥

आवाहन्यादिमुद्राञ्च दर्शयेत्तदनन्तरम् ।
आवाहनीं दर्शयित्वा स्थापनीं तदनन्तरम् ॥ १३८ ॥
सन्निधापनमुद्राञ्च तथा च सन्निरोधनीम् ।
अवगुण्ठनमुद्राञ्च विधाय साधकोत्तमः ॥ १३९ ॥
अङ्गषट्कस्य मुद्राञ्च तालत्रयपुरःसरम् ।
दिग्बन्धनं प्रकुर्वीत छोटिकाभिरनन्तरम् ॥ १४० ॥

इसके बाद उन्हें आवाहन्यादि मुद्रा प्रदर्शित करे । प्रथम आवाहनी मुद्रा दिखावे, फिर स्थापनी, फिर सन्निधापनी, सन्निरोधिनी तथा अवगुण्ठन मुद्रा प्रदर्शित करे । फिर उत्तम साधक तीन ताल देकर षडङ्ग मुद्रा और चुटकी बजाकर दिग्बन्धन करे ॥ १३८-१४० ॥

परमीकरणं कृत्वा अमृतीकरणञ्चरेत् ।
धेनुमुद्रामृतीकृत्य द्रव्यशुद्धिं समाचरेत् ॥ १४१ ॥

पुनः परमीकरण मुद्रा प्रदर्शित कर, अमृतीकरणमुद्रा तथा धेनुमुद्रा प्रदर्शित कर द्रव्यशुद्धि करे ॥ १४१ ॥

आलोकाज्जिघ्रणाद्ध्यानात् स्नानाद्द्रव्यं विशुध्यति ।
द्रव्यस्नानं ततः कुर्याद्दक्षे कृत्वा च चुल्लकम् ॥ १४२ ॥

तन्त्रशास्त्र में देखने से, सूँघने से, ध्यान करने से, स्नान कराने से, द्रव्य (मद्य) की शुद्धि कही गई है । दाहिने हाथ के चिल्लू में जल भरकर स्नान कराना चाहिये ॥ १४२ ॥

द्रव्यस्य चुल्लकं दक्षकरे कृत्वा तु साधकः ।
वामनासाङ्गुष्ठयोगात् पूजाद्रव्येषु निक्षिपेत् ॥ १४३ ॥

फिर साधक दाहिने हाथ के चिल्लू में उस द्रव्य (मद्य) को लेकर अँगूठे से बाईं नासिकापुट में लगाकर पूजाद्रव्य पर छोड़ देवे ॥ १४३ ॥

विन्दुं क्षिप्त्वा स्ववक्त्रे च मार्जयेद्धस्तयुग्मकम् ।
हस्ताभ्यां मार्जयेद्देहं मूलमन्त्रं समुच्चरन् ॥ १४४ ॥

उसका एक बिन्दु साधक को अपने मुख में डालकर दोनों हाथों का मार्जन करना चाहिए । फिर मूल मन्त्र का उच्चारण करते हुये दोनों हाथों से अपने देह का मार्जन करे ॥ १४४ ॥

सुरानिरुक्तिः

एतत्तु कारणं दिव्यं सुरसङ्घनिषेवितम् ।
अतएव नाम तस्य सुरेति भुवनत्रये ॥ १४५ ॥

इस प्रकार यह कारण (मद्य) दिव्य हो जाता है जिसका पान समस्त देवगणों ने किया था । इसीलिये इसे त्रिलोकी में सुरा नाम से जाना जाता है ॥ १४५ ॥

सुरादर्शनफलम्

सुरा दर्शनमात्रेण सर्वपापैः प्रमुच्यते ।
तद्गन्धाघ्राणमात्रेण शतक्रतुफलं लभेत् ॥ १४६ ॥

इस प्रकार के सुरा के दर्शन मात्र से साधक सारे पापों से मुक्त हो जाता है । उसके गन्ध के आघ्राणमात्र से सौ यज्ञों का फल होता है ॥ १४६ ॥

मद्यस्पर्शनमात्रेण तीर्थकोटीफलं लभेत् ।
तथा तत्पानतः साक्षाल्लभेत् मुक्तिं चतुर्विधाम् ॥ १४७ ॥

ऐसे मद्य के स्पर्शमात्र से साधक को करोड़ों तीर्थों के स्नान का फल प्राप्त हो जाता है तथा उसके पीने मात्र से विद्वान् साधक साक्षात् चारों प्रकार की मुक्तियाँ प्राप्त कर लेता है ॥ १४७ ॥

इच्छाशक्तिः सुरामोदे ज्ञानशक्तिश्च तद्रसे ।
तत्स्वादे च क्रियाशक्तिः चेतः शोधनसाधना ॥ १४८ ॥

॥ इति श्रीमज्ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये चतुर्थोल्लासः ॥४॥

सुरा के आघ्राण (सूँघने) से इच्छाशक्ति है और उसके रस में ज्ञानशक्ति है तथा उसके आस्वादन से क्रियाशक्ति बलवती होती है । इस प्रकार यह चित्त के शोधन की साधना है ॥ १४८ ॥

**महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय के ज्येष्ठ पुत्र पण्डित रामरञ्जन मालवीय कृत श्रीमज्ज्ञानानन्द परमहंस विरचित कौलावलीनिर्णय नामक तन्त्र के चतुर्थ उल्लास की निरञ्जन हिन्दी व्याख्या पूर्ण हुई ॥ ४ ॥**

# पञ्चम उल्लासः

तन्त्रवर्त्मना मांसनिरूपणम्

अथातः सम्प्रवक्ष्यामि मांसानि तन्त्रवर्त्मना ।

मांसभेदकथनम्

मांसञ्च त्रिविधं प्रोक्तं जलभूचरखेचरम् ॥ १ ॥

अब मैं तन्त्रमार्ग के अनुसार मांस के विषय में कहता हूँ । जलीय, भूचरीय और खेचरीय तीन प्रकार के मांस कहे गये हैं ॥ १ ॥

गोनरेभाश्वमहिषवराहाजमृगोद्‌भवम् ।
महामांसाष्टकं प्रोक्तं देवताप्रीतिकारकम् ॥ २ ॥

गाय, बकरा, हाथी, घोड़ा, महिष, वराह, मृग और खड्ग (गैंडा) इन आठ के मांस को महामांस कहा जाता है । जिससे देवता प्रसन्न होते हैं ॥ २ ॥

(यद्वा) गोऽजेभाश्ववराहाणां माहिषं मृगखड्गयोः ।
एतन्मांसाष्टकं प्रोक्तं चण्डिकाप्रीतिकारकम् ॥ ३ ॥

अथवा गाय, बकरा, हाथी, घोड़ा, वराह, महिष, मृग एवं गैंडा—इन आठ पशुओं के मांस चण्डिका को प्रीति प्रदान करने वाले कहे गए हैं ॥ ३ ॥

(यद्वा) अजाश्वावपि गण्डा च महिषश्चमरी तथा ।
वराहव्याघ्रभल्लूकशशकाः कूर्मकुक्कुटौ ॥ ४ ॥
कृष्णसारश्च हरिणस्तथा चित्रमृगा अपि ।
मनुष्यो गवयश्चैव शल्लकी च विशेषतः ॥ ५ ॥
हंसः पारावतश्चैव तथैव ग्रामकुक्कुटाः ।
विहिता बलयः प्रोक्ताश्चण्डिकाप्रीतिकारकाः ॥ ६ ॥

अथवा अजा, अश्व, हाथी, महिष, चमरी, वराह (शूकर), व्याघ्र, भल्लूक, शश (खरगोश), कूर्म, कुक्कुट, कृष्णसार मृग, सामान्य हरिण, चित्र हरिण, मनुष्य, गवय और विशेषकर शल्लक (शाही), हंस, पारावत एवं ग्रामकुक्कुट;

इतने बलि कर्म के लिये विहित पशु के माँस हैं, जो चण्डिका को प्रीति उत्पन्न करने वाले बतलाये गये हैं ॥ ४-६ ॥

**एतेषां मांसदानेन सर्वसिद्धिः प्रजायते ।**
**एषामेकतमं लब्ध्वा तर्पणार्थं प्रकल्पयेत् ॥ ७ ॥**

इनके मांस द्वारा पूजा किये जाने पर सभी प्रकार की सिद्धि हो जाती है । इनमें एक का भी मांस प्राप्त हो जाय तो उससे देवी की पूजा करे ॥ ७ ॥

**मांससन्दर्शनेनापि सुरादर्शनवत् फलम् ।**
**पितृदैवतयज्ञेषु वेदे हिंसा विधीयते ॥ ८ ॥**

मांस के दर्शन से भी सुरादर्शन के समान फल प्राप्त होता है । वेद ने भी पितृयज्ञ एवं दैवयज्ञ में हिंसा का विधान कहा है ॥ ८ ॥

**आत्मार्थं प्राणिनां हिंसा कदाचिन्नोदिता प्रिये ।**
**अनिमित्तं तृणं वापि छेदयेन्न कदाचन ॥ ९ ॥**

हे प्रिये ! वेद ने कहीं भी अपने लिये हिंसा का विधान नहीं कहा है । बहुत क्या कहें बिना निमित्त के तृणच्छेदन भी कदापि नहीं करना चाहिए; हिंसा की बात तो बहुत दूर है ॥ ९ ॥

देवतार्थं पशुहनने न दोषः

**देवतार्थं द्विजं गाञ्च हत्वा पापैर्न लिप्यते ।**
**मांसं विनापि पूजायां पापं स्याच्च पदे पदे ॥ १० ॥**

देवता के लिये ब्राह्मण और गौ की हत्या भी पाप नहीं कही जाती । मांस के बिना पूजा में पद-पद पर पाप लगता है ॥ १० ॥

**गन्धपुष्पाक्षतैः पूज्यमन्यथा नरकं व्रजेत् ।**
**हन्यान्मन्त्रेण चानेन त्वभिमन्त्र्य पशुं ततः ॥ ११ ॥**

मांस के साथ केवल गन्ध एवं पुष्पयुक्त अक्षत से भी पूजा कर लेनी चाहिये अन्यथा नरकगामी होना पड़ता है । तदनन्तर निम्न मन्त्र से पशु को अभिमन्त्रित कर उसका वध करना चाहिये ॥ ११ ॥

**शिवोत्कृत्तमिदं पिण्डमतस्त्वं शिवतां गतः ।**
**तदबुद्धस्व पशो त्वं हि मा शिवस्त्वं शिवोऽसि हि ॥ १२ ॥**
**ब्रह्मा स्यात्पलले विष्णुर्गन्धे रुद्रश्च तद्रसे ।**
**परमात्मा तदानन्दे तस्मात् सेव्यमिदं प्रिये ॥ १३ ॥**

**इति हत्वा पशुं पश्चात् चारु पक्वं समाचरेत् ।**
**पूजासु आममांसानि दद्याद्वै साधकः क्वचित् ॥ १४ ॥**

**मन्त्र का स्वरूप—**

शिवोत्कृत्तमिदं पिण्डमतस्त्वं शिवतां गतः ।
तद्बुद्धस्व पशो त्वं हि माशिवस्त्वं शिवोऽसि हि॥
ब्रह्मा स्यात्पलले विष्णुर्गन्धे रुद्रश्च तद्रसे ।
परमात्मा तदानन्दे तस्मात् सेव्यमिदं प्रिये ॥

उपरोक्त श्लोक रूप पूर्ण मन्त्र को पढ़कर पशु का वध करने के पश्चात् उत्तमोत्तम चरु का निर्माण करना चाहिए । कहीं-कहीं कोई साधक पूजा में केवल कच्चा मांस समर्पित करते हैं ॥ १४ ॥

**ऋते तु लोहितं शेषममृतं तत्तु जायते ।**
**संशोधयेत्तु मांसानि यथाशास्त्रप्रमाणतः ॥ १५ ॥**

मारे गये पशु के रक्त को छोड़कर शेष अङ्ग का भाग अमृत बन जाता है । इसके बाद शास्त्र प्रोक्त विधि से उस मांस का संशोधन करे ॥ १५ ॥

**मांसशोधनविधानम्**

**मांसशुद्धिं प्रवक्ष्यामि शाक्तानां सिद्धिहेतवे ।**
**अस्त्रान्तमूलमन्त्रेण प्रोक्षयित्वा च साधकः ॥ १६ ॥**

अब मैं शाक्त सम्प्रदाय वालों के कल्याण के लिये मांस शुद्धि की विधि कहता हूँ । साधक मूल मन्त्र के साथ अन्त में 'अस्त्राय फट्' पढ़कर मांस का प्रोक्षण करे ॥ १६ ॥

**चतुर्धा शोधनं कुर्यात् पूर्वोक्तेन च वर्त्मना ।**
**शोषयेद्वायुबीजेन वह्निबीजेन सन्दहेत् ॥ १७ ॥**

पूर्वोक्त विधि से उसका चार प्रकार से संशोधन करे । वायुबीज (यं) से उसका शोषण करे और अग्नि बीज (रं) से उसे जला देवे ॥ १७ ॥

**शिवशक्तिसमायोगाद्वारुणेनामृतं कुरु ।**
**ततश्च सञ्जपेन्मन्त्रं मांसानां शोधनाय च ॥ १८ ॥**

फिर 'शिवशक्तिसमायोगाद्वारुणेनामृतं कुरु' इस मन्त्र को जपकर मांस का शोधन करे ॥ १८ ॥

**प्रणवं पूर्वमुच्चार्य प्रतद्विष्णुस्ततः परम् ।**
**स्तवते मृगो न भीमः सम्प्रोच्य कुचरो भवेत् ॥ १९ ॥**

**गरिष्ठेति च यस्योरुषु त्रिषु प्रोक्तस्ततः परम् ।**
**विक्रमणेर्ष्वधिक्षिपन्ति भुवनानि विश्वाः ॥ २० ॥**

प्रणव (ॐ) का उच्चारण कर 'प्रतद्विष्णुः' इसके बाद 'स्तवते मृगो न भीमः' पढ़कर 'कुचरो गरिष्ठा यस्योरुषु त्रिषु' इसके बाद 'विक्रमेणाधिक्षिपन्ति भुवनानि विश्वा' पढ़े ॥ १९-२० ॥

**पूर्व्वोक्ता दर्शयेन्मुद्रा आवाहन्यादिसंज्ञिका ।**
**मूलमन्त्रं जपेद्वीरः सप्त वारं ततः परम् ॥ २१ ॥**

फिर पूर्वोक्त आवाहनी आदि मुद्रा प्रदर्शित करे । तदनन्तर वीर साधक मूल मन्त्र का सात बार जप करे ॥ २१ ॥

**मत्स्यानां शोधनं वक्ष्ये यथातन्त्रानुसारतः ।**

मत्स्यभेदकथनम्

**पाठीनश्च वोदालश्च तथा शकुलशालकौ ॥ २२ ॥**
**महाशकुलचित्री च खड्गी च जलवृश्चिका ।**
**अनेन विहिताः सर्वेऽपीमा मीनाः शुभप्रदाः ॥ २३ ॥**

अब शास्त्र के अनुसार मत्स्य-मांस के शोधन का प्रकार कहता हूँ । पाठीन, वोदाल, शकुल, शालक, महाशकुल, चित्री, खड्गी और जलवृश्चिका' इस प्रकार विहित नाम वाले सभी मत्स्य कल्याणकारक होते हैं ॥ २२-२३ ॥

मत्स्यमांसशोधनम्

**आदौ कुर्व्वीत मीनञ्च पूर्ववत् प्रोक्षणादिकम् ।**
**जपेन्मन्त्रं ततः पश्चान्मीनानाञ्च विशुद्धये ॥ २४ ॥**
**ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।**
**उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥ २५ ॥**

सर्वप्रथम पूर्वोक्त विधि के अनुसार मीन का प्रोक्षण करना चाहिए । फिर मीनो की विशुद्धि के लिये—

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥

इस मन्त्र को पढ़कर मीन की शुद्धि करना चाहिए ॥ २४-२५ ॥

**शेषं पूर्ववदाचर्य मुद्राञ्च परिशोधयेत् ।**
**व्रैहेयं मण्डलाकारं चन्द्रविम्बनिभं शुभम् ॥ २६ ॥**
**चारु पक्वमनोहारि शर्कराद्यैः प्रपूरितम् ।**

पूजाकाले देवताया मुद्रैषा परिकीर्त्तिता ॥ २७ ॥
भ्रष्टधान्यादिकं यद्यच्चर्वणीयं प्रकल्पयेत् ।
तस्याः सञ्ज्ञा स्मृता मुद्रा महामोदप्रवर्धिनी ॥ २८ ॥

**महामोदप्रवर्धिनी मुद्रा**—शेष कार्य पूर्ववत् सम्पादन कर मुद्रा को शुद्ध करे । चन्द्रमा के समान अत्यन्त स्वच्छ, सर्वथा गोल, अच्छी तरह से पकाया गया, मनोहारी शर्करादि से युक्त, भ्राष्ट्र में भुजा हुआ धान का लावा चबाने के लिये प्रस्तुत करे । सन्त लोग उसी को महामोदप्रवर्धिनी मुद्रा कहते हैं ॥ २६-२८ ॥

मुदं रातीति मुद्रा स्याद्येनैका मुष्टिभेदतः ।
मुद्राञ्च प्रोक्षयेदादौ शेषं पूर्ववदाचरेत् ॥ २९ ॥

एक ही मुट्ठी के अनेक भेद से मुद्रा कही गई है 'मुदं ददातीति मुद्रा' इस व्युत्पत्ति के अनुसार यतः मुद्रा प्रसन्नता प्रदान करती है, अतः मन्त्र से शुद्धि हेतु पहले मुद्रा का प्रोक्षण करे । शेष पूर्ववत् करे ॥ २९ ॥

ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥ ३० ॥
ॐ तद्विप्रासो विपण्यवो जागृवांसः समिन्धते ।
विष्णोर्यत् परमं पदम् ॥ ३१ ॥
इति सञ्जप्य वीरेन्द्रः शेषं पूर्व्ववदाचरेत् ॥ ३२ ॥

फिर ॐ तद्विष्णोः परमं पदं..........विष्णोर्यत् परमं पदं' पर्यन्त मन्त्र का वीरेन्द्र साधक जप करे । शेष पूजन पूर्ववत् करे ॥ ३०-३२ ॥

### कुण्डगोलोद्भवामृतविधानम्

अथ वक्ष्ये च कुण्डोत्थं देवताप्रीतिकारकम् ।
मद्यकुम्भसहस्रैस्तु मांसभारशतैरपि ॥ ३३ ॥
नैव तुष्टिर्भवेद्देव्याः कुण्डगोलोद्भवं विना ।
भगलिङ्गात्मिका देवी भगलिङ्गामृतात्मिका ॥ ३४ ॥

अब मैं देवता को प्रसन्न करने वाले कुण्डोत्थ अमृत के विषय में कहता हूँ । क्योंकि सहस्रों मदिरापूर्ण कलशों एवं तोल में सहस्रभार मांसो से देवी को उतनी सन्तुष्टि नहीं होती, जितनी कुण्डोद्भव अमृत से होती है । भगवती भगलिङ्गात्मिका है और भगलिङ्गामृतात्मिका भी है ॥ ३३-३४ ॥

### देव्याः शुक्ररजोरूपत्वम्

शुक्ररूपा च शुक्रस्था रजोरूपा रजःस्थिता ।

**विन्दुरूपा च विन्दुस्था रजोविन्दुस्वरूपिणी ॥ ३५ ॥**

शुक्र में रहने वाली शुक्ररूपा है और रज में रहने वाली रजोरूपा है। विन्दु में रहने के कारण वह विन्दुरूपा है इसलिये रजोविन्दुस्वरूपिणी है ॥ ३५ ॥

**भगलिङ्गप्रिया देवो भगलिङ्गामृतप्रिया ।**
**भगलिङ्गामृतेनैव तस्मात्तां परिपूजयेत् ॥ ३६ ॥**

भगवती भगलिङ्गप्रिया एवं भगलिङ्गामृतप्रिया है। इसलिये भगलिङ्ग से उत्पन्न अमृत से उनका पूजन करे ॥ ३६ ॥

**वीरद्रव्यस्य पानेन परस्त्रीरमणेन च ।**
**भगलिङ्गामृतेनैव देवीं यश्च प्रपूजयेत् ॥ ३७ ॥**
**न दुःखं जायते तस्य सिद्धमन्त्रो भवेन्नरः ।**
**कुलस्त्रीकुलपुष्पैश्च कुलद्रव्यैः कुलामृतैः ॥ ३८ ॥**
**सम्पूज्य लभते कामानष्टसिद्धींश्च साधकः ।**
**विना कुलोद्भवैर्द्रव्यैः पूजयेद्यश्च चण्डिकाम् ॥ ३९ ॥**
**जन्मान्तरसहस्रस्य सुकृतं तस्य नश्यति ।**
**द्रव्यशोधनमाचर्य शक्तिशोधनमाचरेत् ॥ ४० ॥**

अतः वीरद्रव्य (मद्य) के पीने से, परस्त्री में रमण करने से तथा भगलिङ्ग से उत्पन्न अमृत से जो उनकी पूजा करता है, वह साधक दुःखी नहीं होता क्योंकि वह पुरुष सिद्ध हो जाता है। कुलस्त्री, कुलपुष्प, कुलद्रव्य, कुलामृत, इनसे पूजा करने से साधक अपना मनोरथ प्राप्त करता है तथा आठों सिद्धियाँ भी प्राप्त होती हैं। कुल सम्प्रदाय से उत्पन्न द्रव्यों के बिना जो चण्डिका का पूजन करता है, उसके हजारों जन्म में किये गये समस्त सुकृत नष्ट हो जाते हैं। यहाँ तक द्रव्य (मद्य मांसादि) के शोधन की विधि कही गई। उसके करने के बाद शक्ति शोधन करना चाहिये ॥ ३७-४० ॥

### शक्तिशोधनम्

**यथा द्रव्यं तथा शक्तिं समानीय यथाक्रमम् ।**
**स्नापितां प्रमदां दिव्यां हेतुयुक्तां च दीक्षिताम् ॥ ४१ ॥**
**स्वकान्तां परकान्तां वा घृणालज्जाविवर्जिताम् ।**
**सालङ्कारां सुवेशाञ्च स्थापयेत् तूलिकोपरि ॥ ४२ ॥**

जिस प्रकार द्रव्य (मद्य) लाने की विधि कही गई है, उसी क्रम से स्नान की हुई, मद से विह्वल, दिव्य (मदिरा) से मस्त, घृणा और लज्जा से विवर्जित, आभूषण युक्त, सुन्दर वेश वाली, ऐसी अपनी स्त्री तथा दूसरे की स्त्री लाकर रूई

के गद्दे पर स्थापित करे ॥ ४१-४२ ॥

न्यासजालं प्रकुर्वीत स्वकल्पोक्तविधानतः ।
मातृकान्यासमाचर्य कलान्यासं समाचरेत् ॥ ४३ ॥

उसके बाद अपने सम्प्रदायानुसार समस्त न्यास करे । प्रथमतः मातृका न्यास करे । फिर कला न्यास करे ॥ ४३ ॥

ह्रीङ्कारं तु ललाटे च क्लीङ्कारं वदने तथा ।
ऐङ्कारं हृदये चैव नाभौ ब्लूङ्कारमेव च ॥ ४४ ॥
स्त्रीङ्कारं विन्यसेद्गुह्ये पञ्चकामान् न्यसेद् बुधः ।
ऋष्यादिकं स्वकल्पोक्तं पाद्यादिभिस्ततो यजेत् ॥ ४५ ॥

उसके ललाट में ह्रींकार से, मुख में क्लींकार से, हृदय में ऐङ्कार से, नाभि में ब्लूङ्कार से और गुह्य में स्त्रीङ्कार मन्त्र से साधक न्यास करे । इसके बाद अपने सम्प्रदाय के अनुसार विद्वान् साधक ऋष्यादि न्यास कर पाद्यादि उपचारों से उनका पूजन करे ॥ ४४-४५ ॥

द्राविणीं विन्यसेद्योनौ मूलविद्यां ततः परम् ।
आधारे हृदये चैव भ्रुवोर्मध्ये न्यसेत् क्रमात् ॥ ४६ ॥

योनि में द्राविणी से न्यास कर, उसके बाद मूल विद्या से आधार, हृदय तथा दोनों भ्रुवों के मध्य में बुद्धिमान् साधक न्यास करे ॥ ४६ ॥

पुनर्मूलं ब्रह्मरन्ध्रे न्यसेत् साधकपुङ्गवः ।
मूर्द्धादिपादपर्यन्तं न्यासं कुर्यात्ततः परम् ॥ ४७ ॥

फिर मूलमन्त्र से ब्रह्मरन्ध्र में साधक पुङ्गव न्यास कर मूर्धा से लेकर पाद पर्यन्त मूलमन्त्र से न्यास करे ॥ ४७ ॥

### मैथुनकथनम्

मौलौ कुन्तलकर्षणं नयनयोराचुम्बनं गण्डयो-
र्दन्तेनाधरपीडनं हृदि हतिर्मुष्ट्या च नाभौ शनैः ।
कुक्षौ कण्ठकपोलमण्डलकुचश्रोणीषु देया नखाः
सीमन्ते लिखनं नखैरुरसिजं गृह्णीत गाढं ततः ॥ ४८ ॥
कुर्वीताविरतं मनोभवगृहे मातङ्गलीला इव ।
जङ्घाङ्गुष्ठपदोरुगुल्फहननं चान्योऽन्यतः कामिनोः ॥ ४९ ॥

फिर साधक उस स्त्री के शिर के बालों को कर्षण करे, नेत्र और गण्डस्थल का चुम्बन करे, दाँत से ओठ काटे, हृदय में मुट्ठी से धक्का दे । इसके बाद

नाभि, कुक्षि, कण्ठ, कपोल-मण्डल, कुच तथा श्रोणी में नखक्षत करे । सीमन्त में नख क्षत करे । तदनन्तर कस कर स्तन दबावे । फिर निरन्तर कामगृह में हाथी के तरह लीला करे । फिर परस्पर दोनों कामी एक दूसरे के जङ्घा, अङ्गुष्ठ, पैर, ऊरू और गुल्फ में हनन करे (इसका रहस्यार्थ कुछ और ही है)॥ ४८-४९ ॥

**पाशबीजं वामनेत्रं कामवरुणभूयुतम् ।**
**एकादशस्वरेणाढ्यं चन्द्रबिन्दुसमन्वितम् ॥ ५० ॥**
**अमुकीं द्रावय स्वाहा विन्यसेत् साधकोत्तमः ।**
**वामा या चपलचित्ते रेतो मुञ्चद्वयं पठेत् ॥ ५१ ॥**

फिर कामबीज (क्लीं), वरुण (वं) से युक्त पाशबीज (आं), तदनन्तर वामनेत्र (ई), फिर अ से लेकर एकादश स्वर पर्यन्त (अ-ए) जो चन्द्र विन्दु (अनुस्वार) से संयुक्त हो; उतना उच्चारण कर 'अमुकीं द्रावय स्वाहा' इस मन्त्र से उत्तम साधक न्यास करे । फिर 'वामा या चपलचित्ते रेतो मुञ्च मुञ्च' इसको पढ़े ॥ ५०-५१ ॥

**वरुणं भूदक्षकर्ण युतञ्च कामबीजकम् ।**
**सोमवधूसमायुक्तं चन्द्रमन्त्यस्वरान्वितम् ॥ ५२ ॥**
**द्राविणीबीजं कथितं साधकानां हिताय च ।**
**तस्या योनौ न्यसेद्विद्यां रेत् शु मा तो च मै न त ॥ ५३ ॥**
**आत्मनि चिन्तयेद्देवीं शक्तिमाद्यास्वरूपिणीम् ।**
**निं घ येद् ङ्गे यो न र्ष लि मूलमुच्चार्य साधकः ॥ ५४ ॥**

फिर वरुण एवं भू (वल), जो दक्षिण कर्ण (ऊकार) से युक्त (ब्लूँ) इस काम बीज को अन्त्य स्वर से युक्त चन्द्र (अनुस्वार) द्रा । इस प्रकार हमने द्राविणी बीज साधकों के हित के लिये कह दिया । उसकी योनि (= कुण्डलिनी) में विद्या न्यास करे । फिर मैथुन न करे (लिङ्गे न घर्षयेद् योनिं) (ततो मैथुन मा चरेत्) किन्तु अपनी आत्मा में आदि स्वरूपा महाशक्ति का ध्यान करे ॥ ५३-५४ ॥

**धर्माधर्महविर्दीप्त आत्माग्नौ मनसा स्रुचा ।**
**सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम् ॥ ५५ ॥**
**स्वाहान्तोऽयं महामन्त्र आरम्भे परिकीर्तितः ।**
**ततो जपेत् स्त्रियं गच्छन् मुखे जिह्वामृतं पिबेत् ॥ ५६ ॥**

स्त्री के पास जाते हुये 'धर्माधर्महविर.............जुहोम्यहम् स्वाहा' पर्यन्त मन्त्र का जप करे । जिसको मैंने पहले भी कहा है । सर्वप्रथम मुख में (खेचरी मुद्रा से उत्पन्न) जिह्वा के अमृत का पान करे ॥ ५५-५६ ॥

**कुलमद्यं समानीय वारुणेन च संस्कृतम् ।**

वरुणं स्वरसंयुक्त पञ्चदीर्घसमन्वितम् ॥ ५७ ॥
वौं वरुणाय प्रणव मन्त्रराजेन शोधितम् ।
मुहुर्मुहुः पिबेत् पानं शक्तिजिह्वाविलोडितम् ॥ ५८ ॥
आत्मनि देवीसंयोगाद्देवीभूतां विचिन्त्येत् ।
आत्मनि शक्तिसंयोगादेकीभूतां विचिन्तयेत् ॥ ५९ ॥

इसके बाद वरुण (वं) मन्त्र से सुसंस्कृत कुल मद्य लाकर पञ्चदीर्घ स्वर समन्वित (आं ईं ऊं ऐं औं से युक्त) वरुण (व) वां वीं वूं वैं वौं, फिर प्रणव (ॐ) इस मन्त्र से शुद्धकर, शक्ति रूप जिह्वा को चलाते हुये, उस मद्य को बारम्बार पान करे और अपने में देवी से संयुक्त होने की भावना करे। फिर अपने में शक्ति के संयोग से एक होने की भावना करे ॥ ५७-५९ ॥

सूक्ष्मरूपकमात्मानं शक्तिं कुण्डलिरूपिणीम् ।
जिह्वां मूलमयीं चिन्त्य योनिञ्च कुलरूपिणीम् ॥ ६० ॥

साधक अपने को सूक्ष्मरूप वाला और शक्ति को कुण्डली रूपा समझे तथा जिह्वा को मूलमयी और योनि को कुलरूपिणी के रूप में ध्यान करे ॥ ६० ॥

कुलाकुलविभागेन आत्मानं नीयते त्वयि ।
शुद्धमन्त्रौषधेनैव रेत् म न नेः ञ्च प्र थ यो ॥ ६१ ॥
मथ्यमाने पुनस्तस्या जायते तत्त्वमुत्तमम् ।
तत्त्वत्यागे पठेन्मूलं साधकः स्थिरमानसः ॥ ६२ ॥

फिर कुलाकुलविभाग के द्वारा मै आप में अपने को स्थापित करता हूँ। इस प्रकार के भाव से योनि का प्रमथन (मात्र ध्यान द्वारा) करे (योनेः प्रमथनं चरेत्)। इस प्रकार शुद्ध मन्त्र एवं औषध से योनि के मन्थन करने से उत्तम तत्त्व (वीर्य) उत्पन्न होता है। जब वीर्य रूपतत्त्व का त्याग करने लगे तब स्थिरचित्त साधक मूलमन्त्र पढ़े ॥ ६१-६२ ॥

प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनीस्रुचा ।
धर्माधर्मकलास्नेहपूर्ण अग्नौ जुहोम्यहम् ॥ ६३ ॥
स्वाहान्तोऽयं महामन्त्रं शुक्रत्यागे प्रकीर्त्तितः ।
शिवशक्तिसमायोगो यत्र यत्र प्रजायते ॥ ६४ ॥
तत्र तत्रैव संयोज्यं द्वयमेनं यथाक्रमात् ।
गृह्णीयात्तत् प्रयत्नेन द्रव्यं कुण्डोद्भवं स्मृतम् ॥ ६५ ॥

**कुण्डोद्भवद्रव्य लक्षण**—शुक्र के त्याग के समय 'प्रकाशाकाश.......... जुहोम्यहं स्वाहा' पर्यन्त मन्त्र कहा गया है। जिस-जिस स्थान पर शिवशक्ति का

समायोग हो, वहाँ-वहाँ उक्त दोनों मन्त्रों को पढ़कर उस द्रव्य (वीर्य) को प्रयत्नपूर्वक ग्रहण करे। उसको ही कुण्डोद्भव द्रव्य कहा जाता है ॥ ६३-६५ ॥

**इदं कुण्डोद्भवं द्रव्यं कथितं सुरदुर्लभम्।**
**गोलोद्भवं प्रवक्ष्यामि वीराणां सिद्धिहेतवे ॥ ६६ ॥**

जिस कुण्डोद्भवद्रव्य को हमने ऊपर कहा है, वह देवताओं के लिये भी दुर्लभ है। अब वीरों की सिद्धि के लिये गोलोद्भव द्रव्य के विषय में कहता हूँ ॥ ६६ ॥

**कुलीनां दीक्षितां मत्तां पतिहीनां विचक्षणाम्।**
**सालङ्कारां हेतुयुक्तामनपत्यां मनोरमाम् ॥ ६७ ॥**
**सुन्दरीं शोभनां क्षीणां पीनोन्नतपयोधराम्।**
**साधकाकाङ्क्षहृदयां कलाशास्त्रविचारिणीम् ॥ ६८ ॥**
**न्यासादिकं प्रकुर्वीत स्वकल्पोक्तविधानतः।**
**पूर्वोक्तक्रमयोगेन तत्त्वमुत्पादयेत् सुधीः ॥ ६९ ॥**
**तत्त्वं गृह्णीयात् यत्नेन पूजार्थं साधकोत्तमः।**
**इदं गोलोद्भवं द्रव्यं देवतातृप्तिकारकम् ॥ ७० ॥**
**ताम्रपात्रे गृहीत्वा तु तत्त्वद्रव्यं कुलोचितम्।**
**नानागन्धसमायुक्तं कटुत्रयसमन्वितम् ॥ ७१ ॥**

**कुण्डगोलोद्भव द्रव्य**—कुलीन, दीक्षित, युवावस्थासम्पन्न, कामातुर, पतिहीन, कामकला में विचक्षण सालङ्कार, मद्यपान किये हुये अपत्यरहिता, अत्यन्त सुन्दरी, शोभायुक्त, अत्यन्त पतली, पीन एवं उन्नत पयोधर वाली, साधक में आसक्त, कलाशास्त्र में निपुण, स्त्री में सुधी साधक अपने सम्प्रदाय के अनुसार न्यासादि कर पूर्वोक्त रीति से उसमें तत्त्व (ऊर्ध्वरेतस्) उत्पन्न करे। फिर उसे पूजा के लिये ग्रहण करे। यह गोलोद्भव द्रव्य देवताओं को प्रसन्न करने वाला होता है। अनेक प्रकार के गन्धों से युक्त कुलोचित उस द्रव्य में त्रिकटुकी (सोठ, कालीमिर्च एवं पीपर) मिलाकर ताम्रपात्र में पूजा के लिए स्थापित करे ॥ ६७-७१ ॥

**कुण्डगोलोद्भवादीनां शोधनञ्च प्रचक्ष्यते।**
**शोधयेत् कुण्डगोलादीन् नयत्वर्चासमाहितः ॥ ७२ ॥**

अब कुण्डगोलोद्भव द्रव्य के शोधन का प्रकार कहता हूँ। शोधन किया हुआ कुण्डगोलद्रव्य अर्चा के लिये उपयुक्त होता है ॥ ७२ ॥

**शोधनमन्त्राः**

**ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु।**
**आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥ ७३ ॥**

गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्त्रजौ ॥ ७४ ॥
प्लुं ज्लुं म्लुं ग्लुं ततः स्वाहा अमृतेति ततो वदेत् ।
अमृते अमृतोद्भवे अमृतवर्षिणीति च ॥ ७५ ॥
अमृतं स्रावय स्वाहा द्विरुच्चार्येत्यपि स्मरेत् ।
शेषं पूर्ववदाचर्य अथवान्यतमञ्चरेत् ॥ ७६ ॥

ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्त्रजौ प्लुं ज्लुं म्लुं ग्लुं स्वाहा पर्यन्त मन्त्र पढ़कर 'अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं स्रावय अमृतं स्रावय' इस मन्त्र को पढ़े । शेष क्रिया पूर्ववत् करे, अथवा कोई एक क्रिया करे ॥ ७३-७६ ॥

तारं कूर्चास्त्रमुच्चार्य शिवादित्रयविन्दुयुक् ।
वह्निजाया तारमाया श्रीबीजं सुरतिप्रिये ॥ ७७ ॥
तारमायारमास्त्रञ्च वह्निजायाञ्च वर्तुलम् ।
ततोऽमृतोद्भवायेति अमृतवर्षिणी परम् ॥ ७८ ॥
प्रिये देवि पदं शुक्रशापं मोचययुग्मकम् ।
वह्निजायान्तमन्त्रेण द्रव्यशुद्धिं समाचरेत् ॥ ७९ ॥

तार (ॐ), कूर्च (हुं), फिर अस्त्र मन्त्र फट् का उच्चारण कर, फिर तीन बिन्दु से युक्त शिवादि (शं षं सं), फिर वह्निजाया (स्वाहा), फिर तार (ॐ), माया ह्रीं, फिर श्रीबीज श्रीं, फिर सुरतिप्रिये, तदनन्तर तार (ॐ), माया (ह्रीं), अस्त्र (फट्), फिर वर्तुल (ॐ), 'अमृतोद्भवाय अमृतवर्षिणि प्रिये देवि शुक्रशापं मोचय शुक्रशापं मोचय' फिर अन्त में वह्निजाया 'स्वाहा' पर्यन्त मन्त्र पढ़कर गोलोद्भव द्रव्य का संशोधन करे ॥ ७७-७९ ॥

वीर्यमेतत् समादाय विशेषार्घ्ये नियोजयेत् ।
तेनामृतेन देवेशीं तर्पयेत् साधकोत्तमः ॥ ८० ॥

फिर पूर्वोक्त कुण्डोद्भव द्रव्य लेकर भगवती को विशेषार्घ्य समर्पित करे और उस अमृतद्रव्य से भगवती को उत्तम साधक तर्पण करे ॥ ८० ॥

सान्निध्यं जायते देव्याः सर्वकाममुपालभेत् ।
अचिरान्मृत्युमाप्नोति द्वन्द्वं कृत्वा नराधमः ॥ ८१ ॥

ऐसा करने से देवी का सान्निध्य प्राप्त हो जाता है और समस्त कामनायें पूर्ण हो जाती हैं । देर में मृत्यु होती है और दीर्घ जीवन प्राप्त होता है । उसमें सन्देह

करने वाला नराधम है ॥ ८१ ॥

शङ्काविहीनेन कुलाचारः कर्त्तव्यः

निर्विकल्पकचेतास्तु कुर्यादेवं समाहितः ।
शङ्कया जायते ग्लानिः शङ्कया दुःखभाजनम् ॥ ८२ ॥

साधक इस कार्य को निर्विकल्प (सन्देहरहित) चित्त होकर करे । क्योंकि शङ्का से ग्लानि होती है और शङ्का से दुःख का भाजन होना पड़ता है ॥ ८२ ॥

शङ्कया सर्वहानिः स्याच्छङ्कया धनहानिता ।
शङ्कया सिद्धिहानिः स्यात्तस्माच्छङ्कां परित्यजेत् ॥ ८३ ॥

इसमें शङ्का करने से सब कुछ नष्ट हो सकता है और शङ्का से धन की हानि भी सम्भव है । शङ्का से सिद्धि में बाधा होती है इसलिये शङ्का का सर्वथा त्याग करना चाहिए ॥ ८३ ॥

द्रव्याणांशक्तिभेदकथनम्

अथ वक्ष्यामि द्रव्याणां शक्तिभेदेन यद्भवेत् ।
स्वल्पाङ्गीं दीर्घकेशीं च साधकः शुद्धभावतः ॥ ८४ ॥
पुष्पगन्धा जवापुष्पैर्देवीं गन्धैश्च पूजयेत् ।
तस्याः पुष्पैः प्रयत्नेन सर्वकाममुपालभेत् ॥ ८५ ॥

इब सभी द्रव्यों में शक्तियों के भेद को कहता हूँ और उससे होने वाले परिणाम को भी कहता हूँ । छोटे अङ्गों वाली, लम्बे लम्बे केशों वाली और पुष्प के समान गन्ध वाली स्त्री का, जब पुष्प तथा सुगन्ध से अर्चन करता है तब उसके पुष्पों से प्रयत्नपूर्वक अर्चना करने वाला साधक सभी कामनायें पूर्ण कर लेता है ॥ ८४-८५ ॥

दीर्घाङ्गी दीर्घनयना श्यामा विलज्जिता सदा ।
सुगन्धा सा सुरताद्यैर्विल्वपत्रैः सुगन्धिता ॥ ८६ ॥
तस्याः पुष्पैः प्रयत्नेन देवीं सम्पूजयेत् पराम् ।
गौराङ्गी पुष्टजङ्घा या पुष्टहस्ता मदातुरा ॥ ८७ ॥
मदगन्धा च खार्जुरैः पलाशैः कुसुमैर्यजेत् ।
पुष्पगन्धा जगद्धात्री सा सदा कृष्णारूपिणी ॥ ८८ ॥

दीर्घ अङ्गों वाली विशाल नेत्रा, श्यामा, सर्वदा लज्जाशील, सुरतादि काल में बिल्वपात्र के सुगन्ध के समान सुगन्ध वाली स्त्री के पुष्प से प्रयत्नपूर्वक परा देवी का पूजन करे । गौराङ्गी, पुष्टजङ्घा, पुष्टहस्ता, मदनातुरा और मधुगन्धा के पुष्प में

खर्जूर एवं पलाश के पुष्पों से परा की पूजा करे। पुष्प के समान गन्ध वाली जगद्धात्री भगवती सर्वदा कृष्ण स्वरूपा है ॥ ८६-८८ ॥

**कृशाङ्गी कृशमध्या च मधु दत्त्वा यजेत् पराम् ।**
**क्षीणाङ्गी च यदा कृष्णा दीर्घकेशी मदाकुला ॥ ८९ ॥**
**तीव्रगन्धा च मन्दारैर्नारिकेलोद्भवैः सदा ।**
**पुष्टा खर्वाऽसिताङ्गी या सा भवेन्मदनाश्रया ॥ ९० ॥**
**मधुगन्धा च गौडीभिः पद्मपुष्पैर्यजेत् पराम् ।**
**कृशाङ्गी गौरदीर्घा या सा परा शिशुमालिना ॥ ९१ ॥**

कृशाङ्गी एवं सूक्ष्म कटि वाली स्त्री को मधु देकर परा भगवती की पूजा करे। क्षीण अङ्ग वाली, जब काली हो, दीर्घ केशो वाली एवं मदनातुरा एवं तीव्रगन्धा हो, तब उसके मन्दार एवं नारिकेल के समान वाले पुष्पों से परा देवी की पूजा करे। पुष्टा वामनी काली, जो मदन से आतुर हो और मधु के समान गन्ध वाली हो, तब उसके मद्य के समान एवं कमल के समान पुष्पों से परा देवी की पूजा करे। कृशाङ्गी, गौर दीर्घा तो साक्षात् परा है ही अतः उनकी शिशु (छोटे पुष्प की) माला से पूजा करे ॥ ८९-९१ ॥

25859

**साधकः पूजयेद्देवीं मल्लिकाभिर्विशेषतः ।**
**पुष्टा खर्वाऽसिताङ्गी या सेन्दीवरविकारकैः ॥ ९२ ॥**
**अस्या मैथुनसम्भूतैः केतकीगन्धयोजितैः ।**
**क्षीणा दीर्घा च गौराङ्गी मालतीगन्धयोजिताः ॥ ९३ ॥**
**सा भवेदङ्कुशा नाम्नी तस्या मैथुनभावुकैः ।**
**बन्धूकैर्यदि गौराङ्गी यानङ्गमेखला शुभा ॥ ९४ ॥**
**कर्पूरगन्धहारिद्रद्रव्यैस्तां परिपूजयेत् ।**
**आसां द्रव्यं गृहीत्वा तु तेनैव परिशोधयेत् ॥ ९५ ॥**

साधक मल्लिका पुष्पों से विशेषरूप से भगवती की पूजा करे। पुष्टा, वामनी एवं श्वेत वर्ण वाली, उस मल्लिका-पुष्प के मैथुन से उत्पन्न कमल के समान गन्ध से, अथवा केतकी के समान गन्ध वाले पुष्प से परा भगवती की पूजा करे। क्षीणा, दीर्घा एवं कृशाङ्गी मालती के समान गन्ध वाली ऐसी स्त्री अङ्कुशा नाम वाली होती है। उसके साथ मैथुन से उत्पन्न बन्धूक पुष्प के समान पुष्पों से परा भगवती की पूजा करे। गौराङ्गी (स्त्री) तो साक्षात् शुभ तथा अनङ्गमेखला ही है। उन देवी का कर्पूर गन्ध से तथा हरिद्रा से पूजन करे। उनका द्रव्य लेकर उसीसे उसे शुद्ध करे ॥ ९३-९६ ॥

**तत्तत्पुष्पैः प्रपूज्यैव सर्वसिद्धिमुपालभेत् ।**

**ज्ञात्वा नैवं क्रमं यो हि यदि देवीं प्रपूजयेत् ॥ ९६ ॥**
**भवेद्धि विफलं सर्वं यज्ञेषु घृतवर्जितम् ।**

इस प्रकार तत्तत्पुष्पों से परा देवी की पूजाकर योगी साधक समस्त सिद्धि प्राप्त कर लेता है । जो इस क्रम को जाने बिना परा भगवती की पूजा करता है उस देवी की सारी पूजा व्यर्थ हो जाती है जिस प्रकार बिना घृत के यज्ञ निष्फल हो जाता है ॥ ९६-९७ ॥

**यदुक्ता दशमी शक्तिः सङ्कीर्णवृत्तिसंस्थिता ॥ ९७ ॥**
**गन्धमात्रं तु गृह्णीयाद्वर्णमात्रं न भेदयेत् ।**
**स्वयं स्रष्टा स्वयं विष्णुः स्वयं देवो महेश्वरः ॥ ९८ ॥**

सङ्कीर्ण वृत्ति में रहने वाली जो एक दशमी शक्ति कही गई है । उसे वर्ण (जाति) मात्र से भिन्न न समझे । केवल उसका गन्ध ही ग्रहण करे क्योंकि उसके भी देवता ब्रह्मा एवं विष्णु तथा स्वयं महेश्वर हैं ॥ ९७-९८ ॥

**साधकानन्दभावेन यजेद्देवीं कुलक्रमे ।**
**गजाश्वानां वृषाजानां नराणां शोणितारुणैः ॥ ९९ ॥**

कुल क्रम में साधक को जिस प्रकार आनन्द प्राप्त हो उस विधि से देवी की पूजा करनी चाहिये । हाथी, घोड़ा, बैल, बकरा तथा मनुष्य के लालवर्ण वाले रक्त से परा की पूजा करे ॥ ९९ ॥

पञ्चतत्त्वप्रशंसा

**कुण्डगोलोद्भवैर्मांसैः स्वयम्भूकुसुमैः सदा ।**
**मत्स्यैर्मद्यैश्च नैवेद्यैः प्रत्यक्षीक्रियते नरैः ॥ १०० ॥**

कुण्डगोलोद्भव द्रव्य से, स्वयम्भू के पुष्पों से, मत्स्य एवं मद्य से, तथा नैवेद्य द्वारा अर्चना करने से साधक पराम्बा का प्रत्यक्ष कर सकता है ॥ १०० ॥

**च यां थु दि ने रा मै म जातिभेदं न चाचरेत् ।**
**नाधर्मो जायते किञ्चिन्महामन्त्रस्य साधने ॥ १०१ ॥**

मदिरा एवं मैथुन में (=मदिरायां मैथुन च) जातिभेद त्याग देवे क्योंकि महामन्त्र के साधन में किसी प्रकार का अधर्म नहीं होता ॥ १०१ ॥

**सर्वसिद्धिर्भवत्येव पञ्चतत्त्वनिवेदनात् ।**
**द्रव्यशुद्धेरभावेन नित्यं कर्म न लोपयेत् ॥ १०२ ॥**

मद्यादि पञ्चतत्त्वों के निवेदन से समस्त सिद्धियाँ प्राप्त हो जाती है । यदि द्रव्य शुद्धि का अभाव हो, तो नित्य कर्म का लोप न करे ॥ १०२ ॥

प्रमादाद्यदि लुप्येत रौरवं नरकं व्रजेत् ।
मकारपञ्चकं कृत्वा पुनर्जन्मं न विद्यते ॥ १०३ ॥

प्रमादवश यदि साधक के नित्य कर्म का लोप हो जावे, तो उसे नरक प्राप्त होता है । मकारपञ्चक का विधान करने से पुनः जन्म नहीं होता ॥ १०३ ॥

अतएव महाप्राज्ञः पञ्चतत्त्वेन पूजयेत् ।
येनावश्यं विधातव्यं मदिरादानपूजनम् ॥ १०४ ॥

इसलिये महाप्राज्ञ साधक पञ्चतत्त्वों से देवी का पूजन करे । जिसमें मदिरा देकर भगवती का आवश्यक पूजन सम्पन्न हो ॥ १०४ ॥

नष्टैः पर्युषितोच्छिष्टैर्दुर्गन्धैर्गन्धवर्जितैः ।
हेतुभिः परपात्रस्थैस्तर्पणं निष्फलं भवेत् ॥ १०५ ॥

सर्वथा विकृत अतएव विनष्ट एवं पर्युषित (बासी), उच्छिष्ट (जूठी), दुर्गन्ध तथा गन्धरहित दूसरों के पात्र में स्थित (हेतु=) मद्यों से भगवती का तर्पण न करे क्योंकि वह निष्फल है ॥ १०५ ॥

आमिषासवसौरभ्यहीनं यस्य मुखं भवेत् ।
प्रायश्चित्ती स वर्ज्यश्च पशुरेव न संशयः ॥ १०६ ॥

मांस एवं आसव के सुगन्धि से जिसका मुख रहित हो; वह प्रायश्चित्ती है; निन्द्य है, किं बहुना; साक्षात् पशु है ॥ १०६ ॥

यावदासवगन्धः स्यात्तावत् पशुपतिः स्वयम् ।
विनालिमांसगन्धेन पशुः पशुपतिः स्वयम् ॥ १०७ ॥

जब तक आसव में गन्ध है, तब तक वह स्वयं पशुपति है । इसी प्रकार गन्धरहित मांस वाला पशु भी स्वयं पशुपति है ॥ १०७ ॥

मत्स्यमांसविहीनेन द्रव्येणापि न तर्पयेत् ।
पिशितं तिलमात्रं तु तिलार्धमपि विन्दुना ॥ १०८ ॥
सकृत्तर्पणमात्रेण यज्ञकोटिफलं लभेत् ।
रक्तवस्त्रैः समाच्छाद्य पञ्चतत्त्वं तु रक्षयेत् ॥ १०९ ॥

मत्स्य एवं मांस रहित द्रव्य से भी भगवती का तर्पण न करे । तिल मात्र, अर्द्ध तिल मात्र या विन्दु मात्र के पिशित (मांस) से एक बार भी तर्पण करने से करोड़ों यज्ञों का फल होता है । पूजन के समय रक्त वस्त्रों से आच्छादित कर पञ्चतत्त्व की रक्षा करे ॥ १०८-१०९ ॥

### पशुसन्निधौ वीरपूजा निषिद्धा

मकारपञ्चकैर्देवीं नार्चयेत् पशुसन्निधौ ।
संस्थापयेन्न दक्षे च द्रव्यशुद्धिरितीरिता ॥ ११० ॥

पशु साधक के सन्निधान में पञ्चमकारों से देवी की पूजा न करे । पशु साधक को अपने दक्षिण स्थापित न करे । इस प्रकार हमने द्रव्य की शुद्धि का भी विधान कह दिया ॥ ११० ॥

एतत्तु कथितं द्रव्यं सर्वसिद्धिप्रदायकम् ।
द्विजानामनुकल्पन्तु न साक्षाच्च विकल्पिनाम् ॥ १११ ॥

इस प्रकार सिद्धि प्रदान करने वाले द्रव्यों के विषय में हमने कहा । विकल्प चाहने वाले ब्राह्मणादि के लिये इसका साक्षात् प्रयोग नहीं करना चाहिये अतः उसका अनुकल्प कहता हूँ ॥ १११ ॥

### कुलद्रव्यप्रतिनिधिः

अथातः सम्प्रवक्ष्यामि द्रव्यादिपरिकल्पनम् ।
ब्राह्मणस्ताम्रपात्रे तु मधुमद्यं प्रकल्पयेत् ॥ ११२ ॥

**मद्य का विकल्प**—अब ब्राह्मणादि के लिये मद्य के अनुकल्प के रूप में द्रव्यादि के विषय में कहता हूँ । ब्राह्मण ताम्रपात्र में मधु स्थापित कर उसमें मद्य की भावना करे ॥ ११२ ॥

अथवा ताम्रपात्रेषु गव्यं दद्याद् घृतं विना ।
नारिकेलोदकं कांस्ये गुडार्द्रकं तथैव च ॥ ११३ ॥

अथवा ताम्रपात्र में घृतरहित पञ्चगव्य रखकर उसे समर्पित करे । अथवा कांसपात्र में नारियल का पानी अथवा गुड एवं आदी प्रदान करे ॥ ११३ ॥

गौडी देया क्षत्रियेण माध्वी वैश्येन तत्र वै ।
सर्वं शूद्रेण दातव्यं यत्र वा तद्रुचिर्भवेत् ॥ ११४ ॥

क्षत्रिय गौडी और वैश्य माध्वी मद्य प्रदान करे । शूद्र इन सब वस्तुओं में जिसमें रुचि हो वह प्रदान करे ॥ ११४ ॥

(यद्वा) मत्स्यमांसादिविजया चाष्टगन्धैः सुमिश्रिता ।
सम्मर्द्य वटिकां कृत्वा संगृह्याथ विचक्षणः ॥ ११५ ॥

अब **मांस का विकल्प** कहते हैं—अष्टगन्ध से मिश्रित मत्स्य एवं मांसादि से युक्त विजया (भाँग) को एक में मल कर उसकी गुटिका (गोलियाँ) बनाकर उन्हें समर्पित करे ॥ ११५ ॥

**तदभावे तु विजया जले संलोड्य तर्पयेत् ।**
**गुडमिश्रेण तक्रेण तर्पयेन्मधुयोजितम् ॥ ११६ ॥**

उसके अभाव में केवल विजया जल में पीसकर भगवती का तर्पण कर समर्पित करे अथवा गुड़ से मिश्रित मट्ठे में मधु मिलाकर भगवती का उससे तर्पण करना चाहिए ॥ ११६ ॥

**सौवीरेणाथवा कुर्यादितत्कर्म न लोपयेत् ।**
**मांसाभावे तु लसुनमार्द्रकं नागरन्तु वा ॥ ११७ ॥**

अथवा सौवीर (?) से इस कर्म को करे । किन्तु मांस दान की प्रक्रिया का लोप न करे । मांस के अभाव में साधक लहशुन एवं आदी (=अदरख) और नागर (मोथा) का प्रयोग करे ॥ ११७ ॥

**शूरणं मांसवटकं मूलं वान्यतमञ्चरेत् ।**
**मांसानुकल्पं कथितं मीनस्याथ विधिं शृणु ॥ ११८ ॥**

अथवा शूरन अथवा मांस का वटक (?) अथवा मूलक में किसी एक को प्रदान करना चाहिए । यहाँ तक हमने मांस का अनुकल्प बतलाया । अब मीन की विधि सुनो ॥ ११८ ॥

**माहिषं गवयं क्षीरं अजाक्षीरं तथैव च ।**
**फलमूलञ्च यत्किञ्चिद्दग्धञ्चेदामिषं भवेत्॥ ११९ ॥**

**मीन का अनुकल्प**—भैंस का दूध, गवय का दूध, बकरी का दूध अथवा यत्किञ्चित् फल मूल यदि इसे आग पर दग्ध कर दिया जावे तो वह आमिष हो जाता है ॥ ११९ ॥

कुण्डगोलादिप्रतिनिधिः

**मीनस्य कथितं कल्पं कुण्डगोलोद्भवं शृणु ।**
**अपरापुष्पगर्भे तु कुलस्थानं मनोरमम् ॥१२० ॥**
**सर्वसुखं भवेत्तत्तु महाकामकलात्मकम् ।**
**हयारिकुसुमे नित्यं स्वयमस्ति सदाशिवः ॥ १२१ ॥**

इस प्रकार मीन का भी अनुकल्प हमने कह दिया । अब **कुण्डगोलोद्भव का विकल्प** सुनिए—अपराजिता के पुष्प के गन्ध में अत्यन्त मनोहर कुलदेवी का स्थान है । वह महाकाम कलात्मक है और सर्वसुखावह है । इसी प्रकार हयारि (करवीर) के पुष्प में स्वयं सदाशिव का निवास है ॥ १२०-१२१ ॥

**तन्मुखे द्रव्यमादाय पुष्पमध्येतु चन्दनम् ।**

**रक्तकुङ्कुमरागं वा भिन्नं तत्त्वं शिवात्मकम् ॥ १२२ ॥**
**योजयेच्छिवशक्त्योस्तु ऐक्यं सम्भावयन् धिया ।**
**क्षणं विचिन्त्य तत्रैव सम्पूज्य परमेश्वरीम् ॥ १२३ ॥**

उसके मुख में द्रव्य डालकर तथा हयारि (करवीर) के मध्य में रक्तचन्दन डालकर उसे ग्रहण करे। अथवा रक्तकुङ्कुम के समान पराम्बा है, उससे भिन्न श्वेत-तत्त्व शिवात्मक है। इस प्रकार शिवशक्त्यात्मक दोनों तत्त्वों को एक में मिलाकर बुद्धिपूर्वक ध्यान करना चाहिए। इस प्रकार क्षणमात्र ध्यान कर साधक परमेश्वरी का पूजन करे ॥ १२२-१२३ ॥

**जप्त्वा तदेव कुण्डोत्थं द्रव्यं परमदुर्लभम् ।**
**अन्तरादधिकं ज्ञेयं एतद्द्रव्यं सुदुर्लभम् ॥ १२४ ॥**

फिर मूल मन्त्र का जप करे। इस प्रकार का कुण्डोत्थ द्रव्य परम दुर्लभ है इसे सभी अन्य द्रव्यों से अधिक समझना चाहिए। इस प्रकार का द्रव्य सर्वथा दुर्लभ है ॥ १२४ ॥

**यद्यच्च कथितं द्रव्यमनुकल्पं विकल्पिनाम् ।**
**आदाय पूजयेद्देवीमन्यथा निष्फलं भवेत् ॥ १२५ ॥**

इस प्रकार हमने विकल्प चाहने वालों के लिये अनुकल्प का विधान कहा। इन्हीं को लेकर परमेश्वरी परा भगवती की पूजा करे। अन्यथा पूजा निष्फल हो जाती है ॥ १२५ ॥

**अकृत्वा पञ्चमे पूजां न लब्ध्वा गुरुसम्मतिम् ।**
**स्वहस्तेन पशुं हत्वा रौरवं नरकं व्रजेत् ॥ १२६ ॥**

**॥ इति श्रीमज्ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये पञ्चमोल्लासः ॥५॥**

जो इन पाँचों द्रव्यों से परमेश्वरी की पूजा नहीं करता और गुरु की सम्मति लिए बिना ही तथा अपने हाथ से स्वयं पशु का मारण करता है, वह रौरव नरक में जाता है ॥ १२६ ॥

**महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय के ज्येष्ठ पुत्र पण्डित रामरञ्जन मालवीय कृत श्रीमज्ज्ञानानन्द परमहंस विरचित कौलावलीनिर्णय नामक तन्त्र के पञ्चम उल्लास की निरञ्जन हिन्दी व्याख्या पूर्ण हुई ॥ ५ ॥**

# षष्ठ उल्लासः

अथेदानीं प्रवक्ष्यामि अर्घ्यस्य विधिमुत्तमम् ।
गृहीत्वाज्ञां महादेव्या विशेषार्घ्यं समाचरेत् ॥ १ ॥

**अर्घ्य विधान**—अब इसके बाद अर्घ्य की सर्वोत्तम विधि कहता हूँ। महादेवी की आज्ञा लेकर विशेषार्घ्य का निर्माण करना चाहिये ॥ १ ॥

आत्मदेवीद्वयोर्मध्ये भूमौ चक्रं लिखेत्ततः ।
त्रिकोणञ्चैव षट्कोणं वृत्तं भूगृहसंयुतम् ॥ २ ॥

साधक अपने और देवी के मध्य में अर्घ्यपात्र स्थापित कर भूमि पर चक्र का निर्माण करे और त्रिकोण, फिर षट्कोण, फिर वृत्त, इसके बाद भूगृह का निर्माण करना चाहिये ॥ २ ॥

मध्ये मायां समालिख्य प्रोक्षयेत्तदनन्तरम् ।
अस्त्रान्तमूलमन्त्रेण सामान्यार्घ्यजलेन च ॥ ३ ॥

मध्य में माया (ह्रीं) लिखकर उसके बाद आदि में मूल मन्त्र एवं अन्त में अस्त्र मन्त्र पढ़कर सामान्य अर्घ्य के जल से उसका प्रोक्षण करना चाहिये ॥ ३ ॥

आधारशक्तिमभ्यर्च्य पूजयेत् पीठदेवताः ।
चतुरस्त्रे पूर्णशैलमुड्डीयानं जलन्धरम् ॥ ४ ॥
पूजयेत् कामरूपञ्च पूर्वादिक्रमयोगतः ।

फिर आधार शक्ति की पूजा कर पीठ, देवता का पूजन करना चाहिये। इस प्रकार चतुरस्त्र के पूर्वादि दिशाओं के क्रम से पूर्णशैल, उड्डीयान, जलन्धर और कामरूप की पूजा करे ॥ ४-५ ॥

अङ्गषट्कं यजेत्तत्र षट्कोणेषु च मन्त्रवित् ॥ ५ ॥

तदनन्तर मन्त्रवेत्ता को षट्कोणों में षडङ्ग की पूजा करनी चाहिये ॥ ५ ॥

मूलमन्त्रं त्रिकोणेषु सम्पूज्य साधकोत्तमः ।

आधारशक्तिं मध्ये च सम्पूज्य तदनन्तरम् ॥ ६ ॥

उत्तम साधक त्रिकोण में मूलमन्त्र का पूजन कर मध्य में आधारशक्ति की पूजा करे ॥ ६ ॥

### आधारपात्रादिवर्णनम्

अस्त्रेण क्षालिताधारं स्थापयेत्तत्र साधकः ।
आधारेण विना भ्रंशो न च तृप्यन्ति मातरः ॥ ७ ॥

फिर अस्त्र मन्त्र (फट्) पढ़कर, आधार का प्रक्षालन कर, उसे वहीं स्थापित करे । क्योंकि बिना आधार के मातृकाओं के गिरने का भय रहता है । अतः आधार के बिना उनको प्रसन्नता नहीं होती ॥ ७ ॥

तस्माद्विधिवदाधारं कल्पयेत् कुलनायिके ।
आधारं त्रिपदं प्रोक्तं षट्पदं वा चतुष्पदम् ॥ ८ ॥
अथवा वर्तुलाकारं कुर्यादाधारमुत्तमम् ।
एषामन्यतमं स्थाप्य पूजयेत् कुलवर्त्मना ॥ ९ ॥

इसलिये कुलनायिका के निमित्त विधिपूर्वक आधार की स्थापना अवश्य करनी चाहिये । वह आधार तीन पैर का, चार पैर का अथवा छह पैर का कहा गया है अथवा वह गोलाकार होना चाहिये । इनमें किसी भी प्रकार का उत्तम आधार कुलमार्ग के अनुसार स्थापित करना चाहिये ॥ ८-९ ॥

पूर्ववन्मण्डलं कृत्वा सम्पूज्य तेन वर्त्मना ।
आदौ सेन्दुं महाकालं वह्निमण्डलं ङेयुतम् ॥ १० ॥
हृदन्तं मन्त्रमुच्चार्य आधारे पूजयेत्ततः ।
तत्र सम्पूजयेद्वह्नेः कलादशकं सञ्ज्ञया ॥ ११ ॥

फिर पूर्ववत् मण्डल बनाकर कुलमार्गानुसार उसकी पूजा करे । सर्वप्रथम इन्दु (अनुस्वार) से युक्त महाकाल (मं), फिर चतुर्थ्यन्त वह्निमण्डल (वह्निमण्डलाय), अन्त में हृत् (नमः) मन्त्र का उच्चारण कर आधार मण्डल की पूजा करे । उसपर अग्नि की दशो कलाओं का पूजन करे ॥ १०-११ ॥

### वह्नेः कलादशकम्

धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी ।
सुश्रीः सुरूपा कपिला हव्यकव्यवहेऽपि च ॥ १२ ॥
यादिसेन्दुक्षकारान्ता अब्जाद्याः परिकीर्तिताः ।
ङेयुता वै नमोऽन्ताश्च कला वह्नेरितीरिताः ॥ १३ ॥

धूम्रा, अर्चिरुष्मा, ज्वलिनी, ज्वालिनी, विस्फुलिङ्गिनी, सुश्री, सुरूपा, कपिला, हव्यवाहा और कव्यवाहा—ये अग्नि की दश कलायें हैं । ॐ वं आदि में अब्ज (?) पुनः यं रं लं वं शं षं सं हं क्षं पर्यन्त दश मन्त्र उनके बीजाक्षर हैं। चतुर्थ्यन्त, उनके नाम तथा अन्त में नमः लगाकर उनका पूजन करना चाहिये । यथा—ॐ अं धूम्रायै नमः, ॐ यं अर्चिरुष्मायै नमः इत्यादि ॥ १२-१३ ॥

**अस्त्रान्तमूलमन्त्रेण क्षालितं पात्रमुत्तमम् ।**
**स्वर्णरौप्यशिलाकूर्मकपालालाबुमृण्मयम् ॥ १४ ॥**
**नारिकेलशङ्खताम्रमुक्ताशुक्तिसमुद्भवम् ।**
**पुण्यवृक्षसमुद्भूतं पात्रं कुर्यान्मनोरमम् ॥ १५ ॥**

फिर मूलमन्त्र के अन्त में 'फट्' अस्त्र मन्त्र से प्रक्षालित कर उत्तम पात्र में; जो सुवर्ण, चाँदी, कूर्म, कपाल अलाबु, मिट्टी, नारिकेल, शङ्ख, ताँबा, मोती अथवा शुक्ति का बना हो अथवा किसी पुण्य वृक्ष के काष्ठ से निर्मित हो; उसका निर्माण करे ॥ १२-१५ ॥

(यद्वा) **काञ्चनरौप्यकाचताम्रजनितं मुक्ताकपालोद्भवं**
**विश्वामित्रमयञ्च कामदमिदं हैमं प्रियं स्फाटिकम् ।**
**भावप्रीतिमदष्टसिद्धिजनकं श्रीनारिकेलोद्भवं**
**कापालं स्फुटमन्त्रसिद्धिजनकं मुक्तिप्रदं मौक्तिकम् ॥ १६ ॥**

(अथवा) जो सुवर्ण, चाँदी, सीसा, ताँबे का अथवा मोती अथवा कपाल हो; अथवा विश्वामित्रमय हो; ऐसा पात्र कामनाओं की पूर्त्ति करता है । हेम अथवा स्फटिक निर्मित पात्र भाव और प्रीति तो उत्पन्न करता ही है; आठो प्रकार की सिद्धियाँ भी प्रदान करता है । नारिकेल का पात्र और कापाल पात्र स्पष्ट रूप से मन्त्रसिद्धि प्रदान करता है । मोती का पात्र मुक्ति प्रदान करता है ॥ १६ ॥

(यद्वा) **सौवर्णरौप्यताम्राणि सर्वसिद्धिकराणि च ।**
**शान्तिके च शिलापात्रं स्तम्भे चैव तु मृण्मयम् ॥ १७ ॥**
**नारिकेलं सर्ववश्ये मोक्षे चैव तु मौक्तिकम् ।**
**ज्ञानप्रदं कपालं स्यान्मारणे लौहमुत्तमम् ॥ १८ ॥**

(अथवा) सुवर्ण, चाँदी, ताँबा, निर्मित पात्र सभी प्रकार की सिद्धियाँ प्रदान करते हैं शान्ति कार्य में शिलापात्र, स्तम्भन में मिट्टी का, वशीकरण में नारिकेल का पात्र, मोक्ष में मोती का पात्र, ज्ञान प्राप्ति में कपाल पात्र, मारण में लोहे का पात्र प्रशस्त कहा गया है ॥ १७-१८ ॥

**कुर्यात् स्वर्णमयं पात्रं विश्वामित्रं कपालकम् ।**

**शङ्खं ज्ञानप्रदं मुक्ताशुक्तिविद्याप्रदायिनी ॥ १९ ॥**

अथवा स्वर्णमय पात्र, विश्वामित्र पात्र कपाल पात्र तथा शङ्ख पात्र ज्ञानप्रद है। मोती और शुक्तिपात्र विद्याप्रद है ॥ १९ ॥

**कपालालावूपात्राणि योगसिद्धिकराणि च ।**
**पुण्यवृक्षजपात्राणि सर्वपापहराणि च ॥ २० ॥**

कपाल और अलाबू (लौकी का) पात्र योग की सिद्धि करने वाले हैं और पुण्य वृक्षों के काष्ठ से बने पात्र सभी प्रकार के पापों को दूर करते हैं ॥ २० ॥

**उक्तेष्वेतेषु पात्रेषु पात्रमेकं प्रकल्पयेत् ।**
**षोडशाङ्गुलविस्तार षष्ठाङ्गुलसमुच्छ्रयम् ॥ २१ ॥**
**अथवापि तदर्द्धं स्यात्तदर्द्धं वापि कारयेत् ।**
**एकाङ्गुलं तथा सार्धं षट्कञ्च वै प्रमाणतः ॥ २२ ॥**

उपर्युक्त कहे गये पात्रों में कोई एक पात्र निर्माण करे। जिसका विस्तार १६ अङ्गुल और ऊँचाई छह अङ्गुल हो। अथवा उसका आधा; अथवा उस आधे का भी आधा पात्र निर्माण करे; अथवा कम से कम प्रमाण में साढ़े छह अङ्गुल लम्बा और एक अङ्गुल ऊँचा पात्र निर्माण करे ॥ २१-२२ ॥

**अतिसूक्ष्ममतिस्थूलं सच्छिद्रं परिवर्ज्जयेत् ।**
**न योजयेद् भग्नपात्रं स्वप्रादेशं प्रशस्यते ॥ २३ ॥**

इससे छोटा से भी छोटा पात्र हो सकता है किन्तु उसे सच्छिद्र नहीं होना चाहिये। टूटा-फूटा पात्र उपयोग में नहीं लाना चाहिये। अपने प्रादेश मात्र (= एक बित्ता) का पात्र प्रशस्त कहा गया है ॥ २३ ॥

**एषामेकतमं पात्रं स्थापयेत् त्रिपदोपरि ।**
**मण्डलं पूर्ववत् कृत्वा पूजयेत् पूर्ववर्त्मना ॥ २४ ॥**

इनमें से कोई एक पात्र त्रिपद पर स्थापित करे। उस पर पूर्ववत् मण्डल निर्माण करे और उसका पूजन पूर्व की भाँति करे ॥ २४ ॥

**सूर्यस्य मण्डलं तत्र चिन्तयित्वाथ पूजयेत् ।**
**स्वराद्यं बिन्दुसहितं ङेयुतम् अर्कमण्डलम् ॥ २५ ॥**

उस मण्डल में सूर्यमण्डल का ध्यान कर उनका पूजन करे। आदि में बिन्दुसहित स्वरादि मन्त्र से चतुर्थ्यन्त लगाकर सूर्यमण्डल की पूजा करे। यथा— 'ॐ अं आं इं ईं उं ऊं एं ऐं ओं औं अं अः सूर्यमण्डलाय नमः पूजयामि' इत्यादि ॥ २५ ॥

**नमोऽन्तं मन्त्रमुच्चार्य पूजयित्वार्घ्यपात्रकम् ।**
**कलाः सम्पूजयेत्तत्र भानोर्द्वादशसञ्ज्ञकाः ॥ २६ ॥**

इस प्रकार 'नमोऽन्त' पर्यन्त मन्त्र का उच्चारण कर अर्घ्यपात्र की पूजा कर सूर्य के द्वादश कलाओं की उसमें पूजा करे ॥ २६ ॥

द्वादशसूर्यकलाः

**तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः ।**
**सुषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा ॥ २७ ॥**

तपिनी, तापनी, धूम्रा, मरीचि, ज्वालिनी, रुचि ,सुषुम्ना, भोगदा, विश्वा, बोधिनी, धारिणी तथा क्षमा—ये द्वादश कलाओं के नाम हैं ॥ २७ ॥

**कभाद्याश्च ठडान्ता वै विन्दुयुक्ता यथाक्रमात् ।**
**बीजाद्याश्च कला ज्ञेयाश्चतुर्थ्याद्या नमोऽन्विताः ॥ २८ ॥**

आदि में क से लेकर भ पर्यन्त वर्ण तथा अन्त में ठ से लेकर ड पर्यन्त मातृका वर्णों से, कला के आदि अक्षरयुक्त बीज से चतुर्थ्यन्त लगाकर उनकी पूजा करनी चाहिए ॥ २८ ॥

**इमाः कलाः सुसम्पूज्याः पात्रञ्च पूजयेत्ततः ।**
**रक्तचन्दनपुष्पैश्च सुगन्धैः सुमनोहरैः ॥ २९ ॥**
**ततश्च पूरयेत् पात्रं त्रिभागं कुम्भहेतुतः ।**
**वरुणं मूलमन्त्रञ्च विलोममातृकां पठन् ॥ ३० ॥**

इन कलाओं की पूजा कर लेने के पश्चात् उस पात्र की भी लाल चन्दन तथा मनोहर सुगन्धित लाल पुष्पों से पूजा करे । फिर कुम्भ में रहने वाले हेतु (मद्य) से उस पात्र के तीन भाग को वरुण (व) मूल मन्त्र तथा विलोम (उल्टे) क्रम से मातृका वर्णों को पढ़ते हुये पूर्ण करे ॥ २९-३० ॥

**जलेन भागमेकं तु पूरयेत् साधकोत्तमः ।**
**तत्र दूर्वाक्षतारक्तपुष्पचन्दनसंयुतम् ॥ ३१ ॥**
**पूर्वोद्धृतं कुण्डगोलं विल्वपत्रं क्षिपेत्ततः ।**
**मांसं मत्स्यं विनिक्षिप्य मुद्राश्चैव विशेषतः ॥ ३२ ॥**

शेष एक भाग जल से पूर्ण करे । उसमें दूर्वा, अक्षत, रक्तपुष्प, रक्तचन्दन, संयुक्त पूर्वोद्धृत कुण्ड गोल तथा विल्वपत्र डाल देवे । मांस एवं मत्स्य डालकर विशेष रूप से मुद्रा प्रदर्शित करे ॥ ३१-३२ ॥

**नानासुगन्धिकञ्चैव नवरत्नं विनिक्षिपेत् ।**

एलालवङ्गकक्ष्वेलजातीफलसमन्वितम् ॥ ३३ ॥
चन्द्रचन्दनकस्तूरीरोचनागुरुकुङ्कुमम् ।
स्वयम्भूकुसुमं कुण्डगोलोत्थञ्चाष्टगन्धकम् ॥ ३४ ॥
तत्र क्षिप्त्वा च वीरेन्द्रः पूजयेच्चन्द्रमण्डलम् ।
सबिन्दुं वामकर्णञ्च ङेयुतं सोममण्डलम् ॥ ३५ ॥
हृदन्तं मनुमुच्चार्य पात्रमध्ये प्रपूजयेत् ।
कला सोमस्य तत्रैव द्विरष्टसंख्यका यजेत् ॥ ३६ ॥

इसी प्रकार अनेक प्रकार के सुगन्धित द्रव्य तथा नवरत्न भी प्रक्षिप्त करे । फिर इलायची, लवङ्ग, कक्कोल, जाती फल सहित कपूर, चन्दन, कस्तूरी, रोचना, अगुरु, कुङ्कुम, स्वयम्भू, कुसुम, कुण्डगोलोद्भव तथा अष्टगन्ध डालकर वीरेन्द्र साधक बिन्दु के सहित वामकर्ण ऊँ के बाद चतुर्थ्यन्त सोममण्डल, अन्त में हृत् नमः पढ़कर इस मन्त्र से पात्र के मध्य में ( साधक सोममण्डल की) पूजा करे । फिर उसी पात्र में चन्द्रमा की सोलह कलाओं का यजन करे । (ॐ ऊँ सोममण्डलाय नमः) ॥ ३३-३६ ॥

**षोडशसोमकलाः**

अमृता मानदा पूषा तुष्टिः पुष्टि रतिर्धृतिः ।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा॥ ३७ ॥
पूर्णा पूर्णामृता कामदायिन्यः स्वरजाः कलाः ।
अकाराद्या विन्दुयुता ङेयुताश्च नमोऽन्तिकाः ॥ ३८ ॥
पूज्याः सर्वाः प्रयत्नेन कला ज्ञेया विधोरिमाः ।
पूर्ववत्तीर्थमावाह्य पूर्ववन्मण्डलं लिखेत् ॥ ३९ ॥

अमृता, मानदा, पूषा, तुष्टि, पुष्टि, रति, धृति, शशिनी, चन्द्रिका, कान्ति, ज्योत्स्ना, श्री, प्रीति, अङ्गदा, पूर्णा एवं पूर्णामृता—ये सभी कामदायिनी सोलह कलायें सोलह स्वरों से उत्पन्न हुई हैं । अतः क्रमशः विन्दुयुक्त अकारादि सोलह स्वरों से इन कलाओं को चतुर्थ्यन्त तथा अन्त में नमः लगाकर इन चन्द्रमा की कलाओं का पूजन करे। यथा—'ॐ अं अमृतायै नमः' इत्यादि इन सभी कलाओं की प्रयत्नपूर्वक पूजा करे । तब उस चन्द्रमण्डल में साधक पूर्ववत् तीर्थो का आवाहन कर पुनः पूर्ववत् मण्डल निर्माण करे ॥ ३७-३९ ॥

पूर्ववन्मन्त्रमुच्चार्य आनन्दभैरवं यजेत् ।
आनन्दभैरवीं देवीं तत्र सम्पूज्य देशिकः ॥ ४० ॥

फिर विद्वान् साधक पूर्ववत् मन्त्र का उच्चारण कर आनन्दभैरव तथा आनन्दभैरवी की पूजा करे ॥ ४० ॥

निजेष्टदेवतां तत्रावाहयेच्च ततः परम् ।
आवाहन्यादिमुद्राश्च साधको दर्शयेत्ततः ॥ ४१ ॥
स्वकल्पोक्तविधानेन मुद्राः सन्दर्शयेत्ततः ।
दर्शयित्वा ततो मुद्रामिष्टदेवं यजेत्ततः ॥ ४२ ॥

इसके बाद साधक अपने इष्ट देवता का आवाहन कर उन्हें आवाहनी सन्निधापनी आदि मुद्रा अपने सम्प्रदायानुसार प्रदर्शित करे । इस प्रकार मुद्रा प्रदर्शित करने के बाद पुनः इष्टदेव की पूजा करे ॥ ४१-४२ ॥

पूर्ववच्च षडङ्गानि त्रिकोणानि प्रपूजयेत् ।
अकथादित्रिरेखायां मध्ये मायां समालिखेत् ॥ ४३ ॥
हसौ मध्ये च संलिख्य पूर्वादिचातुरस्रिके ।
सम्पूजयेत्ततः पश्चात् पञ्चरत्नं सुसाधकः ॥ ४४ ॥

पूर्ववत् षडङ्गों का तथा त्रिकोण का पूजन करे । फिर अ क थादि तीन रेखाओं के मध्य में माया (ह्रीं) मन्त्र लिखे । फिर हसौ लिखकर चतुष्कोण के पूर्वादि चारो दिशाओं में पञ्चरत्न की उत्तम साधक पूजा करे ॥ ४३-४४ ॥

### पञ्चरत्नपूजाविधानम्

पञ्चान्तकं क्षितियुतं दक्षकर्णसमन्वितम् ।
गगनान्ते च रत्नेभ्यो नमोऽन्तमनुमुद्धरेत् ॥ ४५ ॥

**प्रथम मन्त्र**—दाहिने कर्ण (उ) से समन्वित क्षिति (ल), फिर पञ्चान्तक ग, फिर गगन, उसके अन्त में रत्नेभ्यो नमः । इस प्रकार मन्त्र का उद्धार करे । यथा—लुं गं गगनरत्नेभ्यो नमः ॥ ४५ ॥

शीतलं शक्रसंयुक्तमग्रबिन्दुविभूषितम् ।
स्वर्गपदं समुच्चार्य रत्नेभ्यो नम इत्यपि ॥ ४६ ॥

**द्वितीय मन्त्र**—फिर शक्र (ल) से संयुक्त शीतल (व), जो अग्रबिन्दु से विभूषित हो, फिर 'स्वर्ग' पद का उचारण कर 'रत्नेभ्यो नमः' का उच्चारण करे । यथा—'लं वं स्वर्गरत्नेभ्यो नमः ॥ ४६ ॥

पञ्चमं देवराजञ्च दक्षश्रोत्रसमन्वितम् ।
पातालपद रत्नेभ्यो नमोऽन्तश्चापरो मनुः ॥ ४७ ॥

**तृतीय मन्त्र**—पञ्चम (व) दक्षश्रोत्र (उ) से समन्वित देवराज (ल), फिर 'पातालरत्नेभ्यो नमः' का उच्चारण करे । यह अन्य (तृतीय) मन्त्र है । यथा—वं लुं पातालरत्नेभ्यो नमः ॥ ४७ ॥

महाकालं क्षितियुतं दक्षकर्णसमन्वितम् ।
मर्त्यरत्ने ततः पश्चाद्भ्यो नमोऽत्र समुद्धरेत् ॥ ४८ ॥
वामपादं क्षितियुतं दक्षश्रवणभूषितम् ।
नागपदं समुच्चार्य रत्नेभ्यो नम इत्यपि ॥ ४९ ॥

**चतुर्थ मन्त्र**—फिर महाकाल (श), जो दक्षकर्ण (उ) से समन्वित क्षिति (ल) से युक्त हो, फिर मर्त्यरत्नेभ्यो नमः—इस प्रकार यह चतुर्थ मन्त्र है । यथा—लुं शं मर्त्यरत्नेभ्यो नमः ।

**पञ्चम मन्त्र**—फिर दक्ष कर्ण (उ) से भूषित क्षिति (ल) फिर वामपाद (ह), फिर 'नागरत्नेभ्यो' पद और नमः का उच्चारण करे—इस प्रकार यह पञ्चम मन्त्र है । यथा—लुं हं नागरत्नेभ्यो नमः ॥ ४८-४९ ॥

इति मध्ये सुसम्पूज्य त्रिरेखासु ततः परम् ।
वाग्भवान्ते च दिव्यौघं गुरुसञ्ज्ञाञ्च पादुकाम् ॥ ५० ॥
पूजयामि ततः पश्चादेवम्बिधं त्रयं यजेत् ।
सिद्धौघं मानवौघञ्च पूजयित्वा मनुं जपेत् ॥ ५१ ॥

इस प्रकार मध्य में पूजन कर तीनो रेखाओं में 'एं दिव्यौघ गुरुपादुकां पूजयामि' फिर 'ऐं सिद्धौघगुरुपादुकां पूजयामि' फिर 'मानवौघ गुरुपादुकां पूजयामि' से क्रमशः पूजा कर निम्न मन्त्र का जप करे ॥ ५०-५१ ॥

**अमृतेश्वरीमन्त्रः**

अखण्डैकरसानन्दकरे परसुधात्मनि ।
स्वच्छन्दस्फुरणामत्र निधेह्यकुलरूपिणि ॥ ५२ ॥

अखण्डैक रसानन्द करे........................निधेह्यकुलरूपिणि' यह प्रथम श्लोक मन्त्र है ॥ ५२ ॥

अकुलस्थामृताकारे शुद्धिज्ञानकरे परे ।
अमृतत्त्वं निधेह्यस्मिन् वस्तुनि क्लिन्नरूपिणि ॥ ५३ ॥

अकुलस्थामृताकारे........क्लिन्नरूपिणि यह दूसरा श्लोक मन्त्र है ॥ ५३ ॥

तद्रूपेणैकरस्यञ्च दत्त्वा ह्येतत् स्वरूपिणि ।
भूत्वा परामृताकारं मयि चित्स्फुरणं कुरु ॥

तद्रूपेणैकरस्यञ्च........चित्स्फुरणं कुरु यह तीसरा मन्त्र है ॥ ५४ ॥

इति मन्त्रत्रयेणैवमभिमन्त्र्य ततः परम् ।
ब्रह्माण्डखण्डसम्भूतमशेषरससम्भवम् ॥ ५५ ॥

आपूरितं महापात्रं पीयूषरसमावह ।
वाग्भवं पञ्चमं क्षौणीं वामश्रोत्रसमन्वितम् ॥ ५६ ॥
क्षौं जूं सं अमृतेऽमृतोद्भवेऽमृतेश्वरि ।
अमृतवर्षिणि प्रोच्य अमृतं स्रावयद्वयम् ॥ ५७ ॥
वह्निजायान्तमुच्चार्य चोद्धरेदपरन्ततः ।
वाग्भवं वदयुग्मञ्च वाग्वादिनि ततः परम् ॥ ५८ ॥
वाङ्मनः पदमाभाष्य क्लिन्ने क्लेदिनि तत्परम् ।
क्लेदयद्वितयं महामोक्षं कुरुद्वयं वदेत् ॥ ५९ ॥
कामबीजं शक्तिबीजं मोक्षं कुरुद्वयं वदेत् ।
प्रेतबीजं समुच्चार्य हसौर्नमस्ततः परम् ॥ ६० ॥
अनेनैव विधानेन अभिमन्त्र्य ततः परम् ।
आनन्दभैरवं देवमानन्दभैरवीमपि ॥ ६१ ॥
त्रिवारं मूर्ध्नि सन्तर्प्य मुद्राः सन्दर्शयेत्ततः ।
पूर्वोक्ताश्चातुरस्राद्याः शङ्खमुद्रां ततः परम् ॥ ६२ ॥

इस प्रकार तीन मन्त्र से अर्घ्य का अभिमन्त्रण कर 'ब्रह्माण्ड खण्डसम्भूत.....
..पीयूषरसमावह' पर्यन्त पढ़कर वाग्भव (ऐं) पञ्चम (व) जो वाम श्रोत्र (उ) से समन्वित हो फिर क्षौणी ल तदनन्तर क्षौं जू सं अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि' उच्चारण कर अमृतं, फिर दो बार स्रावय, तदनन्तर वह्निजाया (स्वाहा) इस प्रकार मन्त्र का उद्धार करे । इसके बाद दूसरे मन्त्र का वाग्भव (ऐं), फिर दो बार वद, उसके बाद 'वाग्वादिनी', फिर 'वाङ्मनः' पद कहकर क्लिन्ने क्लेदिनि, उसके बाद दो बार क्लेदय, फिर 'महामोक्षं' कहकर दो बार 'कुरु' का उच्चारण करे । पुनः कामबीज (क्लीं), शक्तिबीज (ह्रीं), फिर मोक्षं, इसके बाद दो बार 'कुरु कुरु' कहे, इसके बाद प्रेत बीज 'हं' का उच्चारण कर 'हसौः नमः' पद उच्चारण करे । इस मन्त्र से उसे अभिमन्त्रित कर 'आनन्दभैरव देव' तथा 'आनन्दभैरवी' के शिर पर तीन बार तर्पण कर पश्चात् पूर्वोक्त चातुरस्रादि; उसके बाद शङ्ख मुद्रा प्रदर्शित करे ॥ ५५-६२ ॥

### शङ्खमुद्राकथनम्

वामाङ्गुल्यस्तथा श्लिष्टाः संयुक्ताः सुप्रसारिताः ।
दक्षिणाङ्गुष्ठ संस्पृष्टा मुद्रैषा शङ्खसंज्ञिका ॥ ६३ ॥

दाहिने हाथ से बायें अङ्गूठे को पकड़कर, मुट्ठी को उतान कर, अङ्गुष्ठ को फैला देवे, बायें हाथ की अङ्गुलियों को उसी प्रकार से एक में गूँथकर दाहिने हाथ के अङ्गूठे से मिला देवे तो वह शङ्ख मुद्रा बन जाती है ॥ ६३ ॥

मत्स्यमुद्राकथनम्

अधोमुखं दक्षपाणिं वामञ्चैव तथाविधम् ।
उपर्युपरियोगेन मिलिताः सरलाङ्गुलीः ॥ ६५ ॥
अङ्गुष्ठौ चालयेत् किञ्चिन्मुद्रैषा मत्स्यसंज्ञिता ।
मत्स्यमुद्राञ्च सन्दर्श्य धेनुमुद्राञ्च दर्शयेत् ॥ ६६ ॥

दाहिना हाथ नीचे रखे, बायें को जैसे-तैसे रहने दे, ऊपर से अङ्गुलियाँ सीधी रहें, धीरे-धीरे दो अङ्गूठों को चलाता रहे, तो वह मत्स्य मुद्रा बन जाती है। इस प्रकार मत्स्य मुद्रा प्रदर्शित करने के बाद धेनु मुद्रा प्रदर्शित करे ॥ ६५-६६ ॥

अवगुण्ठ्य ततः पश्चात् योनिमुद्रां च दर्शयेत् ।
त्रितालछोटिकाभिश्च दिग्बन्धनं ततश्चरेत् ॥ ६७ ॥

फिर अवगुण्ठन मुद्रा दिखाकर योनिमुद्रा प्रदर्शित करे । फिर तीन ताल देकर चुटकी बजाकर दिग्बन्धन करे ॥ ६७ ॥

अष्टधा मूलविद्यां च जप्त्वा तु चिन्तयेत्ततः ।
इष्टदेवस्वरूपञ्च विभाव्य साधकोत्तमः ॥ ६८ ॥

फिर उत्तम साधक मूलमन्त्र को आठ बार जपकर अपने इष्टदेव के स्वरूप का ध्यान करे ॥ ६८ ॥

आर्घ्यस्य स्थापनं प्रोक्तं सर्वशास्त्रेषु सिद्धिदम् ।
तथा च सिद्धविद्यानामाचारः कथ्यतेऽधुना ॥ ६९ ॥

यहाँ तक सभी शास्त्रों में कहे गये अर्घ्य स्थापन की विधि हमने कही जो सभी प्रकार की सिद्धियों को देने वाला है । अब सिद्धविद्या के अनुसार उसके अनुष्ठान की विधि कहता हूँ ॥ ६९ ॥

ततः शङ्खं वीरपात्रं स्थापयेन्मध्यभागतः ।
श्रीविद्योक्तविधानेन ततः पूजां समाचरेत् ॥ ७० ॥

शङ्ख पात्र और वीर पात्र मध्य भाग में स्थापित करे । फिर श्री विद्या में कही गई विधि के अनुसार परा भगवती की पूजा करे ॥ ७० ॥

सिद्धविद्याचारः

विसर्जनावधि वीरो नोद्धरेन्न च चालयेत् ।
तस्माद्बिन्दुं विनिक्षिप्य सामान्यार्घ्ये ततः परम् ॥ ७१ ॥

जब तक विसर्जन न हो जावे, तब तक इन दोनों पात्रों को न उठावे, न

चलावे । मात्र कुशा के द्वारा उस जल का विन्दु मात्र जल सामान्य अर्घ्य पात्र में डाल देवे ॥ ७१ ॥

### पात्रसंख्यानिर्णयः

**देव्यर्घ्यकुम्भयोर्मध्ये पात्राणि स्थापयेद् यथा ।**
**गुरोः पात्रं घटस्यान्ते तदन्ते भोगपात्रकम् ॥ ७२ ॥**

तदनन्तर देवी के लिये स्थापित अर्घ्य पात्र और कुम्भ के मध्य में, जिस प्रकार पात्र स्थापन करना चाहिये, उसे कहता हूँ । कलश के अन्त में गुरु पात्र और उसके बाद भोगपात्र स्थापित करे ॥ ७२ ॥

**तदन्ते शक्तिपात्रञ्च योगिनीनां तदन्तिके ।**
**तदन्ते वीरपात्रञ्च बलिपात्रं तदन्तिके ॥ ७३ ॥**
**पाद्यमाचमनीयञ्च पात्राणि स्थापयेद्बुधः ।**
**उत्तमं नवपात्राणि सप्तपात्राणि मध्यमम् ॥ ७४ ॥**

उसके अन्त में शक्तिपात्र, उसके सन्निकट योगिनी पात्र, उसके सन्निकट वीरपात्र, फिर बलिपात्र, फिर पाद्य आचमनीय पात्र साधक स्थापित करे । नव पात्र उत्तम कहे गये हैं, सात पात्र मध्यम कहे गये हैं ॥ ७३-७४ ॥

**केचिद्वदन्ति मन्त्रज्ञाः पञ्चपात्राणि मध्यमम् ।**
**अधमं तानि पात्राणि एकपात्रं न कारयेत् ॥ ७५ ॥**

कोई मन्त्रज्ञ पाँच पात्रों को स्थापित करे तो उसे मध्यम कहते हैं । तीन पात्र का स्थापन अधम कहा गया है । अतः एक पात्र कदापि स्थापित न करे ॥ ७५॥

**एकपात्रं न कुर्वीत यदि साक्षात् कुलेश्वरः ।**
**मन्त्राः पराङ्मुखा यान्ति विघ्नाश्चैव पदे पदे ॥ ७६ ॥**
**इह लोके च दारिद्र्यं मृते च पशुतां व्रजेत् ।**

साक्षात् कुलेश्वर हो, तो भी एक पात्र स्थापित न करे । क्योंकि एक पात्र के स्थापन से मन्त्र विरुद्ध हो जाते हैं और पद पद पर विघ्न उपस्थित होता है । इस लोक में दरिद्रता प्राप्त होती है और मरने पर पशुता प्राप्त होती है ॥ ७६-७७ ॥

**देवीपात्रं गुरोः पात्रं भोगपात्रं त्रयं मतम् ॥ ७७ ॥**
**पूजापात्रं बलेः पात्रं पञ्चपात्रेष्वयं विधिः ।**
**शक्तेः पात्रं वीरपात्रं सप्तपात्रेष्वयं विधिः ॥ ७८ ॥**

यदि तीन पात्र स्थापन करना हो, तो साधक को मात्र देवपात्र, गुरुपात्र तथा भोगपात्र ही स्थापित करना चाहिए । पाँच पात्र में, उसके अतिरिक्त पूजा पात्र और

बलि पात्र बढ़ा देवे । सात पात्र में उन पात्रों के अतिरिक्त शक्ति पात्र और वीर पात्र बढ़ा देवे ॥ ७७-७८ ॥

**पूजापात्रञ्च विज्ञेयं योगिनीनाञ्च पूजने ।**
**पाद्यमाचमनीयञ्च नवपात्रेष्वयं विधिः ॥ ७९ ॥**

इसी प्रकार योगिनी की पूजा में पाद्य पात्र और आचमनीय पात्र इन दो पात्रों को बढ़ा देवे । नव पात्रों की स्थापन की यह विधि है ॥ ७९ ॥

**पात्रस्थापनाविधिः**

**पात्राणां स्थापनं वक्ष्ये यथातन्त्रविधानतः ।**
**कुम्भस्य दक्षिणे कुर्यात्त्रिकोणं वृत्तभूगृहम् ॥ ८० ॥**

अब तन्त्रशास्त्र के विधानानुसार अन्य पात्रों के स्थापन की विधि कहता हूँ । कलश के दक्षिण में त्रिकोण, फिर वृत्त, फिर भूगृह निर्माण करे ॥ ८० ॥

**पूर्ववत् प्रोक्षणादिञ्च कृत्वाधारं विनिक्षिपेत् ।**
**तत्र सम्पूजयेद्वह्निमण्डलं तदनन्तरम् ॥ ८१ ॥**

उन पात्रों को क्रमशः पूर्ववत् प्रोक्षणादि कर आधार पर स्थापित करे । उस पर वह्निमण्डल की पूजा करे ॥ ८१ ॥

**प्रक्षाल्य पूर्ववत् पात्रं आधारे स्थापयेत्ततः ।**
**अभ्यर्च्य मण्डलं तत्र सूर्यस्य पूरयेत्ततः ॥ ८२ ॥**

साधक पुनः पात्र का पूर्ववत् प्रोक्षणादि कर आधार पर उसे स्थापित करे और उस पर सूर्यमण्डल की पूजा करे । फिर उस सूर्यपात्र को कलश के जल से पूर्ण कर देना चाहिए ॥ ८२ ॥

**कुम्भामृतेन सम्पूज्य सोमस्य मण्डलं यजेत् ।**
**कुण्डगोलं क्षिपेत्तत्र कुसुमं गन्धचन्दनम् ॥ ८३ ॥**

तदनन्तर कुम्भामृत से सोममण्डल की पूजा करे । उसमें कुण्डगोल डाले तथा पुष्प, गन्ध और चन्दन डाल देवे ॥ ८३ ॥

**षट्कोणं वृत्तभूपुरं लिखित्वा पूजयेत्ततः ।**
**अङ्गषट्कं कोणषट्कं मुद्राः पूर्ववदाचरेत् ॥ ८४ ॥**

षट्कोण, वृत्त, भूपुर लिख कर, उस पर अङ्गषट्क और कोण षट्क की पूजाकर पूर्ववत् मुद्रा प्रदर्शित करे ॥ ८३-८४ ॥

**दिग्बन्धनं विधायाथ तालत्रयपुरःसरम् ।**

**अष्टधा मूलमन्त्रञ्च जप्त्वा बिन्दुं क्षिपेत्ततः ॥ ८५ ॥**

तदनन्तर तीन बार ताली बजाकर, दिग्बन्धन कर, आठ बार मूल मन्त्र जपकर, उसमें बिन्दुमात्र जल प्रक्षिप्त करे ॥ ८५ ॥

### तर्पणविधिः

**विशेषार्घ्यस्य वीरेन्द्रो गुरूंश्च परितर्पयेत् ।**
**स्वस्वनामयुतान् दिव्यान् सिद्धमानवसङ्ज्ञकान् ॥ ८६ ॥**

इस प्रकार निर्मित विशेषार्घ्य से वीरेन्द्र साधक दिव्यौघ, सिद्धौघ और मानवौघ नामक गुरुओं का तर्पण करे ॥ ८६ ॥

**तर्पयित्वा स्वीयमूर्ध्नि मुद्रया तत्त्वसञ्ज्ञया ।**
**अङ्गुष्ठानामिकाभ्याञ्च वामहस्तस्य सर्वदा ॥ ८७ ॥**
**कथिता तत्त्वमुद्रेयं योजिता तर्पणे बुधैः ।**
**गुरुं परगुरुञ्चैव परापरगुरुं तथा ॥ ८८ ॥**
**परमेष्ठिगुरुञ्चैव तर्पयेत्तदनन्तरम् ।**
**विशेषार्घ्यामृतेनैव तर्पयेन्निजदेवताम् ॥ ८९ ॥**
**पञ्चधा सप्तधा वापि हृत्सरोजे तु साधकः ।**

फिर तत्त्व सञ्ज्ञक मुद्रा से अपने शिर पर तर्पण करे । बायें हाथ के अङ्गूठे एवं अनामिका अङ्गुलियों के योग को तत्त्वमुद्रा कहते हैं । इसके बाद साधक गुरु, परम गुरु, परापरगुरु तथा परमेष्ठि गुरु का तर्पण करे । फिर केवल विशेषार्घ्य के जल से ही वह साधक अपने इष्टदेवता का हृत्कमल में पाँच या सात बार का तर्पण करे ॥ ८७-८९ ॥

### तत्त्वशुद्धिकथनम्

**गुरूणां पात्रदक्षे च भोगपात्रं प्रकल्पयेत् ॥ ९० ॥**
**पूर्ववत् पात्रं संस्थाप्य तत्त्वशुद्धिं समाचरेत् ।**
**भोगपात्रामृतेनैव सम्मार्ज्य करयुग्मकम् ॥ ९१ ॥**
**दक्षकरे सवृत्तञ्च नवयोनिं समालिखेत् ।**
**कलायसदृशं तत्र क्षिपेच्छुद्धिचतुष्टयम् ॥ ९२ ॥**

फिर साधक गुरु पात्र के दक्षिण ओर भोग पात्र स्थापित करे । पूर्ववत् पात्र स्थापित कर पुनः तत्त्वशुद्धि करे । फिर भोगपात्र के अमृत से अपने दोनों हाथ का मार्जन कर दाहिने हाथ में वृत्त के सहित कलाय (मटर) के सदृश नवयोनि निर्माण करे । फिर उसे चार बार शुद्ध करे ॥ ९०-९२ ॥

देहशुद्धिनिरूपणम्

अङ्गुष्ठमध्यमानामायोगैरेकञ्च धारयेत् ।
वामहस्तस्य विप्रेन्द्रः स्वीकुर्यात्तदनेन तु ॥ ९३ ॥
मायाञ्च कमलाबीजं शिवशक्तिसदाशिवम् ।
ङेन्तं विद्याकलात्मानं सविन्दुं षोडश स्वरम् ॥ ९४ ॥
उच्चार्य वाग्भवं मूलं आत्मतत्त्वेन तत्परम् ।
स्थूलदेहं ततः पश्चात् शोधयामि पदात् द्विठः ॥ ९५ ॥

(१) बायें हाथ की अङ्गूठा, अनामिका और मध्यमा अङ्गुलियों को मिलाकर एक को धारण करे । माया (ह्रीं), कमला बीज (श्रीं), 'शिवशक्ति सदाशिवाय विद्या कलात्मने' उच्चारण कर सविन्दु षोडशस्वर का उच्चारण कर वाग्भव (ऐं) तथा मूल मन्त्र का उच्चारण कर 'आत्मतत्त्वेन स्थूल देहं शोधयामि (स्वाहा)' यह शोधन का प्रथम मन्त्र है ॥ ९३-९५ ॥

अनेनाधःशुद्धिखण्डं स्वीकृत्य तदनन्तरम् ।
मायां लक्ष्मीं ततो मायाकलानियतिशब्दतः ॥ ९६ ॥
कलात्मशुद्धविद्याञ्च रागञ्च पुरुषात्मने ।
कादिपञ्चकवर्गञ्च बिन्दुयुक् कामबीजकम् ॥ ९७ ॥
मूलमन्त्रं ततो विद्यातत्त्वेन सूक्ष्मदेहकम् ।
शोधयामि ततः स्वाहा स्वीकुर्यादपरन्ततः ॥ ९८ ॥

(२) इस शोधन मन्त्र को पढ़कर अधोभाग की शुद्धि की कल्पना कर पुनः माया (ह्रीं) लक्ष्मी (श्रीं), तदनन्तर 'मायाकलानियति कलात्मशुद्ध विद्या राग पुरुषात्मने' पढ़कर वर्गादि पाँच वर्ग, जो सविन्दुक हों, उनका उच्चारण कर कामबीज (क्लीं) सहित मूल मन्त्र पढ़कर 'विद्यातत्त्वेन सूक्ष्मदेहकं शोधयामि स्वाहा' इस मन्त्र को पढ़े ॥ ९६-९८ ॥

लज्जां लक्ष्मीं प्रकृत्यहङ्कार बुद्धिमनःश्रोत्रत्वक् ।
चक्षुस्ततोरसनाघ्राणवाक्पाणिपदं तथा ॥ ९९ ॥
पायूपस्थपदं शब्दस्पर्शरूपं ततो रसः ।
गन्धाकाशपदं वायुतेजः सलिलशब्दतः ॥ १०० ॥
भूम्यात्मने समुच्चार्य विन्दुयुग्यादिवर्णकम् ।
शक्तिबीजं स्वमन्त्रञ्च शिवतत्त्वेन तत्परम् ॥ १०१ ॥
परं देहं शोधयामि स्वाहा चैव तृतीयकम् ।

(३) इसके बाद लज्जा (ह्रीं), लक्ष्मी (श्रीं), प्रकृति एवं अहङ्कार, बुद्धि,

मनः, श्रोत्र, त्वक्, चक्षुः, रसन, घ्राण, वाक्, पाणि, पाद, पायूपस्थ, शब्द, स्पर्शरस, गन्धाकाश, वायु, तेजः, सलिल भूम्यात्मने पर्यन्त उच्चारण कर; 'विन्दुयुग्यादि वर्णकं शक्ति बीजं स्वमन्त्रं च शिवतत्त्वेन परं देहं शोधयामि स्वाहा'—यह शोधन का तृतीय मन्त्र है; इसको पढ़े ॥ ९९-१०२ ॥

**स्वीकृत्य च पुनर्मायां लक्ष्मीबीजं समुच्चरेत् ॥ १०२ ॥**
**पुनः शिवादिकं प्रोच्य मायादिकं ततः परम् ।**
**प्रकृत्यादिकमुच्चार्य पञ्चाशन्मातृकान्ततः ॥ १०३ ॥**
**बालाञ्च मूलविद्याञ्च सर्वतत्त्वेन तत्परम् ।**
**तत्त्वत्रयाश्रितं जीवं शोधयामि ततः स्वाहा ॥ १०४ ॥**
**स्वीकुर्यादमुना युग्मं दक्षवामक्रमेण तु ॥ १०५ ॥**

(४) फिर माया (ह्रीं), फिर लक्ष्मी बीज (श्रीं) कहकर 'शिवादि मायादि प्रकृत्यादि' का उच्चारण कर 'पञ्चाशन्मातृकां बालां मूलविद्यां च सर्वतत्त्वेन तत्त्वाश्रितं जीवं शोधयामि स्वाहा' पर्यन्त श्लोक मन्त्र को दायें-बायें क्रम से दो बार पढ़ना चाहिए ॥ १०४-१०५ ॥

**ॐ आर्द्रं ज्वलति ज्योतिरहमस्मि**
**ज्योतिर्ज्वलति ब्रह्माहमस्मि**
**सोऽहमस्मि ब्रह्माहमस्मि अहमस्मि**
**अहमेवाहं मां जुहोमि स्वाहा ॥ १०६ ॥**

इसके बाद ॐ आर्द्रं ज्वलति ज्योतिरहमस्मि ज्योतिर्ज्वलति ब्रह्माहमस्मि सोऽहमस्मि ब्रह्माहमस्मि अहमस्मि अहमेवाहं मां जुहोमि स्वाहा (१)

**ॐ तामेव प्रत्यक्षं ब्रह्म वदिष्यामि**
**ऋतं वदिष्यामि सत्यं वदिष्यामि**
**तन्मामवतु तद्वक्तारमवतु अवतु**
**माम् अवतु वक्तारं स्वाहा ॥ १०७ ॥**

फिर ॐ तामेव प्रत्यक्षं ब्रह्म वदिष्यामि ऋतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवतु अवतु माम् अवतु वक्तारं स्वाहा (२)

**ॐ छन्दसामृषयो गावो यच्छन्दोह्यमृता भुवसामन्द्रोः**
**मेधया स्पृणोतु भुवि स्रुवं मेणोपायतु स्वाहा ॥ १०८ ॥**

फिर ॐ छन्दसामृषयो गावो यच्छन्दोह्यमृता भुवसामन्द्रोः मेधया स्पृणोतु भुवि स्रुवं मेणोपायतु स्वाहा (३)

वाससा करयुग्मञ्च स्पृष्ट्वा देहञ्च शोधयेत् ।
पाणिभ्यां सर्वदेहञ्च प्रोञ्छयेदिति शोधनम् ॥ १०९ ॥
क्षालयेद्धस्तयुगलमथवान्यतमञ्चरेत् ॥ ११० ॥

इन तीन मन्त्रों को पढ़कर वस्त्र से दोनों हाथों का स्पर्श कर देह का संशोधन करे। फिर दोनों हाथों से अपने समस्त शरीर का प्रोक्षण करे; अथवा दोनों हाथ का प्रक्षालन करे। दो में से एक विधि सम्पादित करे ॥ १०६-११० ॥

तत्त्वशुद्धिमन्त्राः

ॐ प्राणापानव्यानोदानसमाना मे शुध्यन्ताम् ।
ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥ १११ ॥

फिर ॐ प्राणापानव्यानोदानसमाना......................भूयासं स्वाहा (१)

ॐ पृथिव्यप्तेजोवाय्वाकाशानि मे शुध्यन्ताम् ।
ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥ ११२ ॥

ॐ पृथिव्यप्तेजोवा.............विपाप्मा भूयासं स्वाहा (२)

ॐ प्रकृत्यहङ्कारबुद्धिमनःश्रोत्राणि मे शुध्यन्ताम् ।
ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥ ११३ ॥

ॐ प्रकृत्यहङ्कार............विपाप्मा भूयासं स्वाहा (३)

ॐ त्वक्चक्षुर्जिह्वाघ्राणवचांसि मे शुध्यन्ताम् ।
ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥ ११४ ॥

ॐ त्वक्चक्षु:.............विपाप्मा भूयासं स्वाहा (४)

ॐ पाणिपादपायूपस्थशब्दा मे शुध्यन्ताम् ।
ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा॥ ११५

ॐ पाणिपादपायु............विपाप्मा भूयासं स्वाहा (५)

ॐ स्पर्शरूपगन्धरसाकाशानि मे शुध्यन्ताम् ।
ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥ १ ॥

ॐ स्पर्शरूप...........विपाप्मा भूयासं स्वाहा (६)

ॐ वायुतेजःसलिलभूम्यात्मानो मे शुध्यन्ताम् ।
ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ११७ ॥

ॐ वायुतेज:............विपाप्मा भूयासं स्वाहा (७)

सप्तमन्त्रमिदञ्चैव पठेत्तत्त्वविशुद्धये ॥ ११८ ॥

तदनन्तर इन सात मन्त्रों को तत्त्वशुद्धि के लिये पढ़े ॥ १११-११८ ॥

तत्त्वशुद्धिं विधायाथ स्थापयेच्छक्तिपात्रकम् ।
योगिनीनाञ्च संस्थाप्य वीरपात्रं ततः परम् ॥ ११९ ॥
बलिपात्रं ततः पश्चात् पाद्यपात्रञ्च सन्दिशेत् ।
आचमनीयपात्रञ्च पूर्ववत् स्थापयेद्बुधः ॥ १२० ॥

इस प्रकार तत्त्वशुद्धि सम्पादन कर शक्तिपात्र स्थापित करे । फिर योगिनियों का पात्र स्थापन कर तदनन्तर वीरपात्र स्थापित करे । इसके बाद बलिपात्र, फिर पाद्यपात्र और फिर आचमनीयपात्र पूर्ववत् स्थापित करे ॥ ११९-१२० ॥

योगिनीपात्रतत्त्वेन तर्पयेद्रश्मिवृन्दकम् ।
बलिपात्रामृतेनैव वटुकादींश्च तर्पयेत् ॥ १२१ ॥

योगिनीपात्र के तत्त्व से रश्मि समूहों का तर्पण करे, बलिपात्रस्थ अमृत से वटुकादि का तर्पण करे ॥ १२१ ॥

तत्तदभावतो वीरः सामान्यार्घ्येण तर्पयेत् ।
देवीपात्रामृतं बिन्दुं पूजाद्रव्योपरि क्षिपेत् ॥ १२२ ॥

उन उनके अभाव में वीर साधक केवल सामान्य अर्घ्य के जल से ही उनका तर्पण करे । देवी पात्रस्थ अमृत बिन्दु को साधक पूजा के लिये एकत्रित द्रव्यों पर छिड़क देवे ॥ १२२ ॥

आत्मदेहञ्च सम्प्रोक्ष्य भावयेद्देवतामयम् ।
भोगपात्रामृतं बिन्दुं स्वीकुर्यात्तदनन्तरम् ॥ १२३ ॥

फिर अपने शरीर का प्रोक्षण कर उसमें देवतामयत्त्व की भावना करे । इसके बाद भोग पात्रस्थ अमृत बिन्दु अपने शरीर पर छिड़क देवे ॥ १२३ ॥

### बलिपञ्चकनिरूपणम्

अथातः सम्प्रवक्ष्यामि बलिपञ्चकमुत्तमम् ।
यावन्नो वटुके दद्यात् योगिन्यां सर्वभूतके ॥ १२४ ॥
क्षेत्रपाले तथा राजराजेश्वरे च साधकः ।
अकृत्वा बलिदानं हि कथं पूजां समाचरेत् ॥ १२५ ॥

**बलि पञ्चक निरूपण**—अब इसके बाद सर्वोत्तम बलि पञ्चक कहता हूँ । क्योंकि जब तक साधक बटुक, योगिनियों, सर्वभूत क्षेत्रपाल तथा राजराजेश्वर को

बलि प्रदान नहीं करता तब तक वह विद्वान् साधक पूजा किस प्रकार से कर सकता है ॥ १२४-१२५ ॥

**अदत्त्वा क्षेत्रपालाय कथं क्षेत्रेषु पूजयेत् ।**
**अदत्त्वा बटुकादीनां यः पूजयति चण्डिकाम् ॥ १२६ ॥**
**पूजा च विफला तस्य देवीशापः प्रजायते ।**

क्षेत्रपाल को बलि प्रदान किये बिना वह किस प्रकार क्षेत्र में पूजा कर सकता है । बटुकादि को बलि दिये बिना जो चण्डिका की पूजा करता है, उसकी पूजा निष्फल तो होती ही है देवता का शाप भी उसे लगता है ॥ १२६-१२७ ॥

**दक्षिणे बटुके देयः उत्तरे योगिनीबलिः ॥ १२७ ॥**
**सर्वभूते बलिं दद्यात् क्षेत्रपालस्य पश्चिमे ।**
**राजराजेश्वरे मध्ये बलिं दद्यात् सुसाधकः ॥ १२८ ॥**

दक्षिण दिशा में बटुक को उत्तर दिशा में योगिनियों को बलि देना चाहिये । क्षेत्रपाल और सर्वभूतों के लिये पश्चिम में तथा उत्तम साधक राजराजेश्वर को मध्य में बलि देवे ॥ १२७-१२८ ॥

**दक्षिणादिचतुर्दिक्षु पूर्ववन्मण्डलं लिखेत् ।**
**प्रोक्षणं पूर्ववत् कृत्वा बटुकं तत्र चिन्तयेत् ॥ १२९ ॥**

दक्षिण आदि चारो दिशाओं में पूर्व की भाँति मण्डल बनावे । फिर पूर्ववत् प्रोक्षण कर बटुक का इस प्रकार चिन्तन करे ॥ १२९ ॥

बटुकध्यानम्

**करकलितकपालः कुण्डली दण्डपाणिः**
**तरुणतिमिरनीलो व्यालयज्ञोपवीती ।**
**क्रमसमयसपर्याविघ्नविच्छेदहेतु**
**र्जयति बटुकनाथः सिद्धिदः साधकानाम् ॥ १३० ॥**

**बटुक का ध्यान**—जिनके हाथ में कपाल शोभित हो रहा है । कानों में कुण्डल और हाथ में दण्ड धारण किये हुये है । घोर अन्धकार के समान सर्वथा नील वर्ण वाले तथा सर्प का यज्ञोपवीत पहने हुये हैं, इतना ही नही; जो यज्ञ तथा पूजा कार्यों में समस्त विघ्नों के विच्छेद के हेतु हैं । साधकों को सिद्धि प्रदान करने वाले ऐसे बटुकनाथ सर्वोत्कृष्टता प्राप्त करे ॥ १३० ॥

**इति ध्यात्वा तु सम्पूज्य पूर्वोक्तबलिमाचरेत् ।**
**अङ्गुष्ठानामिकाभ्याञ्च बटुकस्य बलिं हरेत् ॥ १३१ ॥**

इस प्रकार बटुक का ध्यान कर पूजन के उपरान्त पूर्व में कही गई विधि के अनुसार साधक दक्षिण दिशा में उन्हें अङ्गुष्ठ और अनामिका अङ्गुलियों से बलि प्रदान करे ॥ १३१ ॥

**विषं माया रमा देवीपुत्रवटुकनाथतः ।**
**पिङ्गलपदतो जटाभास्वर प्रोच्य पिङ्गल ॥ १३२ ॥**
**त्रिनेत्र च इमं बलिं पूजां गृह्णयुगन्ततः ।**
**वह्निजायान्तमुच्चार्य वटुकस्य महात्मनः ॥ १३३ ॥**
**अनेन बलिमुत्सृज्य योगिनीश्चिन्तयेत्ततः ॥ १३४ ॥**

विष (म), माया (ह्रीं), रमा (श्रीं), फिर 'देवीपुत्र बटुकनाथ पिङ्गल जटाभास्वर पिङ्गल त्रिनेत्र इमं बलिं पूजा गृह्ण गृह्ण स्वाहा' मन्त्र का उच्चारण कर महात्मा बटुक के लिये बलि त्याग कर योगिनियों का ध्यान करे ॥१३२-१३४॥

### योगिनीध्यानकथनम्

**योगिन्यः कामरूपा निखिलगुणतास्तप्तकान्तस्वभावा**
**मत्ताः कङ्कालमालाकलितकुचतटी रक्तवस्त्रोत्तरीयाः ।**
**लिङ्गं पाशं कपालं शृणिमपि दधतः सुस्मिताः सुप्रसन्नाः**
**भक्तानां साधकानामभिलषितफलं दीयमानाः सुवेशाः ॥ १३५॥**

**योगिनियों का ध्यान**—योगिनियाँ कामस्वरूपा हैं (इच्छानुसार वेष धारण करने वाली), सम्पूर्ण गुणों से युक्त है, तपाये गये सुवर्ण के समान इनके शरीर की कान्ति है, सर्वदा मस्त रहती हैं, इनके कुचों पर कङ्काल (प्रेत की हड्डी) की माला है, रक्त वस्त्र तथा रक्तवर्ण की चादर पहने हुये हैं, लिङ्ग, कपाल, पाश और शृणि (अङ्कुश) धारण किये हुये हैं, मन्द स्मित से युक्त तथा प्रसन्न रहने वाली हैं, इनका वेश अत्यन्त सुन्दर है और ये अपने भक्तों के समस्त अभीष्टों को पूर्ण करने वाली हैं ॥ १३४ ॥

**एवं ध्यात्वा प्रपूज्यैव पश्चादपि बलिं ददेत् ।**
**अङ्गुष्ठमध्यमानामा योगिनीभ्यो बलिं हरेत् ॥ १३६ ॥**

इस प्रकार योगिनियों का ध्यान कर पूजा करने के उपरान्त इन्हें अङ्गुष्ठ, मध्यमा एवं अनामिका अङ्गुलियों द्वारा उत्तर दिशा में बलि प्रदान करे ॥ १३६ ॥

**तारं लज्जां रमां सर्वसिद्धिश्च योगिनीभ्यः ।**
**सर्वाभ्यो मातृकाभ्यश्च इत्युत्सृज्य बलिं ददेत् ॥ १३७ ॥**

तार (ॐ), लज्जा (ह्रीं), रमा (श्रीं), सर्वसिद्धिञ्च योगिनीभ्यः, सर्वाभ्यो मातृकाभ्यश्च'—इस मन्त्र से बलि का त्याग करना चाहिये ॥ १३७ ॥

विषं मायां ततः सर्वभूतेभ्यश्च ततः परम् ।
सर्वभूतपतिं प्रोच्य भ्यो नमोऽन्तं समुच्चरेत् ॥ १३८ ॥
सर्वभूतबलिं दत्ता क्षेत्रपालबलिं हरेत् ।
ततः सञ्चिन्तयेत् क्षेत्रनायकं सिद्धिहेतवे ॥ १३९ ॥

विश (मं), माया (ह्रीं), फिर 'सर्वभूतेभ्य: सर्वभूतपतिभ्य: नम:' इस मन्त्र का उच्चारण कर सर्वभूतों को बलि देवे । पुन: अपनी सिद्धि के लिये क्षेत्रपाल को बलि देने के लिये क्षेत्रनायक का इस प्रकार ध्यान करे ॥ १३८-१३९ ॥

### क्षेत्रपालध्यानम्

निर्वाणं निर्विकल्पं निरुपमसकलं निर्विकारं क्षकारं
हूङ्कारं वज्रदंष्ट्रं हुतवहवदनं रौद्रमुन्मत्तभावम् ।
फट्कारं बद्धनागं भ्रुकुटितटमुखं भैरवं शूलपाणिं
खट्वाङ्गं व्योमनीलं डमरुकसहितं क्षेत्रपालं नमामि॥ १४० ॥

क्षेत्रपाल का ध्यान—जो सर्वथा निर्वाण, निर्विकल्प, निरुपम, सकल (कलासहित), निर्विकार और क्षकार युक्त हैं, हुङ्कार करने वाले हैं, जिनके दाँत वज्र के समान परिपुष्ट हैं, मुख से निरन्तर अग्नि की ज्वाला निकल रही है, जो रौद्र (महाभयानक) और उन्मत्त भाव से युक्त हैं, फटकार करते हुये नागों को बाँधे हुये हैं, जिनका मुख भ्रू से लेकर कटि पर्यन्त लम्बा है, ऐसे महाभयानक शब्द करने वाले, हाथ में त्रिशूल धारण किये, खट्वाङ्ग युक्त, आकाश के समान नीलवर्ण वाले, डमरु बजाते हुये क्षेत्रपाल को मैं नमस्कार करता हूँ ॥ १४० ॥

### क्षेत्रपालबलिप्रदानम्

इति ध्यात्वा तु सम्पूज्य बलिं पश्चान्निवेदयेत् ।
विशं मायां रमाबीजं क्षकारं विन्दुभूषितम् ॥ १४१ ॥
षड्दीर्घस्वरसम्भिन्नं स्वस्थान क्षेत्रपाल च ।
इमं बलिं पदस्यान्ते पूजां गृह्णयुगं ततः ॥ १४२ ॥
स्वाहान्तमन्त्रमुच्चार्य क्षेत्रपालबलिं दिशेत् ।
क्षेत्रपालबलिं दत्त्वा मध्ये दद्यात्ततः परम् ॥ १४३ ॥
इत्युत्सृज्य बलिं दद्याद्राजराजेश्वराय च ।
बलिपात्रामृतेनैव तर्पयेद्वटुकादिकम् ॥ १४४ ॥

इस प्रकार क्षेत्रपाल का ध्यान कर बाद में बलि प्रदान करे । उसके पश्चात् विष (मं), माया बीज (श्रीं), रमा बीज (श्रीं), विन्दुभूषित क्षकार (क्षं), षड् दीर्घ स्वर (आं ईं ऊं ऐं औं अः) का उच्चारण कर 'स्वस्थान क्षेत्रपाल इमं बलिं पूजां

गृह्ण गृह्ण स्वाहा' पर्यन्त मन्त्र का उच्चारण कर क्षेत्रपाल को पश्चिम दिशा में बलि देवे। इस प्रकार क्षेत्रपाल को बलि देकर मध्य में राजराजेश्वर को बलि देवे और बलि पात्रामृत से बटुकादि का तर्पण करे ॥ १४१-१४४ ॥

**एकत्र वा पञ्चबलिं दद्याद्व्यापकमण्डले ।**
**वामभागे स्थिते चैव सर्वविघ्नहरो भवेत् ॥ १४५ ॥**

अथवा व्यापक मण्डल बनाकर एक ही स्थान पर पाँचों को बलि देवे। यदि साधक द्वारा वामभाग में स्थापित कर उन्हें बलि दी जाय तो उससे समस्त विघ्न दूर हो जाते हैं ॥ १४५ ॥

**दक्षिणे बटुकं दद्यादुत्तरे योगिनीबलिम् ।**
**पूर्वे भूः बलिं दद्यात् क्षेत्रपालस्य पश्चिमे ॥ १४६ ॥**
**राजराजेश्वरं मध्ये बलिं दद्यात् सुसाधकः ॥ १४७ ॥**

**॥ इति श्रीमज्ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये षष्ठोल्लासः ॥ ६ ॥**

अथवा बटुक को दक्षिण दिशा में और योगिनियों को उत्तर दिक् में, सर्वभूतों को पूर्व में एवं क्षेत्रपाल को पश्चिम में तथा राजराजेश्वर को मध्य में उत्तम साधक बलि प्रदान करे ॥ १४६-१४७ ॥

**महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय के ज्येष्ठ पुत्र पण्डित रामरञ्जन मालवीय कृत श्रीमज्ज्ञानानन्द परमहंस विरचित कौलावलीनिर्णय नामक तन्त्र के षष्ठम उल्लास की निरञ्जन हिन्दी व्याख्या पूर्ण हुई ॥ ६ ॥**

# सप्तम उल्लासः

पूजाविधिः

अथ वक्ष्ये च पूजाया विधानं यत्र यद्भवेत् ।
पूजादौ च जपादौ च जपस्यान्ते तथैव च ॥ १ ॥
पूजान्ते चाग्निकार्यान्ते प्राणायामत्रयं चरेत् ।
प्राणायामषडङ्गञ्च कृत्वा साधकसत्तमः ॥ २ ॥
पीठपूजां प्रकुर्वीत स्वकल्पोक्तविधानतः ।
स्वकल्पोक्तविधानेन ध्यात्वा देवीं समाहितः ॥ ३ ॥

**पूजा विधान**—अब मैं पूजा के विषय में जहाँ जैसा विधान होना चाहिये उसे कहता हूँ । पूजा के आदि और अन्त में इसी प्रकार जप के आदि एवं अन्त में तथा अग्नि कार्य के आदि और अन्त में तीन-तीन प्राणायाम करे । इसके बाद उत्तम साधक प्राणायाम और षडङ्ग कर अपने सम्प्रदायानुसार पीठ पूजा करे । तदनन्तर अपने सम्प्रदायानुसार सावधान हो देवी का ध्यान करे ॥ १-३ ॥

हृत्सरोजात् समानीय नासापुटपथा सुधीः ।
तेजोमयीं महादेवीं दीपाद्दीपान्तरं यथा ॥ ४ ॥
पुष्पाञ्जलौ ततः पश्चान्मन्त्रमध्ये समानयेत् ।
आवाहन्यादिमुद्राश्च दर्शयेत्तदनन्तरम् ॥ ५ ॥

जिस प्रकार एक दीप से अन्य दीप जलाया जाता है, उसी प्रकार तेजोमयी महादेवी को हृत्कमल से उठाकर नासा पुट से बाहर निकालकर पुष्पाञ्जलि में स्थापित करे । फिर उस पुष्पाञ्जलि से मन्त्र में स्थापित करे । इसके बाद आवाहनी आदि मुद्रा प्रदर्शित करे ॥ ५ ॥

आवाहन्यादिमुद्रानिरूपणम्

१. आवाहनीमुद्रा
२. स्थापनीमुद्रा

ऊर्ध्वाञ्जलिमधः कुर्यादियमावाहनी भवेत् ।
इयं तु विपरीता चेत्तदा वै स्थापनी भवेत् ॥ ६ ॥

**मुद्रा निरूपण**—ऊपर की हुई अङ्गुलि नीचे की ओर कर देवे तो आवाहनी मुद्रा हो जाती है और जब इसी मुद्रा की विपरीत अर्थात् ऊपर की ओर उठा देवे तो स्थापनी मुद्रा हो जाती है ॥ ६ ॥

३. सन्निधापनीमुद्रा

४. सन्निरोधनीमुद्रा

**मिलितं मुष्टियुगलं सन्निधापनरूपिणी ।**
**अन्तरङ्गुष्ठमुष्टिभ्यां सन्निरोधनरूपिणी ॥ ७ ॥**

दोनों मुट्ठियों को एकमें मिला देवे और दोनों अङ्गूठों को ऊपर उठा दें तो सन्निधापनी मुद्रा हो जाती है । यदि अङ्गूठों को भीतर कर मुट्ठी बाँधें तो सन्निरोधनी मुद्रा हो जाती है ॥ ७ ॥

५. अवगुण्ठनीमुद्रा

**एतस्या एव मुद्रायास्तर्जन्यौ सरले यदि ।**
**अवगुण्ठनमुद्रेयमभितो भ्रामिता सती ॥ ८ ॥**

इसी मुद्रा में यदि दोनों तर्जनियों को सीधी रखकर वामावर्त्त घुमा देवे तो अवगुण्ठनी मुद्रा हो जाती है ॥ ८ ॥

६. सकलाकृतिमुद्रा

७. परमीकरणीमुद्रा

८. धेनुमुद्रा

**देवताङ्गे षडङ्गानां न्यासः स्यात् सकलीकृतिः ।**
**अन्योऽन्यग्रथिताङ्गुष्ठप्रसारितकराङ्गुलिः ॥ ९ ॥**
**महामुद्रेति कथिता परमीकरणे बुधैः ।**
**परिवृत्य करौ पश्चात् तर्जनीमध्यमायुगम् ॥ १० ॥**
**कनिष्ठानामिकायुग्मं परस्परयुतं कुरु ।**
**धेनुमुद्रेयमाख्याता अमृतीकरणे बुधैः ॥ ११ ॥**

देवताङ्ग में न्यास से सकलाकृति मुद्रा बन जाती है । परमीकरण में प्रयुक्त होने वाले दोनों हाथों के दोनों अङ्गूठों को परस्पर एक दूसरे में ग्रथित करे और शेष सभी अङ्गुलियाँ फैलाये रखे, तो वह महामुद्रा बन जाती है । फिर अमृतीकरण के लिए दोनों हाथ की कनिष्ठा और अनामिका अङ्गुलियों के अग्रभाग को परस्पर एक में मिला देवे; पुनः तर्जनी और मध्यमा को भी इसी प्रकार परस्पर एक दूसरे में मिला देवे तो यह धेनुमुद्रा बन जाती है ॥ ९-११ ॥

**स्वस्वकल्पोक्तविधिना मुद्राः सन्दर्शयेत्ततः ।**

दर्शयित्वा ततो मुद्रां तालत्रयपुरःसरम् ॥ १२ ॥
छोटिकाभिर्दिग्बन्धनं कृत्वा जीवं न्यसेत्ततः ।
लेलिहामुद्रया यन्त्रं स्पृष्ट्वा पञ्चकुशेन वा ॥ १३ ॥

९. लेलिहामुद्रा

तर्जनीमध्यमानामाः समं कृत्वा अधोमुखम् ।
अनामायां क्षिपेद्वृद्धां ऋजुं कृत्वा कनिष्ठिकाम्॥ १४ ॥
लेलिहेति च विख्याता जीवन्यासे प्रकीर्तिता ।
मूलमन्त्रेण दीप्तात्मा अर्घ्यद्रव्योदकेन च ॥ १५ ॥
त्रिवारं प्रोक्षयेद्धीमान् देवशुद्धिरितीरिता ।
ततः सम्पूजयेद्देवीं षोडशैरुपचारकैः ॥ १६ ॥

तदनन्तर अपने सम्प्रदायानुसार मुद्रा प्रदर्शित करे । मुद्रा प्रदर्शित करने के पश्चात् तीन बार ताली बजाते हुए चुटकी बजाकर दिग्बन्धन करे । तदनन्तर जीवन्यास करे । लेलिहा मुद्रा से अथवा पाँच कुशों से यन्त्र का स्पर्श करे । दोनों हाथों की तर्जनी, मध्यमा तथा अनामिका अङ्गुलियों को परस्पर मिलाकर नीचे करे तथा दोनों अङ्गूठों को अनामिका पर स्थापित कर दोनों कनिष्ठा को सीधे रखे तब वह लेलिहा मुद्रा बन जाती है । जीवन्यास में इसका प्रयोग किया जाता है । फिर उत्साहपूर्वक साधक मूलमन्त्र से अर्घ्यद्रव्य के जल से देवता के ऊपर तीन बार जल छोड़े—इस प्रकार देवशुद्धि कही गई है । तदनन्तर षोडशोपचारों से देवी की पूजा करे ॥ १२-१६ ॥

षोडशोपचारपूजनम्

आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ।
मधुपर्काचमनस्नानवसनाभरणानि च ॥ १७ ॥
गन्धपुष्पे तथा धूपदीपनैवेद्यवन्दनाः ।
(अथवा) पाद्यार्घ्याचमनस्नानवसनाभरणानि यच ॥ १८ ॥
गन्धपुष्पे धूपदीपनैवेद्याचमनं ततः ।
ताम्बूलमर्चनास्तोत्रं तर्पणञ्च ततः परम् ॥ १९ ॥

**षोडशोपचार निरूपण**—आसन, स्वागत, पाद्य, अर्घ्य, आचमनीय, मधुपर्क, आचमन, स्नान, वस्त्र, आमरण, गन्ध, पुष्प, धूप, दीप, नैवेद्य और प्रार्थना—ये सोलह उपचार कहे गये हैं ।

अथवा पाद्य, अर्घ्य, आचमन, स्नान, वस्त्र, आभरण, गन्ध, पुष्प, धूप, दीप, नैवेद्य, आचमन, ताम्बूल, अर्चना, स्तोत्र और उसके बाद तर्पण—ये सोलह उपचार होते हैं ॥ १७-१९ ॥

**अर्घ्यं पाद्यं निवेद्याथ तथैवाचमनीयकम् ।**
**मधुपर्काचमनञ्च गन्धप्रसूनके ततः ॥ २० ॥**
**धूपदीपौ च नैवेद्यं दशोपचारकं स्मृतम् ।**

अर्घ्य एवं पाद्य को निवेदन कर, आचमन, मधुपर्क, पुनः आचमन, गन्ध, पुष्प, धूप, दीप और नैवेद्य—ये दश उपचार कहे गये हैं ॥ २० ॥

**गन्धादयो नैवेद्यान्तः पूजा पञ्चोपचारिका ॥ २१ ॥**

गन्ध से लेकर नैवेद्य पर्यन्त पाँच उपचार कहे गये हैं ॥ २१ ॥

उत्तमादिभेदेन त्रिविधा पूजा

**उत्तमा मध्यमा चैव बुधैरुक्ताऽधमा क्रमात् ।**
**अभावे पुष्पतोयाभ्यां पत्रेण तदभावतः ॥ २२ ॥**
**तदभावे सर्षपेण श्वेतेनाऽपि विशेषतः ।**
**तदभावेऽक्षतेनैव दूर्वया तदभावतः ॥ २३ ॥**
**अभावे वारिणा वापि तदभावे च मानसैः ।**

बुद्धिमान् साधकों ने इन्हें क्रमशः उत्तम, मध्यम तथा अधम उपचार की सञ्ज्ञा दी है । उन (= पञ्चोपचार) के अभाव में केवल पुष्प और जल से, उसके भी अभाव में मात्र पुष्प से, उसके भी अभाव में श्वेत सर्षप से, उसके भी अभाव में मात्र अक्षत से, उसके भी अभाव में दूर्वा से, उसके भी अभाव में केवल जल से, उसके भी अभाव में मात्र मन से पूजा करनी चाहिये ॥ २२-२४ ॥

**मूलान्ते देवतानाम ङेयुतञ्च समुद्धरेत् ॥ २४ ॥**
**देयद्रव्यपदोल्लेखं कृत्वा च तदनन्तरम् ।**
**हृदयेन तु पाद्यञ्च शिरसार्घ्यं निवेदयेत् ॥ २५ ॥**

मूल मन्त्र पढ़कर देवता के नाम का चतुर्थ्यन्त कर मन्त्र का उद्धार करना चाहिये । फिर देय (समर्पण) द्रव्य का नाम लेकर 'हृदयाय नमः' उच्चारण कर पाद्य तथा शिर पर अर्घ्य प्रदान करना चाहिये ॥ २४-२५ ॥

**वारुणेनाचमनं प्रोक्तं तेनैव मधुपर्ककम् ।**
**शिखामन्त्रेण गन्धञ्च पुष्पं नेत्रेण दापयेत् ॥ २६ ॥**

'वं' मन्त्र से आचमन, तथा उसी से मधुपर्क देवे । 'शिखायै वषट्' से गन्ध तथा 'नेत्रत्रयाय वौषट्' से पुष्प निवेदन करे ॥ २६ ॥

**निवेदयामि वदने दद्यात् सर्वं सुसाधकः ।**
**पाद्यादिकं निवेद्याथ स्नानीयञ्च निवेदयेत् ॥ २७ ॥**

फिर 'निवेदयामि' कहकर साधक मुख में सब कुछ देवे । पाद्यादि निवेदन कर स्नान के लिये सामग्री प्रदान करे ॥ २७ ॥

देवीस्नाननिरूपणम्

ततश्च पादुके दत्त्वा सुरक्ते स्नानमन्दिरे ।
नानारत्नसमायुक्तस्वर्णसिंहासनान्विते ॥ २८ ॥
तत्रानीय महादेवीं साधकः शुद्धभावतः ।
घृतेनोद्वर्तनं कार्यं मनसा तदनन्तरम् ॥ २९ ॥
सुगन्धिदिव्यतैलेन देवकन्यासहस्रकैः ।
सहस्रैः स्वर्णकुम्भैश्च सुगन्धजलपूरितैः ॥ ३० ॥
आसिञ्चेद् भक्तिभावेन भवानीं भक्तवत्सलाम् ।
नानातीर्थोदकैः शुद्धैर्गन्धराजसहस्रकैः ॥ ३१ ॥

अत्यन्त मनोहर उस स्नानागार रूप मन्दिर में ही पादुका देकर अनेक प्रकार के रत्नों से जटित स्वर्ण सिंहासन पर साधक शुद्ध भाव से ले आकर देवता को बैठावे । तदनन्तर घृत का उद्वर्त्तन करे । तदनन्तर मन से सहस्रों देव कन्याओं के द्वारा सुगन्धित दिव्य तैल लगवा कर, अनेक तीर्थों से लाये गये सुगन्धित जलों से परिपूर्ण सहस्रों सुवर्णमय कलशों के शुद्ध जल से भक्तिभावपूर्वक भक्तवत्सला भगवती को स्नान करावे ॥ २८-३१ ॥

नागकन्यासहस्रैस्तु किन्नरैरप्सरोगणैः ।
पञ्चामृतैः पञ्चगव्यैः स्नापयेत्तदनन्तरम् ॥ ३२ ॥

तदनन्तर सहस्रों नागकन्याओं द्वारा तथा सहस्रों किन्नर अप्सराओं द्वारा पञ्चामृत और पञ्चगव्य से स्नान करावे ॥ ३२ ॥

नारिकेलोदकेनैव तथेक्षुवारिणा ततः ।
सप्तमृत्तिकया युक्त शीतलेन जलेन च ॥ ३३ ॥
शीतलोष्णोदकेनैव तथा रत्नोदकेन च ।
सुवासितजलेनैव देव्याः स्नानं समाचरेत् ॥ ३४ ॥

फिर नारिकेल के जल से, तदनन्तर ऊख के रस से, फिर सप्त मृत्तिका युक्त शीतल जल से स्नान करावे । पुनः साधक शीतल और उष्ण दोनों ही प्रकार के जल से, फिर उसके बाद रत्नोदक से, तत्पश्चात् सुगन्धित जल से महाभगवती देवी को स्नान करावे ॥ ३३-३४ ॥

सहस्रशीर्षमन्त्रेण पावमान्या तथैव च ।
भृङ्गाराष्टककुम्भैस्तु देव्याः स्नानं विधाय च ॥ ३५ ॥

फिर 'सहस्रशीर्षा' ऋचा से तथा पावमानी मन्त्र से स्वर्ण निर्मित आठ कलशों से स्नान करावे ॥ ३५ ॥

उपचाराः

ततः शुद्धैर्दुकूलैश्च गात्रमार्जनमाचरेत् ।
कार्पासं वाल्कलं वार्क्षं कोषजं वस्त्रमिष्यते ॥ ३६ ॥

इसके बाद शुद्ध दुकूल (पट्टवस्त्र) से भगवती के गात्र का मार्जन करावे, कपास निर्मित वल्कल का, वृक्ष की छाल या पत्तों का अथवा रेशमी वस्त्र देने का विधान है ॥ ३६ ॥

रक्तकौषेयवस्त्रञ्च महादेव्यै प्रशस्यते ।
सपीताम्बरकौषं वा स्वदेवाय च उत्सृजेत् ॥ ३७ ॥

लाल वर्ण का रेशमी वस्त्र भगवती को अत्यन्त अभीष्ट है, अथवा पीताम्बर का वस्त्र अपने इष्टदेव को देना चाहिये ॥ ३७ ॥

विचित्रं सर्वदेवेभ्यो दिव्यांशुकं निवेदयेत् ।
नीलरक्तं तु यद्वस्त्रं तत्सर्वत्र विवर्जयेत् ॥ ३८ ॥

सभी देवताओं के लिये विचित्र दिव्य वस्त्र देने का विधान है किन्तु नीली में रंगा हुआ वस्त्र सर्वत्र वर्जित है ॥ ३८ ॥

विचित्ररागविपुलं लग्नहीनं विवर्जयेत् ।
वस्त्रं दद्यान्महादेव्यै नान्यस्मै तु कदाचन ॥ ३९ ॥

विचित्र रूप में रंगा हुआ और बहुत बड़ा लग्न (किनारा) रहित वस्त्र सर्वथा निषिद्ध है । इस प्रकार का वस्त्र केवल महादेवी को दिया जा सकता है । अन्य देवी देवताओं को कदापि न देवे ॥ ३९ ॥

रक्तवस्त्रं रक्तमाल्यं रक्तालङ्करणं तथा ।
दत्त्वाऽङ्गलेपनं कार्यं गन्धचन्दनसिह्लकैः ॥ ४० ॥

रक्त वस्त्र, रक्त माला, रक्त आभूषण, महाभगवती को प्रदान कर गन्ध, चन्दन और सिह्लक भगवती के अङ्ग में लेपन करे ॥ ४० ॥

पुनश्च पादुके दत्त्वा मनोरमे सुसाधकः ।
यन्त्रमध्ये समानीय नमस्कुर्यात् समाहितः ॥ ४१ ॥

तदनन्तर उत्तम साधक मनोहर पादुका प्रदान करे । फिर यन्त्र में भगवती को पधरा कर भक्तिपूर्वक उन्हें नमस्कार करे ॥ ४१ ॥

**पुनः पाद्यादिकं दत्त्वा पूजयेद्विधिपूर्वकम् ।**
**यथोत्पन्नं फलं पुष्पं तथा दद्याच्च पत्रकम् ॥ ४२ ॥**

पुनः पाद्य आदि देकर उनकी विधिपूर्वक पूजा करे । ऋतुकाल में होने वाले फल पुष्प तथा पत्र प्रदान करे ॥ ४२ ॥

**पुष्पाञ्जलिप्रदानेन न भवेन्नियमस्त्वयम् ।**
**नाधोमुखं फलं दद्यादिति शास्त्रस्य निर्णयः ॥ ४३ ॥**

फिर पुष्पाञ्जलि प्रदान करे । किन्तु अनियम न करे । अधोमुख फलप्रदान न करे । यह शास्त्रों का निश्चय है ॥ ४३ ॥

ज्ञानमुद्रा

**ज्ञानाख्यमुद्रया चैव पूजयेत् परमेश्वरीम् ।**
**अङ्गुष्ठतर्जनीभ्यां तु ज्ञानमुद्रा प्रकीर्तिता ॥ ४४ ॥**

भगवती का पूजन ज्ञानमुद्रा से करे । अङ्गूठा और तर्जनी को एक में मिला देने पर ज्ञानमुद्रा कही जाती है ॥ ४४ ॥

**मध्यमानामिकाभ्यां तु अङ्गुष्ठाग्रेण साधकः ।**
**दद्याच्च विमलं गन्धं मूलमन्त्रेण पूर्ववत् ॥ ४५ ॥**

मध्यमा, अनामिका तथा अङ्गुष्ठ के अग्रभाग को एक में मिला कर मूल मन्त्र पढ़ते हुये विमल गन्ध प्रदान करना चाहिये ॥ ४५ ॥

**यथा गन्धं तथा चैव धूपं दद्याद्विचक्षणः ।**
**मध्यमानामिकाभ्यां तु मध्यपर्वणि देशिकः ॥ ४६ ॥**
**अङ्गुष्ठाग्रेण धूपञ्च धृत्वा च विनिवेदयेत् ।**
**उत्तोलनं त्रिधा कृत्वा गायत्र्या मूलयोगतः ॥ ४७ ॥**
**अनामिकाङ्गुष्ठयोगे नैवेद्यं तु निवेदयेत् ।**
**अन्यत् सर्वं स वीरः प्रदद्याज्ज्ञानमुद्रया ॥ ४८ ॥**

जिस प्रकार गन्ध का विधान कहा गया है उसी प्रकार धूप भी प्रदान करे । मध्यमा अनामिका के मध्य पर्व में अङ्गुष्ठ के अग्र भाग को स्थापित कर उससे धूप पात्र हाथ में लेकर धूप देवे । मूल मन्त्र सहित गायत्री मन्त्र से नैवेद्य को तीन बार ऊपर उठाकर अनामिका और अङ्गूठे को मिलाकर नैवेद्य समर्पित करे । वह वीर साधक शेष उपचार ज्ञानमुद्रा से प्रदर्शित करे ॥ ४६-४८ ॥

**दधिमधुघृतेनैव मधुपर्कः प्रकीर्तितः ।**
**पायसं कृशरं दद्यात् पाल्यन्नं मधुसंयुतम् ॥ ४९ ॥**

**पिष्टकं मोदकञ्चैव दुग्धं दधि तथा फलम् ।**
**ताम्बूलञ्च ततो दद्यात् कर्पूरादिसुवासितम् ॥ ५० ॥**

दही, मधु, घृत मिलाने से मधुपर्क बन जाता है । फिर पायस (खीर), कृशर (खिचड़ी) तथा मधुसंयुक्त शाली धान का भात समर्पित करे । पिष्टक, मोदक, दूध, दही, फल तथा कपूर से वासित ताम्बूल प्रदान करे ॥ ५० ॥

**तत्र तत्र जलं दद्यादुपचारान्तरान्तरा ।**
**पुनर्माल्यं प्रदातव्यं गन्धचन्दनपङ्कजम् ॥ ५१ ॥**

प्रत्येक उपचारों के समर्पण में बीच-बीच में जल भी देते रहना चाहिये । इसके बाद पुनः माल्य, गन्ध, चन्दन तथा कमल पुष्प देना चाहिये ॥ ५१ ॥

**दर्पणं चामरं छत्रं पादुकाञ्च निवेदयेत् ।**
**विधिवत् पूजनं कृत्वा तर्पयेत्तत्त्वमुद्रया ॥ ५२ ॥**

फिर दर्पण, चामर, छत्र तथा पादुका समर्पण करना चाहिये । इस प्रकार विधिवत् पूजन कर भगवती का तत्त्व मुद्रा से तर्पण करना चाहिये ॥ ५२ ॥

### तत्त्वमुद्रा

**अङ्गुष्ठानामिकायोगाद्वामहस्तस्य सर्वदा ।**
**अङ्गुष्ठे भैरवो देवोऽनामायां चण्डिका सदा ॥ ५३ ॥**

बायें हाथ के अङ्गूठा तथा अनामिका अङ्गुली के योग से तत्त्वमुद्रा बन जाती है । क्योंकि अङ्गूठे में भैरव देव तथा अनामिका में चण्डिका का सर्वदा निवास रहता है ॥ ५३ ॥

### तर्पणविधिः

**अनामाङ्गुष्ठयोगेन तर्पयेत् कुलसन्ततिम् ।**
**अङ्गुष्ठमध्यमाभ्याञ्च वश्यकर्मणि तर्पयेत् ॥ ५४ ॥**

अनामिका एवं अङ्गुष्ठ को मिलाकर कुलसन्तति का तर्पण करे । किन्तु वश्यकर्म में अङ्गूठा एवं मध्यमा को मिलाकर तर्पण करे ॥ ५४ ॥

**कनिष्ठाङ्गुष्ठयोगेन स्तम्भने तर्पयेत्ततः ।**
**तर्जन्यङ्गुष्ठयोगेन तर्पयेदभिचारके ॥ ५५ ॥**

स्तम्भन में कनिष्ठा तथा अङ्गूठे से तर्पण करना चाहिये और अभिचार (मारण) प्रयोग में तर्जनी और अङ्गूठे को मिलाकर तर्पण करना चाहिये ॥ ५५ ॥

**एवं सन्तर्प्य देवेशीं कुलद्रव्यैर्यथाविधि ।**

**तर्पणञ्चाष्टधा कार्यं सकृद्वापि यथेच्छया ॥ ५६ ॥**

इस प्रकार कुलद्रव्य से यथाविधि देवी का तर्पण करे। यह तर्पण आठ संख्या में करे अथवा मात्र एक बार करे। साधक की जैसी इच्छा हो ॥ ५६ ॥

**नार्चयेदेकहस्तेन् तर्पयेन्नैकपाणिना ।**
**तर्पयित्वामहादेवीं स्वीयक्रममथाचरेत् ॥ ५७ ॥**

एक हाथ से पूजा तथा एक हाथ से तर्पण न करे। महादेवी का तर्पण कर तदनन्तर अपने सम्प्रदायानुसार पूजा विधान करे ॥ ५७ ॥

**देवतामन्तिकं कुर्यात् कुसुमैर्विहितैः सदा ।**
**पूजाकाले देवताया नोपरि भ्रामयेत् करम् ॥ ५८ ॥**

शास्त्रविहित पुष्पों से पूजा कर देवता का सदैव सन्निधान प्राप्त करे। पूजा के समय देवता के ऊपर हाथ न घुमावे ॥ ५८ ॥

**देव्यनुज्ञां गृहीत्वा तु पूजयेदङ्गदेवताः ।**
**ध्यात्वा गुरुकुलं धीरो रश्मिवृन्दं तथैव च ॥ ५९ ॥**

फिर देवता की आज्ञा लेकर आवरण के देवताओं का गुरुकुलों का तथा रश्मिवृन्दों का ध्यान कर देवताओं की पूजा करे ॥ ५९ ॥

### अङ्गदेवतापूजाविधिः

**स्व स्व स्थाने समावाह्य पूजयेत्तदनन्तरम् ।**
**विना यो हि गुरोः पूजामिष्टदेवं यजेद् यदि ॥ ६० ॥**
**निष्कृतिर्नास्ति तस्यैव नरकार्णवकोटिषु ।**
**तस्मात् सर्वप्रयत्नेन गुरुपूजां समाचरेत् ॥ ६१ ॥**

आवरण के उन अङ्ग देवताओं को अपने-अपने स्थान पर आवाहन कर पश्चात् पूजन करे। यदि कोई साधक गुरु की पूजा के बिना इष्टदेव की पूजा करता है, उसका करोड़ों नरक समुद्र से उद्धार नहीं होता। इसलिये सब प्रयत्न करके भी गुरु की पूजा करे ॥ ६०-६१ ॥

### गुरुपूजा

**दिव्यौघा गुरवो ह्येव सिद्धौघा गुरवस्तथा ।**
**मानवौघाः समासेन पूजनीयाः प्रयत्नतः ॥ ६२ ॥**

दिव्यौघ, सिद्धौघ तथा मानवौघ गुरुओं का साधक को प्रयत्नपूर्वक संक्षेप में पूजन करना चाहिए ॥ ६२ ॥

अथवा सर्वशास्त्रेषु गुरवः पूर्वसूचिताः ।
येषु येषु च मन्त्रेषु ये ये ऋषिगणाः स्मृताः ॥ ६३ ॥
ते ते पूज्याः सपर्यादौ सङ्क्षेपाद् गदितं मया ।
अज्ञात्वा गुरुनामानि गुरुत्रितयमर्चयेत् ॥ ६४ ॥

अथवा सभी गुरु शास्त्रों में कह दिये गये हैं और जिन जिन मन्त्रों में जो जो ऋषि कहे गये हैं उन-उन गुरुओं तथा ऋषियों की संक्षेप में पूजा करे । यदि गुरुओं का नाम न ज्ञात हो, तब तीन गुरुओं की अर्चना करे ॥ ६३-६४ ॥

चतुष्टयं वा सङ्कोचो न च कार्य ततः परम् ।
गुरुः परगुरुश्चैव परापरगुरुस्ततः ॥ ६५ ॥
परमेष्ठिगुरुश्चैव कथिता गुरव शुभाः ।
न जानामि गुरोर्नाम वंशशुद्धिः कदाचन ॥ ६६ ॥
त्वत्पादाम्बुजरेणूनां कर्णमादेहि दासताम् ।
इति स्तवेन संस्तुत्य तस्मिन्निजगुरुं यदि ॥ ६७ ॥
तन्नाम्ना पूजयेद्यस्तु तेन पूजा गुरोर्भवेत् ।

अथवा चार गुरुओं की पूजा करे । सङ्कोच न करे । गुरु, परमगुरु, परापरगुरु और परमेष्ठी गुरु—ये कल्याणकारी गुरु कहे गये हैं । 'न जानामि.................. ........कर्णमादेहि दासताम्' पर्यन्त मन्त्र पढ़कर, उनकी स्तुति कर, उसमें अपने गुरु का नाम लेकर यदि सुधी साधक पूजा करे तो समस्त गुरुओं की पूजा उसी में गतार्थ हो जाती है ॥ ६५-६८ ॥

गुरुपूजां विना चैव यदि पूजां समाचरेत् ॥ ६८ ॥
तद्दोषशमने चैव कुलपूजां समाचरेत् ।
पूर्ववत्तर्पणं कृत्वा रश्मिवृन्दं प्रपूजयेत् ॥ ६९ ॥

यदि गुरु की पूजा के बिना कोई साधक देवी की पूजा करता है तो उस दोष की शान्ति के लिये कुलपूजा अवश्य करनी चाहिए । फिर पूर्ववत् तर्पण कर रश्मिवृन्दों की पूजा करे ॥ ६८-६९ ॥

यत्र यत्र स्थितिश्चैव तत्र तं नार्चयेद्यदि ।
तन्मांसरुधिरेणैव पारणं तस्य जायते ॥ ७० ॥

जिस देवता की जहाँ स्थिति है उनकी पूजा यदि वहाँ नहीं हुई, तो पूजा करने वाले के मांस से उस देवता की तृप्ति होती है ॥ ७० ॥

एकपीठे पृथक् पूजां विना यन्त्रं करोति यः ।
अङ्गाङ्गित्वं परित्यज्य देवताशापमाप्नुयात् ॥ ७१ ॥

जो यन्त्र के अतिरिक्त एक पीठ पर अङ्गाङ्गि (प्रधान और आवरण) भाव त्याग कर पूजा करता है, उसे देवता का शाप प्राप्त होता है ॥ ७१ ॥

**आवाह्य देवतामेकामर्चयंश्चान्यदेवताम् ।**
**उभाभ्यां लभते शापं मन्त्री चञ्चलमानसः ॥ ७२ ॥**

इतना ही नहीं जो साधक एक देवता का आवाहन कर अन्य देवताओं का पूजन करता है, ऐसा चञ्चल मन वाला साधक दोनों देवताओं का शाप प्राप्त करता है ॥ ७२ ॥

**तस्मात् सर्वप्रयत्नेन स्वस्वस्थाने यथाक्रमात् ।**
**सम्पूज्य देवताः सर्वास्तर्पयेत्तदनन्तरम् ॥ ७३ ॥**

इसलिये अपने अपने स्थान पर क्रम के अनुसार सभी देवताओं की पूजा कर उनका तर्पण करना चाहिये ॥ ७३ ॥

**ब्रह्माण्याद्यष्टशक्तींश्च पूजयित्वा च तर्पयेत् ।**
**पुनः सम्पूजयेद् देवीमुपचारैश्च विस्तरैः ॥ ७४ ॥**

तदनन्तर ब्रह्माणी इत्यादि आठ शक्तियों की पूजाकर उनका तर्पण करे । फिर अपने इष्टदेवी का विस्तृत उपचारों से पूजन करे ॥ ७४ ॥

**आसनं प्रथमं दद्यात् रौप्यं दारुजमेव वा ।**
**वस्त्रं वा चार्मणं कोषं मण्डपस्योत्तरे सृजेत् ॥ ७५ ॥**

सर्वप्रथम अपनी इष्टदेवी को चाँदी का, अथवा काष्ठ का, अथवा वस्त्र का, अथवा मृगचर्मादि का, अथवा रेशम का आसन देवे ॥ ७५ ॥

**पाद्यं दत्त्वा महादेव्यै चार्घ्यं दद्यात्ततः परम् ।**
**श्यामा दूर्वा पङ्कजञ्च विष्णुक्रान्तासमन्वितम् ॥ ७६ ॥**
**गन्धपुष्पाक्षतजवाकुशाग्रतिलसर्षपैः ।**
**सदूर्वैः सर्वदेवानामेतदर्घ्यमुदीरितम् ॥ ७७ ॥**

इसके बाद महादेवी को पाद्य देकर अर्घ्य प्रदान करे । फिर श्यामा दूर्वा, कमल, विष्णुक्रान्ता से युक्त गन्ध, पुष्प, अक्षत, जवा, कुशाग्र, तिल, श्वेत सर्षप और दूर्वा मिलाकर अर्घ्य प्रदान करे । इस प्रकार का अर्घ्य सभी देवताओं के लिये प्रशस्त कहा गया है ॥ ७६-७७ ॥

**केवलं तोयमात्रेण तदाचमनमिष्यते ।**
**वासितन्तु सुगन्धाद्यैः कर्त्तव्यं यदि लभ्यते ॥ ७८ ॥**

मन्त्री साधक को यदि कोई सुगन्धित पदार्थ प्राप्त हो जावे तो उसे मिलाकर आचमन करावे ॥ ७८ ॥

### गन्धाष्टकम्

अर्घ्यादिकं प्रदद्यात्तु गन्धाष्टकं निवेदयेत् ।
चन्दनागुरुकर्पूरं चोरकुङ्कुमरोचना: ॥ ७९ ॥
जटामांसी कपिजटा शक्तेर्गन्धाष्टकं विदुः ।
नानाविधानि पुष्पाणि वसनाभरणानि च ॥ ८० ॥

अर्घ्यादि प्रदान कर अष्ट गन्ध निवेदन करे । चन्दन, अगुरु, कपूर, चोर, कुङ्कुम, रोचना, जटामांसी, कपिजटा—ये महाशक्ति के गन्धाष्टक कहे गये हैं । इसके बाद साधक अनेक प्रकार के पुष्प एवं अनेक प्रकार के आभरण एवं अलङ्करण समर्पित करे ॥ ७९-८० ॥

मालां दद्यात्ततो देव्यै गन्धचन्दनमिश्रितम् ।
सर्वाङ्गलेपनं दद्याद् धूपं दद्यात्ततः परम् ॥ ८१ ॥

इसके बाद देवी को माला देकर गन्ध, चन्दन मिश्रित सर्वाङ्गलेपन देवे । इसके बाद धूप देवे ॥ ८१ ॥

### धूपनिर्माणनिरूपणम्

उशीरं चन्दनं कुष्ठमगुरुं गुग्गुलुं तथा ।
मधुना घृतसंयुक्तो धूपोऽयं चण्डिकाप्रियः ॥ ८२ ॥

उशीर, चन्दन, कुष्ठ, अगुरु, गुग्गुलु तथा मधु से मिश्रित यह धूप सर्वदा चण्डिका को प्रिय है ॥ ८२ ॥

(अथवा) रोगरोगहररोगदकेशाः सुरतरुजतुलघुपत्रविशेषाः ।
वक्रतारहितवारिजमुद्रा धूपवर्तिरिह सुन्दरि भद्रा ॥ ८३ ॥

रोग (), रोगहर (), रोगद (), केशर (), सुरतरु (), जतु (लाह), लघुपत्र (), वक्रतारहित वारिजमुद्रा (), इन सबसे बनाई गई धूपबत्ती; हे सुन्दरि ! श्रेष्ठ होती है ॥ ८३ ॥

हरितकीमुस्तमथो नखी च मांसी जतुशैलजदेवदारुः ।
कुष्ठं गुडः सर्जरसस्तथैव दशाङ्गधूपः कथितो मुनीन्द्रैः ॥ ८४ ॥

अथवा हरतिकी (हर्र), मुस्ता (नागरमोथा), नखी, जटामांसी, जतु (लाह), शैलज (शिलाजीत), देवदार, कुष्ठ, गुड़ और सर्ज (सहिजन) का रस—ये दश धूप के अङ्ग मुनीन्द्रों ने कहे हैं ॥ ८३-८४ ॥

(अथवा) अगुरुशीरगुग्गुलुशर्करामधुचन्दनैः ।
धूपयेदाज्यसंमिश्रैर्नीचैर्देवस्य देशिकः ॥ ८५ ॥

अथवा अगुरु, उशीर, गुग्गुल, शर्करा, मधु और चन्दन में घृत मिलाकर देवता के नीचे साधक धूप प्रदान करे ॥ ८५ ॥

केवलं गुग्गुलं धूपमगुरुं वापि सन्दिशेत् ।
एषामेकतमं कृत्वा निवेद्य शास्त्रवर्त्मना ॥ ८६ ॥
न भूमौ स्थापयेद्धूपमासने च घटेऽपि वा ।

अथवा केवल गुग्गुल का धूप, अथवा अगुरु का धूप, इन दोनों में किसी एक का धूप शास्त्रीय मार्ग से प्रदर्शित करे । पृथ्वी पर, आसन पर, अथवा कलशे पर, धूप स्थापित नहीं करना चाहिये ॥ ८६ ॥

कुलदीपदानविधिः

घृतप्रदीपं प्रथमं तिलतैलोद्भवं ततः ॥ ८७ ॥

घी का दीपक, तदभावे तिल तेल का दीपक समर्पित करना चाहिये ॥ ८७ ॥

सार्षपं फलनिर्यासजातं वा वारिजोद्भवम् ।
प्रणवं जयध्वनिपदं मातः स्वाहा ततः परम् ॥ ८८ ॥
अनेन पूजयेद् घण्टामनेन परिवादयेत् ।
तैजसं दारुजं वापि आर्त्तिक्यं दीपवृक्षकम् ॥ ८९ ॥

अथवा सरसों के तेल का, आवा फल का निर्यास अथवा जल में उत्पन्न किसी विशेष वृक्ष से उत्पन्न (नारियल) तेल का दीपक देना चाहिये । तदनन्तर ध्वनि 'ॐ जय मातः स्वाहा' इस मन्त्र से घण्टा का पूजन कर उसे बजावे । दीपक किसी तैजस पदार्थ से, अथवा काष्ठ से, अथवा मिट्टी से, अथवा किसी दीप वृक्ष का बना हुआ होना चाहिये ॥ ८८-८९ ॥

अत्र दीपं प्रदातव्यं भूमौ नहि कदाचन ।
एवं दीपं प्रकुर्वीत नेत्ररञ्जनकारकम् ॥ ९० ॥

पृथ्वी पर दीप कभी भी स्थापित न करे, इस प्रकार का दीप जो देखने में आँखों को सुख प्रदान करे उसे प्रशस्त कहा गया है ॥ ९० ॥

घृतदीपं दक्षिणे तु स्ववामे तैलदीपकम् ।
अभितो दीपयेन्मन्त्री दीपमालां घृतल्पताम् ॥ ९१ ॥

घी का दीपक अपने दाहिने तथा तेल का दीपक अपने बायें स्थापित करे अथवा घृत का दीपक बनाकर दीप माला चारों ओर जलावे ॥ ९१ ॥

**कर्पूरवर्तिकायुक्तां तेनैव वा परिप्लुताम् ।**
**वर्त्ता कर्पूरगन्धिन्या सर्पिषा तिलजेन वा ॥ ९२ ॥**
**आरोप्य दर्शयेद्दीपानुच्चैः सौरभशशालिनः ।**
**दीपाबलिं ततो दत्त्वा कुलदीपं निवेदयेत् ॥ ९३ ॥**

तदनन्तर कपूर की बत्ती से युक्त पर्याप्त कपूर पूर्ण हो इस प्रकार का (सर्वथा सुगन्ध युक्त दीपक), अथवा केवल कपूर की बत्ती, अथवा सरसों के तेल से युक्त बत्ती, अथवा तिल के तेल की बत्ती से युक्त दीपक, जो सुगन्ध पूर्ण हो, उसे ऊँचे उठाकर देवता को प्रदर्शित करे । इस प्रकार साधक दीपमाला देकर कुल दीप निवेदन करे ॥ ९२-९३ ॥

**सौवर्णे राजते कांस्ये स्थानके कुङ्कुमेन तु ।**
**दलाष्टकयुतं पद्मं विलिख्य तत्र साधकः ॥ ९४ ॥**

साधक सुवर्ण, अथवा चाँदी अथवा काँसे से बने हुये किसी पात्र में कुङ्कुम से अष्टदल कमल लिखे ॥ ९४ ॥

**यवगोधूमदुग्धाद्यैः कृत्वेन्दुरूपकं चरुम् ।**
**अष्टपत्रेषु मध्ये च स्थापयित्वा ततः परम् ॥ ९५ ॥**
**नवदीपं क्षिपेत्तत्र मूलमन्त्रेण मन्त्रयेत् ।**
**सप्तधा तत्र उत्तोल्य नवधा भ्रामयेत्ततः ॥ ९६ ॥**
**निर्मञ्छयेन्महादेवीं मूलमन्त्रं समुच्चरन् ।**
**ततश्च साधकश्रेष्ठश्चक्रमुद्रां प्रदर्शयेत् ॥ ९७ ॥**

यव एवं गेहू के आटे से तथा गोदुग्ध से चन्द्रमा के समान स्वच्छ चरू बनाकर उसे कमल के आठ पत्रों में एवं मध्यम में स्थापित करे । फिर उसमें मूलमन्त्र से नवदीपक भी रखे और मूलमन्त्र का उच्चारण करते हुये, सात बार उसे नीचे से ऊपर कर, नव बार घुमा कर महादेवी की आरती करे । इसके बाद श्रेष्ठ साधक चक्र मुद्रा प्रदर्शित करे ॥ ९५-९७ ॥

### चक्रमुद्रालक्षणम्

**दक्षिणेतरहस्तस्य वृद्धागर्भकनिष्ठिका ।**
**दक्षिणे योजयित्वा तु कनिष्ठे गर्भके बुधः ॥ ९८ ॥**
**वामे च यदक्षिणाङ्गुष्ठं साधको विनियोजयेत् ।**
**अन्योन्ययोगतश्चैव चक्रमुद्रा प्रकीर्तिता ॥ ९९ ॥**

**चक्रमुद्रा लक्षण**—बायें हाथ की कनिष्ठा अङ्गुली को बायें अङ्गुठे के भीतर रखकर उसे दाहिने हाथ में मिला देवे । इसी प्रकार बायें हाथ में दाहिने अङ्गुठे के

भीतर कनिष्ठा अङ्गुली स्थापित कर उसे मिला देवे, तो एक दूसरे में मिल जाने पर वह चक्र मुंद्रा बन जाती है ॥ ९८-९९ ॥

प्रदत्त्वा कुलदीपञ्च नैवेद्यं तु प्रदापयेत् ।
तैजसेषु च पात्रेषु प्रस्तरे वाऽब्जपत्रके ॥ १०० ॥
यज्ञदारुमये वापि नैवेद्यं कल्पयेद् बुधः ।
सर्वाभावे तु माहेये स्वहस्तघटिते यदि ॥ १०१ ॥

इसके बाद कुलदीप प्रदान कर नैवेद्य प्रदान करे । यह नैवेद्य किसी तैजस पात्र में, प्रस्तर में, कमलपत्र में अथवा यज्ञीय वृक्ष के काष्ठ से बने हुये पात्र में बुद्धिमान् साधक स्थापित करे । यदि उक्त सब पात्रों का अभाव हो तो केवल मिट्टी के पात्र में ही नैवेद्य प्रदान करे । किन्तु वह मिट्टी का पात्र अपने द्वारा ही बना हुआ होना चाहिये ॥ १००-१०१ ॥

न दद्यात् वाल्कले लौहे दत्ते नरकमाप्नुयात् ।
यद्योग्यं सर्वपात्रे तु तन्निधाय निवेदयेत् ॥ १०२ ॥

वृक्ष के वल्कल में अथवा लोहे के पात्र में नैवेद्य नही देना चाहिए । ऐसा करने से नरक प्राप्त होता है । जहाँ जैसी योग्यता हो उसी प्रकार के पात्र में नैवेद्य प्रदान करे ॥ १०२ ॥

अन्नतोयैर्यथा सृष्टमर्घ्यपात्रस्थितेतरैः ।
न गृह्णाति महादेवी दत्तं विधिशतैरपि ॥ १०३ ॥

अर्घ्यपात्र में स्थित जल यदि अन्न मिश्रित जल से संस्पृष्ट हो जावे, तो कदापि उस अर्घ्य को न देवे । भले ही अनेक विधि से वह दिया जाय, किन्तु भगवती उसे ग्रहण नहीं करती ॥ १०३ ॥

नैवेद्यं षड्रसोपेतं नानाविधफलं तथा ।
नानाविधानि द्रव्याणि दत्त्वा देव्यै प्रयत्नतः ॥ १०४ ॥
मद्यं निवेद्य मांसञ्च मत्स्यं मुद्रां ततः परम् ।
दत्त्वा देव्यै प्रयत्नेन अन्नं बहुविधं तथा ॥ १०५ ॥
विविधं व्यञ्जनं रम्यं कषायं तिक्तसंयुतम् ।
कट्वम्लमधुरञ्चैव परमान्नं सशर्करम् ॥ १०६ ॥

छह रसों से, अनेक प्रकार के फलों से एवं अनेक प्रकार के द्रव्यों से युक्त नैवेद्य प्रयत्नपूर्वक देकर मद्य, मांस, मत्स्य मुद्रा प्रदान कर अनेक प्रकार का अन्न, विविध व्यञ्जन, कषाय, तिक्त, कटु, खट्टा, मधुर, रस तथा शर्करायुक्त परमान्न निवेदित करे ॥ १०४-१०६ ॥

**शर्करादुग्धखण्डादिभावितं पिष्टकं तथा ।**
**दुग्धं दधि तथा तक्रं नवनीतं सशर्करम् ॥ १०७ ॥**

शर्करा, दुग्ध, खाँड में डुबोये गये रसीले आँटे से बने पदार्थ, दूध, दही, मट्ठा तथा शर्करायुक्त नवनीत प्रदान करे ॥ १०७ ॥

**शर्करामोदकं दद्यादन्यं नानाविधं तथा ।**
**चर्व्यं चोष्यं लेह्यपेयं भक्ष्यं भोज्यं निवेदयेत् ॥ १०८ ॥**

शर्करा से बना हुआ मोदक तथा अन्य चर्व्य, चोष्य, लेह्य, पेय, भक्ष्य और भोज्य पदार्थ निवेदन करे ॥ १०८ ॥

**अशक्तौ मनसा दद्यादेतत् कर्म न लोपयेत् ।**
**चुल्लुकञ्च ततो दत्त्वा प्राणमुद्रां प्रदर्शयेत् ॥ १०९ ॥**

यदि उक्त पदार्थों के समर्पण की शक्ति न हो, तो केवल मन से ही समर्पण करे, किन्तु कर्म का लोप न करे । इसके बाद कुल्ला कराकर प्राणमुद्रा प्रदर्शित करनी चाहिए ॥ १०९ ॥

### प्राणादिपञ्चमुद्रा

**वृद्धानामाकनिष्ठाभिः प्राणमुद्रा समीरिता ।**
**वृद्धामध्यातर्जनीभिरपानस्य प्रकीर्तिता ॥ ११० ॥**

**प्राण एवं अपान मुद्रा लक्षण**—वृद्धा (अङ्गूठा), अनामिका और कनिष्ठा अङ्गुलियों को एक में मिला देने पर प्राणमुद्रा बन जाती है । इसी प्रकार अङ्गूठा मध्यमा और तर्जनी के मिला देने से अपान मुद्रा बन जाती है ॥ ११० ॥

**वृद्धानामामध्यमाभिर्व्यानमुद्रा प्रदर्शिता ।**
**कनिष्ठाभिन्नसर्वाभिरुदानस्य समीरिता ॥ १११ ॥**

**व्यान एवं उदान मुद्रा लक्षण**—अङ्गूठा, अनामिका और मध्यमा के योग से व्यान मुद्रा होती है और कनिष्ठा को छोड़कर समस्त अङ्गुलियों के योग से उदान मुद्रा बन जाती है ॥ १११ ॥

**समानमुद्रा सर्वाभिरङ्गुलीभिः प्रदर्शिता ।**
**प्राणापानौ तथा व्यान उदानश्च समानकः ॥ ११२ ॥**
**चतुर्थ्यन्तोऽग्निजायान्तस्ताराद्यो मुद्रिकामनुः ।**
**वामहस्ते प्रासमुद्रा प्रासवत् परिकीर्तिता ॥ ११३ ॥**

**समान मुद्रा लक्षण**—सभी अङ्गुलियों के योग से समान मुद्रा बन जाती है ।

प्राण, अपान, व्यान, उदान और समान इनमें चतुर्थ्यन्त कर अन्त में स्वाहा तथा आदि में प्रणव लगाकर उक्त मन्त्र पढ़कर मुद्रा प्रदर्शित करे, यथा—'ॐ प्राणाय स्वाहा', 'ॐ अपानाय स्वाहा' इत्यादि। बायें हाथ से ग्रास मुद्रा, ग्रास (भाले) के समान आकार बनाकर प्रदर्शित करे ॥ ११२-११३ ॥

**पुनराचमनीयञ्च दत्त्वा देव्यै सुसाधकः ।**
**स्वयम्भूकुसुमं कुण्डगोलोत्थं रोचनागुरुम् ॥ ११४ ॥**
**कस्तूरीकुङ्कुमारक्तचन्दनानि प्रदापयेत् ।**
**गन्धपुष्पं तथा माल्यं रक्तपुष्पादिभूषणम् ॥ ११५ ॥**

फिर उत्तम साधक महादेवी को आचमन प्रदान कर स्वयम्भू कुसुम, कुण्डगोलोत्थ, रोचना, अगुरु, कस्तूरी, कुङ्कुम, रक्तचन्दन, गन्ध, पुष्प, माला, रक्तपुष्प तथा रक्तवर्ण का आभूषण प्रदान करे ॥ ११४-११५ ॥

**सिन्दूरं कज्जलं दद्यादलक्तं पट्टगुच्छकम् ।**
**द्रोणापराजितापुष्पं करवीरं जवां तथा ॥ ११६ ॥**
**प्रयत्नेन प्रदातव्यं चण्डिकाप्रीतिकारकम् ।**
**दत्ते चैव जवापुष्पे पट्टवस्त्रफलं लभेत् ॥ ११७ ॥**

सिन्दूर, कज्जल, अलक्तक, पट्टगुच्छ, द्रोण, अपराजिता का पुष्प, करवीर (कनइल), जपा आदि का पुष्प भगवती को प्रयत्नपूर्वक प्रदान करे। क्योंकि इनके प्रदान से भगवती प्रसन्न होती है। केवल जपा (उड़हुल) पुष्प के प्रदान से पट्टवस्त्र (पटुआ से बने हुये) देने का फल प्राप्त होता है ॥ ११६-११७ ॥

**अपरायाश्च माहात्म्यं वक्तुं नहि कदाचन ।**
**ताम्बूलञ्च ततो दद्यात् कर्पूरादिसुवासितम् ॥ ११८ ॥**
**पुनर्माल्यं प्रदातव्यं गन्धचन्दनसंयुतम् ।**
**दर्पणं पादुकां छत्रं चामरं व्यजनादिकम् ॥ ११९ ॥**
**अजादिबलिदानेन चण्डिकां तोषयेत्ततः ।**

**स्वहस्तेन पशुच्छेद निषेधः**

**यत्नतस्तु बलिं दद्यान्न हन्यादात्मना पुनः ॥ १२० ॥**

अपरा का माहात्म्य तो वाणी कथन से परे है। इसके बाद कपूर की सुगन्धि से युक्त ताम्बूल समर्पित करे। फिर गन्ध एवं चन्दन संयुक्त माल्य अर्पण करे। इसी प्रकार दर्पण, छत्र, चामर एवं पङ्खा प्रदान करे। अजा की बलि देकर चण्डिका को प्रसन्न करे। प्रयत्नपूर्वक भगवती को बलि देवे, किन्तु स्वयं उसकी हत्या बुद्धिमान् साधक न करे ॥ ११८-१२० ॥

स्वहस्तैर्न पशुं हन्यात् स्वतो हिंसां विवर्जयेत् ।
यदि हन्यात् प्रमादेन रौरवं नरकं व्रजेत् ॥ १२१ ॥

साधक अपने स्वयं हाथों से पशु का वध न करे। स्वयं अपने द्वारा की जाने वाली हिंसा वर्जित है। भूल से पशुहत्या करने वाला वह रौरव नरक का भागी होता है ॥ १२१ ॥

छागादीनि बलिं दत्त्वा धूपदीपं निवेदयेत् ।
गृहीत्वा शोणितं पात्रे स्वकीयं हृदयोद्भवम् ॥ १२२ ॥
तोयसैन्धवसंयुक्तं शर्करामधुसंयुतम् ।
प्रदद्याच्च महादेव्यै सर्वसौभाग्यहेतवे ॥ १२३ ॥

बकरे आदि की बलि देकर धूप दीप प्रदान करना चाहिए। फिर अपने हृदय का रक्त निकाल कर किसी पात्र में रखकर सेंधा नमक पानी में मिलाकर, उसमें शर्करा और मधु डालकर, अपने सौभाग्य की वृद्धि के लिए भगवती को अर्पित करना चाहिए ॥ १२२-१२३ ॥

अभ्युक्ष्य रुधिरं धीरो वाग्भवेन प्रदापयेत् ।
शक्तिबीजेन वा दद्यान्नाभेरूर्ध्वमधो नहि ॥ १२४ ॥

धीर साधक उस रुधिर का अभ्युक्षण कर वाग्भव (ऐं) मन्त्र से उसे शक्ति को प्रदान करे। भगवती के नाभि के ऊपरी भाग में उसे समर्पित करे; नीचे के भाग में नहीं ॥ १२४ ॥

पुष्पाञ्जलित्रयं दत्त्वा तर्पयेन्निजदेवताम् ।
ततश्च साधकश्रेष्ठो मन्त्रशुद्धिं माचरेत् ॥ १२५ ॥

फिर तीन पुष्पाञ्जलि देकर, उन अपने देवता का तर्पण करे। इसके बाद श्रेष्ठ साधक अपने मन्त्र को शुद्ध करे। १२५ ॥

गृहीत्वा मातृकावर्णं मूलमन्त्राक्षराणि च ।
क्रमात् क्रमाद् द्विरावृत्तिर्मन्त्रशुद्धिरितीरिता ॥ १२६ ॥

मातृका वर्ण का उच्चारण कर उसमें अपने मन्त्र के एक-एक अक्षरों को दो बार सम्पुटित करे। इस प्रकार मन्त्र की शुद्धि कही गई ॥ १२६ ॥

### वाचिकादिभेदेन त्रिविधो जपः

आदौ मन्त्रविशुद्ध्यर्थं जपं कुर्यात्ततः परम् ।
जपश्च त्रिविधं प्रोक्तं वाचिकोपांशुमानसम् ॥ १२७ ॥

**जप के लक्षण एवं भेद**—मन्त्र की शुद्धि के लिये सर्वप्रथम जप करे। यह जप तीन प्रकार का कहा गया है। प्रथम वाचिक, दूसरा उपांशु और तीसरा मानस—ये उस मन्त्र शुद्धि के भेद हैं ॥ १२७ ॥

**जिह्वौष्ठाधरसंस्फूर्तेर्जपो यश्च प्रजायते ।**
**तज्जपं वाचिकं विद्धि जिह्वामात्रमुपांशुकम् ॥ १२८ ॥**

जिसमें जिह्वा, ओठ और अधर स्फुरित (सञ्चलित) होता है वह जप वाचिक जप कहा जाता है। जिसमें मन्द मन्द केवल जिह्वा ही चले उसे उपांशु जप कहा जाता है ॥ १२८ ॥

**मनसा मन्त्रवर्णस्य चिन्तनं मानसं स्मृतम् ।**
**वाचिकस्य शतं ज्ञेयं एकोत्तरमुपांशुना ॥ १२९ ॥**
**तस्माच्छतगुणं प्रोक्तं मानसं जपमुत्तमम् ।**
(अथवा) **निगदश्च तथा ज्ञेयः स्पष्टवाचा निगद्यते ॥ १३० ॥**

मन से मन्त्र के वर्णो का ध्यान करना मानस जप कहा जाता है। केवल एक संख्या में किया गया उपांशु जप सौ वाचिक जप के तुल्य है, उस उपांशु जप का सौ गुना एक संख्या वाला जप मानस जप के बराबर होता है। अथवा जो स्पष्टवाणी में उच्चारण कर जप किया जाता है, वह निगद (वाचिक) जप कहा जाता है ॥ १३० ॥

**अव्यक्तस्तु स्फुरद्वक्त्र उपांशुः परिकीर्त्तितः ।**
**मानसश्च स बोद्धव्यश्चिन्तनाक्षररूपवान् ॥ १३१ ॥**

अत्यन्त गुप्त रूप से, किन्तु मुख का सञ्चालन जिसमें हो, उसे उपांशु कहते हैं। अक्षर मात्र मन से चिन्तन करना मानस जप कहा जाता है ॥ १३१ ॥

**निगदेन तु यज्जप्तं लक्षमात्रं सुसाधकैः ।**
**उपांशुस्मरणेनैव तुल्यं भवति सर्वथा ॥ १३२ ॥**

साधक के द्वारा स्पष्टोच्चारणपूर्वक निगद रूप से एक लाख की संख्या में किया गया जप एक संख्या वाले उपांशु जप के तुल्य होता है ॥ १३२ ॥

**उपांशुलक्षमात्रं तु यज्जप्तं साधकेन च ।**
**मानसोच्चारणात्तुल्यं जायते साधकस्य च ॥ १३३ ॥**

साधक के द्वारा एक लाख की संख्या में किया गया उपांशु जप एक संख्या वाले मानस जप के तुल्य होता है ॥ १३३ ॥

**प्राणायामं षडङ्गञ्च कृत्वा ऋष्यादिकञ्चरेत् ।**

स्वगुरुं मूर्ध्नि सञ्चिन्त्य हृदि देवीं ततः परम् ॥ १३४ ॥
स्वयं कामकलारूपं भावयन् जपमारभेत् ।
जपस्यादौ शिवां ध्यायेत् ध्यानस्यान्ते पुनर्जपेत् ॥ १३५ ॥

यह जप, प्राणायाम, षडङ्ग न्यास तथा ऋष्यादिन्यास करने के अनन्तर करना चाहिये । मस्तक में गुरु का ध्यान तथा हृदय में भगवती के ध्यान के अनन्तर जप करे। जप के पूर्व अपने को माहेश्वरी के रूप में ध्यान करे । इस प्रकार भगवती शिवा का ध्यान कर तदनन्तर जप आरम्भ करे ॥ १३४-१३५ ॥

जपध्यानसमायुक्तः शीघ्रं सिध्यति साधकः ।
ध्यानं कृत्वा जपेन्मन्त्रं गुरुक्तक्रमतो बुधः ॥ १३६ ॥

जप ध्यान करने वाला साधक शीघ्र ही सिद्धि प्राप्त करता है, गुरु आदि का क्रमशः ध्यान कर मन्त्र का जप करना चाहिये ॥ १३६ ॥

सर्वे मन्त्राः सिद्धिदाः स्युः सत्यमेव न संशयः ।
ततः सम्पूजयेन्मालां तोयैरभ्युक्ष्य यत्नतः ॥ १३७ ॥

ऐसा करने से सभी मन्त्र सिद्धि प्रदान करते हैं । जप के आरम्भ काल में माला यत्नपूर्वक जल से प्रक्षालित करे । फिर उसकी पूजा करे ॥ १३७ ॥

### मालापूजा

ॐ ह्रीँ अक्षमालायै हृन्मन्त्रेण प्रपूजयेत् ।
ॐ माले माले महामाले सर्वसिद्धिस्वरूपिणि ॥ १३८ ॥
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ।

### मालाजपविधिः

पूजयित्वा ततो मालां गृहीत्वा दक्षिणे करे ॥ १३९ ॥
हृत्समीपे समानीय न तु वामेन संस्पृशेत् ।

'ॐ ह्रीं अक्षमालायै नमः' मन्त्र से माला का पूजन करे । फिर 'ॐ माले माले..................सिद्धिदा भव' पर्यन्त मन्त्र पढ़े । इस प्रकार पूजन कर माला को दाहिने हाथ मे ग्रहण करे । उसे हृदय के पास ले आवे । बायें हाथ से माला का कदापि स्पर्श न करे ॥ १३८-१३९ ॥

विना यन्त्रञ्च मन्त्रञ्च कवचं मन्त्रशून्यतः ॥ १४० ॥
मालाञ्च वामहस्तेन मृत्युचिह्नस्य लक्षणम् ।
संख्या कृता मृत्तिका च अक्षतञ्च तथैव च ॥ १४१ ॥

बिना यन्त्र एवं मन्त्र के कवच व्यर्थ हो जाते हैं । बायें हाथ से ली गई माला

यह मृत्यु का चिह्न है । मट्टी एवं अक्षत द्वारा की गई जप संख्या—ये भी उसी प्रकार मृत्यु के कारण हैं ॥ १४०-१४१ ॥

**मध्यमाया मध्यभागे स्थापयित्वा समाहितः ।**
**तर्जन्या न स्पृशेन्मालामङ्गुष्ठाग्रेण चालयेत् ॥ १४२ ॥**

मध्यमा और अनामिका के मध्य भाग में माला स्थापित कर समाहित मन हो जप करे । तर्जनी से माला का स्पर्श न करे । अङ्गूठे के अग्रभाग से माला सरकावे ॥ १४२ ॥

**पार्श्वयोः सेतुमादाय जपकर्म समाचरेत् ।**
**निःसेतुश्च यथा तोयं क्षणान्निम्नं प्रसर्पति ॥ १४३ ॥**

दोनों के पार्श्व के सेतु (मनियों का मध्य भाग) लेकर जप करे, क्योंकि बिना सेतु के जल नीचे बह जाता है ॥ १४३ ॥

**मन्त्रस्तथैव प्रणवो द्विजानां सेतुरीरितः ।**
**शूद्राणां चन्द्रविन्दुस्थ औकारः सेतुरुच्यते ॥ १४४ ॥**

द्विजातियों के लिये मन्त्र का सेतु प्रणव (ॐ) है । शूद्रों के लिये चन्द्रविन्दु (अनुस्वार) युक्त 'औं' वर्ण है ॥ १४४ ॥

**शूद्राणामादिसेतुर्वा द्विसेतुर्वा यथेच्छया ।**
**द्विसेतवः समाख्याताः सर्वथैव द्विजातयः ॥ १४५ ॥**

अथवा शूद्र का अकार सेतु है, अथवा दो सेतु हैं, द्विजाति विशेष रूप से दो सेतु वाले कहे गये हैं ॥ १४५ ॥

**यथा मन्त्रं तथा स्तोत्रं कवचञ्च तथाविधम् ।**
**सेतुं विना भवेद्व्यर्थं तस्मात् सेतुं समाचरेत् ॥ १४६ ॥**

सेतु (प्रणव) के बिना जिस प्रकार मन्त्र व्यर्थ हो जाता है उसी प्रकार स्तोत्र और कवच भी व्यर्थ हो जाते हैं । इसलिये सुधी साधक को सेतु में कवच का प्रयोग करना चाहिए ॥ १४६ ॥

**प्रत्येकं बीजमादाय अङ्गादूर्ध्वेन मन्त्रवित् ।**
**पूर्वबीजं जपन् यस्तु परबीजन्तु संस्पृशेत् ॥ १४७ ॥**
**अङ्गुष्ठेन विना यस्य निष्फलः स जपः सदा ।**
**एवमुक्तविधानेन विलम्बं त्वरितं त्यजेत् ॥ १४८ ॥**
**मेरुं प्रदक्षिणीकृत्य प्रजपेत् साधकोत्तमः ।**
**गणनाविधिमुल्लङ्घ्य यो जपेत्तज्जपं पुनः ॥ १४९ ॥**

**गृह्णन्ति राक्षसास्तेन गणयेत् सर्वदा बुधः ।**
**अथवा करमालायां मातृकायां तथैव च ॥ १५० ॥**

बीज (मनियों) को ऊपर उठाकर प्रत्येक बीज (मनियों) से जप करे । जो जप करते हुए पूर्व बीज (पहली मनियाँ) को छोड़कर दूसरी मनियों का स्पर्श करता है, अथवा बिना अङ्गूठा लगाये जप करता है, वह जप निष्फल हो जाता है। इस प्रकार 'शनैः शनैः' जप करे । विलम्ब से अथवा जल्दीबाजी से मन्त्र का उच्चारण न करे । उत्तम साधक मेरु को प्रदक्षिण कर जप करे । जो बिना गणना किये जप करता है, उसके द्वारा किये गये समस्त जप राक्षस ग्रहण कर लेते हैं। इसलिये जप की सर्वदा गणना करनी चाहिये । कर माला में तथा मातृका वर्णों के द्वारा गणना करनी चाहिये ॥ १४७-१५० ॥

**नित्यं जपं करे कुर्यान्न तु काम्यं कदाचन ।**
**नित्यजपे च होमे च यत्र संख्या न चोदिता ॥ १५१ ॥**

जपसंख्या

**तत्रेयं गणना प्रोक्ता अष्टोत्तरसहस्रकम् ।**
**अष्टोत्तरशतं वापि त्रिंशद्वापि कदाचन ॥ १५२ ॥**

नित्य जप करमाला से करे । किन्तु काम्य जप करमाला पर कदापि न करे । नित्य जप में, होम में, जहाँ संख्या का निर्देश नहीं है, वहाँ इस प्रकार संख्या समझनी चाहिये—एक हजार आठ, अथवा एक-सौ आठ, अथवा तीस की संख्या समझनी चाहिये ॥ १५१-१५२ ॥

**त्रिंशन्न्यूनं न कुर्याच्च नित्यजापे च साधकः ।**
**यथाशक्ति जपं कृत्वा प्राणायामं विधाय च ॥ १५३ ॥**

साधक नित्य संख्या वाले जप में तीस संख्या से कम जप कदापि जप न करे। इस प्रकार यथाशक्ति जप करे । फिर प्राणायाम करे ॥ १५३ ॥

जपसमर्पणं

**गोपयित्वा ततो मालां सप्रसूनार्घ्यवारिणा ।**
**तेजोमयं जपफलं देव्या हस्ते समर्पयेत् ॥ १५४ ॥**

तदनन्तर माला को गुप्त कर पुष्प सहित अर्घ्य के जल से तेजोमय जपफल भगवती के हाथ में समर्पित कर देवे ॥ १५४ ॥

प्रणामविधिः

**गुह्यातीति समर्प्याथ स्तुवन् घण्टाञ्च वादयेत् ।**
**त्रिविधेन नतिं कुर्यादष्टाङ्गकविधानकैः ॥ १५५ ॥**

'गुह्यातिगुह्य' इत्यादि मन्त्र पढ़कर जप समर्पित कर घण्टा बजाते हुये स्तुति करे। तदनन्तर अष्टाङ्ग विधि द्वारा तीन बार भगवती को नमस्कार करे ॥ १५५ ॥

**चिबुकेन मुखेनाथ नासया मस्तकेन च ।**
**ब्रह्मरन्ध्रेण कर्णाभ्यां यद्भूमेः स्पर्शनं भवेत् ॥ १५६ ॥**

चिबुक, मुख, नासिका, मस्तक, ब्रह्मरन्ध्र, दोनों कान, इनके द्वारा जो भूमि का स्पर्श किया जाता है उसे अष्टाङ्ग प्रणाम कहा जाता है ॥ १५६ ॥

(अथवा) **उरः शिरोदृष्टिजानुमनश्चरणवाक्करैः ।**
**अष्टाङ्गनमनं ज्ञेयं नित्यहोमं ततः परम् ॥ १५७ ॥**

अथवा वक्षःस्थल, शिर, दृष्टि, जानु, मन, चरण, वाणी एवं हाथ इन आठ अङ्गों से भगवती को नमन करे। तदनन्तर नित्य होम सम्पादन करे ॥ १५७ ॥

**नित्यं नैमित्तिकं होमं स्थण्डिलेषु समाचरेत् ।**
**न कुर्यात् काम्यहोमं वै विना कुण्डेन मन्त्रवित्॥ १५८ ॥**

नित्य नैमित्तिक होम स्थण्डिल (वेदी) पर करे। किन्तु मन्त्रवेत्ता काम्य होम कुण्ड के बिना न करे ॥ १५८ ॥

**स्वदक्षिणे लिखेद्धस्तप्रमाणं चतुरस्रकम् ।**
**अङ्गुलोत्सेधसंयुक्तं वालुकाभिः समन्ततः ॥ १५९ ॥**
**तत्र मध्ये च षट्कोणं लिखित्वा प्रोक्ष्य पूजयेत् ।**
**आधारशक्तिमभ्यर्च्य पूर्ववच्च षडङ्गकम् ॥ १६० ॥**

बालुका के द्वारा अपने दाहिने हाथ के प्रमाण का चौड़ा एक अङ्गुल चौकोर वेदी निर्माण करे। उसके बीच में षट्कोण बनाकर प्रोक्षण कर उसकी पूजा करे। फिर पूर्ववत् आधार शक्ति का तथा षडङ्ग का पूजन करे ॥ १५९-१६० ॥

**ततो वह्निं समुज्ज्वाल्य क्रव्यादंशं परित्यजेत् ।**
**शब्दास्त्रमनुना मन्त्री नैर्ऋत्यां ज्वलदग्निकम् ॥ १६१ ॥**

फिर उसपर आग को प्रज्वलित कर उसमें से क्रव्यात् अंश को अस्त्र मन्त्र (फट्) से निकाल कर उस जलते अग्नि को नैर्ऋत्य दिशा में फेंक देवे ॥ १६१ ॥

**आत्मनोऽभिमुखं कृत्वा वह्निं संस्थापयेद् बुधः ।**
**अग्निं प्रज्वाल्य मूलेन ज्वालिनीञ्च प्रदर्शयेत् ॥ १६२ ॥**

अपने सम्मुख वेदी पर अग्नि स्थापन की विधि इस प्रकार है, मूल मन्त्र से अग्नि को प्रज्वलित कर ज्वालिनी मुद्रा प्रदर्शित करे ॥ १६२ ॥

ज्वालिनीमुद्रा

मणिबन्धौ समौ कृत्वा करौ तु प्रसृताङ्गुली ।
मध्यमे मिलिते कृत्वा तन्मध्येऽङ्गुष्ठकौ क्षिपेत् ॥ १६३ ॥
इयं स्याज्ज्वालिनी मुद्रा परमा होमकर्मणि ।
अग्निं सम्पूजयित्वा तु शिवशक्तिसमागमात् ॥ १६४ ॥
वह्निमध्ये समावाह्य इष्टदेवीं समाहितः ।
आवाहन्यादिका मुद्रा दर्शयित्वा तु रक्षयेत् ॥ १६५ ॥

दोनों मणिबन्धों को समान रखे, हाथ की अङ्गुलियों को फैला देवे, फिर दोनों मध्यमा अङ्गुलियों को एक में मिलाकर, उसके मध्य में दोनों अङ्गूठो को स्थापित कर दे तो ज्वालिनी मुद्रा बन जाती है, जो होम कर्म में प्रशस्त बतलायी गई है। फिर अग्नि का पूजन कर उसमें शिवशक्ति के एक में मिले हुये रूप का आवाहन करना चाहिए। तदनन्तर इष्टदेवी को आवाहनी आदि मुद्रा प्रदर्शित कर साधक अग्नि की रक्षा करे ॥ १६३-१६५ ॥

सम्पूज्य च महादेवीं हव्यं संशोधयेत्ततः ।
संस्थाप्य हवनीयञ्च पूर्ववत् प्रोक्षणञ्चरेत् ॥ १६६ ॥
चतुर्धा शोधनं कृत्वा आज्यस्थाली तु सन्दिशेत् ।
पूर्ववन्मण्डलं कृत्वा पूजयेत् पूर्ववर्त्मना ॥ १६७ ॥
अत्र पात्रं विनिक्षिप्य हव्यं तत्र निधापयेत् ।
दशधा मूलमन्त्रेण अभिमन्त्र्य हुनेत्ततः ॥ १६८ ॥
प्रणवं भूस्ततः स्वाहा इदमग्निञ्च ङेयुतम् ।
तारं भुवो वह्निजाया इदञ्च वायवे पदम् ॥ १६९ ॥
ॐ स्वः स्वाहा इदं प्रोच्य प्रजाधिपतये ततः ।
इत्याहुतित्रयं हुत्वा महाव्याहृतिसाञ्ज्ञम् ॥ १७० ॥

तदनन्तर महादेवी की पूजा कर हव्य का संशोधन करे। हव्य को किसी पात्र में स्थापित कर पूर्ववत् प्रोक्षण करे। इस प्रकार चार बार संशोधन कर फिर आज्य स्थाली में मण्डल बनाकर उसका पूर्ववत् पूजन करे। उसमें घृत डाले। हव्य को भी वही स्थापित करे। फिर मूलमन्त्र से दस बार अभिमन्त्रित कर हवन प्रारम्भ करे। प्रणव (ॐ), इसके बाद 'भू स्वाहा इदमग्नये' इस मन्त्र से प्रथम आहुति, तार (ॐ), इसके बाद 'भुवः स्वाहा इदं वायवे', इस मन्त्र से द्वितीय आहुति। 'ॐ स्वः स्वाहा इदं प्रजाधिपतये', इस मन्त्र से तृतीय आहुति देवे। इस प्रकार महाव्याहृति सञ्ज्ञक तीन आहुति देवे ॥ १६६-१७० ॥

हव्ये वह्नौ तथा देव्यां आत्मन्यैक्यं विभावयेत् ।

**षडङ्गमनुना षट्कमाहुतिं जुहुयात्ततः ॥ १७१ ॥**

इसके अनन्तर हवि, अग्नि देवता तथा अपनी आत्मा में एकता की भावना करते हुये षडङ्ग मन्त्र से छह आहुति देवे ॥ १७१ ॥

**मूलान्ते देवतानाम ङेयुक्तञ्च समुच्चरेत् ।**
**ततः स्वाहा समुच्चार्य अष्टोत्तरसहस्रकम् ॥ १७२ ॥**
**हविषा च हुनेद्धीर तिलेन पललेन वा ।**
**अष्टोत्तरशतं वापि तदर्द्धं वापि साधकः ॥ १७३ ॥**
**अथवाष्टदशं कुर्यान्नित्यहोमे त्वयं विधिः ।**

प्रथम मूलमन्त्र, इसके बाद चतुर्थ्यन्त देवता का नाम, तदनन्तर स्वाहा का उच्चारण कर एक हजार आठ आहुति हवि से, अथवा तिल से, अथवा मांस से देवे, अथवा एक सौ आठ आहुति, अथवा उसकी आधी, अथवा अट्ठारह आहुति प्रदान करे । नित्य होम का यह विधान है ॥ १७२-१७३ ॥

**मांसेन मधुना चाज्यैर्मत्स्यैः पुष्पैस्तिलैस्तथा ॥ १७४ ॥**
**यवैर्धान्यैश्च मुद्राभिः कुलपुष्पैस्तथा फलैः ।**
**अपामार्गैर्विल्वपत्रैर्भृङ्गराजैः सुशोभनैः ॥ १७५ ॥**

पुष्पनामानि

**करवीरैर्जवापुष्पैरपराद्रोणकिंशुकैः ।**
**पद्मैश्च कुमुदैः कुन्दैर्नीलरक्तोत्पलैस्तथा ॥ १७६ ॥**
**सौगन्धिकैश्च बन्धूकैः केशरैश्चम्पकैस्तथा ।**
**जातीभिर्मालतीभिश्च मल्लिकाभिः कदम्बकैः ॥ १७७ ॥**
**मनोरमैः प्रसूनैश्च फलैः पत्रैर्यथाविधि ।**
**अनेन विधिना मन्त्री देव्या होमं समाप्य च ॥ १७८ ॥**

मांस, मधु, घृत, मत्स्यखण्ड, पुष्प, तिल, यव, धान्य, मुद्रा, कुलपुष्प, फल, अपामार्ग, बिल्वपत्र, उत्तम प्रकार के भृङ्गराज (भडरैया), करवीर (कनइल), जवा पुष्प, अपरा, द्रोण, किंशुक, कमल, कुमुद, कुन्द, नीले अथवा रक्तवर्ण के उत्पल, सौगन्धिक, बन्धूक, केशर, चम्पक, जाती, मालती, मल्लिका, कदम्ब और इसी प्रकार मनोरम फलों, पुष्पों एवं पत्रों से विधान के अनुसार आहुति देवे । मन्त्रज्ञ इस प्रकार भगवती का होम समाप्त करे ॥ १७४-१७८ ॥

होमसमाप्तिः

**पञ्चप्राणाहुतीर्मूलैः षडङ्गानां षडाहुतीः ।**
**गुरुवृन्दं रश्मिवृन्दं समावाह्य हुनेत्ततः ॥ १७९ ॥**

फिर प्राणमन्त्र के द्वारा पाँच आहुति एवं षडङ्ग से छह आहुति देकर गुरुवृन्दों को तथा रश्मिवृन्दों को आहुति देवे ॥ १७९ ॥

**क्रमादेकाहुतिं हुत्वा प्रत्येकेन सुसाधकः ।**
**आहुतित्रितयं हुत्वा पुनर्देव्यै प्रयत्नतः ॥ १८० ॥**

गुरुओं तथा रश्मिवृन्दों को क्रमशः एक-एक आहुति देकर उत्तम साधक फिर प्रयत्नपूर्वक द्रव्यों की तीन आहुति देवे ॥ १८० ॥

**पुनराचमनीयं तु दत्त्वा वह्नौ समानयेत् ।**
**संहारमुद्रया देवीं ॐ अग्नये ततः परम् ॥ १८१ ॥**
**वह्निजायान्तमन्त्रेण आहुतित्रितयं हुनेत् ।**
**विसृज्याग्निञ्च देवीञ्च शङ्खघण्टाञ्च वादयेत् ॥ १८२ ॥**

फिर अग्नि में आचमन देकर देवी को सहार मुद्रा प्रदर्शित करे । फिर 'ॐ अग्नये स्वाहा' मन्त्र पढ़कर तीन आहुति प्रदान करे । तदनन्तर अग्नि एवं देवी का विसर्जन कर शङ्ख और घण्टा बजावे ॥ १८१-१८२ ॥

**तर्पयित्वा ततो देवीं चक्रस्थां परमेश्वरीम् ।**
**देव्यङ्घ्रिमूर्ध्नि संहृत्वा शेषं कर्म समाचरेत् ॥ १८३ ॥**

फिर चक्र स्थित परमेश्वरी का तर्पण कर देवी के चरण कमलों में मस्तक रखकर शेष कर्म करे ॥ १८३ ॥

### निवेदित पञ्चतत्त्वग्रहणफलकथनम्

**ततश्च कौलिकैः सार्द्धं पानं कुर्यात् कुलामृतम् ।**
**पञ्चतत्त्वं महादेव्यै दत्त्वा न स्वीकरोति यः ॥ १८४ ॥**
**नैवेद्यादि तथा सोऽपि देवीनां शापभाग्भवेत् ।**
**रोगी दुःखी दरिद्रश्च भूत्वा नरकमाप्नुयात् ॥ १८५ ॥**

इसके बाद कौलमार्गियों के साथ कुलामृत का पान करना चाहिए । महादेवी को मद्यादि पाँच तत्त्व एवं नैवेद्यादि प्रदान कर जो उसे स्वयं नहीं ग्रहण करता वह देवी के द्वारा शाप प्राप्त करता है । वह रोगी, दुःखी और दरिद्र होकर नरक प्राप्त करता है ॥ १८४-१८५ ॥

### पानस्य त्रैविध्यम्

**एकाकी नाचरेत् पानं कौलिकैर्मायया सह ।**
**पानञ्च त्रिविधं प्रोक्तं दिव्यवीरपशुक्रमात् ॥ १८६ ॥**

दिव्यं देव्यग्रतः पानं वीरमेकान्तवासिनाम् ।
संस्कारादिविहीनं यत्तत् पानं पाशवं स्मृतम् ॥ १८७ ॥

**॥ इति श्रीमज्ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये सप्तमोल्लासः ॥७॥**

**मद्यपान के तीन प्रकार**—अकेले कभी मद्यपान न करे । कौलों और माया (स्त्रियों) के साथ पान करना चाहिए । मद्यपान के तीन प्रकार बतलाये गये हैं—दिव्य, वीर और पशु । देवी के भक्तों के साथ किया गया पान दिव्यपान कहलाता है । एकान्त में किया गया मद्यपान वीर पान होता है तथा संस्कारादि रहित मद्यपान पशुपान कहा जाता है ॥ १८६-१८७ ॥

**महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय के ज्येष्ठ पुत्र पण्डित रामरञ्जन मालवीय कृत श्रीमज्ज्ञानानन्द परमहंस विरचित कौलावलीनिर्णय नामक तन्त्र के सप्तम उल्लास की निरञ्जन हिन्दी व्याख्या पूर्ण हुई ॥ ७ ॥**

# अष्टम उल्लासः

...~~...

अन्नपूर्णायाः पूजाध्यानादि विधानम्

**क्रमं तस्य प्रवक्ष्यामि चतुर्वर्गप्रदायकम् ।**
**अन्नमध्ये त्वष्टपत्रं पद्मं निर्माय तत्र वै ॥ १ ॥**

अब नैवेद्य समर्पण के क्रम को कहता हूँ । जिससे चारों वर्ग (धर्म, अर्थ, काम एवं मोक्ष) की प्राप्ति होती है । अन्न के मध्य में अष्टपत्र कमल का निर्माण करना चाहिये ॥ १ ॥

**कारणैः पूर्णपात्रं तु संस्थाप्य तत्र साधकः ।**
**षड्दीर्घमायया चैव षडङ्गन्यासमाचरेत् ।**
**ततो ध्यायेदन्नपूर्णां परमानन्ददायिनीम् ॥ २ ॥**

वहाँ मद्य से भरा पूर्णपात्र स्थापित करे, फिर ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः इस षड्दीर्घ माया से अङ्गन्यास कर परमानन्ददायिनी अन्नपूर्णा का इस प्रकार ध्यान करे ॥ २॥

अन्नपूर्णाध्यानकथनम्

**आदाय दक्षिणकरेण सुवर्णदर्वीन्**
**दुग्धान्न पूर्णामितरेण च रत्नपात्रम् ।**
**भिक्षान्नदाननिरतां नव हेमवर्णा**
**मम्बां भजे सकलभूषणभूषिताङ्गीम् ॥ ३ ॥**

**अन्नपूर्णा का ध्यान**—जो अपने दाहिने हाथ में दूध और अन्न से भरी हुई दर्वी (=सूप) तथा बायें हाथ में रत्न पात्र लेकर निरन्तर अन्नदान की भिक्षा में निरत हैं । जिनके शरीर का वर्ण तप्त सुवर्ण के समान चमकीला है । इस प्रकार सम्पूर्ण भूषणों से अलंकृत माता अन्नपूर्णा को मैं नमस्कार करता हूँ ॥ ३ ॥

**एवं ध्यात्वा महादेवीं तत्रावाह्य सुसाधकः ।**
**तत्त्वमुद्रां प्रदर्श्याथ इदमन्नामृतं वदेत् ॥ ४ ॥**
**पूरयद्वन्द्वमुच्चार्य नमः स्वाहा ततः परम् ।**

तत्र सन्तर्पयेद्भक्त्या अन्नपूर्णा यजेत्ततः ॥ ५ ॥

इस प्रकार ध्यान कर साधक उस अष्टपत्र कमल में महादेवी का आवाहन कर तत्वमुद्रा प्रदर्शित कर 'इदमन्नामृतं पूरय पूरय स्वाहा' इस मन्त्र को पढ़े । पुनः अन्नपूर्णा का वहीं तर्पण कर भक्तिपूर्वक उनका यजन करे ॥ ४-५ ॥

तारञ्च भुवनेशानीं श्रीबीजं कामबीजकम् ।
हृदन्ते भगवत्यन्ते माहेश्वरीपदं लिखेत् ॥ ६ ॥
अन्नपूर्णे अग्निजाया त्वन्नपूर्णामनूत्तमः ।
यथाशक्ति जपं कृत्वा स्तुत्वा देवीं समाहितः ॥ ७ ॥
अर्चयित्वा तु देवेशीं कौलिकान्नार्चयन्ति ये ।
पापिष्ठास्ते चण्डिकायाः प्रसादभाजनं नहि ॥ ८ ॥

तार (ॐ), भुवनेशानी (ह्रीं), श्रीबीज (श्रीं), फिर कामबीज (क्लीं), का उच्चारण कर, 'नमः भगवति माहेश्वरि अन्नपूर्णे स्वाहा' यह अन्नपूर्णा का सर्वोत्तम मन्त्र है । इस मन्त्र का यथाशक्ति जपकर समाहित चित्त से स्तुति कर उनका कौलिक अर्चन करे । जो पापी कौलिक अन्नपूर्णा का अर्चन नहीं करते, वे अन्नपूर्णा के कृपापात्र नहीं होते ॥ ६-८ ॥

नैवेद्यं पुरतो न्यस्तं दर्शनात् स्वीकृतं त्वया ।
साधुभक्तस्य जिह्वायामश्नामि कमलेक्षणे ॥ ९ ॥

हे मातः! यह नैवेद्य हमने आपके समीप स्थापित किया है जिसे आपने अपनी दृष्टि से स्वीकार भी किया है । हे कमले! अब इस अन्न को मैं उत्तम कोटि के साधुओं की जीभ से भोजन कराना चाहता हूँ ॥ ९ ॥

वसन्ति तस्य जिह्वायां शिवशक्त्यादिदेवताः ।
तस्मात् कौलिकवक्त्रेषु होतव्यं साधकोत्तमैः ॥ १० ॥

यतः साधुजनों की जिह्वा पर शिवशक्त्यात्मक देवता का निवास रहता है, इसलिये कौलिकों को उनके मुख में हवन करना चाहिये ॥ १० ॥

चण्डिकायाः प्रियाकाङ्क्षी देवीभक्तान् यजेत् सदा ।
कौलानां लक्षणं वक्ष्ये यथातन्त्रानुसारतः ॥ ११ ॥

चण्डिका की कृपा चाहने वाला साधक ऐसे देवी भक्तों को भोजन अवश्य करावे । अब तन्त्र के अनुसार कौलिकों के लक्षण कहता हूँ ॥ ११ ॥

**कौललक्षणम्**

निवृत्तदुःखसन्तुष्टा विद्यागमविमत्सराः ।

**कुलज्ञानरताः शान्ताः शिवभक्ता दृढव्रताः ॥ १२ ॥**
**कीर्त्यमाने कुले येषां रोमाञ्चगद्गदस्वराः ।**
**आनन्दाश्रुयुता वीराः कथिताः कौलिकेश्वराः ॥ १३ ॥**

जो सर्वदा दुःख को दूर कर सन्तुष्ट रहते हैं, विद्या आगम (मन्त्रशास्त्र) से युक्त हैं और मात्सर्यरहित हैं, कुलज्ञान में निरत, शान्त, शिवभक्त और दृढ़व्रत रहते हैं, कौलधर्म के निरूपणकाल में जो रोमाञ्च एवं गद्गद् स्वर वाले हो जाते हैं और उनके नेत्रों से अविरल अश्रुधारा प्रवाहित होती है, ऐसे वीर कौलिकेश्वर कहे जाते हैं ॥ १२-१३ ॥

**सर्वधर्मोऽधिको लोके कुलधर्मः शिवोदितः ।**
**इति ये निश्चितधियः प्रोक्तास्ते कौलिकोत्तमाः ॥ १४ ॥**

यतः शिवोपदिष्ट होने से यह कौलधर्म लोक में सबसे अधिक प्रचलित है इस प्रकार की निश्चित बुद्धि वाले सर्वश्रेष्ठ कौलिक कहे गये हैं ॥ १४ ॥

कुलार्चनप्रशंसा

**यो भवेत् कुलतत्त्वज्ञः कुलशास्त्रविशारदः ।**
**कुलार्चनरतपुंसां कौलिकः सोऽधिकः सदा ॥ १५ ॥**

जो कुलतत्वज्ञ एवं कुलशास्त्र में विशारद हैं, वह साधक सभी कुलार्चन करने वाले पुरुषों में श्रेष्ठ है ॥ १५ ॥

**कुलभक्तान् कुलाचारान् कुलज्ञानान् कुलव्रतान् ।**
**प्रीतो भवति यो दृष्ट्वा कौलिकः स शिवप्रियः ॥ १६ ॥**

जो कुलभक्त कुलाचार, कुलज्ञान और कुलव्रत में निरत कौलों को देखकर प्रसन्न होता है वह शिवप्रिय कौलिक है ॥ १६ ॥

**पञ्चतत्त्वस्वीकरणात् मूलमन्त्रार्थतत्त्ववित् ।**
**देवतागुरुभक्तश्चेत् कौलिकः स्याच्च दीक्षया ॥ १७ ॥**

**कौलिकलक्षण**—पञ्चतत्व (मद्य मांसादि) को स्वीकार करने वाला एवं मूलमन्त्र के अर्थ का तत्त्ववेत्ता, देवता और गुरु का भक्त तथा दीक्षा सम्पन्नजनों को कौलिक कहा जाता है ॥ १७ ॥

**दुर्लभं सर्वलोकेषु कुलाचार्यस्य दर्शनम् ।**
**यः शक्तीः स्वयमाहूय कुलाभिज्ञांस्तथैव च ॥ १८ ॥**
**अभ्यर्च्य देवताबुद्ध्या गन्धपुष्पाक्षतादिभिः ।**
**मादिभिः पञ्चमुद्राभिः सद्भक्त्या परितोषयेत् ॥ १९ ॥**

**तेषु तुष्टेषु सन्तुष्टाः शिवाद्याः सर्वदेवताः ।**
**कुलज्ञानी वसेद् यत्र स देशः पुण्यभाजनः ॥ २० ॥**

ऐसे सभी लोकों में इस प्रकार के कुलाचार्य का दर्शन होना सर्वथा दुर्लभ है जो स्वयं शक्ति का तथा कुलमार्ग के ज्ञानियों का आवाहन कर उनका देवता बुद्धि से अभ्यर्चन कर गन्ध, पुष्प, अक्षतों से मकारादि पञ्चद्रव्यों से एवं पञ्चमुद्राओं से भक्तिपूर्वक अर्चन कर सन्तुष्ट करे वह श्रेष्ठ है । क्योंकि ऐसे कौलों के अर्चन से न केवल सभी देवता अपितु शिवादि सब देवता प्रसन्न हो जाते हैं । कुलज्ञानी का जिस देश में निवास होता है वह प्रदेश सर्वाधिक पुण्यशाली है ॥ १८-२० ॥

**दर्शनादर्चनात्तस्य त्रिसप्तकुलमुद्धरेत् ।**
**कुलज्ञानिनमालोक्य स्वगृहेऽन्यगृहे स्थितम् ॥ २१ ॥**
**समायान्ति मुदा तत्र योगिन्यो योगिभिः सह ।**
**प्रविश्य कुलयोगीशं भुञ्जते पितृदेवताः ॥ २२ ॥**

साधक ऐसे कौलों का दर्शन एवं पूजन कर अपनी इक्कीस पीढ़ियों का तरन-तारन कर देता है । अपने घर में तथा अन्य के घर में रहने वाले कुलज्ञानी को देखकर योगिनियाँ प्रसन्नतापूर्वक योगियों के साथ वहाँ पहुँच जाती हैं । पितर और देवता भी कुलयोगीशों के शरीर में प्रविष्ट होकर उस साधक के पास वहाँ भोजन करते हैं ॥ २१-२२ ॥

**यत् कृतं कुलनिष्ठानां तद्देवानां कृतं भवेत् ।**
**देवाः कुलप्रियाः सर्वे तस्मात् कौलिकमर्चयेत् ॥ २३ ॥**

कौलिकों द्वारा किया गया कर्म देवता भी स्वीकार करते हैं । देवता भी कौलिकों से प्रसन्न रहते हैं । इसलिये विद्वान् एवं कुलाचार युक्त कौलिकों की अर्चना अवश्य करनी चाहिये ॥ २३ ॥

**ब्रह्मेन्द्राच्युतरुद्रादिदेवता मुनिराक्षसाः ।**
**कुलधर्मपरा ह्येते मानुषेषु च का कथा ॥ २४ ॥**

ब्रह्मा, इन्द्र, विष्णु, रुद्रादि, देवता एवं मुनि और राक्षस—ये सभी कुलधर्म को मानने वाले हैं । फिर मनुष्यों की बात ही क्या? ॥ २४ ॥

**न तुष्टा चण्डिकाऽन्यत्र तथातः स्यात् सुपूजिता ।**
**कौलिकेन्द्रेऽर्चिते सम्यग् यथा तुष्टा हि चण्डिका ॥ २५ ॥**

कौलिकों के अर्चन से भगवती चण्डिका जितनी प्रसन्न होती हैं उतनी अन्य देवों के पूजन से सम्यक्तया सन्तुष्ट नहीं होतीं । अतः श्रेष्ठ कौलिकों की पूजा अवश्य करनी चाहिये ॥ २५ ॥

**यत् फलं कौलिकेन्द्राणां पूजनाल्लभते सुधीः ।**
**तत्फलं नाप्नुयात्तीर्थैस्तपोव्रतमखैः सदा ॥ २६ ॥**

सुधी साधक कौलिकेन्द्रों के पूजन से जितना फल प्राप्त करता है उतना फल तीर्थ, तप, व्रत एवं यज्ञों के करने से नहीं प्राप्त करता है ॥ २६ ॥

तन्निन्दायां दोषः

**पूजनाज्जपनाद्धोमात् सुकृतं विविधं तथा ।**
**कौलिकस्य भवेद् व्यर्थं कौलिकं योऽवमानयेत् ॥ २७ ॥**

जो कौलिकों का अपमान करता है, उसके पूजा और जप से होने वाले सभी सुकृत विनष्ट हो जाते हैं ॥ २७ ॥

**श्मशानं तद्गृहं विद्धि पापिष्ठः श्वपचाधमः ।**
**कुलनिष्ठं परित्यज्य यच्चान्यस्मै प्रदीयते ॥ २८ ॥**

जो कौलों का परित्याग कर अन्यों को देता है उसका घर श्मशान है । उसे पापिष्ठ और श्वपच (=चाण्डाल) समझना चाहिये ॥ २८ ॥

**तद्दानं निष्फलं विद्याद्दाताऽपि नरकं व्रजेत् ।**
**पापाचारसमायुक्तं सर्वलोकबहिष्कृतम् ॥ २९ ॥**
**त्रायते हि कुलद्रव्यं कुलयोगीश्वरार्पितम् ।**
**कौलिकेन्द्रः सकृद्भुङ्क्ते पुण्यं कोटिगुणं भवेत् ॥ ३० ॥**

उस परित्यक्त कौल का किया हुआ दान निष्फल है । उसे देने वाला स्वयं भी नरक का भागी होता है क्योंकि कुलयोगीश्वरों को अर्पित किया गया दान, कुलद्रव्य, पाप के आचरण में लगे हुये सर्वलोक बहिष्कृत जनों की भी रक्षा करता है । अतः यदि किसी के अन्न को एक कौलिकेन्द्र भोजन कर ले तो उसको करोड़ गुना फल प्राप्त होता है ॥ २९-३० ॥

कुलधर्मप्रशंसा

**किं पुनर्बहुभिर्भुक्तैस्तत् पुण्यं नैव गण्यते।**
**तस्मात् सर्वप्रयत्नेन सर्वावस्थासु सर्वथा ॥ ३१ ॥**
**कुलधर्मपरो भूत्वा कुलज्ञानिनमर्चयेत् ।**
**नन्दन्ति पितरः सर्वे गायन्ति च पितामहाः ॥ ३२ ॥**

फिर जिसके अन्न को बहुत से कौलों ने भोजन कर लिया, तो उसके पुण्य की गणना नहीं हो सकती । इसलिये सभी अवस्थाओं में, सदा कौलिक बनकर, कुलमार्ग के ज्ञाताओं का अर्चन करना चाहिये । ऐसा करने से उसके समस्त

पितर प्रसन्न होते हैं तथा पितामह उसकी प्रशंसा करते हैं ॥ ३१-३२ ॥

**प्रपितामहाश्च नृत्यन्ति कौलिके गृहमागते ।**
**यज्ञकोटिफलं तस्य वाजपेयशतानि च ॥ ३३ ॥**

बहुत क्या कहें ? कौलिक के अपने घर आ जाने पर प्रपितामह प्रसन्नता से नाचने लगते हैं और उसे करोड़ो यज्ञों का तथा सैकड़ों वाजपेय यज्ञों का फल प्राप्त होता है ॥ ३३ ॥

**ददाति कौलिकेभ्यश्च विन्दुमात्रालिसङ्गमात् ।**
**पृथिवी हेमपूर्णा च कल्पकोटिप्रदानतः ॥ ३४ ॥**
**तत्फलं स्पर्शनाज् ज्ञानात् कौलिके यागमन्दिरे ।**
**कौलिकेषु प्रसन्नेषु प्रसन्ना चण्डिका भवेत् ॥ ३५ ॥**

जो कौलिकों को विन्दु मात्र मद्य का सङ्गम कराने से, यागमन्दिर में उसके स्पर्श से, उसके ज्ञान से, इतना पुण्य होता है जितना स्वर्णपूर्णा पृथ्वी के करोड़ो बार देने से होता है । कौलिक के प्रसन्न हो जाने पर स्वयं भगवती चण्डिका प्रसन्न हो जाती हैं ॥ ३४-३५ ॥

**संस्मृतः कीर्तितो दृष्टो वन्दितो भाषितोऽपि वा ।**
**पुनाति कुलधर्मिष्ठश्चण्डालोऽपि यदृच्छया ॥ ३६ ॥**

कुलधर्म का पालन करने वाले चाण्डाल का भी इच्छा से स्मरण करने से, कीर्त्तन करने से, दर्शन करने से, वन्दना करने से और सम्भाषण करने से मनुष्यों को पवित्र कर देता है ॥ ३६ ॥

**सर्वज्ञो वापि मूर्खो वा उत्तमो वाऽधमोऽपि वा ।**
**सर्वथैव शिवः सोऽपि तस्माद्यत्नात् समर्चयेत् ॥ ३७ ॥**

सर्वज्ञ अथवा मूर्ख, उत्तम अथवा अधम कौल भी साक्षात् शिव है । इसलिये उसकी यत्नपूर्वक अर्चना करे ॥ ३७ ॥

**स धन्यः खलु लोकेषु पुरुषः क्षीणकल्मषः ।**
**यत्समीपं समायान्ति कुलाचार्याश्च साधकाः ॥ ३८ ॥**

इस लोक में वह पुरुष धन्य है; वही अत्यन्त पुण्यशाली है, जिसके समीप कुलाचार्य अथवा कुलसाधक आते-जाते रहते हैं ॥ ३८ ॥

**अथ कौलान् समानीय शक्तीश्चैव विशेषतः ।**
**स्वशक्तिं वीरशक्तिं वा दीक्षितां गृहिणीमथ ॥ ३९ ॥**

**पाययित्वा पिबेद् द्रव्यमिति शास्त्रस्य निर्णयः ।**
**अनिवेद्य तु यः शक्तौ कुलद्रव्यं निषेवते ॥ ४० ॥**
**पूजा च विफला तस्य देवता न प्रसीदति ।**

कौलों को तथा विशेष रूप से शक्तियों (युवती) को अपनी शक्ति को अथवा वीरशक्तियों को अथवा कौल सम्प्रदाय से दीक्षित स्त्री को मद्य द्रव्य पिला कर तब स्वयं अपने पान करे ऐसा शास्त्रों का निश्चय है । जो कुलद्रव्यों का शक्तियों के पान कराये बिना कुलद्रव्य का सेवन करता है, उसकी सारी पूजा निष्फल है । देवता उसके ऊपर प्रसन्न नहीं होते ॥ ३९-४० ॥

**विना यन्त्रेण या पूजा विना मांसेन तर्पणम् ॥ ४१ ॥**
**विना शक्त्या तु यत्पानं तत्सर्वं निष्फलं भवेत् ।**
**आहूतो यो निवर्तेत अनाहूतोऽपि यो विशेत् ॥ ४२ ॥**
**चक्रमध्ये स पापी स्यात् सर्वधर्मबहिष्कृतः ।**
**तिरश्चां योनिमालम्ब्य नरकान् प्रतिपद्यते ॥ ४३ ॥**

यन्त्र के बिना की गई पूजा, मांस के बिना किया गया तर्पण और शक्ति के बिना किया गया स्वयं मद्यपान वह सब निष्फल होता है । जो इस चक्र कार्य में बुलाये जाने पर भी लौट जाता है अथवा जो बिना बुलाये वहाँ प्रविष्ट हो जाता है, वह पापी होता है और समस्त धर्म से बहिष्कृत हो जाता है । वह पशु पक्षी की योनि में जन्म लेकर नरक में जाता है ॥ ४१-४३ ॥

**चक्रविधिः**

**पूजास्थाने प्रयत्नेन आसनानि प्रदापयेत् ।**
**ततः कौलाः स्त्रियः सर्वा प्रक्षाल्य पाणिपादकम् ॥ ४४ ॥**
**प्रणम्य प्रविशेच्चक्रं मुद्राभिः पञ्चसञ्ज्ञकैः ।**
**स्त्रीणामन्यतमं स्थानं पुंसामन्यतमं पृथक् ॥ ४५ ॥**

पूजा स्थान पर प्रयत्नपूर्वक सभी को बैठने का स्थान देना चाहिए । फिर कौलिकगण और सभी स्त्रियाँ हाथ पैर धोकर वहाँ बैठें । चक्र मे प्रवेश करने वाले कौलिक को प्रणाम कर तथा पञ्चमुद्रा प्रदर्शित कर उसमें प्रवेश करना चाहिए । वहाँ स्त्री के लिए अन्य स्थान तथा कौलिक पुरुषों के लिये अन्य योग्य स्थान निर्मित होने चाहिये ॥ ४४-४५ ॥

**अथवा मिथुनं कृत्वा क्रमात् समुपवेशयेत् ।**
**पङ्क्त्याकारेण वा सम्यक् चक्राकारेण वाऽथवा ॥ ४६ ॥**

अथवा स्त्री-पुरुष का जोड़ा बनाकर क्रमशः बैठावे, अथवा पंक्ति के आकार

में, अथवा चक्र के समान गोलाकार रूप में बैठावे ॥ ४६ ॥

**चक्रमध्ये तु मूढात्मा जातिभेदं करोति यः ।**
**तं भक्षयन्ति योगिन्यस्तं शपेच्चण्डिका सदा ॥ ४७ ॥**

जो मूर्ख चक्र के मध्य में जाति भेदकर के बैठाता है उसे योगिनियाँ भक्षण कर जाती हैं । चण्डिका का शाप तो लगता ही है ॥ ४७ ॥

**चक्रमध्ये जातिभेदनिषेधः**

**जातिभेदो न चक्रेऽस्मिन् सर्वे शिवसमाः स्मृताः ।**
**प्रवृत्ते भैरवीचक्रे सर्वे वर्णा द्विजातयः ॥ ४८ ॥**

साधक इस चक्र के मध्य में जाति भेद न करे क्योंकि सभी शिव के समान हैं । भैरवी चक्र के प्रवेश काल में सभी वर्ण द्विजाति हो जाते हैं; कोई अछूत नहीं होता है ॥ ४८ ॥

**निवृत्ते भैरवीचक्रे सर्वे वर्णाः पृथक् पृथक् ।**
**रहस्यमार्गनिरता ये ये वर्णा भवन्ति हि ॥ ४९ ॥**
**ते ते विप्राः सर्वथैव सत्यं सत्यं न संशयः ।**
**स्वर्गादिपुण्यलोकेषु देवादन्यो यथा न हि ॥ ५० ॥**
**तथैव चक्रमध्ये तु देवाः सर्वे हि मानवाः ।**
**वेदेऽपि स्थितमेवं हि सर्वं ब्रह्मेति चाब्रवीत् ॥ ५१ ॥**

भैरवी चक्र के निवृत्त हो जाने पर सभी वर्ण पृथक्-पृथक् हो जाते हैं । जो-जो वर्ण रहस्य (कौल) मार्ग के अनुगामी हैं वे सभी विप्र हैं; यह बात सत्य सत्य है; इसमें संशय नहीं । जिस प्रकार स्वर्गादि पुण्य लोक में केवल देवता मात्र का निवास है। उसी प्रकार चक्र के मध्य में सभी मनुष्य देवता है । वेद में भी 'सर्वंखल्विदं ब्रह्म' ऐसा कहा गया है ॥ ४९-५१ ॥

**बहुनात्र किमुक्तेन चक्रमध्ये तु साधकाः ।**
**पुरुषाः शिवरूपाश्च देवीरूपाः स्त्रियः सदा ॥ ५२ ॥**

इस विषय में बहुत कहने से क्या ? चक्र के मध्य में रहने वाले सभी साधक शिव स्वरूप हैं और स्त्रियां देवी स्वरूपा हैं ॥ ५२ ॥

**शिवशक्तिधिया सर्वाश्चक्रमध्ये समर्चयेत् ।**
**संस्काराज्ज्येष्ठक्रमतो ललाटे गन्धचन्दनैः ॥ ५३ ॥**
**शक्तीनां साधकानाञ्च तिलकञ्च सहाक्षतम् ।**
**कृत्वा विलेपनं माल्यं प्रदद्यात् साधकोत्तमः ॥ ५४ ॥**

चक्र के मध्य में समाविष्ट सभी लोगों को शिव और शक्ति स्वरूप समझकर अर्चना करे । इसमें संस्कार के अनुसार ज्येष्ठ और कनिष्ठ का विचार करना चाहिये । जिसका पहले संस्कार हुआ है वह ज्येष्ठ और जिसका बाद में संस्कार हुआ है उसे कनिष्ठ समझना चाहिये । पुरुष साधक के ललाट में गन्धयुक्त चन्दन लगावे और स्त्री साधक के ललाट में अक्षत सहित तिलक लगावे । फिर उत्तम साधक इत्रादि का विलेपन कर माला पहनावे ॥ ५३-५४ ॥

**अलिपानविधिः**

**न स्थूलं न हि सूक्ष्मञ्च पात्रं कृत्वा मनोरमम् ।**
**नयनाग्निबाणसंख्यातैः कर्षन्तु साधकेन च ॥ ५५ ॥**
**हेतुपानं प्रकर्तव्यमित्युक्तं कुलसाधने ।**
**इत्यप्यधिकपानं तु न कर्त्तव्यं तु साधकैः ॥ ५६ ॥**

मद्य परोसने का पात्र बहुत मोटा अथवा बहुत पतला नहीं होना चाहिये । उसे सुन्दर अवश्य होना चाहिये । साधकों को दो, तीन, अथवा पाँच कर्ष (=पसर) परिमाण में मद्य पान करना चाहिये । साधक को इससे अधिक मात्रा में मद्य का पान नहीं करना चाहिये ॥ ५५-५६ ॥

**कराभ्यां पात्रमुद्धृत्य द्वितीयञ्च यथाक्रमात् ।**
**ततः श्रीगुरुपादाय साक्षात् परशिवाय च ॥ ५७ ॥**
**समांसं देवताबुद्ध्या समर्पयेद्यथाक्रमात् ।**
**दत्त्वामृतरसं पूर्णं गुरवे तदनन्तरम् ॥ ५८ ॥**
**योषिद्भ्यस्त्ववशेषं तु वीरेभ्यश्च ततः परम् ।**
**कुलजाय कुलीनाय कुलभक्ताय दापयेत् ॥ ५९ ॥**
**गुरुभ्यो गुरुपात्रञ्च शक्तिभ्यः शक्तिपात्रकम् ।**
**वीरेभ्यो वीरपात्रञ्च भोगपात्रं स्वयं पिबेत् ॥ ६० ॥**

हाथ से पात्र उठाकर मांस सहित मद्य को श्रीगुरु के चरण कमलों में तथा सदाशिव को क्रमानुसार समर्पण करे । सर्वप्रथम उस अमृतमय रस को गुरु के लिये देकर उसके बाद स्त्रियों को देवे । तदनन्तर सम्पूर्ण वीर साधकों को देवे । फिर कुल युक्त एवं कुलीन तथा कुलभक्तों को देवे । गुरु को गुरु के लिये समर्पित पात्र और शक्ति को शक्ति के लिए समर्पित पात्र एवं वीर साधकों को वीर के लिए देय पात्र को दे तथा भोग पात्र स्वयं पान करे ॥ ५७-६० ॥

**साक्षाद्यदि गुरुर्न स्यात्तदा तोये विसर्जयेत् ।**
**सुधाबुद्ध्या ततः सर्वे गृहीत्वा पात्रमुत्तमम् ॥ ६१ ॥**

ध्यानं कुर्यात् सुधादेव्या यथाशास्त्रप्रमाणतः ।

यदि साक्षात् गुरु न प्राप्त हो, तो उनका भाग जल में छोड़ देवे । फिर सभी कौल अमृत बुद्धि से उत्तम पात्र को लेकर शास्त्रानुसार उस मद्य में सुधा बुद्धि से इस प्रकार ध्यान करे ॥ ६१-६२ ॥

सुधादेवीध्यानम्

समुद्रे मथ्यमाने तु क्षीराब्धौ सागरोत्तमे ॥ ६२ ॥
तत्रोत्पन्नां सुधां देवीं कन्यकारूपधारिणीम् ।
गोमूत्रसदृशाकारां फेनामृतसमुद्भवाम् ॥ ६३ ॥
अष्टादशभुजैर्युक्तां नीरजायतलोचनाम् ।
आनन्दशिखरे जात आनन्दश्च महेश्वरः ॥ ६४ ॥
तयोर्योगाद् भवेद् ब्रह्मा विष्णुश्च शिव एव च ।
तस्मादिमां सुरादेवीं पूर्णोऽहं तां भजाम्यहम् ॥ ६५ ॥

क्षीर समुद्र के मन्थन के समय, कन्या रूप धारण कर यह सुधा उत्पन्न हुई है, जिनका आकार गोमूत्र के समान है और जो फेनामृत से उत्पन्न हुई है । जिनके नेत्र कमल के सदृश है और अट्ठारह भुजायें हैं । आनन्द शिखर पर आनन्द स्वरूप भगवान् महेश्वर उत्पन्न हुये हैं । उन दोनों के संयोग से ब्रह्मा, विष्णु एवं शिव की उत्पत्ति हुई है । इस कारण पूर्ण स्वरूप हुआ मैं उस सुधा देवी की सेवा करता हूँ ॥ ६२-६५ ॥

एवं ध्यात्वा मूलमन्त्रं सप्तवारं जपेत्ततः ।
तस्योपरि ततो वीरः पञ्च मुद्राः प्रदर्शयेत् ॥ ६६ ॥
धेनुयोनिं ततः पश्चाद्दर्शयेच्च पुनः पुनः ।
तालत्रयछोटिकाभिः कुर्वीत दिक्षु बन्धनम् ॥ ६७ ॥

इस प्रकार सुरा का ध्यान कर साधक मूल मन्त्र का सात बार जप करे । इसके बाद उस सुरा पर वीर साधक पञ्चमुद्रा प्रदर्शित करे । सबके बाद बारम्बार धेनु मुद्रा तथा योनि मुद्रा प्रदर्शित करे । फिर तीन बार ताली बजाकर चुटकी से दिग्बन्धन करे ॥ ६६-६७ ॥

पूर्ववत्तर्पयेत् मूर्ध्नि आनन्दभैरवं तथा ।
आनन्दभैरवीं देवीं गुरुपङ्क्तिं प्रयत्नतः ॥ ६८ ॥
इष्टदेवं रश्मिवृन्दं गणेशं क्षेत्रपालकम् ।
वटुकं भैरवञ्चैव योगिनीं डाकिनीं तथा ॥ ६९ ॥
महाभूतान् विघ्नदांश्च तर्पयेच्च यथाक्रमात् ।

**पूर्णाभिषेकहीनानां पाने नाधिकारः**

**अयष्ट्वा भैरवं देवमकृत्वा गुरुतर्पणम् ॥ ७० ॥**
**पशुपानविधौ पीत्वा वीरोऽपि नरकं व्रजेत् ।**
**गुरुपङ्क्तीरसन्तर्प्यरश्मिवृन्दं तथैव च ॥ ७१ ॥**
**यः पिबेत् कौलिको द्रव्यं तस्य पानं तु पाशवम्।**

फिर पूर्ववत् आनन्दभैरव एवं आनन्दभैरवी तथा गुरुपंक्ति के शिर पर तर्पण करे, फिर इष्टदेवी, रश्मिवृन्द, गणेश, क्षेत्रपाल, बटुक भैरव, योगिनियों एवं डाकिनियों महाभूतों तथा अन्य विघ्नकारी राक्षसादिकों का क्रमशः तर्पण करे । भैरव की पूजा किये बिना तथा गुरुओं के तर्पण किये बिना पशुपान विधि में सुधा पानकर वीर मार्गानुगामी भी नरक प्राप्त करता है । इसी प्रकार गुरुपंक्ति तथा रश्मिवृन्द का बिना तर्पण किये जो कौलिक मद्य पी लेता है उसका पान पशु के समान हो जाता है ॥ ६८-७२ ॥

**कौलज्ञानं विना योऽपि तद्द्रव्यं भौक्तुमिच्छति ॥ ७२ ॥**
**स महापातकी भूयात् सर्वधर्मबहिष्कृतः ।**
**सेवेत मद्यमांसानि भ्रष्टश्च पातकी भवेत् ॥ ७३ ॥**

जो कौलशास्त्र के ज्ञान के बिना उन द्रव्यों का भोजन करना चाहता है, अथवा मद्य-मांस का सेवन करता है, वह भ्रष्ट तथा महापातकी एवं सर्वधर्म बहिष्कृत होता है ॥ ७२-७३ ॥

**मन्त्रार्थस्मरणार्थं तु मनसः स्थैर्यहेतवे ।**
**भेदपाशविनिर्मुक्तो मद्यपानं समाचरेत् ॥ ७४ ॥**

मन्त्र के अर्थ का स्मरण मन की स्थिरता के लिये बतलाया गया है । अतः योगी साधक भेदपाश से विनिर्मुक्त होकर सब को अभेद दृष्टि से देखते हुये मद्य पान करे ॥ ७४ ॥

**सेवेत यः सुखार्थाय मद्यादीनि स पातकी ।**
**पाशयेद्देवताप्रीत्यै तत्त्वमांसानि साधकः ॥ ७५ ॥**

जो अपने आनन्द के लिये मद्य का सेवन करता है; वह पापी है । इसलिये साधक तत्त्व और मांस का सेवन देवता की प्रीति के लिये करे ॥ ७५ ॥

**पञ्चमुद्रां निषेवेत अन्यथा पातकी भवेत् ।**
**यागकालं विनाऽन्यत्र दूषणं जायते सदा ॥ ७६ ॥**

यागकाल में पञ्चमुद्रा प्रदर्शित करनी चाहिये अन्यथा पाप लगता है ।

यागकाल से अन्यत्र पञ्चमुद्रा प्रदर्शित करने से दोष लगता है ॥ ७६ ॥

**यः शास्त्रविधिमुत्सृज्य वर्तते कामचारतः ।**
**न स सिद्धिमवाप्नोति परत्र न परां गतिम् ॥ ७७ ॥**

जो शास्त्र की मर्यादा त्यागकर मनमानी करता है उसे सिद्धि प्राप्त नहीं होती? किं बहुना परलोक में गति की प्राप्ति तो सर्वथा दूर है ॥ ७७ ॥

**स्वेच्छया वर्तमानो यो दीक्षासंस्कारवर्जितः ।**
**न तस्य सद्गतिः काऽपि तपसा सुकृतादिभिः ॥ ७८ ॥**

जो दीक्षासंस्कार से रहित होकर मनमानी आचरण करता है उसकी तपस्या से तथा अनेक पुण्यों से भी सद्गति नहीं होती ॥ ७८ ॥

**पूर्णाभिषेकयुक्तानां पानमत्यन्तमिष्यते ।**
**पूर्णाभिषेकहीनानां पानमत्यन्तदुर्गतिः ॥ ७९ ॥**

जिनका पुण्याभिषेक हो गया है उन्हें पान अवश्य करना चाहिये किन्तु पुण्याभिषेक विहीन के लिये वह पान दुर्गति प्रदान करता है ॥ ७९ ॥

**अकृत्वा कौलिकाचारमयष्ट्वा गुरुपादुकाम् ।**
**येऽस्मिन् चक्रे प्रवर्तन्ते तेषां हिंसन्ति भैरवाः ॥ ८० ॥**

कौलिकाचार का सम्पादन किये बिना तथा गुरुपादुका का पूजन किये बिना जो इस चक्र में सम्मिलित होता है भैरवगण उसकी हिंसा कर देते हैं ॥ ८० ॥

**अदीक्षितैरनाचारैर्मुद्रामन्त्रविवर्जितैः ।**
**जपपूजां विना नैव न कार्यं द्रव्यभक्षणम् ॥ ८१ ॥**

बिना दीक्षा लिये, आचाररहित मुद्रा तथा मन्त्र से विवर्जित एवं जप पूजा न करने वालों को इन द्रव्यों का भक्षण नहीं करना चाहिये ॥ ८१ ॥

**भक्षणान्नरकं याति निष्कृतिर्नैव जायते ।**
**मन्त्रसंस्कारशुद्धात्मा अलिपानं समाचरेत् ॥ ८२ ॥**

उसके बिना जो पञ्चद्रव्य का भक्षण करता है उसे नरक की प्राप्ति होती है और ऐसे का कोई प्रायश्चित्त नहीं है । अतः मन्त्र संस्कारों द्वारा आत्मा को शुद्ध करने वालों को मद्यपान करना चाहिये ॥ ८२ ॥

**जायते देवताभावो भवबन्धविमोचकः ।**
**विचारयेत्ततो वीरः सत्तर्केण विशेषतः ॥ ८३ ॥**

आत्म शुद्धि से युक्त मद्यपान करने से साधक देवताभाव प्राप्त कर लेते हैं;

जिससे संसार बन्धन कट जाता है । इस कारण वीर साधक उत्तम तर्क से इस सिद्धान्त पर विचार करे ॥ ८३ ॥

**धर्मशास्त्रोक्तपाननिषेधविचारः**

**सिद्धान्नं भुञ्जते विप्राश्चूर्णं शम्बूकसम्भवम् ।**
**काञ्जिकं कासमर्दञ्च तथैव च शिवाघृतम् ॥ ८४ ॥**
**एतेषु यदि न दोषस्तदा सर्वं न दोषभाक् ।**
**सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत् ॥ ८५ ॥**
**इति मन्वादिशास्त्रेषु निषेधः परिनिश्चितः ।**
**मोहादज्ञानतः पीत्वा प्रायश्चित्तं विधीयते ॥ ८६ ॥**

ब्राह्मण लोग यदि सिद्धान्न एवं शूद्र द्वारा पीसे गये आँटे को खा सकते हैं और काञ्जिक, कासमर्द (), गाय का घृत यदि खा सकते हैं तथा यदि इसमें दोष नहीं मानते तो सब कुछ खा लेने में कोई दोष नहीं । जो यह कहा गया है कि 'ब्राह्मण मोहवश सुरा पानकर अग्निवर्णा पिघला हुआ लोहे की सुरा पीवे' इस प्रकार जो मद्यपान का निषेध मन्वादि शास्त्रों में निश्चय किया है वहाँ अथवा अज्ञानवश पी लेने पर प्रायश्चित्त की व्यवस्था कही गई है ॥ ८४-८६ ॥

**यत्पाने दूषणं प्रोक्तं प्रायश्चित्तं तदैव हि ।**
**देवान् पितॄन् समभ्यर्च्य वेदशास्त्रोक्तवर्त्मना ॥ ८७ ॥**
**ज्ञानतो भैरवीचक्रे ज्ञानिनां नैव दूषणम् ।**
**गुरुं स्मरन् पिबन्मद्यं खादन्मांसं न दोषभाक् ॥ ८८ ॥**

यहाँ स्वतन्त्र रूप से मद्यपान में पाप होने के कारण प्रायश्चित्त कहा गया है । किन्तु ज्ञानियों के लिये देवता और पितरों की शास्त्र विधि के अनुसार अर्चना कर भैरवी चक्र में ज्ञानपूर्वक मद्यपान करने पर कोई दोष नहीं होता । गुरुओं का स्मरण कर मद्यपान तथा मांस खाने में कोई दोष नहीं होता ॥ ८७-८८ ॥

**न मांसभक्षणे दोषो न मद्ये न च मैथुने ।**
**यथा क्रतुषु विप्राणां सोमपानं विधीयते ॥ ८९ ॥**

जिस प्रकार यज्ञ-यागादि कार्यों में सोमपान करने से दीक्षित विप्रों को कोई दोष नहीं लगता उसी प्रकार दीक्षित कौलिक को मांस भक्षण एवं मद्यपान और मैथुन में कोई दोष नहीं होता ॥ ८९ ॥

**मद्यपानं तथा कार्यं समये भोगमोक्षदम् ।**
**फलार्थिनामहङ्कारवतां दूषणमेव हि ॥ ९० ॥**

यज्ञादि में विधिपूर्वक किया गया मद्यपान भोग और मोक्ष प्रदान करता है, किन्तु फलेच्छया अहङ्कारवादियों के लिये तो वह दूषण ही है ॥ ९० ॥

**निरहङ्कारिणाञ्चैव न निषेधो न वा विधिः ।**
**पानेभ्रान्तिर्भवेद् यस्य घृणा स्याद्रक्तरेतसोः ॥ ९१ ॥**
**शुचौ चाऽशुद्धताभ्रान्तिः पापशङ्का च मैथुने ।**
**स भ्रष्टः पूजयेच्चण्डीं देवीमन्त्रं कथं जपेत् ॥ ९२ ॥**

जिनमें अहङ्कार का सर्वथा अभाव है, उनके लिये न कोई निषेध है और न कोई विधि है । जिसे रक्त (रज) एवं रेतः (बीज) पान में घृणा एवं भ्रान्ति हो, इसी प्रकार मैथुन में पाप की शङ्का हो, इस प्रकार के शुद्ध पदार्थों में अशुद्धता की भ्रान्ति वाला पुरुष सर्वथा भ्रष्ट है । वह देवी मन्त्र का जप भला किस प्रकार कर सकता है? ॥ ९१-९२ ॥

**रोगी दुःखी भवेत् सोऽपि रौरवं नरकं व्रजेत् ।**
**तस्मादद्वैतभावेन साधकः पञ्चमं भजेत् ॥ ९३ ॥**

ऐसा सर्वथा भ्रष्ट पुरुष सर्वदा रोगी एवं दुःखी तो होता ही है उसे रौरव नरक की प्राप्ति भी होती है । इसलिये वीर साधक अद्वैतभाव से पञ्चमकारादि द्रव्यों का सेवन करे ॥ ९३ ॥

### चक्रानुष्ठानम्

**पात्रं ब्रह्मा सुरा विष्णू रसादो रुद्र एव च ।**
**आनन्दः शेखरः प्रोक्त आनन्दस्तु सदाशिवः ॥ ९४ ॥**
**मद्यं तु भैरवो देवो मदः शक्तिः समीरिता ।**
**अहो भुक्तञ्च मद्यं हि मोहयेत् त्रिदशानपि ॥ ९५ ॥**

पात्र को ब्रह्मा, सुरा को विष्णु, रसपान करने वाला रुद्र आनन्द शेखर एवं सदाशिव है । मद्य साक्षात् भैरव उसका मद (नशा) शक्ति है । अहा ! जिसने मद्य पी लिया वह देवताओं को भी मोहित कर लेता है ॥ ९४-९५ ॥

### सुरा शक्तिः शिवो मांसं

**सुरा शक्तिः शिवो मांसं तद्भोक्ता भैरवः स्वयम् ।**
**तयोरैक्यसमुत्पन्नमानन्दं मोक्ष उच्यते ॥ ९६ ॥**

अथवा सुरा स्वयं शक्ति है, शिव मांस है, उसके भोक्ता स्वयं भैरव है, उन दोनों के संयोग से उत्पन्न हुआ आनन्द मोक्ष कहा जाता है ॥ ९६ ॥

**आनन्दं ब्रह्मणो रूपं तच्च देहे प्रतिष्ठितम् ।**

**तस्याभिव्यञ्जकं मद्यं योगिभिस्तेन पीयते ॥ ९७ ॥**

आनन्द ही ब्रह्म का स्वरूप है, जो देह में प्रतिष्ठित है। उस आनन्द का अभिव्यञ्जक मद्य है इस कारण योगी लोग सदैव उसका पान करते हैं ॥ ९७ ॥

**एवं विचिन्त्य मतिमान् तत्त्वशोधनमाचरेत् ।**
**पूर्ववद्विधिना वीरः पात्रस्य वन्दनं चरेत् ॥ ९८ ॥**

बुद्धिमान् पुरुष ऐसा सोचकर तत्वशोधन करे। वीर साधक सर्वप्रथम पात्र की इस प्रकार वन्दना करे ॥ ९८ ॥

**प्रथमपात्रवन्दनमन्त्रः**

**श्रीमद्भैरवशेखरप्रविलसच्चन्द्रामृताप्लावितं**
**क्षेत्राधीश्वरयोगिनीगणमहासिद्धैः समासेवितम् ।**
**आनन्दार्णवकं महात्मकमिदं साक्षात्त्रिखण्डामृतं**
**वन्दे श्रीप्रथमं कराम्बुजगतं पात्रं विशुद्धिप्रदम् ॥ ९९ ॥**

**प्रथम पात्र वन्दना**—श्री महाभैरव के शिखर (मस्तक) से झरते हुये चन्द्रामृत से परिपूर्ण, क्षेत्रपाल तथा योगिनी गणों से सेवित, अत्यन्त महान् आनन्द का समुद्र, साक्षात् त्रिखण्डामृत से युक्त एवं हाथ में स्थित अत्यन्त विशुद्धि प्रदान करने वाले इस पात्र की मैं सर्वप्रथम वन्दना करता हूँ ॥ ९९ ॥

विमर्श—पञ्च पात्रवन्दना सर्वोल्लास तन्त्र में इसी प्रकार है (द्र० ३५.१७)।

**वन्दयित्वा ततः पात्रं पठेद् भक्तिपरायणः ।**
**जानताऽजानता वापि यन्मया क्रियते शिवे ॥ १०० ॥**
**तव कृत्यमिदं सर्वमिति मत्वा क्षमस्व मे ।**
**इति स्तुत्वा महादेवीमन्योन्य वन्दनञ्चरेत् ॥ १०१ ॥**

इस प्रकार पात्र की वन्दना कर भक्तियुक्त साधक 'जानताजानतावापि......... क्षमस्व मे' पर्यन्त मन्त्र पढ़े। इस प्रकार महादेवी की वन्दना कर एक-दूसरे कौलों की परस्पर वन्दना करे ॥ १००-१०१ ॥

**अनुज्ञां पुरतो लब्ध्वा गृह्णामीति स्वयं वदेत् ।**
**जुषस्वेत्यनुज्ञातो गुरुणा वा कुलीनकैः ॥ १०२ ॥**

फिर भगवती की सर्वप्रथम आज्ञा लेकर 'गृह्णामि' यह वाक्य स्वयं कहे। तदनन्तर गुरु के द्वारा अथवा कुलाचार्य के द्वारा जुषस्व (पान करें) ऐसी आज्ञा प्राप्त करे ॥ १०२ ॥

चक्रानुष्ठानम्

गृह्णीयाच्च स्वयं सिद्धो बद्धपद्मासनः सुधीः ।
सव्येनोद्धृत्य पात्रञ्च मुद्रां कृत्वाऽपसव्यतः ॥१०३ ॥
विलासाद्धनभोगेन न कुर्याद्द्रव्यभक्षणम् ।
नोद्धरेदेकहस्तेन न पिबेदेकपाणिना ॥ १०४ ॥

तदनन्तर सुधी साधक पद्मासन बाँधकर स्वयं सिद्ध बन कर अपसव्य मुद्रा प्रदर्शित करते हुये बाएँ हाथ में पात्र लेकर दाएँ हाथ से उसमें मद्य उड़ेले । विलास प्रदर्शित करते हुये द्रव्य भक्षण न करे । एक हाथ से मद्य न उड़ेले और न एक हाथ से उसका पान ही करे ॥ १०३-१०४ ॥

ततः सञ्चिन्तयेद् देवीं प्रकृतिं परमां कलाम् ।
आत्ममूलत्रिकोणस्थे कोटिसूर्यसमप्रभे ॥ १०५ ॥
कुण्डलीशक्तिचिद्वह्नौ हुनेद् द्रव्यं समन्त्रकम् ।
सशब्दं न पिबेद्द्रव्यं न बिन्दुं पातयेदधः ॥ १०६ ॥

मद्य उडेल लेने के बाद परम कलाभूता प्रकृति देवी का ध्यान करे । करोड़ों सूर्य के समान प्रभा वाले आत्ममूल त्रिकोण में रहने वाली कुण्डली शक्ति रूप चिद् अग्नि में मन्त्रपूर्वक द्रव्य का होम करे । मुख से शब्द करते हुये द्रव्य पान न करे । उसका एक बिन्दु भी नीचे न गिरावे ॥ १०५-१०६ ॥

सशब्दं यो मुखं कुर्यात् कुलदेव्यास्तु तर्पणे ।
रौरवं नरकं याति यावदाहुतसंप्लवम् ॥ १०७ ॥

जो कुलदेवी के तर्पण के समय मुख से शब्द करता है; जब तक प्रलय नहीं होता तब तक वह रौरव नरक में पड़ता है ॥ १०७ ॥

विना चर्व्वेण यत्पानं केवलं विषवर्द्धनम् ।
तस्मात् प्रचर्वयेच्चर्व्यं यथाक्रमविधानतः ॥ १०८ ॥

चबाने वाले पदार्थ को खाये बिना जो मद्यपान किया जाता है, वह विष ही बढ़ाता है । इस कारण विधानपूर्वक यथेच्छ चर्वण कर मद्यपान करे ॥ १०८ ॥

एकासने निविष्टा ये भुञ्जानाश्चैकभाजने ।
एकपात्रे पिबेद्द्रव्यं ते यान्ति नरकं किल ॥ १०९ ॥

जो एक आसन पर स्थित होकर एक ही पात्र में भोजन करते हैं, अथवा एक पात्र में मद्यपान करते हैं, वे नरक के भागी होते हैं ॥ १०९ ॥

उच्छिष्टं न स्पृशेच्चक्रे कुलद्रव्याणि सर्वथा ।

**बहिः प्रक्षाल्य च करौ कुलद्रव्याणि दापयेत् ॥ ११० ॥**

साधक चक्र में उच्छिष्ट हाथ से कुलद्रव्य का स्पर्श न करे। बाहर हाथ धोकर तब कुलद्रव्य का परिवेषण करे ॥ ११० ॥

**नैकहस्तेन दातव्यं न मुद्रावर्जितं सदा।**
**निष्ठीवनं मलं मूत्रमधोवायुविसर्जनम् ॥ १११ ॥**

मुद्रारहित होकर एक हाथ से मद्य न देवे। उस समय थूकना, मलमूत्र तथा अधोवायु का त्याग न करे ॥ १११ ॥

**चक्रमध्ये तु यः कुर्यात् स भवेद्योगिनीपशुः।**
**परीहासं प्रलापञ्च वितण्डां बहुभाषणम् ॥ ११२ ॥**
**औदासीन्यं भयं क्रोधं चक्रमध्ये विवर्जयेत्।**
**न पादाभ्यां स्पृशेत् पात्रमधमाङ्गेन सर्वथा ॥ ११३ ॥**

चक्र के मध्य में जो ऐसा करता है वह योगिनियों का पशु बनता है। इसलिये परीहास, प्रलाप, वितण्डा, बकवाद, उदासीनता, भय, क्रोध, चक्र के मध्य में वर्जित करे। पैर से अथवा किसी निचले शरीर भाग से पात्र का कदापि स्पर्श न करे ॥ ११२-११३ ॥

**न पात्रं चालयेत् स्थानान्न कुर्यात् पात्रसङ्करम्।**
**सशब्दं नोद्धरेत् पात्रं तथैव च न पूरयेत् ॥ ११४ ॥**

एक स्थान पर स्थित पात्र का सञ्चालन न करे। न पात्रों को परसङ्कर (उच्छिष्ट) करे। मुख से शब्द करते हुये पात्र न उठावे और न ही उसे मद्य से पूर्ण करे ॥ ११४ ॥

**नान्योन्यं ताडयेत् पात्रं न पात्रमानयेदधः।**
**साधारं नोद्धरेत् पात्रमनाधारे न निःक्षिपेत् ॥ ११५ ॥**
**रिक्तपात्रं न कुर्वीत न पात्रं भ्रामयेत् कदा।**
**न पात्रं लङ्घयेद्धीमान् उत्क्षिप्य न च पातयेत् ॥ ११६ ॥**
**समीनञ्च पुनः पात्रं प्रदद्याच्च यथाक्रमम्।**
**वन्दयेच्च पुनः पात्रं इमं मन्त्रं स्मरेद्बुधः ॥ ११७ ॥**

एक पात्र को दूसरे पात्र से ताड़ित न करे। पात्र नीचे न रखे, आधार पर रखे हुये पात्र को न उठावे और न उसे आधार से बाहर रखे। पात्र को रिक्त न रखे और उसे कदापि न घुमावे। बुद्धिमान् साधक पात्र का लङ्घन न करे और ऊपर उठाकर उसे न पटके। मद्य परोसने के बाद बारी-बारी से दूसरे पात्र में

मछली रख कर परोसे। फिर उसकी वन्दना करे और विद्वान् साधक इस मन्त्र का उच्चारण करे ॥ ११५-११७ ॥

द्वितीयपात्रवन्दनमन्त्रः

**ॐ हैमं मीनरसावहं दयितया दत्तञ्च पेयादिभिः**
**किञ्चिच्चञ्चलरक्तपङ्कजदृशा तस्यै समावेदितम् ।**
**वामे स्वादु विशुद्धिशुद्धिकरणं पाणौ निधायात्मके**
**वन्दे पात्रमहं द्वितीयमधुनाऽऽनन्दैकसम्वर्द्धनम् ॥ ११८ ॥**
**पूर्ववत्तर्पणं कृत्वा तृतीयञ्च समाचरेत् ।**
**मुद्रया सहितं धृत्वा वन्दयेत् पात्रमुत्तमम् ॥ ११९ ॥**

**द्वितीय पात्र बन्दना का मन्त्र**—किञ्चित् चञ्चल तथा रक्त कमल के समान नेत्रों वाली स्त्री ने भगवती देवी को प्रत्यर्पण कर, अपने बायें हाथ में रखकर, पेयादि से समलङ्कृत, अत्यन्त सुस्वादु मत्स्य का यह सरस पदार्थयुक्त पात्र, जो विशुद्ध को शुद्ध करने वाला है वह आप कौलिक साधक को दिया जा रहा है। अतः आनन्द बढ़ाने वाले इस द्वितीय पात्र की मैं वन्दना करता हूँ। पुनः उससे देवी का तर्पण कर तृतीय पात्र प्रदान करे। मुद्रा प्रदर्शित कर उस पात्र को रखकर उसकी बन्दना करे ॥ ११८-११९ ॥

तृतीयपात्रवन्दनमन्त्रः

**सर्वाम्नायकलाकलापकलितं कौतूहलद्योतकं**
**चन्द्रोपेन्द्रमहेन्द्रशम्भुवरुणब्रह्मादिभिः सेवितम् ।**
**ध्यातं देवगणैः परं मुनिगणैर्मोक्षार्थिभिः सर्वदा**
**वन्देपात्रमहं तृतीयमधुना स्वात्मावबोधक्षमम् ॥ १२० ॥**

**तृतीय पात्र बन्दना**—मैं आत्मबोध कराने में सर्वथा सक्षम इस तृतीय पात्र की वन्दना करता हूँ जो सभी आम्नाय के कला कलापों से मनोहर है, कौतूहल का द्योतक है, चन्द्र, विष्णु, महेन्द्र, शम्भु तथा वरुणादि से सुसेवित है और मोक्ष की इच्छा करने वाले समस्त मुनिगणों तथा देवगणों से ध्यातव्य है ॥ १२० ॥

**पूर्ववत्तर्पयित्वा तु चतुर्थं वन्दयेत्ततः ॥ १२१ ॥**

चतुर्थपात्रवन्दनमन्त्रः

**ॐ मद्यं मीनरसावहं हरिहरब्रह्मादिभिः पूरितं**
**मुद्रामैथुनधर्मकर्मनिरतं क्षाराम्लतिक्ताश्रयम् ।**
**आचार्याष्टकसिद्धिभैरवकलामांसेन संशोधितं**
**पायात् पञ्चमकारतत्त्वसहितं पात्रं चतुर्थं नमः ॥ १२२ ॥**

**चतुर्थ पात्र वन्दना**—उस पात्र से तर्पण कर पुनः चतुर्थ पात्र सामने रखकर वन्दना करे। पञ्चमकार तत्त्व सहित यह चतुर्थ पात्र हमारी रक्षा करे। इसे नमस्कार है। यह मीन के रस से युक्त मद्य है जिसे हरिहर, ब्रह्मादि देवों ने पूर्ण किया है। यह मुद्रा मैथुनादि धर्म कर्म में निरत (संयुक्त) रहता है। क्षार, अम्ल और तिक्त है आचार्याष्टक तथा सिद्ध भैरव के द्वारा कलमांस के द्वारा शुद्ध किया गया है ॥ १२१-१२२ ॥

**पूर्ववत्तर्पयित्वा तु पञ्चमं वन्दयेत्ततः ॥ १२३ ॥**

**पञ्चम पात्र वन्दना**—उससे भी पूर्ववत् तर्पण कर साधक पञ्चम पात्र की वन्दना करे ॥ १२३ ॥

**पञ्चमपात्रवन्दनमन्त्रः**

**आधारे भुजगाधिराजवलये पात्रं महीमण्डलं**
**मद्यं सप्तसमुद्रवारिपिशितं चाष्टौ च दिग्दन्तिनः ।**
**सोऽहं भैरवमर्चयन् प्रतिदिनं तारागणै रक्षितै**
**आदित्यप्रमुखैः सुरासुरगणैराज्ञाकरैः किङ्करैः ॥ १२४ ॥**

भुजगाधिराज भगवान् शेष के फणि मण्डल रूप आधार पर मही मण्डलरूप पात्र है। उसके चारो ओर रहने वाला सात समुद्रों का जल मद्य है और दिशाओं के गज मांस हैं। जिन भैरव के तारागण आदित्यादि प्रमुख देव तथा सुरासुरगण किङ्कर हैं, उनसे रहित रहकर मैं भैरव देव की पूजा करता हूँ ॥ १२४ ॥

**प्रपिबेत् तु ततः षष्ठं पात्रं सम्पूज्य मन्त्रवित् ॥ १२५ ॥**

इस प्रकार मद्यपान करे फिर मन्त्रवेत्ता साधक को षष्ठपात्र का पूजन करना चाहिए ॥ १२५ ॥

**षष्ठपात्रवन्दनमन्त्रः**

**ॐ रुद्रं चामरभद्रपीठपरमानन्दोदितं दीपनं**
**वामां राज्यमनोरमां शुभकरां सायुज्यसाम्राज्यकम् ।**
**नानाव्याधिभवान्धकूपहरणं जन्मान्तरं नाशनं**
**श्रीमत् सुन्दरितर्पणं हरिरसं पात्रञ्च षष्ठं भजे ॥ १२६ ॥**

**षष्ठ पात्र वन्दना**—मैं महाश्री से युक्त महासुन्दरी त्रिपुरा को तृप्त करने वाले हरिरस युक्त षष्ठ पात्र का भजन करता हूँ। जो श्री रुद्र को चामर भद्र (शक्ति) पीठ पर परमानन्द का उदय करने वाला है, प्रकाशयुक्त है, उनकी अत्यन्त सुन्दरी वामा जो सबकी कल्याणकारिणी है, उनसे युक्त रहकर साम्राज्य प्रदान करता है और अनेक प्रकार की व्याधि तथा संसार रूपी अन्धकूप का विनाशक तथा जन्मान्तर का भी नाशक है ॥ १२६ ॥

**पूर्ववत् तर्पणं कृत्वा सप्तमञ्च समर्चयेत् ॥ १२७ ॥**

पूर्ववत् तर्पण कर साधक सप्तम पात्र की अर्चना करे ॥ १२७ ॥

सप्तमपात्रवन्दनमन्त्रः

**ॐ जाग्रत्स्वप्नसुषुप्तितूर्यपरमं चैतन्यं साक्षिप्रदं**
**विद्युद्भास्करसन्निभं द्युतिधरं ज्योत्स्नाकलाव्यापितम् ।**
**इडापिङ्गलमध्यगा त्रिवलया स्यात्कुण्डली चोर्ध्वगा**
**पात्रं सप्तमपूरणेन परमानन्दाधिकं पातु माम् ॥ १२८ ॥**

जो जाग्रत्, स्वप्न, सुषुप्ति तथा तुरीयावस्था में परम चैतन्य एवं साक्षी रहने वाला है, बिजली के समान जाज्वल्यमान प्रकाश करने वाला, ज्योत्स्ना तथा समस्त कलाओं से व्याप्त है, जिसके मध्य में इष्ट पिङ्गला है जो तीन वृत्त में फैला है ऐसा ऊर्ध्वगामिनी कुण्डलिनी रूपी सत्पात्र सप्तम से पूर्ण होकर परमानन्द से भी अधिक होकर मेरी रक्षा करे ॥ १२८ ॥

**एभिः प्रबन्ध्य पात्राणि स्वयं साधकसत्तमः ।**
**लभेत सर्वकर्माणि देहान्ते भैरवो भवेत् ॥ १२९ ॥**
**पीत्वा सप्तमपात्रञ्च शान्तिस्तोत्रं पठेत्ततः ॥ १३० ॥**

साधक सत्तम इस प्रकार सातों पात्रों को बाँधकर अपना सारा मनोरथ पूर्ण करता है तथा शरीर छूट जाने पर भैरव हो जाता है । इस प्रकार सातो पात्र पानकर शान्ति स्तोत्र का पाठ करे ॥ १२९-१३० ॥

शान्तिस्तोत्रम्

**यस्यार्चनेन विधिना किमपीह लोके**
**धर्मप्रसिद्धमिति कामफलं प्रसूते ।**
**तं सन्ततं सकलसाधकचित्तवृत्तिं**
**चिन्तामणिं कुलगणाधिपतिं नमामि ॥ १३१ ॥**

**शान्तिस्तोत्र**—जिसका विधिपूर्वक किया गया अर्चन सिद्ध धर्म होने के कारण समस्त कामनायें पूर्ण करता है, समस्त साधकों की चित्तवृत्ति में सतत् विद्यमान रहने वाले चिन्तामणि स्वरूप गणाधिपति को मैं नमस्कार करता हूँ । अब बटुक की स्तुति करते हैं ॥ १३१ ॥

बटुकस्तुति

**रक्ताम्बरं ज्वलनपिङ्गजटाकलापं**
**भालावलीकुटिलचन्द्रधरं प्रचण्डम् ।**

बालार्कधातुकनकाचलधातुवर्णं
देवीसुतं वटुकनाथमहं नमामि ॥ १३२ ॥

**बटुकस्तुति**—रक्तवर्ण का वस्त्र धारण किये, देदीप्यमान, पीली-पीली जटा-कलाप वाले मस्तक पर द्वितीया का वक्र चन्द्र धारण किये हुये, अत्यन्त उग्र स्वरूप वाले, उदित सूर्य तथा सुवर्ण सदृश सुमेरु पर्वत के धातु के समान कान्ति वाले बटुकनाथ का मैं पूजन करता हूँ ॥ १३२ ॥

हरतु कुलगणेशो विघ्नसङ्घानशेषा-
नुदयतु कुलचर्या पूर्णतां साधकानाम् ।
पिबतु वटुकनाथः शोणितं निन्दकानां
दिशतु सकलकामान् कौलिकानां गणेशः ॥ १३३ ॥

कुलगणेश कौलिक सम्प्रदाय वालों के समस्त विघ्न को दूर करें । साधकों की कुलचर्या पूर्ण होकर उदीयमान रहे । कुल सम्प्रदाय की निन्दा करने वालों का रक्त श्री बटुकनाथ पान करें । श्री गणेश उन कौलिकों की सारी कामनाओं को पूर्ण करें ॥ १३३ ॥

धर्मो जयत्वखिललोकसुखावहोऽयं
नश्यत्वधर्ममखिलं बहुदुःखमूलम् ।
आशीर्वचांसि समन्त्वमृतोपमानि
शापाः पतन्तु समयद्विषि योगिनीनाम् ॥ १३४ ॥

सारे लोक को सुख प्रदान करने वाला धर्म विजय प्राप्त करे और समस्त दुःखों का मूलभूत अधर्म नष्ट हो जावे । योगिनियों का अमृत के समान आशीर्वाद कुलधर्म का पालन करने वालों को प्राप्त हो तथा उससे द्वेष करने वालों पर उनका शाप एक साथ गिरे ॥ १३४ ॥

याश्चक्रक्रमभूमिकावसतयो नाडीषु याः संस्थिताः
याः कायोद्गतरोमकूपनिलया याः संस्थिता धातुषु ।
उच्छ्वासोर्मिमरुत्तरङ्गनिलया निश्वासवाताश्च या-
स्ता देव्यो रिपुपक्षभक्षणपरास्तृप्यन्तु कौलार्चिताः ॥ १३५ ॥

जो चक्रक्रम की भूमि में निवास करने वाली हैं, जो शरीर की नाड़ियों में रहने वाली हैं, शरीर से निकलने वाले रोमकूपों में जिनका घर है, जो धातुओं में भी संस्थित हैं, निःश्वास रूप लहरों से वायु तरङ्ग ही जिनके गृह हैं, ऐसी ये सभी देवियाँ कौलों से पूजित एवं अर्चित होकर कौल साधक के शत्रुओं को खाकर तृप्त हो जावें ॥ १३५ ॥

**देहस्थाखिलदेवता गजमुखाः क्षेत्राधिपा भैरवा**
**योगिन्यो वटुकाश्च यक्षपितरो वेतालकाश्चेटकाः ।**
**अन्ये भूचराः खेचरा दिविचरा भूताः पिशाचा ग्रहा-**
**स्तृप्यन्तां कुलपुत्रकस्य पिबतः पानं सदीपं चरुम् ॥ १३६ ॥**

शरीर में रहने वाले समस्त देवगण, गणेश, क्षेत्रपाल, भैरव, योगिनियाँ, बटुक, यक्ष, पितृगण, बेताल एवं चेटक इनके अतिरिक्त भूचर, खेचर, स्वर्ग में विचरण करने वाले भूत, पिशाच तथा ग्रहगण इस कौलिक के द्वारा पान एवं सदीप चरु के भोजन से तृप्त हो जावें ॥ १३६ ॥

**सत्यञ्चेत् गुरुवाक्यमेव पितरौ देवाश्च चेत् योगिणो**
**प्रीता चेत् परदेवता यदि भवेद् वेदा प्रमाणं हि चेत् ।**
**शाक्तेयं यदि दर्शनं भवति चेत् आज्ञाऽप्यमोघाऽपि चेत्**
**सत्यञ्चापि च कौलधर्मपरमं स्यान्मे जयः सर्वदा ॥ १३७ ॥**

यदि गुरुजनों के वाक्य पितृगण, देवगण, योगिनीगण और परदेवता यदि प्रसन्न हों, किं बहुना यदि वेद का तथा शक्ति दर्शन का प्रामाण्य यदि सत्य हो तथा उनकी आज्ञा यदि कभी निष्फल न हो और यह कौलधर्म यदि सत्य हो, तो मेरी सर्वदा जय होवे ॥ १३७ ॥

**शिवाद्यवनिपर्यन्तं ब्रह्मादिस्तम्बसंयुतम् ।**
**कालाग्न्यादिशिवान्तञ्च जगद् यज्ञेन तृप्यतु ॥ १३८ ॥**

शिव से लेकर पृथ्वी पर्यन्त, ब्रह्मा से लेकर स्तम्ब (कीट विशेष) पर्यन्त, कालाग्नि से लेकर शिवा पर्यन्त, सारा जगत् कौल साधक के इस यज्ञ से तृप्त हो जावे ॥ १३८ ॥

**सम्पूजकानां परिपालकानां**
**जितेन्द्रियाणाञ्च तपोधनानाम् ।**
**देशस्य राष्ट्रस्य कुलस्य राज्ञः**
**करोतु शान्तिं भगवान् गणेशः ॥ १३९ ॥**

पूजा करने वाले, प्रजाओं का पालन करने वाले, जितेन्द्रिय, तपोधन, देश, राष्ट्र, कौलिक तथा राजा को भगवान् गणेश शान्ति प्रदान करें ॥ १३९ ॥

**शिवमस्तु सर्वजगतः परहितनिरता भवन्तु भूतगणाः ।**
**दोषाः प्रयान्तु शान्तिं सर्वजनाः सुखीभवन्तु ॥ १४० ॥**

सारे जगत् का कल्याण हो, जगत् के समस्त प्राणी परस्पर एक दूसरे का

हित करें। सभी दोष शान्त हो जावें तथा सभी लोग सुखी रहें ॥ १४० ॥

**नन्दन्तु कुलयोगिन्यो नन्दन्तु कुलपुत्रकाः ।**
**नन्दन्तु च कुलाचार्या ये चान्ये कुलपालकाः ॥ १४१ ॥**

कुलयोगिनियाँ प्रसन्न रहें। कुल सम्प्रदाय के अनुगामी प्रसन्न रहें। इसी प्रकार कुल सम्प्रदाय के आचार्य तथा कुलमार्ग के प्रतिपालक प्रसन्न रहें ॥ १४१ ॥

**नन्दन्तु साधकाः सर्वे विभीषन्तु च दूषकाः ।**
**अवस्था शाम्भवी नोऽस्तु प्रसनोऽस्तु गुरुःसदा ॥ १४२ ॥**

सभी साधक प्रसन्न रहें, कुलसम्प्रदाय को बुरा कहने वाले सर्वदा भययुक्त बने रहें। मेरी अवस्था सदाशिव के समान हो जावे तथा मेरे गुरु प्रसन्न रहें ॥ १४२ ॥

**अनेककोट्यः कुलयोगिनीना-**
**मन्तर्बहिः कौलिकचक्रसंस्थाः ।**
**निपीयमानेन परामृतेन**
**प्रीताः प्रसन्ना वरदा भवन्तु ॥ १४३ ॥**

**ये ये पापधियः सुदूषणरता मन्निन्दकाः पूजने**
**देवाचारविमर्दनष्टहृदया भ्रष्टाश्च ये साधकाः ।**
**दृष्ट्वा च क्रमपूर्वमर्चनविधौ ये कौलिका दूषका-**
**स्ते ते यान्तु विनाशमत्र समये श्रीभैरवस्याज्ञया ॥ १४४ ॥**

मनुष्यों के भीतर बाहर तथा कौलिक के चक्र में अनेक करोड़ की संख्या में रहने वाली योगिनियाँ इस परामृत के पान से प्रसन्न होकर वर प्रदान करें। जो-जो भी छिद्रान्वेषण करने वाले पापी मेरी पूजा की निन्दा करते हैं, देवाचार के निरन्तर उल्लङ्घन करते रहने के कारण जिनका हृदय नष्ट हो गया है और जो-जो भी भ्रष्ट साधक हैं; मेरी पूजा देखकर मेरे क्रमपूर्वक अर्चन में जो कौलिक दोष लगाते हैं; वे सभी महाभैरव की आज्ञा से विनष्ट हो जावें ॥ १४३-१४४ ॥

**साधकानाञ्च द्वेष्टारः सदैवाम्नाय दूषकाः ।**
**डाकिनीनां मुखे यान्तु तृप्तास्ते पिशितैः सदा ॥ १४५ ॥**

साधकों से द्वेष करने वाले, कौलमार्ग को दोष दृष्टि से देखने वाले—ये सभी डाकिनियों के मुख में जावें। उनके मांस से डाकिनियाँ तृप्त हो जावें ॥ १४५ ॥

**इति स्तोत्रं पठन् पानं कुर्यात् साधकसत्तमः ॥ १४६ ॥**

इन स्तोत्रों का पाठ करते हुये उत्तम साधक पान करे ॥ १४६ ॥

अष्टमपात्रवन्दनमन्त्रः

**ॐ मूढाज्ञानकदम्बकाननकठोराग्निस्वरूपां परां**
**ज्ञानध्वान्तसमस्तसंशयधिया पूर्णं सुधाधारया ।**
**भोगं मोक्षकरं सभावशकरं मूर्ध्नि ज्वलन्तीं परां**
**देवीं वक्षसि सञ्जपन्ननुदिनं पात्रं भजे चाष्टमम् ॥ १४७ ॥**

**अष्टमपात्र बन्दना**—मूढ़, अज्ञानरूप कदम्ब के वन को भस्म करने के लिये प्रचण्ड अग्नि स्वरूप तथा शिरः प्रदेश में देदीप्यमान भगवती परा का हृदय में निरन्तर ध्यान करते हुये प्रतिदिन मैं ज्ञान प्राप्ति के बाधक अज्ञान तथा समस्त संशयों का भेदन करने वाली सुधा धारा से पूर्ण, भोग, मोक्ष प्रदान करने वाले, सभा को वश में करने वाले इस अष्टम पात्र का सेवन करता हूँ ॥ १४७ ॥

**पूर्ववत्तर्पणं कृत्वा नवमञ्च प्रपूजयेत् ॥ १४८ ॥**

उससे भगवती का तर्पण कर नवम पात्र का पूजन करे ॥ १४८ ॥

नवमपात्रवन्दनमन्त्रः

**ॐ मन्ये ब्रह्ममयं समस्तजगतां सारं महत् शाश्वतं**
**दुर्ज्ञेयं भवभोगचञ्चलधिया स्थूलाकृतिं ध्यायताम् ।**
**अस्माकं द्रवरूपतां करुणया प्राप्तं तदेतद्द्भुतं**
**तत्पात्रं नवमं पिबेच्च नियतं भुक्तिञ्च मुक्तिप्रदम् ॥ १४९ ॥**

**नवम पात्र बन्दना**—मैं इसे समस्त जगत् के महान् सार स्वरूप अत्यन्त महान् ब्रह्ममय समझता हूँ । स्थूल आकृति का ध्यान करने वाले संसार के भोग में चञ्चल बुद्धि वालों के लिये यह सर्वथा दुर्ज्ञेय है । आश्चर्य की बात यह है कि वह परब्रह्म मेरे ऊपर करुणा कर मुझे द्रवरूप में प्राप्त हो गया है । इस नवम पात्र का जो भुक्ति और मुक्ति प्रदान करने वाला है मैं पान करता हूँ ॥ १४९ ॥

**सहस्रारे गुरुं ध्यायन् हृदि देवीं तथैव च ।**
**जिह्वाग्रे जपसाधनं शिवोऽहमिति चिन्तयन् ।**
**यथाविधिसमभ्यर्च्य जुहुयात् कुण्डलीमुखे ॥ १५० ॥**

सहस्रार में गुरु का ध्यान करते हुये हृदय में देवी का तथा जिह्वा के अग्रभाग में 'शिवोऽहम्' का चिन्तन करते हुये यथाविधि अर्चन कर कुण्डलिनी के मुख में हवन करे । अब दशम पात्र का पूजन कहते हैं ॥ १५० ॥

दशमपात्रवन्दनमन्त्रः

**ॐ वामे चन्द्रमुखी मुखे च मधुरं पात्रं कराम्भोरुहे**

मूर्ध्नि श्रीगुरुचिन्तनं भगवतीध्यानास्पदं मानसम् ।
जिह्वायां जपसाधनं परिणतं कौलक्रमाध्यासनं
तत्पात्रं दशमं पिबेच्च परमं भुक्तिञ्च मुक्तिप्रदम् ॥ १५१ ॥

**दशम पात्र वन्दना**—जिसके बामभाग में चन्द्रमुखी, मुख में माधुर्ययुक्त मद्य, हाथ में मद्यपात्र, मस्तक में गुरु का ध्यान और मन भगवती में ध्यानास्पद है, जिह्वा पर जप का साधन, जो कौलिकों के अभ्यास में परिणत हो चुका है, ऐसा मैं भोग तथा मोक्ष प्रदान करने वाले इस दशम पात्र को पीता हूँ ॥ १५१ ॥

नाहं कर्त्ता कारयिता न च कार्यं
नाहं भोक्ता भोजयिता न च भोज्यम् ।
नाहं दुःखी दुःखयिता न च दुःखं
सोऽहं प्रत्यक्चित्स्वरूपोऽहमात्मा ॥ १५२ ॥

मैं कर्त्ता नहीं हूँ, कराने वाला भी नहीं हूँ, इसी प्रकार मैं भोक्ता, भोजयिता तथा भोज्य भी नहीं हूँ, न मैं दुःखी हूँ, न दुःख देने वाला हूँ और न दुःख हूँ। मैं केवल प्रत्यक् चैतन्य स्वरूप आत्मा हूँ ॥ १५२ ॥

एवं सञ्चिन्त्य वीरेन्द्रः पुनः पानं समाचरेत् ॥ १५३ ॥

इस प्रकार ध्यानकर बीरमार्ग शिरोमणि पुनः पात्र का पान करे ॥ १५३ ॥

एकादशपात्रवन्दनमन्त्रः

ॐ वामां वामकरे सुधाञ्च अधरे मन्त्रं जपन्मानसे
वीणावेणुरवाबयन्त्रविधिवद्गायन्ति पञ्चोप्सरसः ।
क्रीडाकेलिकुतूहलेन कमलालावण्यलीलोरसः
पानोल्लासविलासपूर्णसमये पात्रञ्च एकादशम् ॥ १५४ ॥

**ग्यारहवें पात्र की वन्दना**—मेरी बायीं ओर अत्यन्त सुन्दरी वामा है, अधर में सुधा है, मन में मन्त्र का जप है, बिना किसी वाद्य यन्त्र के वीणा और वेणु का शब्द हो रहा है। जहाँ पाँच अप्सरायें गान कर रही हैं। क्रीडाकेलि के कुतूहल से कमला के समान सुन्दरी स्त्री का लीलायुक्त हृदय है। ऐसे पान के उल्लास तथा विलासपूर्ण काल में इस ग्यारहवें पात्र की मैं वन्दना करता हूँ ॥ १५४ ॥

स्वपात्रस्थितहेतुञ्च न दद्याद् भैरवाय च ।
दत्ते च सिद्धिहानिः स्याद् देवताशापमाप्नुयात् ॥ १५५ ॥

अपने पात्र में स्थित मद्य भैरव को न देवे। भैरव को दे देने पर सिद्धि की हानि होती है तथा देवता का शाप भी प्राप्त होता है ॥ १५५ ॥

**क्वचित्यदृच्छया प्राप्तमन्यमन्यन्तु भक्तितः ।**
**आदाय स्वीयपात्रञ्च पिबेद् द्रव्यं गुरुं स्मरन् ॥ १५६ ॥**

कहीं यदृच्छा से प्राप्त अथवा भक्तिपूर्वक अन्यान्य लोगों द्वारा दिया गया मद्य अपने पात्र में लेकर गुरु का स्मरण करते हुये पान करे ॥ १५६ ॥

**गुरुशक्तिसूतानाञ्च गुरुज्येष्ठकनिष्ठयोः ।**
**उच्छिष्टं भक्षयेत् स्त्रीणां ताभ्यो नोच्छिष्टमर्पयेत् ॥ १५७ ॥**

गुरु की शक्ति (स्त्री में) उत्पन्न होने वालों का एवं छोटे-बड़े गुरुओं का उच्छिष्ट भोजन कर लेवे; अथवा स्त्रियों का उच्छिष्ट भक्षण कर ले, किन्तु उन्हें उच्छिष्ट न देवे ॥ १५७ ॥

**अन्यथा चक्रमध्ये तु पतनं साधकस्य च ।**
**शक्त्युच्छिष्टं पिबेद्द्रव्यं वीरोच्छिष्टञ्च चर्वणम् ॥ १५८ ॥**

यदि कोई साधक चक्र के मध्य में स्त्रियों को उच्छिष्ट प्रदान करता है तो उसका पतन हो जाता है, शक्ति (स्त्री) का उच्छिष्ट मद्यपान करे और वीरोच्छिष्ट चर्वण ग्रहण करे ॥ १५८ ॥

**शक्तिवीरप्रसादेन किं न सिध्यति भूतले ।**
**कनिष्ठेभ्यः स्वशिष्येभ्यश्चोच्छिष्टञ्च प्रदापयेत् ॥ १५९ ॥**

यदि शक्ति और वीर साधक प्रसन्न हो जावें, तो पृथ्वी पर कौन सी ऐसी सिद्धि है जो प्राप्त न हो? सिद्धि प्राप्ति के बाद अपने से छोटे को तथा अपने शिष्य को उच्छिष्ट दिया जा सकता है ॥ १५९ ॥

**दद्यात् स्नेहेन योऽन्येभ्यः स भवेदापदां पदम् ।**
**यावन्न चलते दृष्टिर्यावन्न चलते मनः ॥ १६० ॥**
**तावत् पानं प्रकुर्वीत पशुपानमतःपरम् ।**
**मन्त्रार्थस्फुरणार्थाय ब्रह्मज्ञान स्थिराय च ॥ १६१ ॥**
**अलिपानं प्रकर्तव्यं लोलुपो नरकं व्रजेत् ।**
**पीत्वा पीत्वा पुनः पीत्वा पतित्वा च महीतले ॥ १६२ ॥**
**उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते ।**

जो स्नेहवश अपना उच्छिष्ट अन्यों को देता है; वह आपत्तियों का स्थान बन जाता है । जब तक दृष्टि चञ्चल न हो, जब तक मन अन्यत्र चञ्चल न हो अर्थात् चैतन्यता बनी रहे; तब तक पान करे । इसके बाद पान पशुपान हो जाता है । मन्त्र के अर्थ के स्फुरित होने के लिये तथा ब्रह्मज्ञान के स्थिर रहने के लिये

मद्यपान करना चाहिये । लोलुप बुद्धि से पान करने वाला नरकगामी होता है । एक बार पान करे, पुनः पान करे, पुनः-पुनः पान कर पृथ्वी पर गिरे । फिर उठकर पीये क्योंकि ऐसा करने से पुनर्जन्म नहीं होता ॥ १६०-१६३ ॥

**अलिमीनाङ्गनासङ्गे यत् सुखं जायते नृणाम् ॥ १६३ ॥**
**तदेव मोक्षो विदुषामबुधानाञ्च पातकम् ।**
**चक्रमध्ये घटे भग्ने पात्रे च पतिते तथा ॥ १६४ ॥**
**द्रव्यस्य पतने भूमौ भिन्ने पात्रे तथैव च ।**
**दीपनाशे च तच्छान्त्यै पुनश्चक्रं समाचरेत् ॥ १६५ ॥**

मद्य, मछली और अङ्गना के साथ सङ्गम करने में मनुष्यों को जो सुख होता है वही विद्वान् पुरुषों का मोक्ष है । भले वह मूर्खों के लिये पातक हो । चक्र के मध्य में कलश के फूट जाने पर, पात्र के टूट जाने पर, अथवा गिर जाने पर, अथवा द्रव्य के पृथ्वी पर गिर जाने पर, पात्र के फूट जाने पर, दीपक के बुझ जाने पर, शान्ति के लिये पुनः चक्र का आयोजन करे ॥ १६३-१६५ ॥

**पाययित्वा यथायोग्यं पीत्वा च साधकोत्तमः ।**
**पूर्ववत् तर्पयेद्देवीं परिवारसमन्विताम् ॥ १६६ ॥**

उस पुनः चक्र के आयोजन में पुनः कौलों को पान करावे । स्वयं भी पान कर उत्तम साधक आवरण सहित देवी का तर्पण करे ॥ १६६ ॥

**पुनर्माल्यादिकं दत्त्वा गन्धचन्दनमिश्रितम् ।**
**धूपं दीपं ततः पश्चाद्दर्पणं चामरं तथा ॥ १६७ ॥**

पुनः गन्ध एवं चन्दन मिश्रित माल्य प्रदान करे, धूप, दीप देकर पश्चात् दर्पण तथा चामर प्रदान करे ॥ १६७ ॥

**नैवेद्यं शङ्खघण्टाञ्च वादयेत् सुमनोहरम् ।**
**यथाशक्ति स्तवं कृत्वा प्रदक्षिणीकृत्य साधकः ॥ १६८ ॥**

उत्तम नैवेद्य देकर मनोहर शङ्ख एवं घण्टा बजावे । तदनन्तर साधक यथाशक्ति स्वयं प्रदक्षिणा करे ॥ १६८ ॥

### आत्मसमर्पणम्

**सपुष्पार्घ्यामृतं नीत्वा आत्मानञ्च समर्पयेत् ।**
**ॐ इतः पूर्वं ततः प्राणबुद्धिदेहं ततो वदेत् ॥ १६९ ॥**
**धर्माधिकारतो जाग्रत्स्वप्नसुषुप्तावस्थासु च ।**
**कर्मणा मनसा वाचा हस्ताभ्याञ्च ततः पद्भ्याम् ॥ १७० ॥**

उदरेण च शिश्ना यत् कृतं यत् स्मृतं ततः ।
यदुक्तं प्रोच्य तत्सर्वं मां मदीयञ्च संलिखेत् ॥ १७१ ॥
सकलं श्रीमदिष्टान्ते देवता च पदे ततः ।
समर्पणं ततः पश्चादेतेनैव समर्पयेत् ॥ १७२ ॥
देवीपदे ततो दत्त्वा क्षमस्वेति वदेत्ततः ।
पुनराचमनीयञ्च दद्यादेव्यै पुनः पुनः ॥ १७३ ॥

पुष्प सहित अर्घ्यामृत तथा स्वयं अपने को समर्पण करे । उसका मन्त्र इस प्रकार है—'ॐ इतः ततः प्राण बुद्धिदेहं धर्माधिकारतो जाग्रत्स्वप्नसुषुप्तावस्थासु कर्मणा मनसा वाचा हस्ताभ्यां पद्भ्यां उदरेण शिश्ना यत् कृतं यत् स्मृतं यदुक्तं तत्सर्वं मां मदीयञ्च सकलं श्रीमदिष्ट देवता समर्पणम्' । इस प्रकार मन्त्र पढ़कर पुष्पाञ्जलि देवी के पैरों में रखकर 'क्षमस्व' इतना कहे; फिर साधक देवी को पुनः आचमन देवे ॥ १६९-१७३ ॥

### अर्घ्यदानम्

समस्तावरणं देव्या अङ्गे लीनं विभाव्य च ।
अर्घ्यपात्रं ततः पश्चादुत्तोल्य साधकोत्तमः ॥ १७४ ॥
देव्युपरि त्रिधा भ्राम्य निवेदयेत्ततः परम् ।
तेजोमयीं महादेवीं संहारमुद्रया हृदि ॥ १७५ ॥
नासापथात् समानीय निर्माल्यवासिनीं यजेत् ।
निर्माल्यकुसुमैर्देवीं प्रणम्य गुरुपादुकाम् ॥ १७६ ॥

फिर समस्त आवरण देवताओं को देवी में लीन होने का ध्यान कर पश्चात् अर्घ्यपात्र ऊपर उठाकर उत्तम साधक देवी के ऊपर तीन बार घुमाकर निवेदित करे । पुनः नासिका के मार्ग से संहार मुद्रा द्वारा तेजोमयी महादेवी निर्माल्यवासिनी को अपने हृदय में पधरा कर उनका यजन करे । निर्माल्य के पुष्पों से गुरुपादुका को प्रणाम करे ॥ १७४-१७६ ॥

### पूजासमाप्तिः

भक्तिभावे ततः पश्चात् प्राणायामषडङ्गकौ ।
कृत्वा सोऽहं विभाव्याथ साधकः स्थिरमानसः ॥ १७७ ॥

तदनन्तर भक्तिभाव से प्राणायाम और षडङ्गन्यास कर स्थिरचित्त हो साधक अपने में 'सोऽहं' की भावना करे ॥ १७७ ॥

ब्रह्मरन्ध्रे गुरोः स्थाने यन्त्रलेपञ्च धारयेत् ।
नास्तिकेभ्यो न पशुभ्यो न मूर्खेभ्यो प्रदापयेत् ॥ १७८ ॥

ब्रह्मरन्ध्र में जहाँ गुरु का निवास है, वहाँ यन्त्र का लेप स्थापित करे। चण्डिका देवी का नैवेद्य नास्तिक, पशु तथा मूर्खों को कदापि न देवे ॥ १७८ ॥

**कुलीनाय च दातव्यमथवा जलमध्यतः ।**
**नैवेद्यं चण्डिकादेव्या वाञ्छन्ति विबुधाः सदा ॥ १७९ ॥**

वह प्रसाद कुलमार्ग वालों को दे, अथवा जल में फेंक देवे। चण्डिका देवी का नैवेद्य तो देवता लोग भी चाहते हैं ॥ १७९ ॥

**तस्माद्देयं सदा पुष्पं ब्रह्मणे विष्णवेऽपि च ।**
**मह्यं शुक्राय सूर्याय गणेशाय यमाय च ॥ १८० ॥**

इसलिये चण्डिका समर्चित पुष्प ब्रह्मा को, विष्णु को, अथवा मुझे (भैरव) को, अथवा शुक्र, सूर्य, गणेश, अथवा यम को देवे ॥ १८० ॥

**अग्नये वरुणायापि वायवे धनदाय च ।**
**ईशानाय महादेवीसाधकाय प्रकल्पयेत् ॥ १८१ ॥**

चण्डिका देवी का नैवेद्य अग्नि, वरुण, वायु, कुबेर, ईशान तथा महादेवी के साधक को देवे ॥ १८१ ॥

**अथवा तरुमूले च गर्ते वा शुचिदेशके ।**
**यत्नतः साधकश्रेष्ठो निर्माल्यानि समर्पयेत् ॥ १८२ ॥**

अथवा वृक्ष के मूल में डाल देवे, अथवा किसी उत्तम प्रदेश में गड्ढा खोदकर रख देवे। इस प्रकार साधक निर्माल्य को यत्नपूर्वक कहीं योग्य स्थान में समर्पण करे ॥ १८२ ॥

**शक्तिभ्यः साधकेभ्यश्च दत्त्वा निर्म्माल्यचन्दनम् ।**
**माल्यं गन्धं ततो दत्त्वा आत्मदेहं ततोऽर्पयेत् ॥ १८३ ॥**

सभी शक्तियों एवं सभी साधकों को निर्माल्य और चन्दन देकर माल्य एवं गन्ध देवे। इसके बाद स्वयं अपने को समर्पित कर देवे ॥ १८३ ॥

**अथवा कारयेत् पानं मधुना वीरसाधकः ।**
**श्रीपात्रग्रहणं कृत्वा आदौ चक्रं करोति यः ॥ १८४ ॥**
**पशुपानं भवेत्तस्य प्रायश्चित्ती स साधकः ।**
**अर्घ्यामृतं ततो वीरः सामयिकेभ्यो निवेदयेत् ॥ १८५ ॥**

अथवा वीर साधक मधु के साथ पान करा देवे। जो पहले श्री पात्र ग्रहण कर चक्र निर्माण करता है, उसका वह पान पशुपान हो जाता है, ऐसा साधक

प्रायश्चित्ती हो जाता है। इसके बाद अर्घ्यामृत सभी सामयिको (अन्तर्याजियों) को प्रदान करे ॥ १८४-१८५ ॥

शेषतत्त्वग्रहणविधिः

ततश्च साधकश्रेष्ठः शेषमात्मनि योजयेत् ।
प्रबन्धे पूर्णपात्रञ्च प्रगृह्य साधकोत्तमः ॥ १८६ ॥
देहं मन्त्रमयं विधाय पुरतः कृत्वा गुरोर्वन्दनं
श्रीपात्रं कुलविद्यया विलसितं संशोध्य दिव्यामृतम्।
विद्यापीठचतुष्टयं शिवशिवे सन्तर्प्य सिद्धिक्रमा-
दास्वाद्यापि पिबेद्रसं सुखकरं दुःखस्य निर्मूलनम् ॥ १८७ ॥

इसके बाद श्रेष्ठ साधक रस शेष का स्वयं आस्वादन करे। प्रबन्ध में उत्तम साधक पूर्ण पात्र लेकर, प्रथम देह को मन्त्रमय बनाकर, तदनन्तर गुरु की वन्दना करे। कुलविद्या मन्त्र से श्री पात्रयुक्त दिव्यामृत का संशोधन करे। फिर सिद्धिक्रम से चार विद्यापीठों में शिव शिवा का सन्तर्पण कर, दुःख को निर्मूलन करने वाले, सर्वदा सुखकारी, उस दिव्य रस का स्वयं आस्वादन करे ॥ १८६-१८७ ॥

महापातकयुक्तो वा बहुपापान्वितोऽपि वा ।
अर्घ्यस्य विन्दुमात्रेण मुक्तो भवति पातकात् ॥ १८८ ॥

ब्रह्महत्यादि महापाप करने वाले तथा अनेक पाप करने वाले पापी इस अर्घ्य के बिन्दु मात्र जल से सभी पापों से मुक्त हो जाते हैं ॥ १८८ ॥

एवं पानं समाचर्य स्वीकृत्य पूर्णपात्रकम् ।
न्युब्जीकुर्याच्च तद्भूमौ तत्र पुष्पं क्षिपेद् बुधः ॥ १८९ ॥

इस प्रकार पान का आचरण स्वीकार कर, उस पूर्णपात्र को उलटकर भूमि में स्थापित कर देवे। फिर उस पर पुष्प रख देवे ॥ १८९ ॥

तदमृतस्निग्धभूमौ मायाबीजं विलिख्य च ।
कनिष्ठाङ्गुलिना वामहस्तस्य तिलकं तथा ॥ १९० ॥

उस पानामृत से संसिक्त भूमि में साधक माया बीज (ह्रीं) लिखकर बायें हाथ की कनिष्ठा अङ्गुली से मस्तक में तिलक लगावे ॥ १९० ॥

अनेन मनुना मन्त्री मूलाद्येन समाहितः ।
यं यं स्पृशामि पादेन यं यं पश्यामि चक्षुषा ॥ १९१ ॥
स एव दासतां यातु यदि शक्रसमो भवेत् ।
ततः प्रक्षाल्य वीरेन्द्रो गोपयेत् पात्रमुत्तमम् ॥ १९२ ॥

तिलक का मन्त्र इस प्रकार है । मन्त्रज्ञ साधक आदि में मूल मन्त्र पढ़कर 'यं यं स्पृशामि................यदि शक्रसमो भवेत्' यह श्लोक तिलक लगाने का मन्त्र है । इसके बाद पात्र का प्रक्षालन कर विद्वान् साधक उसे किसी गुप्त स्थान में स्थापित कर देवे ॥ १९१-१९२ ॥

**ततो यथाक्रमेणैव प्रसादं परिवेश्य च ।**
**भोजयेच्च ततो विद्वान् स्त्रीभिश्च साधकैः सह ॥ १९३ ॥**

तदनन्तर क्रमानुसार प्रसाद परोस कर उन स्त्रियों तथा साधकों के साथ स्वयं भी प्रसाद भक्षण करे ॥ १९३ ॥

**भुक्त्वा दद्यात् पुनर्माल्यं गन्धचन्दनसंयुतम् ।**
**ताम्बूलाभरणादींश्च तथा तल्पं सुसाधकः ॥ १९४ ॥**

भोजन करने के अनन्तर उन लोगों को गन्ध चन्दन युक्त माला प्रदान करे और ताम्बूल, आभरण तथा शयन के लिये शय्या प्रदान करे ॥ १९४ ॥

**सेविते च कुलद्रव्ये कुलतत्त्वार्थदर्शिनः ।**
**जायते भैरवावेशः सर्वत्र समदर्शनः ॥ १९५ ॥**

कुलद्रव्य के सेवन से कुलतत्व के पारदर्शियों को सर्वत्र समदर्शन कराने वाला भैरवावेश उत्पन्न होता है ॥ १९५ ॥

**न्तं वा ग त च्छ रं पि मा कौलिकं न निवारयेत् ।**
**वारणात् त्रिपुरा रुष्टा ततो हानिस्तु जायते ॥ १९६ ॥**

न्तं वा ग त च्छ रं पि मा (मातरं वापि गच्छन्तं) इस प्रकार भैरव के आवेश में प्रमादवश माता के पास सन्निधान करने वाले साधकों को मना न करे । मना करने से त्रिपुरा रुष्ट हो जाती है, जिससे हानि की सम्भावना होती है ॥ १९६ ॥

**कौलिकः पशुगामी च परशक्तिं रमेद् बलात् ।**
**गोष्ठीमध्ये तु यत्नेन स्पर्शं तस्य न कारयेत् ॥ १९७ ॥**

जो पशुगामी कौलिक दूसरों की स्त्रियों से बलात्कारपूर्वक रमण करता है । गोष्ठी में यत्नपूर्वक उसका स्पर्श भी कदापि न करे ॥ १९७ ॥

**र्यां वा तां गि भा नीं सु भ यो दद्यात् कुलयोगिने।**
**मधुमत्ताय वीराय पुण्यं तस्य न गण्यते ॥ १९८ ॥**

र्यां वा तां गि भा नीं सु भ (भागिनीं वा सुतां भार्यां) बहन, लड़की या अपनी स्त्री इन्हें मद्य से मस्त कुलयोगियों को जो प्रदान करता है उसके पुण्य की इति श्री नहीं है ॥ १९८ ॥

**कुलं कुलाय यो दद्यात् सोऽपि योनौ न जायते ।**
**भगरूपा च सा देवी रेतःप्रीता च सर्वदा ॥ १९९ ॥**

जो कुलमार्गी को कुल (शक्ति) प्रदान करता है, वह पुनः योनि में उत्पन्न नहीं होता । भगरूपा वह देवी सर्वदा रेतः (वीर्य) से प्रसन्न रहती है ॥ १९९ ॥

**रेतःसमर्पणं तस्यै मद्यैर्मांसैः समं सदा ।**
**ध्यात्वा कुण्डलिनीं शक्तिं रमन् रेतो विमुञ्चयेत् ॥ २०० ॥**

मद्य, मांस के साथ उस शक्ति में रेतः (वीर्य) का समर्पण करे, कुण्डलिनी शक्ति का ध्यान करते हुये साधक खेचरी मुद्रा से रमण करते हुये योनि में वीर्य (=आनन्द) समर्पण करे ॥ २०० ॥

**अमन्त्रा तु यदा नारी बलाद् यत्नाद्वा लभ्यते ।**
**आत्मदेहस्वरूपेण तत्कर्णे मन्त्रमुत्सृजेत् ॥ २०१ ॥**

जो स्त्री बलात् अथवा किसी प्रयत्न से प्राप्त हो गई है, तो आत्मदेह स्वरूप समझकर उसके कान में मन्त्र का उत्सर्जन करे ॥ २०१ ॥

**ततः सा शक्तिरूपा स्याद् भुक्तिमुक्तिफलप्रदा ।**
**रतिकाले च दीक्षायामभिषेकं समाचरेत् ॥ २०२ ॥**

ऐसा करने से वह शक्तिरूपा भोग और मोक्ष देने वाली हो जाती है । अतः रतिकाल में तथा दीक्षाकाल में अभिषेक अवश्य करना चाहिये ॥ २०२ ॥

**सुरया रेतसा वापि जलेन चन्दनाम्बुना ।**
**सम्भोगेऽभिषिचेन्नारीं रण्डाञ्च मन्त्रवर्जिताम् ॥ २०३ ॥**

सामान्य स्त्री का तथा रण्डा नारी का मद्य, वीर्य, जल अथवा घिसे चन्दन से सम्भोगकाल में अभिषेक करना चाहिये ॥ २०३ ॥

**आदौ बालां समुच्चार्य त्रिपुरायै समुच्चरेत् ।**
**नमः शब्दं समुच्चार्य इमां शक्तिं ततो वदेत् ॥ २०४ ॥**
**पवित्रीकुरुशब्दान्ते मम शक्तिं कुरुद्वयम् ।**
**वह्निजायां समुच्चार्य शुद्धिमन्त्रः प्रकीर्त्तितः ॥ २०५ ॥**

'बाला त्रिपुरायै नमः इमां शक्तिं पवित्रीकुरु मम शक्तिं कुरु कुरु स्वाहा' यह शुद्धि का मन्त्र कहा गया है ॥ २०४-२०५ ॥

**अनेन मनुना चैव अभिषिक्ताः स्त्रियः सदा ।**
**रममाणो भवेन्नित्यं सर्वसिद्धिमवाप्नुयात् ॥ २०६ ॥**

उपर्युक्त मन्त्र से अभिषिक्त की गई स्त्री से रमण करने वाला साधक समस्त सिद्धियाँ प्राप्त कर लेता है ॥ २०६ ॥

**इहलोके परंभोगं भुक्त्वा मुक्तिमवाप्नुयात् ।**
**रम्भा शच्युर्वशी मुख्या या नारी गगने भुवि ॥ २०७ ॥**
**पाताले च स्थिता या च तस्या नाथस्तु कौलिकः ।**
**तस्य वर्ज्या च या नारी कथ्यते तन्त्रवर्त्मना ॥ २०८ ॥**

इस प्रकार से स्त्री के साथ रमण करने वाला साधक इस लोक में सुख प्राप्त करता है और परलोक में मुक्ति प्राप्त करता है । रम्भा, शची, उर्वशी, जितनी भी पाताल एवं स्वर्ग में रहने वाली श्रेष्ठ स्त्रियाँ हैं उन सभी के स्वामी कौलिक हैं । अब जो नारी वर्जित है, उन्हें तन्त्रशास्त्र के अनुसार कहता हूँ ॥ २०७-२०८ ॥

**त्रिपुरैव गुरुः साक्षात्तत्पत्नी तत्स्वरूपिणी ।**
**मनसा कर्मणा वाचा रमणं तत्र वर्जयेत् ॥ २०९ ॥**

**कौलिक के लिए वर्ज्य स्त्री**—गुरु साक्षात् त्रिपुरा स्वरूप है, उसकी पत्नी (गुरुपत्नी) भी त्रिपुरा स्वरूप है, अतः उसके साथ मन, वचन और कर्म से भी रमण वर्जित है ॥ २०९ ॥

**तस्या एव पदे भक्तो मुक्तिमप्यचिराल्लभेत् ।**
**गुरोः स्नुषा च कन्या च स्वपुत्री मन्त्रपुत्रिका ॥ २१० ॥**

गुरुपत्नी के चरण कमलों का भक्त साधक उसकी सेवा करने से थोड़े ही काल में मुक्ति प्राप्त कर लेता है । गुरु की पतोहु, गुरुकन्या और अपनी पुत्री इन सभी को (जप) मन्त्र की कन्या समझना चाहिये ॥ २१० ॥

**एतस्या रमणं वर्ज्यं ब्रह्मविन्मानसेन च ।**
**कौलिकस्य च पत्नी वै साक्षात् सिद्धीश्वरी शिवा ॥ २११ ॥**
**तस्या रमणमात्रेण कौलिको नारकी भवेत् ।**
**माताऽपि गौरवाद्वर्ज्या शिवहीना तथैव च ॥ २१२ ॥**

ब्रह्मवेत्ता मन से भी इनके साथ कदापि रमण की इच्छा न करे । कौलिक की पत्नी साक्षात् सिद्धेश्वरी शिवा है । अतः कुलमार्गानुसारी साधक की पत्नी से रमण करने वाला साक्षात् नरक का भागी होता है । माता का गौरव सबसे ऊँचा है अतः प्रयत्नपूर्वक उसके साथ रमण वर्जित है । इसी प्रकार शिवहीना से भी रमण वर्जित बतलाया गया है ॥ २११-२१२ ॥

**अन्यस्थाने विचारे तु देवीशापः प्रजायते ।**

**मन्त्रमाता च पुत्री च भगिनी च कुलाङ्गना ॥ २१३ ॥**
**न रमेत् कौलिको नित्यमेताः सम्यक् समर्चयेत् ।**
**(यद्वा) गुरुवीरवधूं त्यक्त्वा रम्याः सर्वाश्च योषितः ॥ २१४ ॥**

अन्य स्थान (विषय) में रमण के विषय में विचार करने से साधक को देवी का शाप लगता है । मन्त्र की माता, पुत्री, भाञ्जी तथा कुलाङ्गनाओं से कौलिक रमण न करे किन्तु इनका नित्य पूजन अवश्य करे । अथवा गुरुपत्नी, वीरपत्नी को छोड़कर सभी स्त्रियों से रमण किया जा सकता है ॥ २१३-२१४ ॥

**सन्दिग्धानां द्वैतज्ञानिनां पञ्चतत्त्वग्रहणे निषेधः**

**एता वर्ज्याः प्रयत्नेन सन्दिग्धानाञ्च सर्वदा ।**
**अद्वैतानाञ्च कुत्रापि निषेधो नैव विद्यते ॥ २१५ ॥**

इन्हें प्रयत्नपूर्वक वर्जित करे । किन्तु सन्दिग्ध स्त्रियों से सर्वदा सशङ्कित रहे । अद्वैत मत मानने वालों के लिये तो कहीं भी निषेध नहीं है ॥ २१५ ॥

**मातृगर्भस्थबीजेन शिशुरेव न संशयः ।**
**गर्भनिःसारकाले तु बालको हि दिगम्बरः ॥ २१६ ॥**
**अननीजठराद्योनिरन्ध्रद्वाराद्बहिर्भवन् ।**
**जननीयोनिसम्बन्धःसुतः शिश्नाऽधिगच्छति ॥ २१७ ॥**
**एवं विचार्यमाणे तु को न स्याद्गुरुतल्पगः ।**
**निर्विकारतया नात्र भवेत् नह्यन्यथा ततः ॥ २१८ ॥**

लड़का तो माता के गर्भ में उसके बीज से बनता है और गर्भ से निकलने के समय बालक सर्वथा दिगम्बर (नङ्गा) रहता है और माता के पेट से योनि के छिद्र से निकल कर बाहर आता है । उस समय माता की योनि से लड़के के शिश्न का सम्बन्ध होता है । इस प्रकार विचार करने पर कौन गुरुतल्पग नहीं होता? किन्तु निर्विकार होने से उसे अन्यथा (कुत्सित) नहीं कहा जाता ॥ २१६-२१८॥

**अतएव यदा यस्य वासना कुत्सिता भवेत् ।**
**तदा दोषाय भवति नान्यथा दूषणं क्वचित् ॥ २१९ ॥**

इससे यह सिद्ध हुआ कि जब कभी वासना कुत्सित होती है, तभी दोष लगता है । अन्यथा दोष नहीं लगता ॥ २१९ ॥

**निर्विकल्पमना भूत्वा चिन्मयीं समुपासयेत् ।**
**तदारूढेषु वीरेषु कार्याकार्यं न विद्यते ॥ २२० ॥**

अतः निर्विकल्प (बिना वासना के) होकर चिन्मयी की उपासना करने वाले के

लिये और उसके आचरण में संलग्न वीर पुरुषों (कौलों) के लिये कार्याकार्य का विचार नहीं होता ॥ २२० ॥

**तस्माद्द्वैतरूपेण सर्वयोनिं विचारयेत् ।**
**निश्चयं मुक्तिमाप्नोति सहस्त्रयोनिदर्शनात् ॥ २२१ ॥**

इसलिये अद्वैत भावना वाले को किसी प्रकार का विचार नहीं करना चाहिये, वह सब योनियों से सम्बन्ध कर सकता है। भले हजारों योनियों में रमण करे किन्तु उसकी मुक्ति निश्चित है ॥ २२१ ॥

**अनाचारः सदाचारः कुकार्यं कार्यमुत्तमम् ।**
**अमेध्यमपि मेध्यं स्याद्द्वैतानाञ्च निश्चितम् ॥ २२२ ॥**

अद्वैतवादियों के लिये अनाचार, सदाचार है, कुत्सित कार्य भी उत्तम कार्य है और अपवित्र भी पवित्र है। यह निश्चित सिद्धान्त है ॥ २२२ ॥

**अपेयमपि पेयं स्यादभोज्यं भोज्यमेव च ।**
**अगम्याऽपि च गम्या स्याद्द्वैतानां सुनिश्चितम् ॥ २२३ ॥**

उनके लिये अपेय भी पेय है, अभोज्य भी भोज्य है, अगम्य भी गम्य है और यह भी अद्वैतों के लिये निश्चित है ॥ २२३ ॥

**न विधिर्न निषेधश्च न पुण्यं न च पातकम् ।**
**न स्वर्गो नैव नरकमद्वैतानाञ्च निश्चितम् ॥ २२४ ॥**

उन अद्वैतवादियों के लिये न कोई विधि है और न कोई निषेध है, न पुण्य है, न पाप है, न स्वर्ग है, न नरक है। यह मत निश्चित है ॥ २२४ ॥

**यत्र यत्र निषेधश्च विधिर्वा परिकथ्यते ।**
**तत्र तत्रापि बोद्धव्यं सन्दिग्धानां सुनिश्चितम् ॥ २२५ ॥**

जहाँ-जहाँ विधि है और जहाँ-जहाँ निषेध है, वह सब निश्चित रूप से सन्देह करने वालों के लिये ही कहा गया है ॥ २२५ ॥

**सर्वथैव गुरोरग्रे अद्वैतं नैव कारयेत् ।**
**तस्माच्च यत्नतो वीरो गुरुयोनिं परित्यजेत् ॥ २२६ ॥**

गुरु के आगे सर्वथा अद्वैत मार्ग का अनुसरण न करे। इसलिये वीर साधक गुरु की स्त्री के साथ कदापि रमण न करे ॥ २२६ ॥

**अद्वैतद्वैतभेदेन पूजनं कथितं महत् ।**
**पञ्चतत्त्वमसंयुक्तं पञ्चमं यस्तु कारयेत् ॥ २२७ ॥**

इस प्रकार हमने अद्वैत तथा द्वैत भेद से पूजा का विधान कहा, जो पाँच मकार युक्त तत्वों से युक्त है । अत: पाँचों वस्तु से पूजा करे ॥ २२७ ॥

**तस्य पूजा च सा नष्टा प्रायश्चित्ती स साधक: ।**
**तत्त्वहीनं कृतं कर्म जपकर्म च निष्फलम् ॥ २२८ ॥**

पञ्चतत्त्वरहित किया गया कर्म तथा जप निष्फल होता है, पञ्चतत्व से रहित पूजा नष्ट है । ऐसा साधक प्रायश्चित्ती होता है ॥ २२८ ॥

**शाम्भवी कुप्यते तेभ्यो ब्रह्महत्या दिने दिने ।**
**चक्रं त्यक्त्वा तु देवेशीं पूजयेत्तर्पणं विना ॥ २२९ ॥**
**चत्वारि तस्य नश्यन्ति आयुर्विद्यायशोबलम् ।**

पञ्चतत्त्वविहीन पूजा करने वालों पर शाम्भवी (त्रिपुरा) कुपित होती हैं । उसे प्रतिदिन ब्रह्महत्या का पाप लगता है । जो साधक चक्र का परित्याग कर तर्पण-रहित देवेशी का पूजन करता है, उसके आयु, विद्या, यश एवं बल चारों ही नष्ट हो जाते हैं ॥ २२९-२३० ॥

**चक्रमध्ये तु यद्दृष्टं शुभं वा यदि वाऽशुभम् ॥ २३० ॥**
**प्रभाते तन्न वक्तव्यं साधकेन महात्मना ।**
**नित्यपूजा च कथिता साधकानां सुसिद्धये ॥ २३१ ॥**

**॥ इति श्रीमज्ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये अष्टमोल्लास: ॥८॥**

चक्र के मध्य में रात्रि के समय, जो भी अच्छा या बुरा जो भी दिखाई पड़े, साधक उसे प्रात:काल में प्रकाशित न करे । इस प्रकार साधकों की सिद्धि के लिये हमने नित्य पूजा का विधान कहा ॥ २३०-२३१ ॥

**महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय के ज्येष्ठ पुत्र पण्डित रामरञ्जन मालवीय कृत श्रीमज्ज्ञानानन्द परमहंस विरचित कौलावलीनिर्णय नामक तन्त्र के अष्टम उल्लास की निरञ्जन हिन्दी व्याख्या पूर्ण हुई ॥ ८ ॥**

# नवम उल्लासः

इति गुप्ततरं श्रेयं गन्धर्वस्य क्रमं शुभम् ।
अत्यन्तगोपनाद्यस्तु पञ्चतत्त्वेन पूजयेत् ॥ १ ॥
सर्वसिद्धिमवाप्नोति मन्दभाग्योऽपि पूजनात् ।
तस्मात् पूजां सदा कुर्यात् सिद्धार्थी सिद्धिसंग्रहः ॥ २ ॥

इस प्रकार इस कल्याणकारी गन्धर्व क्रम को अत्यन्त गुप्त समझना चाहिये । जो अत्यन्त गुप्त रखकर पञ्चतत्व से श्री महाभगवती का पूजन करता है । वह भले ही अभागा हो, किन्तु गुप्त पूजन प्रकार से उसे सभी प्रकार की सिद्धियाँ प्राप्त हो जाती है । इसलिये सिद्धि चाहने वाला अथवा सिद्धियों का सङ्ग्रह करने वाला सदैव महाभगवती का पूजन करे ॥ १-२ ॥

### पूजाफलकथनम्

पूजाफलेन दौर्भाग्यं दुःखदारिद्र्यनिग्रहम् ।
सर्वप्रशमनं याति ईश्वरो जायते भुवि ॥ ३ ॥

इस प्रकार के पूजा करने के फलस्वरूप दुर्भाग्य और दारिद्र्य का विनाश हो जाता है उसकी समस्त (ग्रहजन्य) अशान्ति शान्त हो जाती है और वह ऐश्वर्ययुक्त हो जाता है ॥ ३ ॥

अर्चनक्षणभङ्गेन विकला योगिनी भवेत् ।
पूजाहीनोऽशुचिर्नित्यं गर्हितः सर्वकर्मसु ॥ ४ ॥

उस पूजा एवं अर्चनक्षण में विघ्न पड़ने से योगिनी विकल हो जाती हैं । पूजारहित व्यक्ति अपवित्र रहता है, अतः वह समस्त पूजातिरिक्त कार्यों में निन्दित होता है ॥ ४ ॥

पूजां विहाय यो मूढो मन्त्रं जपति नित्यशः ।
तज्जपं विफलं विद्यात् स मन्त्री पातकी भवेत् ॥ ५ ॥

जो मूर्ख बिना पूजा किये नित्य मन्त्र का जप करता है । उसका सारा किया गया जप निष्फल समझना चाहिये और वह स्वयं भी पापी हो जाता है ॥ ५ ॥

**विद्यां संगृह्य पूजायां श्रद्धा यस्य न विद्यते ।**
**स महापातकी भूत्वा पशुयोनिमवाप्नुयात् ॥ ६ ॥**

विद्या प्राप्त कर लेने पर भी जिसकी श्रद्धा पूजा में नहीं होती, वह महापातकी होकर अन्य जन्म में पशुयोनि प्राप्त करता है ॥ ६ ॥

**पूजाहीनस्य मांसेन रुधिरेण विशेषतः ।**
**पारणं योगिनीनाञ्च भैरवाणां भवेद्ध्रुवम् ॥ ७ ॥**

पूजारहित व्यक्ति के मांस से, विशेष रूप से उनके रुधिर से योगिनियों का तथा भैरवों का पारण होता है ॥ ७ ॥

**तस्मात् पूजां सदा कुर्यात् सिद्ध्यर्थी मानसेऽथवा ।**
**यद्गेहे पूजयेद् देवीं सदैव तत्र पूजनम् ॥ ८ ॥**

इसलिये सिद्धि चाहने वाला व्यक्ति सदैव पूजा करे । वह पूजा मन में करे अथवा जिस घर में पूजा प्रारम्भ करे उसमें नित्य पूजा करे ॥ ८ ॥

**दिवसे पूजानिषेधः**

**अतिगुप्तेन तत्कार्यं दिवसे नैव सर्वथा ।**
**दिवसे पञ्चमैः पूजा राष्ट्रहानिं करोति हि ॥ ९ ॥**

महाभगवती की पूजा अत्यन्त गुप्त रूप से करनी चाहिये । दिन में तो सर्वथा पूजा न करे क्योंकि दिन में पञ्चमकारों के पूजन से राष्ट्र की हानि होती है ॥ ९ ॥

**साधकस्य महाक्षोभं प्रददाति सुनिश्चितम् ।**
**तस्मात् पञ्चमकारेण दिवसे नैव सर्वदा ॥ १० ॥**

दिन में पञ्चमकार द्वारा की गई पूजा साधक में निश्चित रूप से क्षोभ (चाञ्चल्य और पागलपन) उत्पन्न करती है । इसलिये पञ्चमकारों द्वारा सर्वदा दिन में पूजा नहीं करे ॥ १० ॥

**उत्तमादिभेदेन त्रिविधा पूजा**

**उत्तमा नित्यपूजा स्यात् पर्वपूजा च मध्यमा ।**
**मासपूजाऽधमा प्रोक्ता मासादूर्ध्वं पशुर्भवेत् ॥ ११ ॥**

नित्य पूजा उत्तम कही गई है । प्रतिवर्ष (अमावस्या एवं पूर्णमासी पर) की गई पूजा मध्यम तथा मास-मास पर की जाने वाली पूजा अधम कही गई है । मास के बाद की जाने वाली पूजा पशु पूजा हो जाती है उससे कोई फल प्राप्त नहीं होता ॥ ११ ॥

**पशोर्भूयः प्रवेशेच्छा यदि स्याद्दीक्षयेत् पुनः ।**
**विहितैर्मादिभिर्द्रव्यैर्मासादूर्ध्वं समाचरेत् ॥ १२ ॥**

यदि पशुभाव वाला साधक कौल धर्म में पुनः प्रवेश करना चाहे; तो उसे फिर दीक्षा देनी चाहिये । एक महीना के ऊपर हो जाने पर, वह पुनः विहित मांसादि से महादेवी की पूजा करे ॥ १२ ॥

### प्रशस्तकालनिर्णयः

**कृष्णाष्टमी चतुर्दश्यमावस्याथ च पूर्णिमा ।**
**संक्रान्तिः पञ्चपर्वाणि पुण्यादि दिवसेषु च ॥ १३ ॥**
**सम्पत्तौ च यजेल्लाभे तपोदीक्षाव्रतोत्सवे ।**
**पीठोपगमने वीराकुलपीठस्य दर्शने ॥ १४ ॥**
**देशिकागमने पुण्यतीर्थदैवतदर्शने ।**
**एवमादिषु कालेषु विशेषदिवसेषु च ॥ १५ ॥**
**गुरुजन्मदिने प्राप्ते तद्गुरोस्तद्गुरोरपि ।**
**मानवौघादिपुंसाञ्च स्वजन्मदिवसेऽपि च ॥ १६ ॥**
**एकादश्यां व्यतीपाते कर्मलोपं न कारयेत् ।**
**अष्टम्याञ्च चतुर्दश्यां पूजा कार्या प्रयत्नतः ॥ १७ ॥**

कृष्णपक्ष की अष्टमी, चतुर्दशी, अमावास्या, पूर्णिमा, सङ्क्रान्ति—ये पाँच पर्व बतलाये गये हैं । इसके अतिरिक्त सभी पुण्य दिन तथा सम्पत्ति में भी यजन करे। इसी प्रकार तप, दीक्षा, व्रत के उत्सव में, पीठ पर आसीन होने पर, वीरपीठ एवं कुलपीठ के दर्शन काल में, आचार्य के पधारने पर, पुण्यतीर्थ एवं देवता दर्शन इत्यादि कालों के उपस्थित होने पर तथा विशेष, विशेष दिनों के प्राप्त होने पर, गुरु के जन्मदिन एवं उनके भी गुरु के जन्मदिन में, मानवौघादि पुरुषों के जन्मदिन में और अपने जन्मदिन में भी, एकादशी तथा व्यतीपात उपस्थित होने पर कर्मलोप न करे । अष्टमी तथा चतुर्दशी तिथियों में प्रयत्नपूर्वक पूजा करनी चाहिये ॥ १३-१७ ॥

**न लङ्घयेदष्टमीञ्च लङ्घनात् पातकी भवेत् ।**
**इति पूर्वापरे प्राप्ते पञ्चतत्त्वैश्च साधकः ॥ १८ ॥**

विशेष कर अष्टमी में पूजोल्लङ्घन न करे क्योंकि उस दिन पूजा का अतिक्रमण करने से पाप लगता है । इस प्रकार पूर्वपक्ष अथवा अपरपक्ष (कृष्ण एवं शुक्ल पक्ष) के प्राप्त होने पर साधक पञ्चतत्त्वों से पूजा करे ॥ १८ ॥

**पूजां कुर्यात् प्रयत्नेन अन्यथा सिद्धिहा भवेत् ।**

**बहिःपूजाविधानेन गन्धर्वो वापि किन्नरः ॥ १९ ॥**
**राजाऽपि साधको वापि नान्यः कोऽपि महीतले।**
**यतिर्वा भूपतिर्वापि नान्योऽस्ति पूजकः क्वचित् ॥ २० ॥**

पूजा प्रयत्नपूर्वक मन लगाकर करे, अन्यथा सिद्धि में हानि उठानी पड़ती है। जो विधानपूर्वक बहिः पूजा करता है; गन्धर्व, किन्नर या राजा कोई साधक पृथ्वी में उसकी समानता नहीं कर सकता। यति, भूपति तथा अन्य पूजक उसकी समानता नहीं कर सकते ॥ १९-२० ॥

**न देवः पर्वताग्रेषु न देशे विष्णुसद्मनि।**
**देवश्चिदानन्दमयो हृदि भावेन दृश्यते ॥ २१ ॥**

देवता पर्वत के ऊँचे शिखरों पर अथवा विष्णु के मन्दिर में निवास नहीं करते। आनन्दमयता ही देवता का स्वरूप है जो भाव से दिखाई पड़ते हैं ॥ २१॥

**यत्र यत्र दृढा भक्तिर्यदा यस्य महात्मनः।**
**तत्र तत्र महादेवी प्रकाशमनुगच्छति ॥ २२ ॥**

इसलिये जिस महात्मा की जहाँ-जहाँ दृढ़ भक्ति होती है, महात्मा लोगों को वहाँ-वहाँ महाभगवती का दर्शन प्रकाशरूप से प्रत्यक्ष हो जाता है ॥ २२ ॥

### सिद्धक्षेत्रकथनम्

**अथ वक्ष्ये फलाधिक्यं पूजायां यत्र जायते।**
**वाराणस्यां महापूजा सम्पूर्णफलदायिनी ॥ २३ ॥**

अब मैं जहाँ-जहाँ पूजा करने से अधिक फल की प्राप्ति होती है, उन-उन स्थानों को कहता हूँ। वाराणसी में की गई महापूजा साधक को सम्पूर्ण फल प्रदान करती है ॥ २३ ॥

### स्थानभेदेन पूजाफलभेदः

**ततस्तु द्विगुणा प्रोक्ता पुरुषोत्तमसन्निधौ।**
**ततोऽपि द्विगुणा प्रोक्ता द्वारकायां विशेषतः ॥ २४ ॥**

पुरुषोत्तम क्षेत्र में पूजा करने से उसको दूना फल प्राप्त होता है। विशेष रूप से द्वारका में पूजा करने से उसका भी दूना फल प्राप्त होता है ॥ २४ ॥

**सर्वक्षेत्रेषु तीर्थेषु पूजा द्वारावतीसमा।**
**विन्ध्ये शतगुणा प्रोक्ता गङ्गायामपि तत्समा ॥ २५ ॥**

ऐसे तो सभी तीर्थों एवं पुण्य क्षेत्रों में पूजा का फल द्वारावती (हरिद्वार) के

समान ही होता है किन्तु विन्ध्य क्षेत्र में तथा गङ्गा में उसका शतगुणा फल प्राप्त होता है ॥ २५ ॥

**आर्यावर्त्ते मध्यदेशे ब्रह्मावर्त्ते तथैव च ।**
**विन्ध्यवत् फलदा पूजा प्रयागे पुष्करेषु च ॥ २६ ॥**

आर्यावर्त मध्यदेश एवं ब्रह्मावर्त देश में की गई पूजा विन्ध्यक्षेत्र में की गई पूजा के फल के समान होती है। किन्तु प्रयाग एवं पुष्कर में उसका चौगुना फल प्राप्त होता है ॥ २६ ॥

**ततश्चतुर्गुणा प्रोक्ता करतोयानदीजले ।**
**तस्माच्चतुर्गुणफला नन्दिकुण्डे च निश्चितम् ॥ २७ ॥**

करतोया के जल में उसका भी चौगुना फल प्राप्त होता है। नन्दि कुण्ड में निश्चित रूप से उसका भी चौगुना फल प्राप्त होता है ॥ २७ ॥

**ततश्चतुर्गुणा प्रोक्ता जल्पीशस्य च सन्निधौ ।**
**ततः सिद्धीश्वरीयोनौ ततोऽपि द्विगुणा स्मृता ॥ २८ ॥**

जल्पेश्वर के सन्निधान में उसका भी चौगुना फल होता है। उसके बाद सिद्धेश्वरी की योनि में पूजा करने से उसका भी दूना फल प्राप्त होता है ॥ २८ ॥

**ततश्चतुर्गुणा प्रोक्ता लौहित्यनदपाथसि ।**
**तत्समा कामरूपे च सर्वत्रैव जले स्थले ॥ २९ ॥**

फिर उसका भी चौगुना फल लौहित्य (ब्रह्मपुत्र) के जल में पूजा करने से प्राप्त होता है। उतना ही फल कामरूप क्षेत्र में तथा सर्वत्र जल एवं स्थल में पूजा करने से होता है ॥ २९ ॥

**सर्वश्रेष्ठो यथा विष्णुर्लक्ष्मीः सर्वोत्तमा यथा ।**
**देवीपूजा तथा शक्त्यां कामरूपे सुरालये ॥ ३० ॥**

जिस प्रकार विष्णु सर्वश्रेष्ठ हैं और महालक्ष्मी सर्वोत्तम देवी है उसी प्रकार कामरूप के मन्दिर में की गई पूजा सर्वश्रेष्ठ पूजा होती है ॥ ३० ॥

कुलार्णवे—

**कामरूपञ्च द्विविधं व्यक्तं गुप्तं महेश्वरि ।**
**करतोयानदीपूर्वं यावद्दिक्करवासिनी ॥ ३१ ॥**
**त्रिंशद्योजनविस्तीर्णं शतयोजनमायतम् ।**
**त्रिकोणं कृष्णवर्णञ्च कामरूपमुदाहृतम् ॥ ३२ ॥**

कुलार्णव तन्त्र में कहा भी है—हे महेश्वरि ! कामरूप क्षेत्र व्यक्त (प्रगट) और गुप्त (अप्रगट) भेद से दो प्रकार का कहा गया है । पूर्व में करतोया नदी से प्रारम्भ कर दिक्करवासिनी पर्यन्त तीस योजन चौड़ा और सौ योजन लम्बा कहा गया है । इस प्रकार का त्रिकोण और काले वर्णों वाला कामरूप क्षेत्र बतलाया गया है ॥ ३१-३२ ॥

द्विविधः कामरूपः

**व्यक्तं तत्रैव विज्ञेयं गुप्तञ्चैव गृहे गृहे ।**
**व्यक्ताद् गुप्तं महापुण्यं लभ्यते साधकोत्तमैः ॥ ३३ ॥**

इसे व्यक्त कामरूप क्षेत्र कहा गया है । किन्तु गुप्तकाम रूप क्षेत्र प्रत्येक घर में है ऐसा समझना चाहिये । व्यक्त की अपेक्षा गुप्त अत्यन्त पुण्योत्पादक तीर्थ है जो साधकों को महापुण्य से प्राप्त होता है ॥ ३३ ॥

**देवीक्षेत्रं कामरूपं विन्द्यादन्यत्र तत्समम् ।**
**अन्यत्र विरला देवी कामरूपे गृहे गृहे ॥ ३४ ॥**

यह कामरूप क्षेत्र देवी क्षेत्र है । अन्य कोई इसकी समता नहीं कर सकता । देवी तो अन्यत्र कहीं-कहीं मन्दिर में ही रहती है, किन्तु कामरूप क्षेत्र में देवी प्रत्येक गृह में विराजमान है ॥ ३४ ॥

**ततः शतगुणा प्रोक्ता नीलकूटस्य मस्तके ।**
**ततोऽपि द्विगुणा प्रोक्ता सुमेरौ शिवलिङ्गके ॥ ३५ ॥**

कामरूप क्षेत्र की अपेक्षा सौगुना फल नीलकूट के मस्तक पर विराजमान देव का बतलाया गया है और उसका भी दूना फल सुमेरु पर्वत के शिवलिङ्ग में पूजा करने से प्राप्त होता है ॥ ३५ ॥

**ततोऽपि द्विगुणा प्रोक्ता शैलपुत्र्याश्च योनिषु ।**
**ततः शतगुणा प्रोक्ता कामाख्यायोनिमण्डले ॥ ३६ ॥**

उसका भी दूना फल शैलपुत्री की योनि में पूजा का है और उसका भी सौगुना फल कामाख्या के योनिमण्डल में पूजा करने से होता है ॥ ३६ ॥

**तत्समापि च सा पूजायोषितां योनिमण्डले ।**
**पीठानां परमं पीठं कामरूपं महाकुलम् ॥ ३७ ॥**

स्त्रियों के योनिमण्डल में पूजा करने से कामाख्या योनिमण्डल का फल समान रूप से प्राप्त होता है । सभी पीठों की अपेक्षा कामरूप महाकुल सर्वोत्तम कहा गया है ॥ ३७ ॥

**ततः शतगुणं प्रोक्तं कामाख्यायोनिमण्डलम् ।**
**यत्र कोटिगुणैः सार्द्धं माया महिषमर्दिनी ॥ ३८ ॥**

उससे भी सौगुना फल वाला कामाख्या योनिमण्डल है । इसमें करोड़ों गुना फल के साथ महिषमर्दिनी महामाया का निवास है ॥ ३८ ॥

**यत्पीठं ब्रह्मणो वक्त्रं गुप्तं सर्वसुखावहम् ।**
**यतो देवाश्च देव्यश्च मुनयश्चैव भावजाः ॥ ३९ ॥**
**सर्वेऽप्याविर्भवन्त्यत्र तेन गुप्तं महाकुलम् ।**

यह पीठ ब्रह्मदेव का मुख है और सर्वथा गुप्त तथा सर्वसुखावह है । जहाँ भाव द्वारा सभी देव तथा सभी देवियाँ उत्पन्न होती हैं । इस कारण वह महाकुल सर्वथा गुप्त है ॥ ३९-४० ॥

**कामाख्यायां महायोनौ पूजां यः कृतवान् सकृत्॥ ४० ॥**
**स चेह लभते कामान् परत्र शिवतां व्रजेत् ।**
**अत्र यत्क्रियते पूजा सकृद्वा साधकेन च ॥ ४१ ॥**
**विहाय सर्वपीठानि तस्य देहे वसेत् शिवा ।**
**अथ वक्ष्यामि सामान्य पूजायाः क्रममुत्तमम् ॥ ४२ ॥**

जिसने कामाख्या रूप महायोनि की एक बार भी पूजा कर ली है । वह इस लोक में अपनी सारी कामनायें प्राप्त कर लेता है तथा मरने के बाद परलोक में साक्षात् शिव हो जाता है । साधक एक बार भी यदि वहाँ पूजा कर लिया तो महाभगवती शिवा समस्त पीठों को छोड़कर उसके शरीर में ही निवास करने लगती हैं । अब सामान्य पूजा का सर्वश्रेष्ठ क्रम कहता हूँ ॥ ४० - ४२ ॥

सामान्यपूजाक्रमः

**आदावृष्यादिकन्यासः करशुद्धिस्ततः परम् ।**
**अङ्गुलीव्यापकन्यासौ हृदादिन्यास एव च ॥ ४३ ॥**

साधक सर्वप्रथम ऋष्यादि न्यास करे, इसके बाद हस्तप्रक्षालन कर करशुद्धि करे । तदनन्तर अङ्गुलीन्यास, व्यापकन्यास तथा हृदयादिन्यास करे ॥ ४३ ॥

**तालत्रितयदिग्बन्धः प्राणायामस्ततः परम् ।**
**ध्यानं पूजा जपश्चेति सर्वतन्त्रेष्वयं विधिः ॥ ४४ ॥**

तीन ताल देकर दिग्बन्धन करे । तदनन्तर प्राणायाम, फिर क्रमशः ध्यान, पूजा और जप करे । सभी तन्त्रों में सामान्य पूजा का यह क्रम है ॥ ४४ ॥

**जपार्थं सर्वमन्त्राणां विन्यसेत्तु लिपिं विना ।**

**कृतञ्च निष्फलं विद्यात् तस्मादादौ लिपिं न्यसेत् ॥ ४५ ॥**

सभी मन्त्रों के जप में भूतलिपि का न्यास किये बिना जो जप किया जाता है वह निष्फल हो जाता है, इसलिये सर्वप्रथम भूतलिपि न्यास अवश्य करे ॥ ४५ ॥

**शिवाबलिकथनम्**

**अथातः सम्प्रवक्ष्यामि शिवाया बलिमुत्तमम् ।**
**न ददाति बलिं यस्तु शिवायाः शिवताप्तये ॥ ४६ ॥**
**स पापिष्ठौ नाधिकारी कुलदेव्यास्तु पूजने ।**
**पशुरूपां शिवां देवीं यो नार्चयति निर्जने ॥ ४७ ॥**
**शिवारावेण तस्यास्तु सर्वं नश्यति निश्चितम् ।**
**पूजा जपविधानानि यत्किञ्चित् सुकृतानि च ॥ ४८ ॥**
**गृहीत्वाशापमासाद्य शिवा रोदिति निर्जने ।**
**अवश्यमन्नपानेन नियतं तोषयेच्छिवाम् ॥ ४९ ॥**

**बलिदान प्रयोग**—अब इसके बाद शिवा भगवती के बलिदान का प्रकार कहता हूँ । जो शिवता प्राप्ति के लिये महाभगवती शिवा को बलि प्रदान नहीं करता वह महापापी है । कुलदेवी के पूजन में उसका अधिकार नहीं है । जो साधक निर्जन वन में पशुरूपा शिवा (शृगाली) का पूजन अर्चन नहीं करता शिवा राव (शृगाली का फेत्कार शब्द) के साथ उसके किये गये समस्त जप विधान नष्ट हो जाते हैं । शिवा उसके यत्किञ्चित् पुण्य को लेकर उसे शाप देकर उस निर्जन वन में रोने लगती है । इसलिये अन्न पानादि द्वारा उन शिवा भगवती को साधक अवश्य सन्तुष्ट करे ॥ ४६-४९ ॥

**एकया भुज्यते यत्र शिवायाश्चैव निश्चितम् ।**
**तदैव सर्वशक्तीनां प्रीतिः परमदुर्लभा ॥ ५० ॥**

यदि एक भी शिवा (शृगाली) निश्चित रूप से भोजन कर लेती है, तो उसी समय साधक से सभी शक्तियाँ प्रसन्न हो जाती हैं, जो अन्य सबके लिये अत्यन्त दुर्लभ कहा गया है ॥ ५० ॥

**पशुशक्तिर्नरशक्तिः पक्षिशक्तिस्तु सर्वदा ।**
**पूजिता विगुणं कर्म सगुणं साधयेद् यतः ॥ ५१ ॥**
**तेन सर्वप्रयत्नेन कर्तव्यं पूजनं महत् ।**
**राजादिभयमापन्ने ग्रहादिभयमेव च ॥ ५२ ॥**
**शुभाशुभानि कर्माणि विचिन्त्य बलिमाहरेत् ।**

यतः पशुशक्ति, नरशक्ति और पक्षिशक्ति सर्वदा पूजित होने पर साधक के विकृत कर्मों को भी सगुण बना देती है । इसलिए राजादि द्वारा भय उपस्थित होने पर सभी प्रयत्नों से उनका पूजन करना ही चाहिये अथवा ग्रहादिमय भय उपस्थित होने पर साधक शुभ और अशुभ कर्म का विचार कर भगवती के लिये बलि प्रदान करे ॥ ५१-५३ ॥

**बिल्वमूले प्रान्तरे वा श्मशाने वापि साधकः ॥ ५३ ॥**
**मांसप्रधानं नैवेद्यं सन्ध्याकाले निवेदयेत् ।**
**गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि ॥ ५४ ॥**
**शुभाशुभं फलं व्यक्तं ब्रूहि गृह्ण बलिं तव ।**
**एवमुच्चार्य दातव्यो बलिः कुलजनप्रियः ॥ ५५ ॥**

बिल्वमूल में सर्वथा एकान्त में श्मशान में सन्ध्या काल में मांसप्रधान बलि इस श्लोक मन्त्र से निवेदन करे—

गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि ।
शुभाशुभं फलं व्यक्तं ब्रूहि गृह्ण बलिं तव ॥

कुलजनप्रिय द्रव्य रूप इस मन्त्र का उच्चारण कर भगवती को बलि प्रदान करे ॥ ५३-५५ ॥

**कालीकालीति वक्तव्यस्तत्रोमा शिवारूपिणी ।**
**पशुरूपा समायाति परिवारगणैः सह ॥ ५६ ॥**

इसके बाद 'काली-काली' इतना शब्द और कहे, फिर तो शिवस्वरूपिणी उमा पशुरूप धारण कर अपने परिवार गणों के साथ साधक के समक्ष स्वयं उपस्थित हो जाती हैं ॥ ५६ ॥

**भक्त्वा रौति यदैशान्यां मुखमुत्तोल्य सुस्वरा ।**
**तदैव मङ्गलं तस्य नान्यथा साधकस्य च ॥ ५७ ॥**

बलि भोजन करने के पश्चात् यदि वह शिवा (शृगाली रूपा उमा) ईशानकोण में ऊपर मुख कर सुस्वर से रोती है । तब उससे साधक का मङ्गल समझना चाहिये, अन्यथा नहीं ॥ ५७ ॥

**यदि न भुज्यते तत्र तदा नैव शुभं भवेत् ।**
**नित्ये नैमित्तिके काम्ये बलिं दद्यात् प्रयत्नतः ॥ ५८ ॥**

यदि वह बलि भोजन नहीं करती तो साधक का कल्याण नहीं समझना चाहिये, नित्य, नैमित्तिक, काम्य कर्मों में प्रत्यनपूर्वक बलि देनी चाहिये ॥ ५८ ॥

कुलपूजाविधानम्

**अति गुप्तेन कर्तव्यं बलिदानं शुभावहम् ।**
**कुलपूजां प्रवक्ष्यामि यथाशास्त्रविधानतः ॥ ५९ ॥**

यतः यह बलिदान शुभकारी होता है अतः अत्यन्त गुप्त रूप से करना चाहिये। अब शास्त्रों में जिस प्रकार कुलपूजा का विधान है उसे कहता हूँ ॥ ५९॥

कुलागमे

**यथा कुलवारे कुलाष्टम्यां चतुर्दश्यां विशेषतः ।**
**कुलतिथौ कुलर्क्षे च कुलपूजां समाचरेत् ॥ ६० ॥**

कुलागमतन्त्र में कही गई विधि—कुलवार में, कुलाष्टमी एवं चतुर्दशी विशेषकर कुलतिथि तथा कुलनक्षत्रों में कुलपूजा करनी चाहिये ॥ ६० ॥

**योगिनीपूजनं यत्र प्रधानं कुलपूजनम् ।**
**यथा विष्णुतिथौ विष्णुः पूजितो वाञ्छितप्रदः ॥ ६१ ॥**
**तथा कुलतिथौ देवी पूजिता वरदायिनी ।**
**नित्यश्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम् ॥ ६२ ॥**
**तथैव कौलिकानाञ्च नित्यता कुलपूजने ।**
**एकरात्रं द्विरात्रं वा नहि चेत् कुलपूजनम् ॥ ६३ ॥**
**तदा तं साधकं त्यक्त्वा लयमेष्यति चण्डिका ।**
**कुलपूजासमं नास्ति पुण्यमन्यज्जगत्त्रये ॥ ६४ ॥**

जिसमें योगिनी पूजन प्रधान होता है वही कुलपूजन कहा जाता है जिस प्रकार विष्णुतिथि (एकादशी) में पूजा किये जाने पर विष्णु वाञ्छित फल प्रदान करते हैं उसी प्रकार कुलतिथि में पूजा किये जाने पर देवी वर प्रदान करती है जिसका प्रकार नित्यकर्म में, नित्यश्राद्ध, सन्ध्यावन्दन तथा पितृतर्पण नित्य है। उसी प्रकार कौलिकों के लिये कुलपूजन नित्यकर्म है। यदि एक रात या दो रात में कुलपूजा नहीं की गई तो उस साधक का परित्याग कर चण्डिका अन्तर्हित हो जाती है। कुलपूजा के समान पुण्यकर्म तीनों जगत् में नहीं है ॥ ६१-६४ ॥

**तस्माद् यः पूजयेद् भक्त्या भुक्तिमुक्त्योः स भाजनम् ।**
**अनधीतोऽप्यशास्त्रज्ञो गुरुभक्तो दृढव्रतः ॥ ६५ ॥**
**कुलपूजारतो यस्तु स मे प्रियतरो भवेत् ।**
**इच्छासिद्धिफलं दद्यात् पूजिता सुवधूरिव ॥ ६६ ॥**

इसलिये जो भक्तिपूर्वक कुलपूजा करता है, वह भोग और मोक्ष दोनों का

भाजन बन जाता है। जिसने अध्ययन नहीं किया, जिसे शास्त्र का ज्ञान नहीं है, किन्तु यदि वह गुरुभक्त, दृढ़व्रत, और कुलापूजा करता है तो हे भैरव! वह मेरा अत्यन्त प्रिय भक्त है। भगवती चण्डिका उसे वाञ्छानुकूल फल प्रदान करती है। जिस प्रकार उत्तम वधू की पूजा वाञ्छा प्रदान करती है ॥ ६५-६६ ॥

**अपूजिता यदा देवी दुःखदा कुवधूरिव ।**
**कुलपूजान्तरायं तु यः करोति हि दुर्मतिः ॥ ६७ ॥**
**स याति नरके घोरे एकविंशतिभिः कुलैः ।**
**विगुणं यत्र यद्यत् स्यात् सगुणं कुलपूजनात् ॥ ६८ ॥**

किन्तु यदि देवी की पूजा नहीं की जाती तो वह कुत्सित वधू के समान दुःख प्रदान करती है। जो दुष्ट कुल पूजा में बाधा उत्पन्न करता है, वह अपनी २१ पीढ़ी के साथ घोर नरक में जाता है। जो कार्य सर्वथा विगुण एवं विकृत है, वे सभी कुलपूजन के प्रभाव से गुणयुक्त हो जाते हैं ॥ ६७-६८ ॥

**कुलावलोकनं चेत् स्यात् कुतः प्रोक्षणमार्जनम् ।**
**क्व स्नानं क्व च वा शुद्धिः क्व च न्यासविशोधनम् ॥ ६९ ॥**

यदि कुलपूजा का दर्शन हो गया, तो प्रोक्षण, मार्जन, स्नान, शुद्धि, न्यास तथा विशोधन की आवश्यकता नहीं रह गई ॥ ६९ ॥

**तस्मात् सर्वप्रयत्नेन कुलपूजां समाचरेत् ।**
**लभते सर्वसिद्धिञ्च नात्र कार्या विचारणा ॥ ७० ॥**

इसलिये सभी प्रयत्न द्वारा कुलपूजा अवश्य करे। समस्त सिद्धि प्राप्त हो जाती है, इसलिये कुलपूजा में विचार की आवश्यकता नहीं ॥ ७० ॥

### कुलवारतिथिनक्षत्रादिविधानम्

**कथ्यते कुलवारादिनिर्णयः सिद्धिहेतवे ।**
**द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम् ॥ ७१ ॥**

अब कुल सम्प्रदायोक्त वार तिथि नक्षत्रादि का विधान करते हैं। द्वितीया, दशमी षष्ठी—ये तिथियाँ कुलाकुल (शिवशक्त्यात्मक) कही गई हैं ॥ ७१ ॥

**विषमाश्चाकुलाः सर्वाः शेषाश्च तिथयः कुलाः ।**
**रविः सोमो गुरुः शौरिश्चत्वारश्चाकुला मताः ॥ ७२ ॥**

सम सञ्ज्ञक तिथियाँ कुल कही गई हैं। शेष अकुल कही गई हैं। रवि सोम गुरु और शनैश्चर—ये अकुल माने गये हैं ॥ ७२ ॥

**भौमशुक्रौ कुलाख्यौ च बुधवारः कुलाकुलः ।**

**वारुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतम् ॥ ७३ ॥**
**कुलानि समधिष्ठानि शेषाण्यकुलभानि च ।**
**तिथिवारे च नक्षत्रे चाकुले स्थायिनोऽजयः ॥ ७४ ॥**
**कुलर्क्षे जयिनो नित्यं साम्यञ्चैव कुलाकुले ।**
**पौर्णमास्यन्तमासेन तिथिकृत्यं विधीयते ॥ ७५ ॥**
**महाष्टम्येव विज्ञेया कुलाष्टमी सुसिद्धिदा ।**
**कथितः कुलवारादिनिर्णयः सिद्धिहेतवे ॥ ७६ ॥**

मङ्गल और शुक्र कुल (शक्ति) दिन है और बुधवार कुलाकुल है । वारुण () आर्द्रा, अभिजित् और मूल कुलनक्षत्र हैं, उससे शेष अकुल सञ्ज्ञक नक्षत्र हैं । अकुल सञ्ज्ञक तिथि एवं बार और नक्षत्रों में स्थायी पराजित होता है, कुल सञ्ज्ञक नक्षत्र विजय देने वाले हैं । कुलाकुल में दोनों बराबर हैं । पौर्णमासी के अन्त तक रहने वाले मास के हिसाब से तिथियों का कृत्य कहा गया है । महाष्टमी (नवरात्र की अष्टमी) कुलाष्टमी है, जो सर्व प्रकार की सिद्धि देती है । सिद्धि के लिये हमने यहाँ तक कुलवार और कुलतिथि इत्यादि का कथन किया ॥७३-७६॥

**स्नानं पाद्यार्घ्यपर्यन्तं स्वकल्पोक्तं विधाय च ।**
**लाक्षारसतद्वदहे बीरस्तूलिकां रचयेत्ततः ॥ ७७ ॥**

इसके बाद साधक अपने सम्प्रदायानुसार स्नान, पाद्य, अर्घ्य आदि की सामग्री एकत्रित करे । वीर साधक लाक्षारस के समान लाल वर्ण की तूलिका (रूई की गद्दी) उसी दिन निर्माण करे ॥ ७७ ॥

### कुलकन्यानिरूपणम्

**नटी कापालिकी वेश्या रजकी नापिताङ्गना ।**
**ब्राह्मणी भद्रकन्या च तथा गोपालकन्यका ॥ ७८ ॥**
**मालाकारस्य कन्या च नवकन्याः प्रकीर्तिताः ।**
(यद्वा) **चण्डाली चर्मकारी च मागधीपुक्कसी तथा ॥ ७९ ॥**
**श्वपची खण्डिका चैव कैवर्त्ती विटयोषितः ।**
**कुलाष्टकं तु कथितमकुलाष्टकमुच्यते ॥ ८० ॥**

नट की कन्या, कापालिक की कन्या, वेश्या की कन्या, धोबी की कन्या, नाऊन की कन्या, ब्राह्मणी, भद्र (मल्लाह) की कन्या तथा गोपाल (यादव) की कन्या और माली की कन्या—इस प्रकार नव कन्यायें कही गई हैं । अथवा चण्डाली, चर्मकारी, मागधी, पुक्कसी (नीच), श्वपची, खण्डिका, कैवर्त्ती तथा विट् (धूर्त परस्त्रीगामी) की कन्यायें कुलाष्टक कन्यायें कही गई हैं । अब अकुलाष्टक कन्यायें कहता हूँ ॥ ७८-८० ॥

अकुलाष्टक कन्याकथनम्

**कल्मषी चैव शौण्डी च शस्त्रजीवी च राक्षसी ।**
**गोमुखी रजकी शिल्पी बेनकी च तथाष्टमी ॥ ८१ ॥**

कल्मषी, शौण्डी (कलवारी), शास्त्रजीवी, राक्षसी, गोमुखी, रजकी, शिल्पी, बेनकी (ढरकारिन)—ये आठ कन्यायें अकुलाष्टक हैं ॥ ८१ ॥

(यद्वा) **गणिका शौण्डिकी चैव कैवर्त्ती रजकी तथा ।**
**तन्तुकारी चर्मकारी मातङ्गी पुक्कसी तथा ॥ ८२ ॥**

(अथवा) गणिका, शौण्डिकी (कल्वारिन्), कैवर्त्ती (मल्लाहिन), रजकी (धोबिन), तन्तुकारी (जुलाहिन), चर्मकारी (चमाइन), मातङ्गी (चाण्डालिन) एवं पुक्कसी (पञ्चमवर्ण की अत्यन्त नीच)—ये आठ कन्यायें अकुलाष्टक कही गई हैं ॥ ८२ ॥

(यद्वा) **नटी कापालिकी वेश्या पुक्कसी योगिनी तथा ।**
**रजकी रञ्जकी चैव सैरिन्ध्री च विलासिनी ॥ ८३ ॥**
**खटिका घटिका चैव तथा गोपालकन्यका ।**
**विशेषवैदग्ध्ययुताः सर्वा एव कुलाङ्गनाः ॥ ८४ ॥**
**उक्तजात्यङ्गनाभावे भैरवीं तद्गतां यजेत् ।**

अथवा नटी, कापालिकी, वेश्या, पुक्कसी (चाण्डाल से भी नीच), योगिनी, रजकी, रञ्जकी (रङ्गने वाली), सौरिन्ध्री (दासी), विलासिनी, खटिका (खटिक की कन्या), घटिका, गोपाल कन्या, अथवा विशेष रूप से कामभाव प्रगट करने वाली सभी कुलाङ्गनायें अकुलाष्टक कही गई हैं। यदि ऊपर बतलायी गई जाति वाली कन्यायों का अभाव हो, तो साधक केवल भैरवी की उपासना करने वाली शक्ति की पूजा करे ॥ ८३-८५ ॥

शक्तिपूजाविधिः

**मन्त्रतन्त्रसमायुक्ताः समयाचारपालिकाः ॥ ८५ ॥**
**अवीराश्च व्रतपरा योगमुद्राधरास्तथा ।**
**गुरुभक्ता देवभक्ता घृणालज्जाविवर्जिताः ॥ ८६ ॥**
**सङ्गोपनरताः प्रायस्तरुण्यः सिद्धिदायिकाः ।**
**दीक्षिता मनुना येन केन मूलेन वा पुनः ॥ ८७ ॥**

मन्त्र-तन्त्र को जानने वाली, कौलधर्म के समयों तथा आचारों का पालन करने वाली, अवीरा (पति पुत्रहीना) व्रत परायणा, योग की मुद्रा धारण करने वाली, गुरुभक्ता, देवभक्ता, घृणा और लज्जारहित, अपने को प्रगट न करने वाली ऐसी तरुणी स्त्रियों का पूजन सिद्धि प्रदान करता है अथवा जिस किसी मन्त्र द्वारा

दीक्षित तरुणी की पूजा से सिद्धि प्राप्त होती है ॥ ८५-८७ ॥

### वर्ज्या नारीकथनम्

तत्र वर्ज्या च या नारी कथ्यते तन्त्रमार्गतः ।
विकृतां विधवां व्यङ्गीं वृद्धाञ्चैव तपस्विनीम् ॥ ८८ ॥
हीनाङ्गीं हीनवसनां कुटिलां कलहप्रियाम् ।
लोकवेदविरुद्धाञ्च तथा निष्ठुरभाषिणीम् ॥ ८९ ॥
मिथ्याप्रलापनिरतां मिथ्याचारमदोत्सुकाम् ।
ईर्ष्यादिदोषसंयुक्तां प्रमत्ताञ्च विवर्जयेत् ॥ ९० ॥

**वर्ज्य कन्यायें**—अब जिस प्रकार की नारियाँ पूजा में वर्जित हैं, उन्हें तन्त्र मार्ग के अनुसार कहता हूँ । विकृत (कुरूपा), विधवा, टेढे अङ्ग वाली, वृद्धा, तपस्विनी, हीनाङ्गी, वस्त्र से रहित (नङ्गी), कुटिल, झगड़ालू, लोक वेद से विरुद्ध आचरण करने वाली, निष्ठुरभाषिणी, मिथ्या प्रलाप करने वाली (झूठी), मिथ्या आचरण करने वाली, मद्य के नशे में धुत, ईर्ष्यालु और पागल स्त्रियों की पूजा कभी नहीं करनी चाहिये ॥ ८८-९० ॥

विकृतास्यामदीक्षितां सविकल्पकमानसाम् ।
वर्षीयसीं पापरतां क्रूरामत्यन्तलोलुपाम् ॥ ९१ ॥
अतर्कमानसां दीनां वर्जयेत् साधकोत्तमः ।
ततः समानयेद् वीरः पूर्वोक्ताष्टकुलोद्भवाम् ॥ ९२ ॥

विकृत मुख वाली, दीक्षारहित, नित्य सन्देह करने वाली, अत्यन्त वृद्धा, पापाचारिणी, अत्यन्त निर्दयी, अत्यन्त लोभ करने वाली, अतर्कमानसा (जिनका विचार ज्ञात न हो) तथा दीन स्वभाव वाली स्त्रियों को उत्तम साधक पूजा में वर्जित करे । इसके बाद विज्ञ साधक पूर्व में बतलायी गई (७८-८०) अष्टकुल वाली कन्याओं को ले आवे ॥ ९१-९२ ॥

अक्रूराञ्च सुरूपाञ्च सालङ्कारां सुदीक्षिताम् ।
घृणाह्रींवर्जितां शान्तां शिववाक्यदृढव्रताम् ॥ ९३ ॥
गुरुदेवपदे भक्तां युवतीं साधिकां पराम् ।
स्वकान्तां परकान्तां वा विदग्धां चारुहासिनीम् ॥ ९४ ॥

जो क्रूरता से रहित, स्वरूपवती, सालङ्काराः, दीक्षा प्राप्त की हुई, घृणा एवं लज्जा रहित, शान्त और शिववाक्य (=कौलाचार) में निष्ठा रखने वाली हों, गुरु और देवता के चरणों में भक्ति रखने वाली हो, युवती एवं उत्कृष्ट साधिका हों, इस प्रकार की चाहे अपनी स्त्री, अथवा पराई स्त्री, अथवा मनोहर हंसने वाली

विदग्धा वेश्या हो, उसे पूजा के लिये ले आवे ॥ ९३-९४ ॥

**तस्यै पाद्यादिकं दत्त्वा स्थापयेत्तूलिकोपरि ।**
**साधयेत् सिद्धिमतुलां साधकः स्थिरमानसः ॥ ९५ ॥**

साधक उसे पाद्यादि प्रदान कर रूई के गद्दे पर स्थापित करे और स्थिर चित्त हो उसी से अपनी सिद्धि साधन करे ॥ ९५ ॥

**पूजाकाले शुभाः प्रोक्ताः शक्तयः सहजा बुधैः ।**
**तस्या देहे स्वकल्पोक्तन्यासजालं प्रविन्यसेत् ॥ ९६ ॥**

बुद्धिमानों ने पूजा कार्य में सहज (अपनी पत्नी) शक्ति की प्रशंसा की है । उसके शरीर में अपने सम्प्रदायानुसार न्यास करे ॥ ९६ ॥

**देवी परा भगवती जगदाधाररूपिणी ।**
**ब्रह्मविष्णुशिवानाञ्च योनिरुत्पत्तिकारिणी ॥ ९७ ॥**
**सा योनिः सर्वभूतानां सृष्टिस्थितिलयात्मिका ।**
**गुणत्रयसमापन्ना वाक्यत्रयविभाविनी ॥ ९८ ॥**
**शृङ्गाररूपमापन्ना त्रिकोणाकारतां गता ।**
**भगरूपेण सर्वेषां भूतानां देहमध्यगा ॥ ९९ ॥**
**शिवसन्निधिमास्थाय रत्यर्थं लिङ्गरूपिणी ।**
**सर्वेषां जननी सा तु रत्यर्थं रमणी परा ॥ १०० ॥**

जगत् की आधारभुता, परा स्वरूपा, देवी भगवती, ब्रह्मा, विष्णु तथा शिव की उत्पत्ति करने वाली योनि स्वरूपा है । वही योनि सम्पूर्ण प्राणीमात्र की सृष्टि स्थिति तथा लय करने वाली है । सत्त्व, रज और तम तीनों गुणों से युक्त है । मध्यमा पश्यन्ती और वैखरी वाक्य स्वरूपा है । वह शृङ्गार रूप धारण कर त्रिकोण के आकार में हो गई है तथा त्रिकोणाकार भगरूप से समस्त प्राणियों के शरीर में निवास करती है । शिव सन्निधि प्राप्त कर वही रति के लिये लिङ्ग रूप धारण कर लेती है । वह सभी प्राणियों की माता है और रति के लिये परा स्वरूपा होकर रमणी भी हो जाती है ॥ ९७-१०० ॥

### योनिप्रशंसा

**पुंसो योनिः स्त्रियो योनिर्भगदा भगरूपिणी ।**
**यस्यां तु जायते जन्तुस्तस्यां चान्ते प्रलीयते ॥ १०१ ॥**

वही पुरुष के जन्म का कारण है । वही स्त्री के जन्म का कारण है । सौभाग्य देने वाली तथा भगरूपिणी है । उसी में जन्तु का जन्म होता है तथा उसी में वह लीन भी हो जाता है ॥ १०१ ॥

**त्रिशक्तिसहिता योनिर्ब्रह्मविष्णुशिवात्मिका ।**
**देवी भगवती ख्याता भगवांश्च सदाशिवः ॥ १०२ ॥**

यह योनि ब्रह्मा, विष्णु तथा शिव की जन्मदात्री होने के कारण त्रिशक्ति के सहित है । यह देवी रूप में भगवती आदि नामों से कही जाती है तथा सदाशिव रूप में भगवान् (ऐश्वर्य सम्पन्न) नाम से कहे जाते हैं ॥ १०२ ॥

**एकैव परमा देवी भगलिङ्गस्वरूपिणी ।**
**सर्वेषां योनिरूपेण सा देवी भगरूपिणी ॥ १०३ ॥**

यही एक परा देवी भग लिङ्ग दोनों स्वरूपों वाली है । सभी प्राणियों का जन्म देने के कारण वह देवी भगरूपिणी भी है ॥ १०३ ॥

**योनिस्था योनिमध्यस्था योनिरूपस्वरूपिणी ।**
**त्रिकोणा सा त्रिगुणा सा त्रिदैवतमयी परा ॥ १०४ ॥**

वह योनि के अन्त में तथा मध्य में रहने वाली योनिस्वरूपिणी है और वही त्रिकोण; वही त्रिगुणा है तथा वही त्रिदेवतामयी परा है ॥ १०४ ॥

**संयोगे चातुरी याया पूर्णता पञ्चमी स्मृता ।**
**तस्माद्योनौ यजेद् देवीं नित्यमानन्दरूपिणीम् ॥ १०५ ॥**

वही संयोग के लिये आतुर रहती है । संयोग के पूर्ण हो जाने पर पञ्चमी हो जाती है । इसलिये आनन्दस्वरूपिणी उस परा देवी का यजन योनि में ही करना चाहिये ॥ १०५ ॥

**प्रक्षाल्य गन्धतोयेन धूपयित्वाऽम्बुधूपकैः ।**
**सिन्दूररजसा चैव योनौ चक्रं समालिखेत् ॥ १०६ ॥**

साधक गन्धयुक्त जल से योनि का प्रक्षालन करे और धूप से धूपित करे । फिर उस योनि में सिन्दूर के रज से चक्र लिखे ॥ १०६ ॥

**स्वकल्पोक्तविधानेन तत्र देवीं प्रपूजयेत् ।**
**सर्वयोषिन्मये देवि सर्वकामार्थदायिनि ॥ १०७ ॥**
**कामेश्वरि कामभूते कामुके सन्निधिं कुरु ।**
**अनेनाऽऽवाहयेद् देवीं स्वीयक्रममथाचरेत् ॥ १०८ ॥**

उस चक्र में अपने सम्प्रदायानुसार देवी का पूजन करे । 'सर्वयोषिन्मये..... सन्निधिं कुरु' पर्यन्त मन्त्र पढ़कर चक्र में देवी का आवाहन करे । तदनन्तर अपने क्रम के अनुसार पूजा करे ॥ १०७-१०८ ॥

पञ्चमीपूजने चैव वर्ज्यं स्वकुलमन्त्रकम् ।
यावत् पुंसां प्रसङ्गोऽत्र तावत् स्वैरं विवर्जयेत् ॥ १०९ ॥

पञ्चमी के पूजन में अपने सम्प्रदायभूत कुल मन्त्रों का उच्चारण न करे । जब तक पुरुष के साथ प्रसङ्ग रहे, तब तक स्वेच्छाचार वर्जित रखे ॥ १०९ ॥

यदि शङ्कास्पदं तत्र तदा देवीं विसर्जयेत् ।
प्रमादाद्यदि पापात्मा तत्सङ्गमनुगच्छति ॥ ११० ॥
तदा कुष्ठीभवेत् सद्यो निन्दितां सिद्धिमाप्नुयात् ।
मद्यं मांसं विना यस्तु कुलपूजां समाचरेत् ॥ १११ ॥
जन्मान्तरसहस्रस्य सुकृतं तस्य नश्यति ।
विधिवत् पूजनं कृत्वा जप्त्वा स्तुत्वा प्रणम्य च ॥ ११२ ॥
तस्यां यन्त्रं समालिख्य पुनस्तस्यां निवेदयेत् ।
यावत् सा विह्वला न स्यात्तावत्तां न विसर्जयेत् ॥ ११३ ॥

यदि शङ्का हो तो उसी समय देवी का विसर्जन कर देवे । यदि पापबुद्धि से वह पापात्मा साधक उसके साथ सङ्गम करता है । तब वह सद्यः कोढ़ी हो जाता है और निन्दित सिद्धि प्राप्त करता है । जो मद्य, मांस के बिना कुलपूजा करता है; उसके हजारों जन्म के किये गये समस्त पुण्य नष्ट हो जाते हैं । इस प्रकार विधिवत् पूजन, जप, स्तुति तथा प्रणाम कर उसी में यन्त्र लिखना चाहिए । फिर उसी में समर्पण करना चाहिए । जब तक यह देवी विह्वल न हो जाय, तब तक उसका विसर्जन नहीं करना चाहिए ॥ ११०-११३ ॥

विसर्जनं विधायैव शक्तीच्छा यदि विद्यते ।
तस्या आज्ञां गृहीत्वा तु रेत् मै नं र्व च वन् थु पू ॥ ११४ ॥
ततो जपेत् स्त्रियं गच्छन् शेषं पूर्ववदाचरेत् ।
मद्यं मांसं तथा चान्यं यत्किञ्चित् कुलसाधनम् ॥ ११५ ॥
तस्यै दत्त्वा ततः शेषं गुरवे विनिवेद्य च ।
तदनुज्ञां मूर्ध्नि कृत्वा शेषमात्मनि योजयेत् ॥ ११६ ॥

यदि शक्ति की इच्छा हो तो उसका विसर्जन कर देवे । फिर उसकी आज्ञा लेकर (पूर्ववत् मैथुनं चरेत्) पूर्ववत् स्त्री सङ्गम करते हुये जप करे । शेष कार्य पूर्व की तरह सम्पादन करे । कुल पूजा के साधनभूत मद्य, मांस तथा अन्य यत्किञ्चिद् पदार्थ पहले उस शक्ती को देवे । फिर गुरु को निवेदन करे । फिर उनकी आज्ञा लेकर स्वयं अपने ग्रहण करे ॥ ११४-११६ ॥

शक्तये दक्षिणां दत्त्वा सोऽहं सच्चिन्तयेत्ततः ।

**कुलपूजनमेतत्तु कथितं सिद्धिहेतवे ॥ ११७ ॥**

तदनन्तर शक्ति को दक्षिणा देकर 'सोऽहम्' मन्त्र का ध्यान करे । इस प्रकार सिद्धि प्राप्त करने के लिये हमने कुल पूजन का विधान कहा ॥ ११७ ॥

देवीयजनविधानम्

**सङ्क्षेपयजनं वक्ष्ये यथा तन्त्रानुसारतः ।**
**आलिङ्गनं भवेन्न्यासश्चुम्बनं ध्यानमीरितम् ॥ ११८ ॥**

**देवी यजन निरूपण**—अब कौलागमतन्त्र के अनुसार संक्षेप में देवीयजन का प्रकार आपको कहता हूँ । देवी का आलिङ्गन, न्यास, चुम्बन एवं ध्यान बतलाया गया है ॥ ११८ ॥

**शीत्कारं यजनं प्रोक्तं नैवेद्यं नखलेखनम् ।**
**पानं जिह्वामृतं ज्ञेयं रमणञ्च जपो भवेत् ॥ ११९ ॥**

देवी का शीत्कार यजन है । स्तनादि पर नखक्षतादि नैवेद्य है । जिह्वामृत का स्वाद पान है और रमण यह जप कहा गया है ॥ ११९ ॥

**आनन्दस्तवनं विद्धि रेतःपातो विसर्जनम् ।**
**अद्वैतज्ञानमाश्रित्य सदा देवीं समर्चयेत् ॥ १२० ॥**

रति में प्राप्त होने वाला आनन्द ही स्तुति है और रेतःपात विसर्जन है । इस प्रकार अद्वैतज्ञान का आश्रय लेकर सर्वदा देवी का अर्चन करे ॥ १२० ॥

**अश्वमेधशतेनापि ब्रह्महत्याशतेन वा ।**
**पुण्यपापैर्न लिप्यन्ते येषां ब्रह्म हृदि स्थितम् ॥ १२१ ॥**

जिनके हृदय में परब्रह्म विराजमान है, वे सौ अश्वमेध के पुण्य से तथा सैकड़ों ब्रह्महत्या के पाप से लिप्त नहीं होते ॥ १२१ ॥

**पृथिव्यां यानि कर्माणि जिह्वोपस्थनिमित्तकम् ।**
**जिह्वोपस्थपरित्यागी कर्मणा किं करिष्यति ॥ १२२ ॥**

इस पृथ्वी में जितने भी कर्म किये जाते हैं, उनमें जिह्वा और उपस्थ दो ही निमित्त माने गये हैं । किन्तु जिसने जिह्वा और उपस्थ का परित्याग कर दिया है । वह कर्म कर के भी क्या करेगा ? ॥ १२२ ॥

**तावत् कर्माणि कुर्वीत यावज्ज्ञानं न जायते ।**
**पूजाकोटिसमं स्तोत्रं स्तोत्रकोटिसमो जपः ॥ १२३ ॥**
**जपकोटिसमं ध्यानं ध्यानकोटिसमो लयः ।**

**नहि ध्यानात् परो मन्त्रो न देवस्त्वात्मनः परः ॥ १२४ ॥**

जब तक ज्ञान नहीं होता, तभी तक कर्म करने की आवश्यकता है। करोड़ों पूजा के समान स्तोत्र हैं, करोड़ों स्तोत्रों के समान जप है, करोड़ों जप के समान ध्यान है करोड़ों ध्यान के समान लय है। ध्यान से बढ़कर कोई मन्त्र नहीं और आत्मा को छोड़कर कोई देवता नहीं ॥ १२३-१२४ ॥

**नानुसन्धात् परा पूजा न हि तृप्तेः परं फलम् ।**
**मन्त्रोदकैर्विना सन्ध्यां जपहोमैर्विना तपः ॥ १२५ ॥**
**उपचारैर्विना पूजां योगी नित्यं समाचरेत् ।**
**देहो देवालयो देवि जीवो देवः सदाशिवः ॥ १२६ ॥**

ब्रह्मज्ञानी योगी बिना सामग्री सम्पादन के परा की पूजा कर लेता है और बिना तृप्त किये समस्त फल प्राप्त कर लेता है, बिना मन्त्र और बिना जल के सन्ध्या कर लेता है। किं बहुना, जप होम बिना किये ही उसका तप हो जाता है। बिना उपचार के ही वह समस्त पूजा कर लेता है। हे देवि! यह शरीर देवालय है, जीव देव है और सदाशिव है ॥ १२५-१२६ ॥

**त्यजेदज्ञाननिर्माल्यं सोऽहम्भावेन पूजयेत् ।**
**जीवः शिवः शिवो जीवः स जीवः केवलः शिवः॥ १२७ ॥**

योगी अज्ञान का निर्माल्य त्याग देवे और 'सोऽहं' भाव से भगवती परा की पूजा करे। जीव शिव है, शिव जीव है और वही जीव केवल शिव है ॥ १२७ ॥

**पाशबद्धः पशुः, पाशमुक्तः शिवः**

**पाशबद्धः पशुर्देवि पाशमुक्तः सदाशिवः ।**
**तुषेण बद्धो ब्रीहिः स्यात् तुषाभावे तु तण्डुलम् ॥ १२८ ॥**

हे देवि ! पाश से बद्ध पशु है। पाश से मुक्त सदाशिव है। जब तक तुष (भूसी) से युक्त है, तब तक ब्रीहि है। किन्तु जब वह तुष (भूसी) से रहित हो जाता है, तब केवल चावल कहा जाता है ॥ १२८ ॥

**कर्मबद्धः सदा जीवः कर्ममुक्तः सदाशिवः ।**
**ध्यायतां क्षणमात्रं वा श्रद्धया परमं त्विह ॥ १२९ ॥**
**यद्भवेत्तन्महापुण्यं तस्यान्तो नैव गम्यते ।**
**क्षणं ब्रह्माहमस्मीति यः कुर्यादात्मचिन्तनम् ॥**
**तत्सर्वं पातकं हन्यात्तमः सूर्योदये यथा ॥ १३० ॥**

जो कर्म में बँधा है वह जीव है, जो सर्वथा कर्म से मुक्त है वह सदाशिव है।

अत्यन्त श्रद्धा के साथ क्षणमात्र ध्यान करने वाले योगियों को जितना बड़ा पुण्य होता है, उसका अन्त नहीं होता । जो क्षणमात्र भी 'अहं ब्रह्मास्मि' का ध्यान करता है, वह ध्यान करने वाले का सारा पाप इस प्रकार नष्ट कर देता है, जैसे सूर्य का उदय संसार के सारे अन्धकार को नष्ट कर देता है ॥ १२९-१३० ॥

योगीन्द्रलक्षणम्

**स्नातं तेन समस्ततीर्थसलिलैः दत्ता च पृथ्वी द्विजे**
**नूनं तेन सुतर्पिताश्च पितरो देवाश्च सम्पूजिताः ।**
**यज्ञानाञ्च सहस्रमेवमखिलं तेनैव सर्वं कृतं**
**यस्य ब्रह्म विचारणे क्षणमपि प्राप्तञ्च धैर्यं मनः ॥ १३१ ॥**

ब्रह्म ध्यान में निमग्न जिस योगी का एक क्षण के लिये भी मन स्थिर हो गया, उसने समस्त तीर्थों के जल से स्नान कर लिया और समस्त पृथ्वी का दान ब्राह्मण को कर दिया । निश्चय ही उसके पितृगण भली प्रकार से तृप्त हो गये और उसने देवताओं का पूजन कर लिया । किं बहुना, उसने समस्त यज्ञ हजारों बार सम्पादन कर लिया ॥ १३१ ॥

**व्रतक्रतु तपस्तीर्थदानदेवार्चनादिषु ।**
**यत्फलं कोटिगुणितं तदेवाप्नोति तत्त्ववित् ॥ १३२ ॥**

तत्त्ववेत्ता योगी को व्रत, क्रतु, तप, तीर्थ, दान एवं देवार्चन के करने से जितना फल होता है उसका करोड़ गुना फल उसे ब्रह्मध्यान से स्वयं प्राप्त हो जाता है ॥ १३२ ॥

**उत्तमा सहजावस्था मध्यमा ध्यानधारणा ।**
**जपस्तुतिः स्यादधमा होमपूजाऽधमाधमा ॥ १३३ ॥**

सहजावस्था उत्तमा कही जाती है । ध्यान, धारणा मध्यमावस्था है । जप, स्तुति, अधमा तथा होम पूजा अधमाधमावस्था कही गई है ॥ १३३ ॥

**उत्तमा तत्त्वचिन्ता स्याज्जपचिन्ता तु मध्यमा ।**
**शास्त्रचिन्ताऽधमा ज्ञेया लोकचिन्ताऽधमाधमा ॥ १३४ ॥**

तत्त्व चिन्ता उत्तमा, जप चिन्ता मध्यमा, शास्त्र चिन्ता अधमा और लोक चिन्ता अधमाऽधमा जानना चाहिये ॥ १३४ ॥

**यो निन्दास्तुतिशीलेषु सुखदुःखारिबन्धुषु ।**
**समश्चेत् स तु योगीन्द्रो हर्षाहर्षविवर्जितः ॥ १३५ ॥**

जो निन्दा या स्तुति करने वालों में सुख-दुःख और शत्रु-बन्धु में हर्ष-द्वेष भाव

**नहि ध्यानात् परो मन्त्रो न देवस्त्वात्मनः परः ॥ १२४ ॥**

जब तक ज्ञान नहीं होता, तभी तक कर्म करने की आवश्यकता है। करोड़ों पूजा के समान स्तोत्र हैं, करोड़ों स्तोत्रों के समान जप है, करोड़ों जप के समान ध्यान है करोड़ों ध्यान के समान लय है। ध्यान से बढ़कर कोई मन्त्र नहीं और आत्मा को छोड़कर कोई देवता नहीं ॥ १२३-१२४ ॥

**नानुसन्धात् परा पूजा न हि तृप्तेः परं फलम् ।**
**मन्त्रोदकैर्विना सन्ध्यां जपहोमैर्विना तपः ॥ १२५ ॥**
**उपचारैर्विना पूजां योगी नित्यं समाचरेत् ।**
**देहो देवालयो देवि जीवो देवः सदाशिवः ॥ १२६ ॥**

ब्रह्मज्ञानी योगी बिना सामग्री सम्पादन के परा की पूजा कर लेता है और बिना तृप्त किये समस्त फल प्राप्त कर लेता है, बिना मन्त्र और बिना जल के सन्ध्या कर लेता है। किं बहुना, जप होम बिना किये ही उसका तप हो जाता है। बिना उपचार के ही वह समस्त पूजा कर लेता है। हे देवि! यह शरीर देवालय है, जीव देव है और सदाशिव है ॥ १२५-१२६ ॥

**त्यजेदज्ञाननिर्माल्यं सोऽहम्भावेन पूजयेत् ।**
**जीवः शिवः शिवो जीवः स जीवः केवलः शिवः॥ १२७ ॥**

योगी अज्ञान का निर्माल्य त्याग देवे और 'सोऽहं' भाव से भगवती परा की पूजा करे। जीव शिव है, शिव जीव है और वही जीव केवल शिव है ॥ १२७ ॥

पाशबद्धः पशुः, पाशमुक्तः शिवः

**पाशबद्धः पशुर्देवि पाशमुक्तः सदाशिवः ।**
**तुषेण बद्धो ब्रीहिः स्यात् तुषाभावे तु तण्डुलम् ॥ १२८ ॥**

हे देवि ! पाश से बद्ध पशु है। पाश से मुक्त सदाशिव है। जब तक तुष (भूसी) से युक्त है, तब तक ब्रीहि है। किन्तु जब वह तुष (भूसी) से रहित हो जाता है, तब केवल चावल कहा जाता है ॥ १२८ ॥

**कर्मबद्धः सदा जीवः कर्ममुक्तः सदाशिवः ।**
**ध्यायतां क्षणमात्रं वा श्रद्धया परमं त्विह ॥ १२९ ॥**
**यद्भवेत्तन्महापुण्यं तस्यान्तो नैव गम्यते ।**
**क्षणं ब्रह्माहमस्मीति यः कुर्यादात्मचिन्तनम् ॥**
**तत्सर्वं पातकं हन्यात्तमः सूर्योदये यथा ॥ १३० ॥**

जो कर्म में बँधा है वह जीव है, जो सर्वथा कर्म से मुक्त है वह सदाशिव है।

अत्यन्त श्रद्धा के साथ क्षणमात्र ध्यान करने वाले योगियों को जितना बड़ा पुण्य होता है, उसका अन्त नहीं होता । जो क्षणमात्र भी 'अहं ब्रह्मास्मि' का ध्यान करता है, वह ध्यान करने वाले का सारा पाप इस प्रकार नष्ट कर देता है, जैसे सूर्य का उदय संसार के सारे अन्धकार को नष्ट कर देता है ॥ १२९-१३० ॥

### योगीन्द्रलक्षणम्

**स्नातं तेन समस्ततीर्थसलिलैः दत्ता च पृथ्वी द्विजे**
**नूनं तेन सुतर्पिताश्च पितरो देवाश्च सम्पूजिताः ।**
**यज्ञानाञ्च सहस्रमेवमखिलं तेनैव सर्वं कृतं**
**यस्य ब्रह्म विचारणे क्षणमपि प्राप्तश्च धैर्यं मनः ॥ १३१ ॥**

ब्रह्म ध्यान में निमग्न जिस योगी का एक क्षण के लिये भी मन स्थिर हो गया, उसने समस्त तीर्थों के जल से स्नान कर लिया और समस्त पृथ्वी का दान ब्राह्मण को कर दिया । निश्चय ही उसके पितृगण भली प्रकार से तृप्त हो गये और उसने देवताओं का पूजन कर लिया । किं बहुना, उसने समस्त यज्ञ हजारों बार सम्पादन कर लिया ॥ १३१ ॥

**व्रतक्रतु तपस्तीर्थदानदेवार्चनादिषु ।**
**यत्फलं कोटिगुणितं तदेवाप्नोति तत्त्ववित् ॥ १३२ ॥**

तत्त्ववेत्ता योगी को व्रत, क्रतु, तप, तीर्थ, दान एवं देवार्चन के करने से जितना फल होता है उसका करोड़ गुना फल उसे ब्रह्मध्यान से स्वयं प्राप्त हो जाता है ॥ १३२ ॥

**उत्तमा सहजावस्था मध्यमा ध्यानधारणा ।**
**जपस्तुतिः स्यादधमा होमपूजाऽधमाधमा ॥ १३३ ॥**

सहजावस्था उत्तमा कही जाती है । ध्यान, धारणा मध्यमावस्था है । जप, स्तुति, अधमा तथा होम पूजा अधमाधमावस्था कही गई है ॥ १३३ ॥

**उत्तमा तत्त्वचिन्ता स्याज्जपचिन्ता तु मध्यमा ।**
**शास्त्रचिन्ताऽधमा ज्ञेया लोकचिन्ताऽधमाधमा ॥ १३४ ॥**

तत्त्व चिन्ता उत्तमा, जप चिन्ता मध्यमा, शास्त्र चिन्ता अधमा और लोक चिन्ता अधमाऽधमा जानना चाहिये ॥ १३४ ॥

**यो निन्दास्तुतिशीलेषु सुखदुःखारिबन्धुषु ।**
**समश्चेत् स तु योगीन्द्रो हर्षाहर्षविवर्जितः ॥ १३५ ॥**

जो निन्दा या स्तुति करने वालों में सुख-दुःख और शत्रु-बन्धु में हर्ष-द्वेष भाव

त्याग कर समदृष्टि रखता है, वही योगीन्द्र है ॥ १३५ ॥

**निस्पृहो नित्यसन्तुष्टः समदर्शी जितेन्द्रियः ।**
**आस्ते देहे प्रवासीव स योगी परतत्त्ववित् ॥ १३६ ॥**

जो सर्वथा निःस्पृह, नित्य सन्तुष्ट, समदर्शी और जितेन्द्रिय है और देह में प्रवासी के समान निवास करता है, वह परतत्त्ववेत्ता योगी है ॥ १३६ ॥

**निःसङ्कल्पो निर्विकल्पो निर्जितोपाधिवासनः ।**
**निजस्वरूपनिर्मग्नः स योगी परतत्त्ववित् ॥ १३७ ॥**

जो सङ्कल्परहित एवं विकल्परहित है, जिसने वासनारूपी उपाधि पर विजय प्राप्त कर लिया है, जो निरन्तर अपने स्वरूप में ही निमग्न रहता है वही परतत्त्ववेत्ता महान् योगी है ॥ १३७ ॥

**यथा पङ्ग्वन्धबधिरक्लीबोन्मत्तजडादयः ।**
**निवसन्ति च सर्वत्र स योगी परमो मतः ॥ १३८ ॥**

जिस प्रकार लंगड़े, अन्धे, बधिर, क्लीब, उन्मत्त और जड़ सब जगह रहते हैं, उसी प्रकार से सर्वत्र रहने वाला योगी सर्वोत्कृष्ट योगी है ॥ १३८ ॥

**पञ्चमुद्रासमुत्पन्नः परमानन्दनिर्भरः ।**
**य आस्ते स तु योगीन्द्रः पश्यत्यात्मानमात्मनि ॥ १३९ ॥**

पञ्चमुद्रा से उत्पन्न होने वाले परमानन्द में जो परिपूर्ण रहता है और सर्वत्र सभी आत्मा में अपने को देखता है वही योगीन्द्र है ॥ १३९ ॥

**येन युक्तेन मनसा प्रसन्ना चण्डिका भवेत् ।**
**तेन सन्तुष्टहृदयैः सेव्या देवी न संशयः ॥ १४० ॥**

**॥ इति श्रीमज्ज्ञानानन्दपरहंसविरचिते कौलावलीनिर्णये नवमोल्लासः ॥ ९ ॥**

जिनके द्वारा भगवती चण्डिका प्रसन्न हों, उस वस्तु से सन्तुष्ट हृदय वाले भक्तजन भगवती की सेवा करें । इसमें संशय कदापि न करे ॥ १४० ॥

**महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय के ज्येष्ठ पुत्र पण्डित रामरञ्जन मालवीय कृत श्रीमज्ज्ञानानन्द परमहंस विरचित कौलावलीनिर्णय नामक तन्त्र के नवम उल्लास की निरञ्जन हिन्दी व्याख्या पूर्ण हुई ॥ ९ ॥**

# दशम उल्लासः

कौलाचारविधानम्

अथाचारं प्रवक्ष्यामि यथातन्त्रानुसारतः ।
सर्वभूतहिते युक्तः समयाचारतत्परः ॥ १ ॥

अब तन्त्र मार्ग के अनुसार कौलाचार का वर्णन करता हूँ । सदाचारी कौल साधक समस्त प्राणियों के हित में लगा रहे और कौलों के समय (=विधि-विधान) तथा आचार में तत्पर रहे ॥ १ ॥

समयाचारकथनम्

अनित्यकर्मसन्त्यागी नित्यानुष्ठानतत्परः ।
मन्त्रधारणमात्रेण शिवभावेन तत्परः ॥ २ ॥

अनित्यकर्म का त्याग करे । नित्यकर्मानुष्ठान तत्परतापूर्वक कर मन्त्र के धारण मात्र से शिवभाव में लीन रहे ॥ २ ॥

परस्यां देवतायां तु सर्वकर्मनिवेदकः ।
येषाञ्च निश्चलाभक्तिर्गुरौ देवे मनावपि ॥ ३ ॥
तेषां सिद्धिर्भवेदाशु नान्यथा कल्पकोटिषु ।

गुरुमाहात्म्यम्

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ॥ ४ ॥
गुरुर्मनुर्गुरुर्जापो गुरुरेव परन्तपः ।
तेषां सिद्धिर्भवेदाशु नाभक्तस्य कदाचन ॥ ५ ॥

अपना सभी कर्म पर देवता में अर्पण करे । जिनकी भक्ति गुरु देवता और मन्त्र में निश्चल है, कभी विचलित नहीं होती, उनको शीघ्र ही सिद्धि प्राप्त हो जाती है अन्यथा करोड़ों कल्पों में भी सिद्धि नहीं प्राप्त होती । गुरु महात्म्य- जिनके लिये गुरु ब्रह्मा है, गुरु विष्णु स्वरूप है तथा महेश्वर हैं । गुरु ही मन्त्र है, गुरु ही जप हैं, गुरु ही श्रेष्ठ तप हैं । उनको शीघ्र ही सिद्धि प्राप्त होती है, किन्तु जो गुरुभक्त नहीं हैं उसे कदापि सिद्धि नहीं प्राप्त होती ॥ ३-५ ॥

**प्रातरेव गुरुं ध्यायेत् ब्रह्मरन्ध्रे च साधकः ।**
**सम्पूज्य सकलं कर्म कुर्यात्तस्याऽऽज्ञया सदा ॥ ६ ॥**

साधक प्रातःकाल में ही ब्रह्मरन्ध्र में गुरु का ध्यान करे । उनका पूजन कर उनकी आज्ञा लेकर समस्त कर्म सम्पादन करे ॥ ६ ॥

**विंशतिः पुरुषान् वापि सप्त पञ्चत्रयोऽपि वा ।**
**अज्ञात्वा गुरुवंशानां शिष्यश्चेन्नष्टसन्ततिः ॥ ७ ॥**

जो शिष्य गुरु के वंशों में २१ पुस्त, सात पुस्त, अथवा पाँच पुस्त, अथवा तीन पुस्त तक नाम नहीं जानता, उसकी सन्तति नष्ट हो जाती है ॥ ७ ॥

गुरुवंशगौरवम्

**ध्यात्वा गुरुकुलं नैव नष्टमार्गो भविष्यति ।**
**नष्टमार्गान् मन्त्रविद्ये न तादृक्सिद्धिगोचरे ॥ ८ ॥**

गुरुकुलों का ध्यान करने से शिष्य के मार्ग का नाश नहीं होता । जिनके मार्ग नष्ट हो जाते हैं, उनकी मन्त्र और विद्या दोनों ही सिद्धि प्रदान नहीं करतीं ॥ ८ ॥

**गुरूणां शिष्यभूतानां नास्ति चेत् सन्ततिक्रमः ।**
**तन्त्रमन्त्राश्च विद्याश्च निष्फला नात्र संशयः ॥ ९ ॥**

यदि गुरुओं एवं उनके शिष्यों में सन्तति क्रम नहीं (निर्वंश) है तो उनके तन्त्र, मन्त्र और विद्यायें निष्फल हैं इसमें सन्देह नहीं ॥ ९ ॥

**स्ववंशादधिको ज्ञेयो गुरुवंशः शुभावहः ।**
**उत्पादकब्रह्मदात्रोर्गरीयान् मन्त्रदः पिता ॥ १० ॥**

अपने वंश की अपेक्षा गुरु वंश अधिक कल्याणकारी होता है । जन्म देने वाले पिता और मन्त्र देने वाले गुरु में गुरु ही श्रेष्ठ माने जाते हैं ॥ १० ॥

**अस्मान् मन्येत सततं पितुरप्यधिकं गुरुम् ।**
**गमनं पूजनं स्वप्नं भोजनं रमणं तथा ॥ ११ ॥**
**गृहीत्वाऽऽज्ञां गुरोः कुर्यात्तस्य सिद्धिर्विना जपात् ।**

इस कारण साधक को अपने पिता की अपेक्षा मन्त्र देने वाले गुरु का अधिक सम्मान करना चाहिये । साधक जाना-आना, पूजा, शयन, भोजन एवं रमण गुरु की आज्ञा लेकर ही सम्पादन करे । ऐसे साधक शिष्य को बिना जप के ही सिद्धि प्राप्त हो जाती है ॥ ११-१२ ॥

**गुरौ मनुष्यबुद्धिञ्च मन्त्रे चाक्षरभावनाम् ॥ १२ ॥**

**प्रतिमासु शिलाबुद्धिं कुर्वाणो नरकं व्रजेत् ।**
**गुरौ मानुषबुद्ध्या न पश्येत् शिष्यः कदाचन ॥ १३ ॥**

गुरु में मनुष्य बुद्धि रखने वाला, मन्त्र में अक्षर की भावना वाला और देव प्रतिमाओं में प्रस्तर बुद्धि रखने वाला साधक नरकगामी होता है । शिष्य गुरु को मनुष्य बुद्धि से कदापि न देखे ॥ १२-१३ ॥

**कदाचिन्न लभेत् सिद्धिं मन्त्रैर्वा देवतार्चनैः ।**
**श्रीगुरुं प्राकृतैः सार्द्ध ये स्मरन्ति वदन्ति च ॥ १४ ॥**

जो मन्त्री साधक गुरु को साधारण मनुष्य के समान देखते हैं अथवा स्मरण करते हैं, या बातचीत करते हैं, उन्हें मात्र मन्त्र से अथवा देवतार्चन से सिद्धि नहीं प्राप्त होती ॥ १४ ॥

**तेषां हि सुकृतं सर्वं पातकं भवति क्षणात् ।**
**चापल्यं परिहासञ्च गुरोः साक्षाद्विवर्जयेत् ॥ १५ ॥**

जो इस प्रकार गुरु को देखते हैं उनके समस्त सुकृत पाप रूप में परिणत हो जाते हैं । अतः गुरु के सामने चपलता तथा परिहास न करे ॥ १५ ॥

**वृथा तु पूजनं मुद्रा क्रियते मन्दबुद्धिभिः ।**
**श्रीगुरौ संस्थिते साक्षात् किं वृथा ध्यानयोगतः ॥ १६ ॥**

जब गुरु स्वयं सामने विद्यमान रहें, तो मन्द बुद्धि वाले व्यर्थ ही पूजा और मुद्रा प्रदर्शित करते हैं । इसलिए जब गुरु प्रत्यक्ष विद्यमान है तब ध्यान और योग व्यर्थ है ॥ १६ ॥

**गुरौ सन्निहिते यस्तु पूजयेदन्यदेवताम् ।**
**स याति नरकं घोरं सा पूजा विफला भवेत् ॥ १७ ॥**

गुरु के सन्निधान में जो अन्य देवताओं का पूजन करता है, वह नरक जाता है और उसकी सारी पूजा व्यर्थ हो जाती है ॥ १७ ॥

**यतः सर्वत्र मन्त्राणां गुरुपूजा गरीयसी ।**
**तदग्रे मन्त्रतन्त्राणां भाषणं नैव कारयेत् ॥ १८ ॥**

यतः सभी मन्त्रों की अपेक्षा गुरुपूजा अत्यन्त श्रेष्ठ है । अतः गुरु के आगे मन्त्र तन्त्रों का व्याख्यान न करे ॥ १८ ॥

**पूजिते गुरुपादे वै सर्वदेवः सुखी भवेत् ।**
**सर्वेषां मन्त्रतन्त्राणां पिताऽसौ यः सदाशिवः ॥ १९ ॥**

गुरुपाद की पूजा कर लेने मात्र से सभी देवता सुखी हो जाते हैं । क्योंकि गुरु सभी मन्त्र तन्त्रों के पिता हैं और वही सदाशिव हैं ॥ १९ ॥

**अन्यदेवसपर्या वा अन्यदेवस्य कीर्तनम् ।**
**गुरुदेवं विना चैव तदग्रे नरकं व्रजेत् ॥ २० ॥**

जो गुरुदेव की सपर्या त्याग कर उनके आगे ही अन्य देव का पूजन करता है, या अन्य देव का कीर्तन करता है, वह नरकगामी होता है ॥ २० ॥

**गुरोः प्रीतिकरं कर्म यः कुर्यात् साधकोत्तमः ।**
**तस्याऽऽशु सिद्धयः सर्वाः सन्ति पादतले सदा ॥ २१ ॥**

जो उत्तम साधक गुरु को प्रसन्न करने वाले समस्त कर्मों को करता है, उसके पैर के नीचे सभी सिद्धियाँ प्राप्त हो जाती हैं ॥ २१ ॥

**कायेन मनसा वाचा यो भक्तश्चरणे गुरोः ।**
**तस्य सिद्धिर्भवेदाशु पूजाहोमजपादृते ॥ २२ ॥**

शरीर, मन और वाणी से जो भक्त गुरु के चरणों में भक्ति रखता है, पूजा एवं होम के बिना भी उसे सिद्धि प्राप्त हो जाती है ॥ २२ ॥

**गुरुभक्तिविहीनश्चेत् हानिस्तस्य पदे पदे ।**
**प्रत्यक्षे वा परोक्षे वा प्रत्यहं प्रणमेद् गुरुम् ॥ २३ ॥**

जो गुरु में भक्ति नहीं रखता, उसे पद पद पर हानि उठानी पड़ती है । चाहे गुरु प्रत्यक्ष हों, चाहे परोक्ष हों, गुरु को नित्य प्रणाम करना चाहिये ॥ २३ ॥

**गुरोरग्रे पृथक् पूजामौद्धत्यञ्च विवर्जयेत् ।**
**दीक्षां व्याख्यां प्रभुत्वञ्च गुरोरग्रे न कारयेत् ॥ २४ ॥**

गुरु के प्रत्यक्ष रहने पर किसी अन्य की पृथक् पूजा न करे । उच्छृङ्खलता न करे, किसी को दीक्षा न दे, शास्त्रीय व्याख्यान तथा अपना प्रभुत्व गुरु के सामने प्रगट न करे ॥ २४ ॥

**सर्वथा तुष्टिमुत्पाद्य गुरोः प्रसादमालभेत् ।**
**ऋणदानं तथाऽऽदानं वस्तूनां क्रयविक्रयम् ॥ २५ ॥**
**न कुर्याद् गुरुणा सार्द्धं शिष्योऽपि च कदाचन ।**
**आज्ञाभङ्गोऽर्थहरणं गुरोरप्रियवर्तनम् ॥ २६ ॥**

गुरु को सन्तुष्ट कर उनकी प्रसन्नता प्राप्त करे । गुरु के साथ कर्जे का लेनदेन वस्तुओं का क्रय-विक्रय शिष्य कदापि न करे । गुरु की आज्ञा न टाले,

उनका धन न लेवे । गुरु से अप्रिय व्यवहार न करे ॥ २५-२६ ॥

**गुरुद्रोहमिदं प्राहुः यः कुर्यात् स च पातकी ।**
**स्नेहद्रव्यनियोगञ्च नाऽनिवेद्य गुरौ चरेत् ॥ २७ ॥**

ऐसा करना साक्षाद् गुरुद्रोह ही कहा गया है, अतः जो ऐसा करता है । वह पापी है गुरु के द्वारा चाही जाने वाली वस्तु तथा द्रव्यादि गुरु को ही समर्पित करे। बिना उनके समर्पण के स्वयं उसका उपयोग न करे ॥ २७ ॥

**अनिवेद्य तु यः कुर्यात् स भवेद् ब्रह्मघातकः ।**
**गुरुनाम न भाषेत जपकालादृते क्वचित् ॥ २८ ॥**

जो साधक बिना निवेदन किये गुरु के अभीष्ट द्रव्य का स्वयं उपयोग करता है, वह ब्रह्मघातक है, इसलिए जपकाल के अतिरिक्त और किसी काल में गुरु का नाम न लेवे ॥ २८ ॥

**श्रीनाथ देव स्वामीत्यभिवादे साधने वदेत् ।**
**गुरुं तुङ्कृत्य हुङ्कृत्य वाचा निर्भर्त्स्य यः कदा॥ २९ ॥**

अभिवादन करते समय; अथवा साधन काल में श्रीनाथदेव तथा स्वामी इत्यादि पद से गुरु को सम्बोधित करना चाहिए । जो गुरु को त्वं शब्द से, हुङ्कार शब्द से तथा वाणी से धमकाता है, वह कुत्सित होता है । पता नहीं वह किस दुर्गति को प्राप्त करेगा ॥ २९ ॥

**देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताः ।**
**सिद्धिं सिद्धाधिवासांश्च श्रीपूर्वं समुदीरयेत् ॥ ३० ॥**

देवता, गुरु, गुरुस्थान, क्षेत्र, क्षेत्राधिदेवता, सिद्धि तथा सिद्धि का अधिवास स्थान इनके पूर्व में श्री शब्द लगाकर बोलना चाहिये ॥ ३० ॥

**विकल्प्य कुलशास्त्राणि भवन्ति कुलराक्षसाः ।**
**एकाक्षरप्रदातारं यो गुरुञ्चावमानयेत् ॥ ३१ ॥**
**शुनो योनिशतं गत्वा चण्डालत्वमवाप्नुयात् ।**
**गुर्वग्रे न तपः कुर्यान्नोपवासव्रतादिकम् ॥ ३२ ॥**

जो इस प्रकार के कुल शास्त्रों का खण्डन करता है, वह कुल राक्षस होता है जो एकाक्षर प्रदान करने वाले गुरु की भी अवमानना करता है, वह सौ जन्म पर्यन्त कुत्ता बनकर चाण्डाल के घर जन्म लेता है । गुरु के आगे तपस्या न करे, उपवास न करे और व्रतादि भी न करे ॥ ३१-३२ ॥

**तीर्थयात्राञ्च यः कुर्यान्न कुर्यादात्मशुद्धये ।**

**न नियोगं गुरोर्दद्याद् दुष्टतां न विभावयेत् ॥ ३३ ॥**

गुरु के रहते आत्मशुद्धि के लिये तीर्थ यात्रा न करे। गुरु को आज्ञा न देवे और उनसे किसी प्रकार की दुष्टता न करे ॥ ३३ ॥

**यस्मिन् द्रव्ये गुरोरस्ति स्पृहा नानुभवेत्ततः ।**
**अवश्यं यदि वाञ्छा स्यादनुभूयात्तदाज्ञया ॥ ३४ ॥**

जिस द्रव्य में गुरु की इच्छा उत्पन्न हो गई हो, उसका उपयोग स्वयं अपने लिये न करे। यदि स्वयं भी उस वस्तु के उपयोग में स्पृहा उत्पन्न हो गई हो, तो उनकी आज्ञा लेकर ही उपयोग करे ॥ ३४ ॥

**यस्तिलार्धं तदर्धं वा गुरुस्वमुपजीवति ।**
**मोहाल्लोभात् पतेद्यस्तु नरके च त्रिसप्तके ॥ ३५ ॥**
**बह्वल्पं हि गुरोर्द्रव्यं अदत्तं स्वीकरोति यः ।**
**तिरश्चां योनिमालम्ब्य क्रव्यादैर्भक्ष्यते सदा ॥ ३६ ॥**

जो शिष्य लोभवश अथवा मोहवश गुरु के तिलमात्र, अथवा उसके भी आधे मात्र गुरु के धन का उपयोग कर जीता है, वह पतित होता है और इक्कीस नरकों में जाता है। जो गुरु का धन उनके बिना दिये हुये चोरी से अपने उपयोग में लाता है, वह तिर्यक् योनि में जन्म लेकर मांसभक्षी पशुओं के द्वारा भक्षण किया जाता है ॥ ३५-३६ ॥

**गुरुद्रव्याभिलाषी च गुरुस्त्रीगमनोत्सुकः ।**
**पतितस्यापि तस्यापि प्रायश्चित्तं न विद्यते ॥ ३७ ॥**

जो मन्त्री साधक गुरु के द्रव्य की अभिलाषा करता है; अथवा गुरु की स्त्री में सम्भोग की कामना करता है, ऐसे पतित एवं कामी साधक के लिये धर्मशास्त्रों में कोई प्रायश्चित्त नहीं है ॥ ३७ ॥

**तत्पापं समवाप्नोति गुर्वग्रेऽनृतभाषणात् ।**
**गोब्राह्मणवधं कृत्वा यत्पापं समवाप्नुयात् ॥ ३८ ॥**

गौ एवं ब्राह्मण का वध करने से जितना पाप लगता है, उतना पाप गुरु के सामने झूठ बोलने से लगता है। इसलिये गुरु से झूठ न बोले ॥ ३८ ॥

**शक्तिच्छायां गुरुच्छायां देवच्छायां न लङ्घयेत् ।**
**यद्यत्र गुरुणा सार्द्धं स्वपित्युपविशेत्तु यः ॥ ३९ ॥**
**स याति नरकं घोरं यावदिन्द्राश्चतुर्दश ।**

शक्ति (स्त्री) की छाया, गुरु की छाया तथा देवता की छाया का लङ्घन न

करे। जो अपने पिता को गुरु के साथ एक आसन पर बैठाता है वह तब तक घोर नरक प्राप्त करता है जब तक चौदह इन्द्र रहते हैं ॥ ३९-४० ॥

**गुरुवाक्यहतं कृत्वा आत्मवाक्यं तु रोपयेत् ॥ ४० ॥**
**गुरुं जेतुं मनो यस्य पच्यते नरकार्णवे ।**
**अनेकधा पशोरन्नं भुञ्जते ये च कौलिकाः ॥ ४१ ॥**
**तेभ्यः प्रकुप्यते' देवी तत्सङ्गं नैव कारयेत् ।**
**लक्षत्रयञ्जपेल्लोपां लक्षं वाऽप्यजपां जपेत् ॥ ४२ ॥**

जो साधक गुरु की बात काटकर अपनी बात प्रतिष्ठापित करता है, अथवा शास्त्रार्थ में गुरु को भी जीतने की इच्छा करता है वह घोर नरक में पड़ता है। जो कौलिक अनेक प्रकार के पशुओं का अन्न भोजन करते हैं, देवी उन पर क्रोध करती हैं। अतः साधक उनका सङ्ग न करे। यदि किसी प्रकार यह पाप हो जाय तो तीन लाख लोपा (मुद्रा) का जप करे, अथवा एक लाख अजपा (हंसः सोऽहं) का जप करे ॥ ४०-४२ ॥

**होमयेद्धविषाऽऽज्येन निष्पापः स्यात्तदा ध्रुवम् ।**
**गुरुणाऽऽलोकितः शिष्य उत्तिष्ठेदासनं त्यजेत् ॥ ४३ ॥**

हविष्य अन्न से हवन करे, तो साधक निश्चय ही पाप रहित हो जाता है। गुरु द्वारा देखे जाने पर साधक आसन का त्याग कर उठ जावे ॥ ४२ ॥

**गुरुणा सदसद्वापि यदुक्तं तन्न लङ्घयेत् ।**
**रभसं मैथुनं मिथ्या यो वदेद् गुरुमन्दिरे ॥ ४४ ॥**
**स याति नरकं घोरं शम्भुना परिभाषितम् ।**
**न विशेदासने धीरो देवतागुरुसन्निधौ ॥ ४५ ॥**

गुरु जो भी अच्छा बुरा कहे, उसका लङ्घन न करे। जो गुरु के घर में रहकर बलात्कार करता है, मैथुन करता है, अथवा झूठ बोलता है, वह घोर नरक में जाता है, ऐसा शम्भु ने कहा है। देवता और गुरु के सन्निधान में धीर साधक आसन पर न बैठे ॥ ४४-४५ ॥

**गुरोः सिंहासनं देयं ज्येष्ठानामुत्तमासनम् ।**
**देश्यासनं कनिष्ठानामितरेषां समासनम् ॥ ४६ ॥**

गुरु को सिंहासन देवे। अपने से ज्येष्ठ को तथा आचार्य को उत्तम आसन प्रदान करे। अपने से छोटे तथा इतर लोगों को अपने ही समान आसन पर बैठावे ॥ ४६ ॥

रिक्तहस्तो न पश्येत्तु राजानं दैवतं गुरुम् ।
फलपुष्पादिकं नीत्वा यथा शक्त्या समर्पयेत् ॥ ४७ ॥

राजा, देवता और गुरु का दर्शन रिक्त हाथ से न करे । अपनी शक्ति के अनुसार फलपुष्पादि समर्पित करे ॥ ४७ ॥

एवं यो नाचरेन्मन्त्री ब्रह्मराक्षसतां व्रजेत् ।
आलिङ्गनप्रदानेन गुरौ तुष्टे सकृद्यदि ॥ ४८ ॥
तदा किम्वा न लभते साधका गुरुसेवकाः ।

गुरुत्यागात् नरकगामित्वम्

गुरुत्यागे ध्रुवो मृत्युर्मन्त्रत्यागाद्दरिद्रता ॥ ४९ ॥

जो मन्त्रज्ञ साधक इस प्रकार के आचरणों का पालन नहीं करता, वह ब्रह्मराक्षस होता है । गुरु के चरणों के दबाने पर एक बार भी गुरु के सन्तुष्ट हो जाने पर गुरु का सेवक उसी समय क्या-क्या नहीं प्राप्त कर लेता । गुरु के त्याग करने पर मृत्यु निश्चित है और उनके द्वारा प्रदत्त मन्त्र त्याग से साधक को दरिद्रता प्राप्त होती है ॥ ४८-४९ ॥

गुरुमन्त्रपरित्यागाद्रौरवं नरकं व्रजेत् ।
गुरुत्यागकरः शिष्यः प्रायश्चित्ती भवेद्ध्रुवम् ॥ ५० ॥

अतः गुरु द्वारा दिये गये मन्त्र के त्याग से रौरव नरक निश्चित है । गुरु का त्याग करने वाला शिष्य निश्चय ही प्रायश्चित्त का अधिकारी है ॥ ५० ॥

लक्षं श्रीपादुकामन्त्रं जप्त्वा पापात् प्रमुच्यते ।
मन्त्रत्यागकरः शिष्यस्तत्सङ्गं नैव कारयेत् ॥ ५१ ॥

यदि किसी प्रकार ऐसा पाप बन जाए; तो श्रीपादुका मन्त्र का एक लाख जप करने से साधक समस्त पापों से मुक्त हो जाता है । जो शिष्य गुरु मन्त्र का त्याग करता है; उसका साथ कभी न करे ॥ ५१ ॥

लक्षमेकं जपेन्मन्त्रं होमतर्पणतः शुचिः ।
ब्रह्मपराशरव्यासविश्वामित्रादयः पुनः ॥ ५२ ॥
गुरुशुश्रूषणात् सिद्धिं प्राप्तास्ते भुवनत्रये ।
शिवो गुरुप्रसादेन सर्ववित्सर्वगः प्रभुः ॥ ५३ ॥

गुरु त्यागी साधक एक लाख मन्त्र का जप कर होम एवं तर्पण से शुद्ध होता है । विश्वामित्र, पराशर, व्यास और ब्रह्मदेव भी गुरु की सेवा से सिद्धि प्राप्त किये हैं । यह बात तीनों लोकों में प्रसिद्ध है कि शिव भी गुरु (राम) की कृपा से ही

सर्वज्ञ सर्वान्तर्यामी हुये हैं ॥ ५२-५३ ॥

**साधकः शिव एव स्याद् गुरौ तुष्टे सकृद् यदि ।**
**तदा किम्वा न लभन्ते साधका गुरुसेवकाः ॥ ५४ ॥**

यदि गुरु एक बार भी प्रसन्न हो जावें, तब साधक शिव ही हो जाता है । फिर गुरु के नित्य सेवक गुरु को प्रसन्न कर क्या प्राप्त नहीं कर सकते ॥ ५४ ॥

**तस्मादेव प्रयत्नेन गुरुसेवां समाचरेत् ।**
**सर्वदा गोपयेदेनं गुरुञ्च मनुमेव च ॥ ५५ ॥**

इसलिये साधक प्रयत्नपूर्वक गुरु सेवा करे और अपनी सेवा एवं गुरु तथा मन्त्र को सदा गुप्त रखे ॥ ५५ ॥

**गुरुशय्यासनं यानं पादुकोपानहौ तथा ।**
**स्नानोदकं तथा छायां लङ्घयेन्न कदाचन ॥ ५६ ॥**

गुरु की शय्या, आसन, वाहन, पादुका (खड़ाँऊ), जूता, स्नानीय जल तथा छाया कदापि लङ्घन न करे ॥ ५६ ॥

**वृथा कालं न गमयेद् द्यूतक्रीडादिना सुधीः ।**
**गमयेद् देवतापूजाजपयागस्तवादिना ॥ ५७ ॥**

द्यूतक्रीड़ा, शतरञ्ज आदि खेलों में अपना समय नष्ट न करे । अतः साधक अपना समय देवपूजा, जप, याग तथा स्तुतियों के द्वारा सफल बनावे ॥ ५७ ॥

**गुरोः कृपालापकथास्तोत्रागमावलोकनैः ।**
**गमयेदनिशं कालं न वदेत् परदूषणम् ॥ ५८ ॥**

गुरु द्वारा किये गये कृपा, बातचीत, भगवत्कथा, स्तोत्र तथा शास्त्रावलोकनादि में ही निरन्तर अपना काल व्यतीत करे । दूसरे की निन्दा वर्णित रखे ॥ ५८ ॥

**रागलोभमदक्रोधपैशुन्यादि विवर्जयेत् ।**
**कुलाचारं गुरुं देवं मनसाऽपि न निन्दयेत् ॥ ५९ ॥**

इतना ही नहीं राग, लोभ, परनिन्दा और क्रोध वर्जित करे । कुलाचार, गुरुनिन्दा तथा देवनिन्दा मन से भी न करे ॥ ५९ ॥

**पूजां ध्यानं जपं होमं यथा कर्मचतुष्टयम् ।**
**प्रत्यहं साधकः कुर्यात् स्वयञ्चेत् सिद्धिमिच्छति ॥ ६० ॥**

साधक यदि स्वयं अपने लिये सिद्धि चाहता हो तो पूजा, ध्यान, जप और होम इन चारों कर्मों को नित्य करे ॥ ६० ॥

परदारादिसङ्गतिः वर्जनीया

**कन्यायोनिं पशुक्रीडां दिग्वस्त्रां प्रकटस्तनीम् ।**
**नालोकयेत् परद्रव्यं परदारांश्च वर्जयेत् ॥ ६१ ॥**

कन्या योनि, (बन्दर, कुत्ता आदि) पशुओं की क्रीड़ा, नङ्गी स्त्री, जिसका स्तन उभर रहा हो उस युवती कन्या, पर द्रव्य तथा परस्त्री का अवलोकन सर्वदा वर्जित रखे ॥ ६१ ॥

**न निन्देद् व्रतिनं विप्रं वेदाङ्गसंहितास्तथा ।**
**पुराणागमशास्त्राणि कल्पांश्चापि न दूषयेत् ॥ ६२ ॥**

अनुष्ठान में लगे रहने वाले ब्राह्मण की, वेदाङ्गों की, वेदसंहिताओं की, पुराण एवं आगमशास्त्र तथा कल्पों को दूषित न करे (दोष न लगावे) ॥ ६२ ॥

**अन्यमन्त्रार्चने श्रद्धामन्यमन्त्रप्रपूजनम् ।**
**एकस्यावाहनं कृत्वा नान्यसाधनमाचरेत् ॥ ६३ ॥**

किसी अन्य मन्त्र के अर्चन में अपनी श्रद्धा न करे और प्रमादवश अन्य मन्त्र का पूजन भी कदापि न करे । इसी प्रकार आवाहन किसी दूसरे देवता का और साधना (सामग्री) किसी अन्य देव को समर्पित करे, यह भी निषिद्ध है ॥ ६३ ॥

**अन्यस्य स्मरणाद् दुःखं योगिनीशापमालभेत् ।**
**अपमृत्युभवेत्तस्य मृते च नरकं व्रजेत् ॥ ६४ ॥**

इसी प्रकार अपने इष्ट देव तथा गुरु प्रदत्त मन्त्र को त्याग कर अन्य मन्त्र का स्मरण एवं जप करे तो साधक दुःख प्राप्त करता है । उसे योगिनियाँ शाप देती हैं और उसकी अपमृत्यु होती है तथा मरने पर वह नरकगामी होता है ॥ ६४ ॥

**किमधिकश्चापरैः साध्यं तस्याः सर्वं यतो लभेत् ।**
**कुलदर्शनशास्त्राणि कुलद्रव्याणि कौलिकान् ॥ ६५ ॥**
**सेवकान् प्रेरकान् वापि वाचकान् दर्शकांस्तथा ।**
**शिक्षकान् मोक्षकान् वापि योगिनीसिद्धिरूपकान् ॥ ६६ ॥**

स्त्रीनिन्दा न कर्त्तव्या

**कन्यां कुमारिकां नग्नामुन्मत्तामपि योषितम् ।**
**न निन्देन्न जुगुप्सेत न हसेन्नावमानयेत् ॥ ६७ ॥**

इससे अधिक और बात क्या कहें कि उसका साध्य, किं बहुना, सब कुछ योगिनियाँ ले लेती हैं । कुलदर्शन, कुलशास्त्र, कुलद्रव्य, कौलिक, कुलसेवक, कुलप्रेरक, कुलवाचक, कुलदर्शक, कुलशिक्षक, कुलमोक्षक एवं योगिनी गणों की

सिद्धि करने वाले कुमारी कन्या, नग्न स्त्री एवं उन्मत्त (पागल) स्त्री की भी निन्दा न करे। इनसे घृणा भी न करे। साधक इनसे हँसी-मजाक भी न करे और न ही इनका अपमान करे ॥ ६५-६७ ॥

**नाप्रियं नानृतं ब्रूयात् कस्यापि कुलयोगिनः ।**
**कुरूपेति निकृष्टेति न वदेत् कुलयोषितम् ॥ ६८ ॥**

कुल सम्प्रदाय के योगियों से अप्रिय भाषण तथा झूठी बात कभी न कहे। कुल सम्प्रदाय में दीक्षित युवती स्त्री को 'यह कुरूपा है' या 'यह निकृष्टा है' ऐसा न कहे ॥ ६८ ॥

**परीक्षयेन्न भक्तांश्च वीराणाञ्च कृताकृतम् ।**
**या काचिदङ्गना लोके सा मातृकुलसम्भवा ॥ ६९ ॥**

कुल (=शाक्त) भक्तों की तथा वीरों के कार्य की परीक्षा न करे। इस जगत् में जितनी भी अङ्गनायें हैं, वे सभी हमारे मातृकुल में ही उत्पन्न हुई हैं, सदैव ऐसा विचार रखे ॥ ६९ ॥

**कुप्यन्ति कुलयोगिन्यो वनितानामतिक्रमात् ।**
**स्त्रीणां शतापराधेन पुष्पेणापि न ताडयेत् ॥ ७० ॥**

स्त्रियों के अतिक्रमण (अपमान) से योगिनियाँ कुपित हो जाती हैं। स्त्रियों के सौ अपराध किये जाने पर भी पुष्प से भी उनको प्रताड़ित न करे ॥ ७० ॥

**कुलस्त्रीवीरनिन्दाञ्च तत्त्वद्रव्यापहारणम् ।**
**कुलरोधप्रहारञ्च वर्जयेन्मतिमान् सदा ॥ ७१ ॥**

कुलस्त्री की निन्दा, वीर साधक की निन्दा, पञ्चद्रव्य एवं तत्त्वों का अपहरण, कुलरोध, कुलप्रहार इन सभी कार्यों को बुद्धिमान् साधक सदा वर्जित करे ॥ ७१ ॥

**स्त्रीमयञ्च जगत् सर्वं स्वयं तावत्तथा भवेत् ।**
**न हिंसेदखिलान् जन्तून्न निन्देद्वामलोचनाम् ॥ ७२ ॥**

सारे जगत् को स्त्रीमय तथा स्वयं को भी उसी प्रकार समझे। किसी भी जीव की हत्या न करे और स्त्रियों की निन्दा से भी दूर रहे ॥ ७२ ॥

**न निन्देद्दक्षिणं वामं देववाक्यं तथैव च ।**
**न निन्देत् शक्तिसिद्धान्तं शक्तिपूजनतत्परः ॥ ७३ ॥**

दक्षिण-पन्थ तथा वामपन्थ की, उसी प्रकार देव-वाक्य की तथा शक्ति-सिद्धान्त की शक्ति की पूजा करने वाला साधक निन्दा न करे ॥ ७३ ॥

**न निन्देद् वृद्धवाक्यं तु न निन्देद् वेदवादिनम् ।**
**न निन्देद् बहुमान्यञ्च न निन्देच्च पतिव्रताम् ॥ ७४ ॥**

वृद्ध के वाक्यों की तथा वेद मार्गानुसारी की, सर्वाधिक सम्मानित व्यक्ति की तथा पतिव्रता स्त्री की निन्दा न करे ॥ ७४ ॥

**न निन्देद् देवलोकादीन्न निन्देत् समयस्थितान् ।**
**न निन्देद् बहुलं मांसं निन्दां सर्वत्र वर्जयेत् ॥ ७५ ॥**

देवलोकों की, मर्यादा में स्थित रहने वालों की, काले पुरुष की तथा मांस की निन्दा, किं बहुना, किसी की भी निन्दा न करे ॥ ७५ ॥

**प्रमत्तामन्त्यजां कन्यां पुष्पितां पतितस्तनीम् ।**
**विरूपां मुक्तकेशीञ्च कामार्त्ताञ्च न निन्दयेत् ॥ ७६ ॥**

पागल, चाण्डालिन, कन्या, पुष्पवती स्त्री, वृद्धा स्त्री, कुरूपा, बिखरे बालों वाली एवं कामार्त्त स्त्री की भी निन्दा न करे ॥ ७६ ॥

**स्त्री: शक्तिरूपिणी**

**शक्तिमयं जगत् सर्वं स्वयं तावत्तथा भवेत् ।**
**शक्तिरूपा यतो देवी सृष्टिमध्ये व्यवस्थिता ॥ ७७ ॥**

सारा जगत् शक्तिमय समझे तथा स्वयं को भी वैसा ही समझे । क्योंकि इस सारे सृष्टि के मध्य में स्वयं देवी ही शक्ति रूप में विद्यमान है ॥ ७७ ॥

**शक्तेः सृष्टिः समुत्पन्ना शक्तौ च लीयते पुनः ।**
**तस्मात् शक्तिः प्रधाना च पूजनीया प्रयत्नतः ॥ ७८ ॥**

यह सारी सृष्टि ही शक्ति से उत्पन्न है, फिर उसी में इसका लय भी होता है इसलिये शक्ति प्रधान है, उनकी प्रयत्नपूर्वक पूजा करनी चाहिये ॥ ७८ ॥

**भक्षयेद्योषिता सार्द्धं जुहुयादग्निसम्मुखे ।**
**आरक्तवसनां नारीं यत्नाद् भक्त्या समानयेत् ॥ ७९ ॥**

भोजन स्त्री के साथ करे । अग्नि में हवन करे और लाल वस्त्र वाली नारी को प्रतिष्ठा के साथ अपने घर में ले आवे ॥ ७९ ॥

**शक्तिपूजां सदा कुर्यात् प्रसन्ना येन जायते ।**
**सुखं शक्तिप्रसन्ने तु दुःखं तद्वर्जनाद् भवेत् ॥ ८० ॥**

सर्वदा शक्ति की इस प्रकार पूजा करे, जिससे वह प्रसन्न रहे । शक्ति के प्रसन्न होने पर सुख होता है और उसे दुःखी करने में दुःख होता है ॥ ८० ॥

शाक्तव्यवहारः

**भक्ष्यं भोज्यं तथा पेयं गन्धं पुष्पं तथा पुनः ।**
**शक्तौ निवेद्य प्रथमं तथा चाऽऽभरणादिकम् ॥ ८१ ॥**
**तत्पश्चादात्मसात् कुर्यात् सिद्ध्यर्थी साधकश्च यः ।**
**शक्तौ दर्पं घृणां लज्जां वर्जयेत् क्रोधदर्शनम् ॥ ८२ ॥**

भक्ष्य, भोज्य, पेय, गन्ध, पुष्प तथा आभरणादि उत्तम पदार्थ सर्वप्रथम शक्ति को ही समर्पण करे। इसके बाद सिद्धि चाहने वाला साधक स्वयं अपने उपयोग में लावे। साधक शक्ति से कभी भी घमण्ड, घृणा एवं लज्जा तथा क्रोध प्रदर्शित न करे ॥ ८१-८२ ॥

**कदाचिद्दर्परूपेण पुष्पेणापि न ताडयेत् ।**
**शक्तौ न विस्मयं कार्यं यस्मात् क्रुद्धा च चण्डिका ॥ ८३ ॥**

भय प्रदर्शित करने के लिये आवेश में पुष्प से भी शक्ति की ताड़ना न करे। शक्ति को कभी भय प्रदर्शित न करे। जिससे चण्डिका के क्रुद्ध होने की सम्भावना रहती है ॥ ८३ ॥

**विस्मिते बहुलं नाशं मृत्युलाभमवाप्नुयात् ।**
**मृतेऽपि नरकं याति श्रियमाप्नोति पूजनात् ॥ ८४ ॥**

शक्ति को भयभीत करने से अपना सर्वनाश हो जाता है और केवल मृत्यु ही हाथ आती है। मरने पर भी नरक ही प्राप्त होता है। किन्तु शक्ति पूजन से महालक्ष्मी प्राप्त होती हैं ॥ ८४ ॥

**चर्व्यं चोष्यं लेह्यपेयं भक्ष्यं भोज्यं गृहं सुखम् ।**
**सर्वञ्च युवतीरूपं भावयेत् यतमानसः ॥ ८५ ॥**

चर्व्य, चोष्य, लेह्य, पेय, भक्ष्य, भोज्य, गृह और सुख इन्हें समाहित चित्त हो युवतीरूप समझे ॥ ८५ ॥

**कुलजां युवतीं वीक्ष्य नमस्कुर्यात् समाहितः ।**
**यदि भाग्यवशेनैव कुलदृष्टिस्तु जायते ॥ ८६ ॥**

उत्तम कुल में उत्पन्न हुई युवती को देखकर सावधानी से नमस्कार करे क्योंकि बहुत भाग्य से कुलजा स्त्रियों के दर्शन होते हैं ॥ ८६ ॥

**तदैव मानसीं पूजां तत्र तासां प्रकल्पयेत् ।**
**बालां वा यौवनोन्मत्तां वृद्धां वा सुन्दरीं तथा ॥ ८७ ॥**
**कुत्सितां वा महादुष्टां नमस्कृत्य विसर्जयेत् ।**

तासां प्रहारं निन्दाञ्च कौटिल्यमपि चाप्रियम् ॥ ८८ ॥
सर्वथा न च कर्त्तव्यमन्यथा सिद्धिरोधकृत् ।
स्त्रियो देव्यः स्त्रियः प्राणाः स्त्रिय एव विभूषणम्॥ ८९ ॥

युवती के दर्शन होते ही उनकी मानसिक पूजा सम्पन्न करे। बाला जवानी की मस्ती से इठलाती हुई, अथवा वृद्धा, अथवा सुन्दरी, कुत्सिता तथा महादुष्ट स्त्रियों को नमस्कार कर उनका विसर्जन करे। उनके ऊपर प्रहार, निन्दा, कुटिलता, अप्रिय सर्वथा न करे। ऐसा करने से सिद्धि में विघ्न होता है। स्त्रियाँ साक्षाद् देवी हैं स्त्रियाँ प्राण हैं और स्त्रियाँ आभूषण हैं ॥ ८७-८९ ॥

स्त्रीसङ्गिना सदा भाव्यमन्यथा स्वस्त्रिया अपि ।
न पश्येत् पतितां नग्नामुन्मत्तां प्रकटस्तनीम् ॥ ९० ॥
दिवसे न रमेन्नारीं तद्योनिं न निरीक्षयेत् ।
विपरीतरता सा तु भविता हृदयोपरि ॥ ९१ ॥

सर्वदा स्त्री के साथ रहे। उनके न मिलने पर स्वयं अपनी स्त्री के साथ निवास करे। पतिता, नग्ना, पगली तथा उभरते हुये स्तनों वाली स्त्री का दर्शन न करे। दिन में स्त्री सम्भोग न करे। उनकी योनि कदापि न देखे। क्योंकि विपरीत रति में वे हृदय के ऊपर (मृत्यु रूप में) आ जाती हैं ॥ ९०-९१ ॥

स्त्रीद्वेषो नैव कर्त्तव्यो विशेषात् पूजनं स्त्रियः ।
जपस्थाने महाशङ्खं निवेश्योर्ध्वं जपञ्चरेत् ॥ ९२ ॥

स्त्री से द्वेष कदापि न करे। विशेष रूप से उनका पूजन ही करे। जहाँ जप करना हो वहाँ महाशङ्ख स्थापित कर जप करे ॥ ९२ ॥

### जपे कालशुच्यादि नियमो नास्ति

स्त्रियं गच्छन् स्पृशन् पश्यन् विशेषात् कुलजां शुभाम् ।
मांसमत्स्यदधि क्षौद्रभक्ष्यद्रव्ये यथारुचि ॥ ९३ ॥
भोज्यान्नासनभक्तानि भुक्त्वा भक्ष्यं चरेज्जपम् ।
विना पीत्वा सुरां भुक्त्वा मांसं गत्वा रजस्वलाम्॥ ९४ ॥
यो जपेच्चण्डिकां देवीं दुःखं तस्य पदे पदे ।

कुलमार्ग में उत्पन्न कल्याणकारिणी स्त्री के अपने पास से जाते हुये, उनको स्पर्श करते हुये, उनको देखते हुये, तदनन्तर स्वयं मांस, मत्स्य, दधि, क्षुद्र भोजन व स्वकीय इच्छानुसार द्रव्य, भोज्यान्न, आसन तथा भक्ष्य भोजन कर जप करे। जो साधक बिना सुरापान किये, बिना मांस का भोजन किये, रजःस्वला से बिना सम्भोग किये चण्डिका देवी का जप करता है उसे पद-पद पर दुःख उठाना

पड़ता है ॥ ९३-९५ ॥

कौलिकमाहात्म्यम्

**अन्तःशाक्ता बहिःशैवाः सभायां वैष्णवा मताः ॥ ९५ ॥**
**नानावेशधराः कौला विचरन्ति महीतले ।**

कौल मार्गी भीतर से शाक्त, बाहर से शैव तथा सभा के मध्य में वैष्णव इस प्रकार नानारूप धारण कर पृथ्वी में विचरण करते हैं ॥ ९५-९६ ॥

**कुलपूजादिलिङ्गैस्तु रहितो विष्णुतत्परः ॥ ९६ ॥**
**गच्छन् स्वपन् भ्रमन् वापि स्खलन् विष्णुपरायणः ।**
**हरिनाम्ना जातभावो भावाखिलविचेष्टितः ॥ ९७ ॥**
**जय विष्णो हरे ब्रह्मन् नानार्थपरविस्तरैः ।**
**स्मर्त्तव्या च महादेवी कुलीनैर्विपिने गृहे ॥ ९८ ॥**

जिस प्रकार जो कुलपूजादिकों के चिह्न से रहित विष्णु का भक्त चलते, सोते, भ्रमण करते, गिरते पड़ते भी उसे भगवान् के नाम लेते ही महाभाव उत्पन्न हो जाता है । वह 'जय विष्णो हरे ब्रह्मन्' इन नामों को लेकर महाभाव की सारी चेष्टायें करने लगता है, उसी प्रकार अनेक प्रयोजनों के विस्तार से कुलीन (कुल मार्ग का उपासक) वन में अथवा घर में महादेवी का स्मरण करे ॥ ९६-९८ ॥

रात्रौ जपः प्रशस्तः

**रात्रौ पर्यटनञ्चैव रात्रौ च शक्तिपूजनम् ।**
**न करोति कथञ्चैव साधकः कौलिको भवेत् ॥ ९९ ॥**

कुलमार्ग का उपासक रात्रि में पर्यटन न करे और रात्रि में शक्ति का पूजन भी न करे तो वह किस प्रकार कौलिक साधक कहा जा सकता है ॥ ९९ ॥

**बधिराद् विहरेदेकः सदा सङ्गविलङ्घितः ।**
**दिक्कालनियमो नात्र स्थित्यादिनियमो न च ॥ १०० ॥**

कुलमार्ग का उपासक बधिर बनकर सदैव अकेला रहे । वह किसी का साथ न करे । उसके लिये दिशा और काल का नियम नहीं है । स्थिति आदि का भी नियम नहीं है ॥ १०० ॥

**न जपे कालनियमो नार्चादिषु बलिष्वपि ।**
**स्वेच्छानियम उक्तोऽत्र शक्तिमन्त्रस्य साधने ॥ १०१ ॥**

जप में अर्चा में बलि में उसके लिये कोई काल का नियम नहीं है किं बहुना कुलमार्ग की उपासना करने वाले के लिये शक्तिमन्त्र की साधना में उसकी

इच्छानुसार ही नियम होता है ॥ १०१ ॥

**स्नानादिमानसं शौचं मानसः प्रवरो जपः ।**
**पूजनं मानसं दिव्यं मानसं तर्पणादिकम् ॥ १०२ ॥**

उसका मानस स्नानादि शौच तथा मानस जपादि भी होता रहता है उसका मानस दिव्य पूजन तथा मानस तर्पणादि भी हो जाता है ॥ १०२ ॥

**सर्व एव शुभः कालो नाशुभो विद्यते क्वचित् ।**
**न विशेषो दिवारात्रौ न सन्ध्यायां महानिशि ॥ १०३ ॥**

कौलिक के लिये सभी काल कल्याणकारी है कोई भी काल अशुभ नहीं है उनके लिये दिन रात-सन्ध्या तथा महानिशा का कोई भेद नहीं है ॥ १०३ ॥

**वस्त्रासनस्थानगेह देहस्पर्शादिधारिणः ।**
**शुद्धिं न चाचरेत्तत्र निर्व्विकल्पं मनश्चरेत् ॥ १०४ ॥**

अन्य के वस्त्र आसन स्थान गृह तथा शरीर के स्पर्श हो जाने पर उन्हें शुद्धि की आवश्यकता नहीं है वे निःसन्देह होकर सर्वदा विचरण करे ॥ १०४ ॥

**नात्र शुद्धेरपेक्षास्ति न चामेध्यादिदूषणम् ।**
**य एवं चिन्तयेन्मन्त्री सर्वकामार्थसिद्धिभाक् ॥ १०५ ॥**

अमेध्यादि दूषित पदार्थों के दोष से उन्हें शुद्ध होने की अपेक्षा नहीं रखनी चाहिये। जो मन्त्रज्ञ साधक इस प्रकार का विचार रखता है उसे सभी काम और अर्थ की प्राप्ति हो जाती है ॥ १०५ ॥

**गद्यपद्यमयी वाणी सभायां तस्य जायते ।**
**तस्य दर्शनमात्रेण वादिनो निष्प्रभां गताः ॥ १०६ ॥**

ऐसे कौलिक की वाणी सभा के मध्य में गद्य पद्यमयी उभयात्मक हो जाती है प्रतिवादी उसके दर्शनमात्र से हताश हो जाते हैं ॥ १०६ ॥

**राजानोऽपि च दासत्वं भजन्ते किं परे जनाः ।**
**सर्वदेवमयं देहं सर्वदेवमयीं तनूम् ॥ १०७ ॥**

राजागण भी उस साधक के दास बन जाते हैं फिर साधारण मनुष्य की बात ही क्या? कौलिक साधक अपने देह को सर्व देवमय तथा अपनी तनू को सर्वदेवमयी समझे ॥ १०७ ॥

**आत्मानं देवतारूपं अद्वैतं परिचिन्तयेत् ।**
**आत्मा च परमात्मा च जगद्व्यापी स्वयं विभुः ॥ १०८ ॥**

अपने को देवता स्वरूप तथा अद्वैत रूप में समझे। आत्मा को जगद्व्यापी स्वयं विभु परमात्मा समझे ॥ १०८ ॥

**आत्मानं ब्रह्मरूपं च सर्वदा परिचिन्तयेत् ।**
**शत्रवश्चापि मित्रन्ति साक्षाद्दासन्ति भूमिपाः ॥ १०९ ॥**

साधक अपने को सर्वदा ब्रह्म रूप समझे। ऐसे साधक के शत्रु भी मित्र के समान आचरण करते हैं और राजा भी दासवत् हो जाते हैं ॥ १०९ ॥

**वाचयन्ति यशः सर्वे साधकानां सुनिश्चितम् ।**
**दुर्मुखाः सुमुखाः सर्वे गर्विता प्रणमन्ति च ॥ ११० ॥**

सभी इस प्रकार के साधकों के यश का गान करते हैं, निष्ठुरभाषी सुमुख हो जाते हैं और अहङ्कारी प्रणाम करने लगते हैं ॥ ११० ॥

**बाधकाः साधका यान्ति साधकस्य विशेषतः ।**
**सर्वदा पूजयेद् देवीमस्नातः कृतभोजनः ॥ १११ ॥**

विशेष रूप से बाधा उत्पन्न करने वाले व्यक्ति साधक हो जाते हैं। बिना स्नान किये अथवा भोजन कर देवी का पूजन न करे ॥ १११ ॥

**महानिशाशुचौ देशे बलिं मन्त्रेण दापयेत् ।**
**अत्यन्तरोगयुक्तो वा शुचिर्वाऽप्यथवाऽशुचिः ॥ ११२ ॥**
**अकालेऽप्यथवा काले अधिकारी सदैव हि ।**
**कृतार्थं मन्यमानस्तु सन्तुष्टनिजमानसः ॥ ११३ ॥**

महानिशा (अर्धरात्रि) में या किसी अपवित्र प्रदेश में मन्त्र द्वारा बलि प्रदान करे। चाहे अत्यन्त रोगी हो, अथवा शुचि हो, अथवा अशुचि हो, चाहे काल हो, चाहे अकाल हो, अपने को कृतार्थ मानने वाला, अपने मन को सन्तुष्ट रखने वाला भक्त चण्डिका पूजन का अधिकारी है ॥ ११२-११३ ॥

**नाधर्मो विद्यते किञ्चित् किञ्चिद्धर्मो महान् भवेत् ।**
**कुलान्नञ्चैव भुञ्जीत कुलीनेन सह स्वपेत् ॥ ११४ ॥**

ऐसे अधिकारी को कोई पाप नहीं लगता। किन्तु महान् पुण्य ही होता है। अधिकारी साधक को कौल मार्गियों के साथ भोजन करना चाहिये और उनके साथ शयन भी करना चाहिये ॥ ११४ ॥

**कुलप्रसङ्गः कर्त्तव्यः कुलीनैर्न पशोः क्वचित् ।**
**यस्मिन्मन्त्रे य आचारस्तस्य धर्मस्तु तादृशः ॥ ११५ ॥**

कुल मार्ग के उपासकों के साथ कुल मार्ग की चर्चा करे । किन्तु पशु मार्ग वाले साधक के साथ कुलमार्ग की चर्चा न करे । क्योंकि जिस मन्त्र में जैसा आचार है, उसका धर्म भी उसी प्रकार का होता है ॥ ११५ ॥

**तद्धस्तावचितं भोज्यं तद्धस्तावचितं जलम् ।**
**तद्धस्तावचितं पुष्पं देवताभ्यो निवेदयेत् ॥ ११६ ॥**

उनके हाथ का दिया हुआ भोजन, उनके हाथ से लाया गया जल और उनके हाथ से लाये गये पुष्प देवताओं को समर्पित करना चाहिये ॥ ११६ ॥

**षडङ्गन्यासमाचर्य ध्यात्वा रात्रौ जपेत् सुधीः ।**
**सदाकालं जपेन्मन्त्रं सर्वसिद्धिपरायणः ॥ ११७ ॥**

सुधी साधक रात्रि में षडङ्ग न्यास करे और देवी का ध्यान कर, तदनन्तर जप करे । सब प्रकार की सिद्धि चाहने वाला सभी कालों में जप करे ॥ ११७ ॥

**न दोषः सर्वदा जापे सर्वदिशेऽपि सर्वदा ।**
**जपनिष्ठो जपेद्यस्तु सर्वयज्ञफलं लभेत् ॥ ११८ ॥**

सभी देशों में, सर्वदा जप करने में, कोई दोष नहीं है, जो जप में निष्ठा रखते हुये जप करता है, उसे समस्त यज्ञों का फल प्राप्त होता है ॥ ११८ ॥

**सर्वेषामेव यज्ञानां जपयज्ञः प्रशस्यते ।**
**रात्रौ जपैकमात्रेण सिद्धिदा चण्डिका भवेत् ॥ ११९ ॥**

सभी यज्ञों की अपेक्षा जपयज्ञ श्रेष्ठ है । रात्रि में मात्र एक संख्या के जप से चण्डिका सिद्धि प्रदान कर देती हैं ॥ ११९ ॥

**इडायाञ्च गते रात्रौ शक्तिमन्त्रं जपेद् यदि ।**
**पिङ्गलायां गते जीवे पुंमन्त्रं प्रजपेत् सदा ॥ १२० ॥**

रात्रि में जब इडा नाड़ी (नासिका में) प्रवाहित होती हो, तो शक्ति मन्त्र (स्वाहान्त) मन्त्र का जप करे । जब पिङ्गला नाड़ी में जीव हो तब साधक पुंमन्त्र (हुं फट्) मन्त्र का जप करे ॥ १२० ॥

**न चेज्जन्मसहस्रैस्तु नैव सिद्धिः प्रजायते ।**
**कृतार्थस्तेन जायेत स्वर्गो वा मोक्ष एव वा ॥ १२१ ॥**

यदि साधक ऐसा नहीं करता, तो सहस्रों जन्म पर्यन्त जप करते रहने से उसे सिद्धि नहीं प्राप्त हो सकती । उक्त प्रकार से जप करते रहने से साधक सफल होता है, उसे स्वर्ग एवं मोक्ष की प्राप्ति हो जाती है ॥ १२१ ॥

**भ्रान्तिरत्र न कर्त्तव्या सिद्धिहानिः प्रजायते ।**
**विस्मिता विलयं यान्ति पशवः शास्त्रमोहिताः ॥ १२२ ॥**

जप में भ्रान्ति न करे । ऐसा करने से सिद्धि में हानि होती है । पशु लोग शास्त्र में मोहित होकर भयभीत हो विनष्ट हो जाते हैं ॥ १२२ ॥

**विशुद्धचित्तोऽत्र भवेत् सिद्धिः स्यादपवर्गदा ।**
**एतैस्तु तत्क्षणात् सिद्धिर्विस्मयो नास्ति चापरः ॥ १२३ ॥**

जप में विशुद्ध चित्त होने से अपवर्ग (मोक्ष) देने वाली सिद्धि होती है । इन नियमों के पालन करने से तत्क्षण सिद्धि प्राप्त होती है । इसमें कोई दूसरे प्रकार का संशय नहीं करना चाहिये ॥ १२३ ॥

### कुलभ्रष्टस्य निष्कृतिर्नास्ति

**सर्वाचारपरिभ्रष्टः कुलाचारं समाचरेत् ।**
**कुलाचारपरिभ्रष्टो रौरवं नरकं व्रजेत् ॥ १२४ ॥**

जो सभी प्रकार के आचारों से परिभ्रष्ट हो चुका है, उसे इस कुलाचार का पालन करना चाहिये । किन्तु कुलाचार से भी भ्रष्ट हो जाने वाला रौरव नरक प्राप्त करता है ॥ १२४ ॥

**शास्त्रेषु निष्कृतिर्दृष्टा महापातकिनामपि ।**
**कुलभ्रष्टस्य कुत्रापि न दृष्टा निष्कृतिः क्वचित् ॥ १२५ ॥**

शास्त्रों ने महापातकियों के लिये उद्धार का उपाय बताया है । किन्तु कुलमार्ग से भी भ्रष्ट हो जाने वाले के लिये उद्धार का कहीं कोई उपाय नहीं है ॥ १२५ ॥

**आपदं दुरितं रोगो दारिद्र्यं कलहो भयम् ।**
**योगिनीनां प्रकोपश्च स्खलितानि पदे पदे ॥ १२६ ॥**

कुलमार्ग से परिभ्रष्ट आपत्ति, पाप, रोग, दारिद्र्य, कलह, भय और योगिनियों का प्रकोप तथा पदे पदे पराभव प्राप्त करता है ॥ १२६ ॥

### कुलाचारी योगिनीप्रियः

**भ्रंशमानः प्रणष्टश्च तेजोहीनश्च दुर्मतिः ।**
**निन्दितः सर्वविद्विष्टो विह्वलः सङ्गवर्जितः ॥ १२७ ॥**
**देशाद्देशान्तरं याति कार्यहानिश्च सर्वदा ।**
**तत्रापि कुलमार्गस्थाः शाकिन्यः कुलपालिकाः ॥ १२८ ॥**
**भक्षयन्ति पुरा तासां वरो दत्तो मयैव तु ।**

**तस्मादाचारवान् वीरो योगिनीनां प्रियो भवेत् ॥ १२९ ॥**

कुलमार्ग से भ्रष्ट होते ही साधक प्रनष्ट, तेजोहीन, दुर्बुद्धि, निन्दित, सब का विद्वेषी, विह्वल (पागल) और सङ्गवर्जित हो जाता है। वह एक स्थान से दूसरे स्थान तक डोलता फिरता है। सर्वदा उसके कार्य में हानि होती रहती है। इतना होने पर भी कुलमार्ग की शाकिनियाँ उसे खा जाती हैं। क्योंकि मैंने ही उन्हें इस प्रकार का वरदान दिया है। इस कारण कुलमार्ग का आचरण करने वाला वीर ही योगिनियों का प्रिय होता है ॥ १२७-१२९ ॥

**कुलाचारेण देवत्वं योगिनीवीरमेलनम् ।**
**तिर्यग्योनिं समाप्नोति कौलिकस्तद्विपर्ययात् ॥ १३० ॥**

कुलाचार से देवत्व की प्राप्ति होती है। योगिनियाँ और वीर उन्हीं को प्राप्त होते हैं। किन्तु कौल मार्ग प्रतिकूल आचरण करने से कौलिक साधक को तिर्यक् योनि (पशुपक्षी) प्राप्त होती है ॥ १३० ॥

**आज्ञासिद्धिर्भवेत्तस्य आचारपालनात् सदा ।**
**संस्कारस्य विहीनत्वाद् गुरुवाक्यस्य लङ्घनात् ॥ १३१ ॥**
**आचारवर्जनाच्चैव कौलिकः पतितो भवेत् ।**
**भोगो मोक्षायते तस्य पातकं सुकृतायते ॥ १३२ ॥**
**मोक्षायते च संसारः साधकशुद्धभावतः ।**
**पञ्चतत्त्वेन कर्त्तव्यं सदैव पूजनं महत् ॥ १३३ ॥**

जो आचार का परिपालन करता है उसे आज्ञा सिद्धि प्राप्त होती है। किन्तु संस्कार रहित होने से तथा गुरु की आज्ञा का उल्लङ्घन करने से एवं आचार का वर्जन करने से कौलिक पतित हो जाता है। जो साधक शुद्ध भाव से कौल मार्ग का पालन करता है, उसके लिये भोग मोक्ष के समान हो जाता है तथा पाप सुकृत के समान हो जाता है। अतः भगवती चण्डिका की पूजा पञ्चतत्त्व के पदार्थों से करनी चाहिये ॥ १३१-१३३ ॥

**अतिगुप्तेन कर्त्तव्यं सर्वथैव सुनिश्चितम् ।**
**इत्याचारपरः श्रीमान् जपपूजापरायणः ॥ १३४ ॥**
**पालकः कुलतत्त्वानां परतत्त्वे प्रलीयते ।**
**अणिमाद्यष्टसिद्धीनामाश्रयः साधको भवेत् ॥ १३५ ॥**

कुल पूजा अत्यन्त गुप्त रूप से करनी चाहिये। इस प्रकार के आचरणों वाला श्रीमान् जप एवं पूजा परायण तथा कुल तत्त्व का पालन करने वाला निश्चित रूप से परतत्त्व में विलीन हो जाता है और ऐसा साधक अणिमादि अष्टसिद्धियों

का आश्रय बन जाता है ॥ १३४-१३५ ॥

**प्रायश्चित्तं भृगोः पातं सन्न्यासं व्रतधारणम् ।**
**कायक्लेशश्च नास्तिक्यं तीर्थयात्रामुपोषणम् ॥ १३६ ॥**
**वर्जयेच्च प्रयत्नेन यदीच्छेत् सिद्धिमात्मनः ।**

पञ्चमहापातकानि

**वीरहत्या वृथापानं वीरद्रव्यापहारिता ॥ १३७ ॥**
**वीरस्त्रीगमनञ्चापि तत्संसर्गाच्च पञ्चमम् ।**
**महापातकमित्युक्तं सर्वथा परिवर्जयेत् ॥ १३८ ॥**

कुलमार्गानुगामी प्रायश्चित्त, भृगुपतन (ऊँचे पर्वतादि से गिरकर आत्मघाती), सन्यास व्रत, कायक्लेश, नास्तिक्य (यदि अपना कल्याण चाहे तो) तीर्थयात्रा एवं उपवास प्रयत्नपूर्वक वर्जित रखे । वीर साधक की हत्या, वृथा मद्यपान, वीरद्रव्य का अपहरण, वीर की स्त्री के साथ सम्भोग और इन सभी प्रकार के पापों को करने वाले का साथ—ये कुल सम्प्रदाय में पाँच महापातक कहे गये हैं । कौलिक इन पाँचों महापातकों का त्याग कर देवे ॥ १३५-१३७ ॥

**कुसुम्भं नालिकाञ्चैव चिञ्चामेव न खादयेत् ।**
**भुक्त्वा चान्द्रायणं कुर्यात् सिद्धविद्याप्रपूजकः ॥ १३९ ॥**

कुसुम्भ-नारिकेल-चिञ्चा न खावे । यदि प्रमाद वश खा लेवे तो उस सिद्ध विद्या प्रपूजक को चान्द्रायण व्रत करना चाहिये ॥ १३८ ॥

**इक्षुखण्डं न भुञ्जीत शिवा कालीति नो वदेत् ।**
**न छेदयेत् कदम्बञ्च त्रिपुरापूजकः सदा ॥ १४० ॥**

कुलपूजक ऊख का बना हुआ खाँड़ न खावे, शिवा-काली यह नाम न लेवे तथा त्रिपुरा की पूजा करने वाला कदम्ब वृक्ष का छेदन न करे ॥ १४० ॥

**प्रमादाद्यदि कुर्वीत सुन्दरीशापमाप्नुयात् ।**
**कुलधर्मं समाश्रित्य आचारं यो न पालयेत् ॥ १४१ ॥**
**यथेच्छाचारिणस्तस्य महापातकिनः सदा ।**
**निष्कृतिर्नास्ति तस्यैव महारौरवसङ्कुले ॥ १४२ ॥**

यदि प्रमादवश उक्त कार्यों को करता है, तो उसे सुन्दरी भगवती का शाप लगता है । कुल धर्म की दीक्षा लेकर जो कौलाचार का पालन नहीं करता, ऐसे यथेच्छाचारी, महापातकी का महारौरव से उद्धार नहीं होता ॥ १४१-१४२ ॥

**स सदा पशुरित्युक्तो देवताशापमाप्नुयात् ।**

गुप्तप्रकटसम्भूतं ज्ञानाज्ञानकृतं तथा ॥ १४३ ॥
निषिद्धाचरणं यत्र कुत्रापि यदि जायते ।
प्रायश्चित्तं तत्र तत्र कर्त्तव्यं साधकेन च ॥ १४४ ॥

वह सर्वदा पशु बना रहता है । उसे पर देवता का शाप प्राप्त होता है । गुप्त रूप से या प्रकट रूप से, जान में अथवा अनजान में, यदि निषिद्धाचरण जहाँ-कहीं भी हो जाय; तो वहाँ-वहाँ कुल साधक को प्रायश्चित्त अवश्य करना चाहिये ॥ १४३-१४४ ॥

निषिद्धाचरणे सम्यक् पापस्य गुरुलाघवम् ।
देशं कालं वयो वित्तं सम्यक् ज्ञात्वा यथाविधि ॥ १४५ ॥
प्रायश्चित्तं गुरोः कुर्यात् सर्वपापविशुद्धये ।
शिष्योऽपि खलु तत्प्रोक्तं प्रायश्चित्तं समाचरेत् ॥ १४६ ॥

निषिद्धाचरण हो जाने पर साधक शिष्य पापों के गुरु-लाघव का, देशकाल, अवस्था तथा वित्त का यथाविधि ज्ञान कर; गुरु के पाप से शुद्धि करने के लिये स्वयं प्रायश्चित करे । शिष्य भी स्वयं से पाप हो जाने पर गुरु के द्वारा उपदिष्ट प्रायश्चित्त करे ॥ १४५-१४६ ॥

अथवा सर्वपापानां गुरुनामजपः स्मृतः ।
जाम्बूनदस्य कलुषं परिशुद्धं यथाऽग्निना ॥ १४७ ॥
अनाचारस्य मालिन्यं प्रायश्चित्ताऽग्निना दहेत् ।
लक्षं नाम्नो गुरोर्जपि सर्वपापाद्विशुद्ध्यति ॥ १४८ ॥

अथवा शिष्य अपने द्वारा किये गये सभी पापों से निवृत्ति के लिये गुरु के नाम का केवल जप करे । जिस प्रकार सुवर्ण अग्नि से तपाये जाने पर अपना सारा कालुष्य छोड़ देता है, उसी प्रकार प्रायश्चित्त रूपी अग्नि से निषिद्धाचरण का मालिन्य दूर हो जाता है । गुरु के नाम का एक लाख जप करने से सारे पापों से मुक्ति हो जाती है ॥ १४७-१४८ ॥

अथवाऽप्यजपालक्षं लोपालक्षत्रयं तथा ।
जपान्मुच्येत पापेभ्यः सर्वेभ्यः साधकः सदा ॥ १४९ ॥

अथवा अजपा (हंसः सोऽहं) का एक लाख अथवा लोपा (मुद्रा) का तीन लाख जप करे तो साधक सदैव के लिये सभी पापों से मुक्त हो जाता है ॥१४९॥

### लोपामुद्रामन्त्रोद्धारः

वियच्छून्ययुतः शक्तिः सविसर्गोऽजपामनुः ।

**वियच्छक्तिस्ततः कामः क्षौणी च परमेश्वरी ॥ १५० ॥**
**आकाशं भृगुकामौ च शिवः शक्रश्च पार्वती ।**
**चन्द्रोऽनङ्गो धरादेवी लोपामुद्रा प्रकाशिता ॥ १५१ ॥**

**अजपा एवं लोपामुद्रा मन्त्र**—वियत् (ह) शून्य युक्त विन्दुयुक्त (हं), शक्ति स जो विसर्ग युक्त हो (सः), यह अजपा मनु (=मन्त्र) है । (हंसः) वियत् (ह), शक्तिः (स) कामः (क), क्षोणी (ल), इसके बाद परमेश्वरी (ह्रीं), फिर आकाश (ह), भृगु (स), काम (क), शिव (ह), शक्र (ल), पार्वती (ह्रीं), चन्द्र (स), अनङ्ग (क), धरा (ल), (ह्रीं) इस मन्त्र को लोपामुद्रा ने प्रकाशित किया है । ह स क ल ह्रीं, ह स क ह ल ह्रीं, स क ल ह्रीं' यह अगस्त्य ऋषि की पत्नी लोपामुद्रा द्वारा उपासित त्रिपुरा मन्त्र है ॥ १५०-१५१ ॥

**बहुनाऽत्र किमुक्तेन रहस्यं कथ्यतेऽधुना ।**
**वर्णाश्रमाणां सर्वेषामाचारः सद्गतिप्रदः ॥ १५२ ॥**

इस विषय में बहुत क्या कहा जाय । अब रहस्य कहता हूँ । सभी का वर्णाश्रम धर्म के अनुसार आचरण करने से सद्गति प्राप्त होती है ॥ १५२ ॥

गुरुः शिष्यपापम् आप्नोति

**प्रजादोषश्च राजानं जायादोषं पतिं यथा ।**
**तथा प्राप्नोत्यसन्देहः शिष्यपापं गुरुः सदा ॥ १५३ ॥**

जिस प्रकार प्रजा का पाप राजा को लगता है, स्त्री द्वारा किया गया पाप पति को लगता है, उसी प्रकार शिष्य द्वारा किया गया पाप निश्चित रूप से गुरु को लगता है ॥ १५३ ॥

**गुरुस्त्रिवारमाचारं कथयेच्च स्वशिष्यके ।**
**न गृह्णाति हि शिष्यश्चेत् तदा पापं गुरोर्न हि ॥ १५४ ॥**

इस कारण गुरु अपने शिष्य को तीन बार आचार का उपदेश करे । यदि शिष्य उसे ग्रहण न करे, तो गुरु को दोष नहीं लगता ॥ १५४ ॥

कुलशास्त्रं पशुभ्यः गोप्तव्यम्

**कुलधर्मप्रसङ्गन्तु पशूनां पुरतस्त्यजेत् ।**
**कदाचिन्नैव कुर्याद्धि शूद्राग्रे वेदपाठवत् ॥ १५५ ॥**

पशु साधकों के सामने कुलधर्म का विषय प्रगट न करे । विशेष कर शूद्र के आगे उसी प्रकार, उसकी व्याख्या न करे, जिस प्रकार शूद्र के आगे वेद पाठ नहीं किया जाता ॥ १५४ ॥

**पीठक्षेत्रागमाम्नायं तद्विद्याचारकौलिकान् ।**
**कुलद्रव्यादिकञ्चापि न वदेत् पशुसन्निधौ ॥ १५६ ॥**

पीठाम्नाय, क्षेत्राम्नाय, आगमाम्नाय, उन-उन विद्याओं के आचरण करने वाले कौलिकों तथा कुलद्रव्यादि पशु साधक के सन्निधान में प्रगट न करे ॥ १५६ ॥

**यथा रक्षति चौरेभ्यो धनधान्याम्बरादिकम् ।**
**कुलधर्मं तथा चैव पशुभ्यः परिरक्षयेत् ॥ १५७ ॥**

जिस प्रकार अपने धन धान्य वस्त्रादि की चोरों से रक्षा की जाती है, उसी प्रकार कुलधर्म की रक्षा पशुओं से करनी चाहिये ॥ १५७ ॥

**सुगुप्तकौलिकाचारमनुगृह्णन्ति देवताः ।**
**वाञ्छदासिद्धिमवाप्नोति नाशयन्ति प्रकाशकान् ॥ १५८ ॥**

जो कौलाचार को गुप्त रखता है, प्रगट नहीं करता, उसके मनोरथ पूर्ण हो जाते हैं । देवगण उसकी रक्षा करते हैं, देवगण कौलाचार का प्रकाशन करने वाले का नाश कर देते हैं ॥ १५८ ॥

**या देवी भुवनेश्वरी त्रिभुवनलोकोद्धृता ह्यग्रतो**
**विद्यासृष्टिकृता स्वकीयवपुषो वर्णाश्रिता देवता ।**
**सा नित्या सकला गृहस्थनिलया कान्तादृता कोमला**
**नित्यं पञ्चगुणैर्भजस्व तपसा भोगेन तां साधक! ॥१५९ ॥**

**॥ इति श्रीमज्ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये दशमोल्लासः॥१०॥**

जिस देवी भुवनेश्वरी ने सर्वप्रथम त्रिभुवन लोक को प्रगट किया । जिसने अपने शरीर से विद्या की और वर्ण के आश्रित देवता की भी सृष्टि की । हे साधक! उस नित्या, सकला, आदरणीया, कान्ता, कोमला, गृहस्थों के घर में रहने वाली भगवती भुवनेश्वरी का पञ्चगुणों से, तपस्या से तथा भोगार्पण से नित्य भजन करना चाहिए ॥ १५९ ॥

**महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय के ज्येष्ठ पुत्र पण्डित रामरञ्जन मालवीय कृत श्रीमज्ज्ञानानन्द परमहंस विरचित कौलावलीनिर्णय नामक तन्त्र के दशम उल्लास की निरञ्जन हिन्दी व्याख्या पूर्ण हुई ॥ १० ॥**

# एकादश उल्लासः

भावनिरूपणम्

पश्वादिभेदेन भावस्य त्रैविध्यम्

अथ भावं प्रवक्ष्यामि यथा तन्त्रानुसारतः ।
भावस्तु त्रिविधः प्रोक्तो दिव्यवीरपशुक्रमात् ॥ १ ॥

अब तन्त्र के अनुसार भाव के विषय में कहता हूँ । दिव्य, वीर और पशु के भेद से भाव तीन प्रकार के कहे गये हैं ॥ १ ॥

तद्भेदेन गुरुमन्त्रदेवतानां त्रैविध्यम्

गुरुश्च त्रिविधश्चैव तथैव मन्त्रदेवता ।
आद्यभावो महान् श्रेयान् सर्वसिद्धिप्रदायकः ॥ २ ॥

उसी प्रकार गुरु तथा मन्त्र एवं देवता भी तीन-तीन प्रकार के कहे गये हैं । उसमें से प्रथम दिव्य-भाव महान् है और कल्याणकारी है तथा समस्त सिद्धियों को देने वाला है ॥ २ ॥

द्वितीयो मध्यमश्चैव तृतीयो विश्वनिन्दितः ।
बहुजापात्तथा होमात् कायक्लेशादि विस्तरैः ॥ ३ ॥
न भावेन विना चैव यन्त्रमन्त्राः फलप्रदाः ।
किं वीरसाधनैर्लक्षैः किम्वाऽऽकृष्टकुलाकुलैः ॥ ४ ॥
किं पीठपूजनेनैव किं कन्याभोजनादिभिः ।
स्वकुले प्रीतिदानेन किं परेषान्तथैव च ॥ ५ ॥
किं जितेन्द्रियभावेन किं कुलाचारकर्मणा ।
यदि भावविशुद्धात्मा न स्यात् कुलपरायणः ॥ ६ ॥

दूसरा वीर भाव मध्यम है, किन्तु तीसरा पशुभाव विश्वभर में निन्दित है । भाव के बिना बहुत कायक्लेश के द्वारा किये गये जप होमादि से यन्त्र एवं मन्त्र फल प्रदान नहीं करते । अनेक प्रकार के वीर साधनों से, लाखों बार कुलाकुल के

आकर्षण से, पीठ पूजन से तथा कन्यकादि को भोजन प्रदान से कोई लाभ नहीं होता। साधक यदि भाव से विशुद्धात्मा तथा कुल परायण नहीं है तो अपने कुल को प्रसन्न रखने से, उन्हें सन्तुष्ट रखने से, इन्द्रियों पर विजय प्राप्त करने से तथा कुलाचारों एवं चित्त कर्म के सम्पादन से भी कोई लाभ प्राप्त नहीं होता ॥ ३-६ ॥

**भावेन लभते मुक्तिं भावेन कुलवर्धनम् ।**
**भावेन गोत्रवृद्धिः स्याद् भावेन कायशोधनम् ॥ ७ ॥**

भाव से मुक्ति प्राप्त होती है। भाव से ही कुल की वृद्धि होती है, भाव से गोत्रशुद्धि होती है और सद्भाव से शरीर शुद्ध होता है ॥ ७ ॥

**किं न्यासविस्तरेणैव किं भूतशुद्धिविस्तरैः ।**
**किं वृथा पूजनेनैव यदि भावो न जायते ॥ ८ ॥**

यदि भाव नही है तो न्यास के विस्तार से या भूतशुद्धि के विस्तार से तथा पूजा से कोई लाभ नहीं होता। अत: भाव के बिना सभी कर्म व्यर्थ हैं ॥ ८ ॥

**केन वा पूज्यते विद्या न वा केन प्रजप्यते ।**
**फलाभावश्च नियतं भावाभावात् प्रजायते ॥ ९ ॥**

यदि भाव का अभाव है तो फल का भी अभाव होता है। फिर किस कारण महाविद्या की उपासना तथा किस कारण जपानुष्ठान किया जाय ॥ ९ ॥

### दिव्यभावनिरूपणम्

**प्रथमं दिव्यभावस्तु कथ्यते तन्त्रवर्त्मना ।**
**यद्वर्णं देवता यत्र तत्तेजःपुञ्जपूरितम् ॥ १० ॥**

अब तन्त्र मार्ग के अनुसार दिव्यभाव का प्रथमत: वर्णन करता हूँ। जहाँ पर जिस वर्ण के देवता हैं; वह स्थान (=मन्दिर) उन देवता के तेज:पुञ्ज से परिपूर्ण रहता है ॥ १० ॥

**तेजोमयं जगत् सर्वं विभाव्य मूर्त्तिकल्पनम् ।**
**तत्तन्मूर्त्तिमयैर्मन्त्रैः स्वेन स्वेनैव वा पुनः ॥ ११ ॥**
**आत्मानं तन्मयं दृष्ट्वा सर्वं भावं तथैव च ।**
**तत्सर्वं योषिति ध्यात्वा चिन्तयेद्यतमानसः ॥ १२ ॥**

यह सारा जगत् तेजोमय है; इसी विचार से मूर्त्ति की कल्पना है। तत्तन्मूर्त्तिमय मन्त्रों से अथवा स्व स्व मन्त्रों से अपने को तन्मय देखकर; उसी प्रकार सभी भावों को योषित् (स्त्री मात्र) में भी देखकर; समाहित चित्त हो कुल साधक ध्यान करे ॥ ११ ॥

**अष्टाब्दात् षोडशाब्दान्तं युवतीति प्रचक्ष्यते ।**
**तत्र भावप्रकाशश्चेत् स भावः परमो मतः ॥ १३ ॥**

आठ वर्ष से सोलह वर्ष की अवस्था वाली योषित् अर्थात् 'युवती' कही जाती है। यदि उसमें देवी का भाव प्रकाशित होता है तो वह भाव ही सर्वश्रेष्ठ कहा जाता है ॥ १३ ॥

**चरणान्मूलपर्यन्तं पीत्वा पीत्वा पुनः पिबेत् ।**
**तस्या नखमणिज्योत्स्नाखण्डिताघतमो भवेत् ॥ १४ ॥**

साधक उसके चरण से मूल पर्यन्त भाग का बारम्बार नेत्रों से पान कर उसके नखरूपी मणि की ज्योत्स्ना से अपना सारा पाप नष्ट कर देता है ॥ १४ ॥

**विमर्श**—रामकृष्ण परमहंस इसी प्रकार के शक्ति के उपासक थे। वह अपनी भार्या में ही देवी रूप का दर्शन करते थे।

**स्निग्धान्तःकरणो वीरो निर्विकारः सदा भवेत् ।**
**सुवृत्तजानुना चारुजङ्घोरुजघनश्रिया ॥ १५ ॥**
**नाभिरोमावली वक्षःस्थलैः पीनपयोधरैः ।**
**ग्रीवानयनपर्यन्तं केशाग्रैः प्रकरस्मितैः ॥ १६ ॥**
**यावमधुमदापूर्णदिव्यभावविलोकितैः ।**
**स्निग्धेन्द्रियश्च सन्तुष्टश्चतुर्वर्गपदाश्रयः ॥ १७ ॥**

किन्तु वह वीर साधक उस योषित् पर अन्तःकरण से प्रेम करते हुये भी निर्विकार रहे। इसके बाद उसके गोल वृत्ताकार जानु से, मनोहर जङ्घा, ऊरू और जघन की शोभा से, नाभि, रोमावली, वक्षःस्थल तथा पीन पयोधर से, ग्रीवा से लेकर नेत्र पर्यन्त केशाग्र से तथा उसके मन्द-मन्द मुस्कान से, मधु एवं मस्तीपूर्ण दिव्यभाव के अवलोकन से, सर्वदा अविचलेन्द्रिय एवं सन्तुष्ट हो जावे, जो धर्म, अर्थ, काम और मोक्ष इन चारों पुरुषार्थों का आश्रय है ॥ १५-१७ ॥

कामकलापूजा

**ततः कामकलां ध्यायेत् साधकः स्थिरमानसः ।**
**निवृत्तिकाले पुनस्तस्या भावपूर्णामृतैर्निजम् ॥ १८ ॥**
**मुखं विन्दुवदाकारं तदधः कुचयुग्मकम् ।**
**तदधः सपरार्धञ्च चिन्तयेत्तदधोमुखम् ॥ १९ ॥**
**सर्वविद्यामृतापूर्णं सर्ववाग्विभवप्रदम् ।**
**सर्वार्थसाधकञ्चैव सर्वरञ्जनकारकम् ॥ २० ॥**

सर्वदेवादिभूतञ्च सर्वदेवनामस्कृतम् ।
सर्वाह्लादनसम्पूर्णं सर्वमोहनकारणम् ॥ २१ ॥
सर्वार्थसाधनञ्चैव सर्ववश्यप्रवर्त्तकम् ।
एवं कामकलाध्यानं सुगोप्यं साधकोत्तमैः ॥ २२ ॥

**कामकला का ध्यान**—इसके बाद साधक उसकी कामकला (ई) का स्थिर चित्त हो ध्यान करे । ध्यान की निवृत्ति के बाद पुनः अपने भावपूर्ण चित्त से बिन्दु के आकार वाला मुख, उसके नीचे दो स्तन मण्डल, उनसे नीचे अधोमुख रहने वाली रोमावली युक्त, सर्व विद्यामृतापूर्ण, सम्पूर्ण वाग्विभव प्रदान करने वाली, सभी कामनाओं को पूर्ण करने वाली, सब को प्रसन्न करने वाली, सबकी उत्पत्ति का स्थान, सभी देवों से नमस्कृत, सभी प्रकार की प्रसन्नता से पूर्ण, सब को मोहित करने वाली, सर्वार्थसाधिका सब को वश में करने वाली इस प्रकार की कामकला का उत्तम साधक ध्यान करे और उसे सुगोप्य रखे ॥ १८-२२ ॥

एतद्रूपं तु चात्मानं चिन्तयेत् साधकः सदा ।
मेढ्रस्थाने शिवाकारमाधारे कनकप्रभम् ॥ २३ ॥
नाभिस्थं सूर्यविम्बाभं तरुणादित्य वर्चसम् ।
हृदि वह्निशिखाकारं तदूर्ध्वे भास्करद्युतिम् ॥ २४ ॥
कण्ठे दीपशिखाकारं घण्टा वैदूर्यसन्निभम् ।
लम्बिके चन्द्रविम्बाभं भ्रूमध्ये रत्नवद्रुचिम् ॥ २५ ॥
नयने विश्वतेजश्च चिन्तयेदेषु साधकः ।

**सदाशिव का ध्यान**—इसके बाद साधक अपने को इस प्रकार के रूप में ध्यान करे । मेढ्र (लिङ्ग) स्थान में शिव का आकार, जो आधार में सुवर्ण के समान चमकीला, नाभि में तरुणादित्य के समान तेजस्वी, सूर्य बिम्ब के समान, हृदय में अग्नि की शिखा के समान, उसके ऊपर सूर्य के समान प्रकाश करने वाले, कण्ठ में दीप शिखा के आकार वाले, गला में वैदूर्य के समान, लम्बिका में चन्द्र बिम्ब के समान, आभा वाले, भ्रूमध्य में रत्न की द्युति के समान आभा वाले, नेत्र में विश्व एवं तैजस स्वरूप सदाशिव का चिन्तन करे ॥ २३-२६ ॥

धृत्वा स्पृष्ट्वाऽथवा दृष्ट्वा ध्यात्वा कामकलातनूम् ॥ २६ ॥
कुलेषु तत्कलारूपमकुले परिचिन्त्य च ।
क्षणं तद्वद्विमर्शेन जायते भावसञ्चयः ॥ २७ ॥

फिर कामकला को पकड़कर, अथवा स्पर्शकर, अथवा देखकर, अथवा ध्यान कर, कुल में कलारूप तथा अकुल में भी उसी प्रकार ध्यान कर, क्षण मात्र में विचार करने से उस साधक में भाव का सञ्चय हो जाता है ॥ २६-२७ ॥

**कुलीनो जायते यस्मात्तत् सर्वं कथितं शुभम् ।**
**कुले साक्षाद् यतस्तत्त्वं देवी तिष्ठति तत्त्वतः ॥ २८ ॥**

इस प्रकार जिससे साधक कुलोपासक बन जाता है वह उपाय हमने प्रदर्शित किया । क्योंकि कुल में सभी तत्त्व तथा स्वयं देवी भी तत्त्वयुक्त होकर विद्यमान रहती है ॥ २८ ॥

**तेन तत्कुलशास्त्राङ्गे पूजनीया प्रयत्नतः ।**
**कुलदेवी चाद्या देवी निश्चला यस्य विद्यते ॥ २९ ॥**
**स धन्यः पुरुषो लोके निश्चलो यत एव सः ।**
**इति कामकलाध्यानं कथितं सर्वसिद्धिदम् ॥ ३० ॥**

इसलिये उस कुलशास्त्र के अङ्ग में देवी की पूजा करनी चाहिये । जिसमें यह आद्या कुलदेवी निश्चल होकर निवास करती है, इनकी जिसने पूजा की वह पुरुष धन्य है । वही लोक में सर्वथा निश्चल है । यहाँ तक हमने सम्पूर्ण सिद्धियों को प्रदान करने वाला काम कला का ध्यान कहा ॥ २९-३० ॥

**परयोषाधिका ज्ञेया निजस्त्री प्रीतिवर्द्धिनी ।**
**आगते स्वागतं कुर्याज्लीलायोगात् स्वलीलया ॥ ३१ ॥**

कुल पूजा के लिये दूसरे की स्त्री अधिक (श्रेष्ठ) मानी गई है । अपनी स्त्री में कुल पूजा से प्रीति बढ़ती है । यदि भगवती की लीला योग से, अथवा स्वयं अपनी लीला से स्त्री स्वयं आ जावे, तो उसका स्वागत करना चाहिये ॥ ३१ ॥

**तल्पाच्चोत्थाप्य हस्ताग्रे धृत्वा सम्वेशयेत्तः ।**
**वामभागसमासीनां सुवेशीं कामरूपिणीम् ॥ ३२ ॥**
**ध्यात्वा कामकलां तत्र विन्द्वादिपूर्वविग्रहाम् ।**
**गन्धमाल्यं ततो दत्त्वा कुलद्रव्याणि योजयेत् ॥ ३३ ॥**

अपने आसन से उठकर, उसके हाथ का अग्रभाग पकड़कर, सर्वप्रथम आसन पर बैठावे । इस प्रकार वामभाग में बैठी हुई, सुवेशा, कामरूपिणी देवी के विन्द्वादि पूर्वकथित विग्रह वाले कामकला का ध्यान करे । इसके बाद गन्ध माल्य प्रदान कर उसके सामने कुलद्रव्य स्थापित करे ॥ ३२-३३ ॥

**हेतुयुक्तं सताम्बूलं दत्त्वा भुक्त्वा च साधकः ।**
**पृच्छेत् कुलकथां सर्वां लौकिकालौकिकादिकाम्॥ ३४ ॥**

मद्य युक्त ताम्बूल देकर, साधक स्वयं भोजन कर, उससे लौकिक तथा अलौकिक कुलकथा के विषय में पूछे ॥ ३४ ॥

**तस्यां निन्दाभयक्रोध कटूक्तियोजनं यदि ।**
**करोति कुलशास्त्रज्ञः सिद्धोऽपि नश्यति ध्रुवम् ॥ ३५ ॥**

यदि साधक उससे निन्दा, भय, क्रोध तथा कटूक्ति (निष्ठुर भाषण) युक्त व्यवहार करता है, तो वह कुलशास्त्र का ज्ञाता साधक सिद्ध होकर भी निश्चित रूप से विनष्ट हो जाता है ॥ ३५ ॥

**हित्वा दोषादिकं तत्र स्नेहवृष्टीव शिक्षया ।**
**भावयेन्न कटूक्त्या वै कृते तु निष्फलं भवेत् ॥ ३६ ॥**

उसके दोषों की ओर ध्यान न देकर, स्नेह दृष्टि से देखते हुये उसे शिक्षा देवे। किन्तु निन्दा, भय एवं क्रोध युक्त निष्ठुर वचन न बोले; क्योंकि ऐसा करने से उसे कोई फल नहीं होता ॥ ३६ ॥

**कुलशास्त्रे रहस्यं तु कुलमूलं ततो जगत् ।**

उसे कुलशास्त्र के रहस्य की इस प्रकार शिक्षा देवे कि यह सारा जगत् कुल से उत्पन्न हुआ है ॥ ३७ ॥

**वरं कुलमनोस्त्यागो वरं कुलगुरोरपि ॥ ३७ ॥**
**न त्यागयोग्यं स्वकुलं दृष्टदोषेण सर्वथा ।**
**स्वकुले कुलबाहुल्यं यदि स्याद् भाग्ययोगतः ॥ ३८ ॥**

कुल मन्त्र का त्याग तथा कुलगुरु का त्याग भले ही हो जावे; किन्तु दोषों के दिखाई पड़ने पर भी अपने कुल (स्त्री) का त्याग उचित नहीं है । यदि भाग्यवशात् अपना कुल (स्त्री) हो तो कुल की बहुलता होती है ॥ ३७-३८ ॥

**समरूपं विधातव्यं वैपरीत्यं परित्यजेत् ।**
**पृथक् स्थानं पृथग्ध्यानं पृथक्पूजा पृथक् स्तुतिः ॥ ३९ ॥**
**न कर्त्तव्या प्रयत्नेन किमेभिर्बहुजल्पितैः ।**
**वीरापत्यकुले चैव वीरपत्नीकुलेऽपि च ॥ ४० ॥**
**सदा तिष्ठति देवेशि नात्र कार्या विचारणा ।**
**तासां निश्वासयोगेन तद्देशश्चैव नश्यति ॥ ४१ ॥**

अपने कुल (स्त्री) से समता का व्यवहार करना चाहिये विरुद्ध व्यवहार सर्वथा वर्जित करे । उससे अलग स्थान में अलग रहकर ध्यान, अलग पूजा और अलग प्रार्थना कदापि नहीं करनी चाहिये । प्रयत्नपूर्वक वर्जित करनी चाहिये । इस विषय में बहुत कहने से क्या लाभ? महाभगवती वीरापत्य कुल में तथा वीरपत्नी कुल में सर्वदा निवास करती है । इसमें विचार की आवश्यकता नहीं है । यदि कुल स्त्री ने

दुःखपूर्वक श्वास लिया तो सारा देश नष्ट हो जाता है ॥ ३९-४१ ॥

**प्रमोदादमृतस्नानं देव्याः स्यान्नात्रसंशयः ।**
**कुलजा सा महायुद्धे वीरास्फालननादिनी ॥ ४२ ॥**

जहाँ स्त्रियाँ प्रसन्न होकर निवास करती हैं वहाँ स्वयं भगवती अमृत में स्नान करती हैं इसमें संशय नहीं । ऐसी कुलजा महायुद्ध में बड़े-बड़े वीरों को भी आस्फालित कर देती है अर्थात् पराभूत कर देती है ॥ ४२ ॥

**न दोषमनुगच्छन्ती पालयन्ती यतो जगत् ।**
**मात्सर्यं पतिविद्वेषः कटूक्तिः कलहादिकम् ॥ ४३ ॥**
**नीचाभिगमनाच्चैव न सा देवी हरप्रिया ।**
**एवं कुलं परित्यज्य साधयेत् सिद्धिमात्मनः ॥ ४४ ॥**

जिसमें दोष नहीं है ऐसी वह सारे जगत् का पालन करती है । किन्तु जिसमें मात्सर्य, पति द्वेष, निष्ठुर भाषण, कलहादि दोष हैं और जो नीचों के साथ अभिगमन करती है, वह शिव को प्रिय नहीं लगती । ऐसी दूषित कुलजा (स्त्री) का परित्याग कर साधक अपनी सिद्धि करे ॥ ४३-४४ ॥

### फलपाकविधानम्

**फलपाकविधानं किं कथ्यते तन्त्रवर्त्मना ।**
**वीरपत्नी च परमा स्वयमेव महेश्वरी ॥ ४५ ॥**

अब जो स्त्री पूजा के योग्य हैं, तन्त्र मत के अनुसार उनकी पूजा से प्राप्त होने वाला फल कहता हूँ । वीर साधक की पत्नी स्वयं परमानन्दकारिणी तथा स्वयं महेश्वरी है ॥ ४५ ॥

**तत्सुता कुलविद्यानामाद्या रौद्री सनातनी ।**
**तद्वधू भुवनेशानी सर्वमन्त्रप्रबोधिनी ॥ ४६ ॥**

उस वीर साधक की कन्या कुल विद्या नाम वाली है और वही आद्या, रौद्री एवं सनातनी है । उसकी वधू (पतोहू) भुवनेशानी सर्वमन्त्रप्रबोधिनी है ॥ ४६ ॥

**न्यायतोऽन्यायतो वापि वीरपत्नी गुरुर्यदि ।**
**दीक्षणादेव सर्वार्थसाधकः साधको भवेत् ॥ ४७ ॥**

न्याय (विधिपूर्वक) अथवा अन्याय (विना विधि) से यदि वह वीर पत्नी मन्त्रदात्री हो गई हो तो उसकी दीक्षा मात्र से साधक सर्वार्थसाधक बन जाता है ॥४७॥

**यदि भाग्यवशाद्देवि वीरपत्नी तु लभ्यते ।**
**फलपाकं तत्र कृत्वा किं न सिध्यति भूतले ॥ ४८ ॥**

हे देवि ! यदि भाग्यवश मन्त्र के लिये वीरपत्नी मिल जावे, तो उसमें फल पाक (=सिद्धि) करके साधक के लिये कौन-सा ऐसा मनोरथ संसार में है जो सिद्ध न हो ॥ ४८ ॥

**फलपाकविधानं तु सर्वदेवनमस्कृतम् ।**
**दृष्टादृष्टाफलश्चैव देवगन्धर्वकिन्नराः ॥ ४९ ॥**
**आयान्ति फलपाकार्थं तस्माद्यत्नविशेषतः ।**
**विसर्जनं विधातव्यं गोपनं भावशक्तिकम् ॥ ५० ॥**

फलपाक विधान, सर्वदेवनमस्कृत एवं दृष्ट तथा अदृष्ट फल वाला है । इस फल पाक (=सिद्धि) के लिये देवता, गन्धर्व एवं किन्नर आते हैं । इसलिये इसमें विशेषतः प्रयत्न करता रहे । इस (आगन्तुक सिद्धि) का विसर्जन करे और भावशक्ति को गुप्त रखे ॥ ४९-५० ॥

### पातिव्रत्यप्रशंसा

**तत्तत्कल्पविधानेन कुलं कुर्यात् सुशिक्षितम् ।**
**यतः पतिव्रताधर्मात् धर्मो नास्ति जगत्त्रये ॥ ५१ ॥**

वीर साधक कुल (स्त्री) को तत्तत् कल्पों में विहित विधान के अनुसार सुशिक्षित करे । उसे यह बतावे कि पतिव्रता धर्म से बढ़कर तीनों जगत् में कोई धर्म नहीं है ॥ ५१ ॥

**पतिः प्राणप्रदो नित्यं पतिरेव परा गतिः ।**
**पतिरेव परं ब्रह्म पतिः प्राणाधिकः प्रभुः ॥ ५२ ॥**

पति ही स्त्री में प्राण देने वाला है । पति ही स्त्रियों के लिये परा गति है । पति स्त्रियों के लिये परब्रह्म है । पति प्राण से भी अधिक समर्थ है ॥ ५२ ॥

**सर्वतीर्थमयः स्वामी सर्वदेवमयः पतिः ।**
**सर्वदेवीमयश्चैव पतिरेवमहागुरुः ॥ ५३ ॥**

पति सर्वदेवमय है; पति ही स्वामी तथा सर्वतीर्थमय है । पति सर्वदेवीमय तथा महागुरु भी पति ही है ॥ ५३ ॥

**सर्वदेवमयं हित्वा या नारी परगोचरा ।**
**शूकरी गर्दभी काको शृगाली जायते ध्रुवम् ॥ ५४ ॥**

ऐसे सर्वदेवमय पति का त्याग कर जो स्त्री पर पुरुष के साथ हो जाती है वह दूसरे जन्म में शूकरी, गर्दभी, काकी और शृगाली निश्चित रूप से होती है ॥५४॥

**अहं तु पुत्रवद्देवि नात्र भीतिर्न च त्रपा ।**

**तव लिङ्गे यो हि याति पतिरूपधरः क्वचित् ॥ ५५ ॥**

हे देवि! मैं तो आपके पुत्र के समान हूँ। अतः मुझसे भय एवं लज्जा मत करो क्योंकि जो पतिरूप धारण कर आपके पास जाता है वह आपका स्वरूप ही हो जाता है ॥ ५५ ॥

**मूलमन्त्रजप्ततोयं तद्गात्रे देयमीश्वरि ।**
**तदा यदि बहिर्न स्यात्तदा स्वपतिरेव हि ॥ ५६ ॥**
**इत्यादिशिक्षया कार्याः शिक्षिताः कुलयोषितः ।**
**आगत्योपविशेत् पार्श्वे मुखं वीक्ष्य स्थिरा भवेत् ॥ ५७ ॥**
**पतिभावेङ्गिते दक्षा हृष्टा स्यात् पतिदर्शने ।**
**उत्तरे नोत्तरं दद्यात् व्याहरेच्छुभकर्मणि ॥ ५८ ॥**

जो मेरु है उसे गुरु समझना चाहिये और मन्त्र बीज दाहिनी ओर स्थापित करे। इस प्रकार माला का निर्माण कर उसकी प्रतिष्ठा करे ॥ ४५ ॥

मालासंस्कारक्रमविवेचनम्

**अनुलोमविलोमाभ्यां मातृकान्तरितां न्यसेत् ।**
**पञ्चगव्ये क्षिपेन्मालां शिवमन्त्रेण मन्त्रिताम् ॥ ४६ ॥**

मातृकार्पण (अ से लेकर क्ष पर्यन्त) के अनुलोम और विलोम क्रम से (अ-- क्ष अनुलोम क्ष..................अ प्रतिलोम क्रम से) प्रत्येक बीज में न्यास करे। फिर शिवमन्त्र से अभिमन्त्रित कर माला को पञ्चगव्य में डाल देवे ॥ ४६ ॥

**सान्तं शक्रस्वरारूढं नादविन्दुविभूषितम् ।**
**कथितं शिवमन्त्रञ्च साधकानां हिताय च ॥ ४७ ॥**

साधकों के हित के लिये शिवमन्त्र इस प्रकार बतलाया गया है—सान्त (ह) जो शक्र स्वर (औ) तथा नाद विन्दु (अनुस्वार से विभूषित हो) वह शिवमन्त्र कहा गया है; यथा—(हौं) ॥ ४७ ॥

**पञ्चामृतैः पञ्चगव्यैः स्नापयेन्मूलमुच्चरन् ।**
**घृतं क्षीरं तथा नीरं शर्करामधुसंयुतम् ॥ ४८ ॥**
**पञ्चामृतमिदं ख्यातं प्रत्येकन्तु पलं पलम् ।**
**पलार्धं गोमयं क्षीरं प्रस्थं दधि तथा समम् ॥ ४९ ॥**
**गोमूत्रं प्रस्थमानं स्यादाज्यञ्चैव तदर्धकम् ।**
**मूलेन मन्त्रितं कृत्वा योजयेत् पञ्चगव्यकम् ॥ ५० ॥**

तदनन्तर मूल मन्त्र का उच्चारण करते हुये पञ्चामृत और पञ्चगव्य से माला को स्नान करावे। घी, दूध, जल, शर्करा और मधु को एक-एक पल लेकर एक साथ मिला देने से पञ्चामृत बन जाता है, अर्थात् पञ्चामृत में प्रत्येक का परिमाण एक एक पल होना चाहिये। आधा पल गोमय, दूध और दही, एक-एक प्रस्थ बराबर घी, दूध, जल, शर्करा और मधु इनको एक में मिलाने से पञ्चामृत बनता है। एक प्रस्थ गोमूत्र उसका आधा घी इनको मूल मन्त्र से एक में मिला देवे तो पञ्चगव्य बन जाता है ॥ ४८-५० ॥

**अशीतलजलेनैव स्नापयेत्तदनन्तरम् ।**
**क्षालयेत् पञ्चगव्येन सद्योजातेन मार्जयेत् ॥ ५१ ॥**

मालासंस्कारमन्त्रः

**ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ।**
**भवेऽभवेऽनादिभवे भजस्व मां भवोद्भवाय नमः॥ ५२ ॥**

**सद्योजात मन्त्र**—इसके बाद माला को गर्म जल में स्नान करावे और पञ्चगव्य से प्रक्षालन करे। फिर सद्योजातम्' इस मन्त्र से मार्जन करे । 'ॐ सद्योजातम्.........भवोद्भवाय नमः'—यह सद्योजात मन्त्र है ॥ ५१-५२ ॥

**चन्दनागुरुगन्धाद्यैर्वामदैवेन घर्षयेत् ॥ ५३ ॥**

फिर चन्दन, अगुरु तथा गन्ध से वामदेव मन्त्र द्वारा अर्चन करे ॥ ५३ ॥

**ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः**
**कालाय नमः कलविकरणाय नमः ।**
**बलाय नमो बलविकरणाय नमो बलप्रमथनाय नमः**
**सर्व भूतदमनाय नमो नम उन्मनाय नमः ॥ ५४ ॥**

**वामदेव मन्त्र**—'ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः, कालाय नमः कलविकरणाय नमः, बलाय नमो बलविकरणाय नमो बलप्रमथनाय नमः सर्व भूतदमनाय नमो नम उन्मनाय नमः'—पर्यन्त वामदेव मन्त्र है ॥ ५४ ॥

**सुधूपैर्धूपयेत्ताञ्च अघोरमनुना बुधः ।**
**ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः**
**सर्वतः सर्वसर्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः ॥ ५५ ॥**

**अघोर मन्त्र**—फिर बुद्धिमान् साधक अघोर मन्त्र से उत्तम धूप द्वारा माला को धूप प्रदान करे । 'ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वतः सर्वसर्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः'—यह अघोर मन्त्र है ॥ ५५ ॥

**गन्धचन्दनकुङ्कुमैर्लेपयेत्पुरुषेण च ॥ ५६ ॥**
**ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि ।**
**तन्नो रुद्रः प्रचोदयात् ॥ ५७ ॥**

**तत्पुरुषमन्त्र**—तदनन्तर तत्पुरुष मन्त्र द्वारा गन्ध, चन्दन और कुङ्कुम द्वारा माला को अनुलिप्त करे । 'ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात्'—यह तत्पुरुष मन्त्र है ॥ ५६ ॥

**मन्त्रयेच्च ततो धीरः प्रत्येकञ्च शतं शतम् ।**
**ईशानमनुना मेरुं शतं चैव ततः परम् ॥ ५८ ॥**
**ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम्**

**ब्रह्माधिपतिः ब्रह्मणोऽधिपतिः शिवो मेऽस्तु सदाशिवोम् ॥५९॥**

इसके बाद धीर पुरुष एक-एक मनियों को सौ-सौ बार अभिमन्त्रित करे। तदनन्तर 'ईशान मन्त्र से सौ बार सुमेरु को अभिमन्त्रित करे ॥ ५८ ॥

**ईशान मन्त्र**—'ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम् ब्रह्माधिपतिः ब्रह्मणोऽधिपतिः शिवो मेऽस्तु सदाशिवोम्' यह ईशान मन्त्र है ॥ ५९ ॥

### मालाप्राणप्रतिष्ठाविधानम्

**ततः संस्थापयेन्मालां स्वर्णादिपीठके बुधः ।**
**पद्माकारेषु चाश्वत्थपत्रेषु स्थापयेच्च वा ॥ ६० ॥**

इस क्रिया के अनन्तर साधक सुवर्णादि निर्मित पीठ पर माला स्थापित करे। अथवा कमल पर अथवा पीपल के पत्र पर भी माला स्थापित करे ॥ ६० ॥

**पीठे वापि च संस्थाप्य पूजयेत् स्वीयदेवताम् ।**
**साङ्गावरणसंयुक्तामुपचारैः सुविस्तरैः ॥ ६१ ॥**

अथवा किसी भी पीठ पर माला स्थापित करे। तदनन्तर अङ्गावरण सहित अपने इष्ट देवता की विस्तृत उपचारों से पूजा करे ॥ ६१ ॥

**एकैकक्रमयोगेन बीजानां साधकोत्तमः ।**
**प्राणप्रतिष्ठां कुर्वीत अष्टोत्तरशतं ततः ॥ ६२ ॥**

फिर उत्तम साधक एक-एक बीज में के क्रम से एक-सौ आठ बार उसमें प्राण प्रतिष्ठा करे ॥ ६२ ॥

### मालाप्राणप्रतिष्ठा मन्त्रः

**प्राणशक्तिसमारूढं औकारविन्दुरूपधृक् ।**
**प्रणवं अक्षमालाधिपतये तदनन्तरम् ॥ ६३ ॥**
**हृदन्तं मूलमुच्चार्य पूजयेन्मालिकां क्रमात् ।**
**तिलेन घृतयुक्तेन शक्त्या होमं प्रकल्पयेत् ॥ ६४ ॥**

प्राणशक्ति (ह), उस पर औ विन्दु युक्त, फिर प्रणव, तदनन्तर 'अक्ष मालाधिपतये, इसके बाद हृत् (नमः), इस मन्त्र से प्राण प्रतिष्ठा कर माला की पूजा करे। (हौं ॐ अक्षमालाधिपतये नमः) यह प्राण प्रतिष्ठा का तथा पूजा का मन्त्र कहा गया। फिर घी मिश्रित तिल से होम करे ॥ ६३-६४ ॥

**होमकर्मण्यशक्तश्चेद् द्विगुणं जपमाचरेत् ।**
**तारोऽक्षमालाधिपतये सुसिद्धादिं वदेत्ततः ॥ ६५ ॥**

**सर्वमन्त्रार्थसाधिनीतिसाधयद्वितयं पुनः ।**
**सिद्धिंप्रकल्पय स्वाहा अभिमन्त्रितमालया ॥ ६६ ॥**
**मूलमन्त्रं जपेत्तत्र अष्टोत्तरसहस्रकम् ।**
**अष्टोत्तरशतं वापि जप्त्वा मालां समर्पयेत् ॥ ६७ ॥**

यदि होम करने में असमर्थ हो तो दूना जप करे । इसके बाद 'तार (ॐ), फिर 'अक्षमालाधिपतये सुसिद्धादि सर्वमन्त्रार्थसाधिनि साधय साधय सिद्धिं प्रकल्पय स्वाहा' इस मन्त्र से अभिमन्त्रित माला के द्वारा मूल मन्त्र का आठ हजार की संख्या में जप करे अथवा एक-सौ आठ की संख्या में जप करे । इतने जप के पश्चात् गुरु शिष्य के हाथ में माला समर्पित करे ॥ ६५-६७ ॥

**शिष्यहस्ते ततः सोऽपि जपेदष्टसहस्रकम् ।**
**अष्टोत्तरशतं वापि जप्त्वा मालाञ्च गोपयेत् ॥ ६८ ॥**

फिर शिष्य भी आठ हजार की संख्या में अथवा एक सौ आठ की संख्या में जप करे और माला को गुप्त रखे ॥ ६८ ॥

**गुरवे दक्षिणां दत्त्वा यथाशक्त्या तु साधकः ।**
**गुरोरभावे मालायाः संस्कारं स्वयमाचरेत् ॥ ६९ ॥**

साधक शिष्य यथाशक्ति गुरु को दक्षिणा देवे । यदि गुरु न हों तो स्वयं माला का संस्कार करे ॥ ६९ ॥

### मालाप्रदर्शनं वर्जनीयः

**गुरुं प्रकाशयेद्विद्वान् न तु मन्त्रं कदाचन ।**
**अक्षमालाञ्च मुद्राञ्च गुरोरपि न दर्शयेत् ॥ ७० ॥**

विद्वान् भले ही अपने गुरु को प्रकाशित कर दे, किन्तु मन्त्र कदापि प्रकाशित न करे, उसे गुप्त ही रखे । बहुत क्या ! अक्षमाला और मुद्रा गुरु को भी न दिखावे ॥ ७० ॥

**भूतराक्षसवेतालाः सिद्धगन्धर्वचारणाः ।**
**हरन्ति प्रकटाद्यस्मात्तस्माद्यत्नेन गोपयेत् ॥ ७१ ॥**

यतः मन्त्रादि के प्रकट (प्रकाशित) करने से भूत, राक्षस, बेताल, सिद्ध, गन्धर्व और चारण उसका अपहरण कर लेते हैं । अतः साधक उसे यत्नपूर्वक गुप्त रखे ॥ ७१ ॥

**जपान्यसमये मालां पूजयित्वा तु गोपयेत् ।**
**अशुचिर्न स्पृशेन्मालां शुचौ न प्रकल्पयेत् ॥ ७२ ॥**

जप कर लेने के बाद माला की पूजा कर उसको गुप्त रखे। अपवित्रता की अवस्था में माला का स्पर्श न करे और अपवित्र स्थान में उसे न रखे ॥ ७२ ॥

**हस्तात् पतति चेन्माला न जप्तव्या त्र्यहं बुधैः ।**
**प्रायश्चित्तं विधातव्यं जपेन्मन्त्रं सहस्रकम् ॥ ७३ ॥**

यदि माला हाथ से गिर जावे तो बुद्धिमान् साधक तीन दिन पर्यन्त जप न करे। तदनन्तर प्रायश्चित्त कर एक सहस्र मन्त्र का जप करे ॥ ७३ ॥

(अथवा) **करभ्रष्टे शब्दकृते जपेदष्टोत्तरं शतम् ।**
**जीर्णे सूत्रे पुनः सूत्रं प्रथयित्वा शतं जपेत् ॥ ७४ ॥**

अथवा माला के हाथ से गिर जाने पर स्वयं बोलने पर एक सौ आठ बार पुनः जप करे। सूत्र के जीर्ण हो जाने पर, उसे पुनः गूँथकर एक सौ की संख्या में जप करे ॥ ७४ ॥

**छिन्ना भवति चेन्माला पूजां कृत्वा ततोऽधिकाम्।**
**गुरूणां शिल्पिनाञ्चैव पूजां कृत्वा तु साधकः ॥ ७५ ॥**
**प्रतिष्ठां पूर्ववत् कृत्वा पुनर्जापं समाचरेत् ।**
**एवंविधा सर्वमाला सर्वदेवे प्रतिष्ठिता ॥ ७६ ॥**

यदि माला छिन्न (टूट) जावे, तब साधक उससे भी अधिक, अपने गुरु की तथा शिल्पी की पूजा कर पूर्ववत् माला की प्रतिष्ठा करे। तब उस पर जप प्रारम्भ करे। इस प्रकार की माला में समस्त देवताओं का निवास होता है ॥ ७५-७६ ॥

### अक्षमालापूजाकथनम्

**अथान्यां सम्प्रवक्ष्यामि मालां कुलमयीं पराम् ।**
**कुण्डगोलोद्भवैर्द्रव्यैः स्वयम्भूकुसुमेन च ॥ ७७ ॥**
**रोचनाकुङ्कुमेनैव अक्षमालां समर्चयेत् ।**
**कर्पूरागुरुकस्तूरी तथा मृगमदेन च ॥ ७८ ॥**

अब कौलिकों के प्रयोग की परा कुलमयी माला कहता हूँ। कुण्डगोलोद्भव द्रव्यों से, स्वयम्भू पुष्प से, रोचना कुङ्कुम, कपूर, अगुरु, कस्तूरी तथा मृगमद से अक्ष माला की पूजा करनी चाहिये ॥ ७७-७८ ॥

**अक्षमालामुपस्कृत्य प्रतिष्ठां विधिवच्चरेत् ।**
**अथातः सप्रवक्ष्यामि मालां सर्वोत्तमोत्तमाम् ॥ ७९ ॥**

इस प्रकार अक्षमाला का संस्कार कर उसकी विधिवत् प्रतिष्ठा करे। अब सर्वोत्तम से भी उत्तम माला कहता हूँ ॥ ७९ ॥

**यस्य विज्ञानमात्रेण मन्त्राः सिध्यन्ति तत्क्षणात् ।**
**अनुलोमविलोमेन मन्त्रमातुर्विभेदतः ॥ ८० ॥**
**मन्त्रेणाऽन्तरितं वर्णं वर्णेनाऽन्तरितं मनुम् ।**
**कुर्याद्वर्णमयीं मालां सर्वमन्त्रप्रदीपिनीम् ॥ ८१ ॥**

जिसके जान लेने मात्र से तत्क्षण मन्त्र की सिद्धि हो जाती है। मन्त्र माता के भेद से उसके अनुलोम-विलोम द्वारा जिसका निर्माण किया जाता है अर्थात् एक मन्त्र के बाद एक वर्ण, फिर एक वर्ण के बाद एक मन्त्र। इस क्रम से वर्णमयी माला का निर्माण कर इससे सारे मन्त्रों में तेज आ जाता है ॥ ८०-८१ ॥

**चरमार्णं मेरुरूपं लङ्घयेन्न कदाचन ।**
**एतद्रहस्यं परमं नाऽऽख्येयं यस्य कस्यचित् ॥ ८२ ॥**

अन्तिम वर्ण 'क्ष' का उल्लङ्घन कदापि न करे। यह अत्यन्त गोपनीय रहस्य है। इसे जैसे-तैसे निठल्लू को उपदेश नहीं करना चाहिये ॥ ८२ ॥

**अनुलोमविलोमस्थैर्बिन्दुयुङ्मातृकाक्षरैः ।**
**क्षमेरुकैः साष्टवर्गैः क्लृप्तया वर्णमालया ॥ ८३ ॥**

विन्दु युक्त मातृका अक्षरों के अनुलोम-विलोम से युक्त 'क्ष' मेरु वाले एवं आठ वर्गों (अ - क्ष (१) क- से प- (५) य व (१) श ष स ह (१) =८) से युक्त, प्रत्येक अनुस्वार सहित वर्णों से युक्त, प्रत्येक अक्षर वाले मन्त्र शीघ्र ही सिद्धि प्रदान करते हैं।

**विमर्श**—'अ' इसके बाद मन्त्र का अनुस्वार युक्त एक अक्षर, फिर आ, फिर मन्त्र का अनुस्वार युक्त दूसरा अक्षर, यह अनुलोम क्रम है। हं फिर मन्त्र का पहला सानुस्वार अक्षर, इस प्रकार के अनुलोम विलोम वाले मातृकाओं से युक्त मन्त्रों के प्रत्येक वर्ण होने चाहिये ॥ ८३ ॥

**प्रत्येकं वर्णयुङ्मन्त्रा जप्ताः स्युः क्षिप्रसिद्धिदाः ।**
**सविन्दुं वर्णमुच्चार्य पश्चान्मन्त्रं जपेत् सुधीः ॥ ८४ ॥**

मातृकावर्ण के साथ मन्त्र के वर्ण को भी सानुस्वार उच्चारण करना चाहिये। इस प्रकार से साधक को जप करना चाहिये ॥ ८४ ॥

**क्षं मेरुं कल्पयित्वा तु जपेत्तन्नाऽभिलङ्घयेत् ।**
**अथ यन्त्रप्रतिष्ठानं कथयामि प्रसङ्गतः ॥ ८५ ॥**

'क्षं' को मेरु समझे और उसका उल्लङ्घन न करे। अब प्रसङ्ग प्राप्त यन्त्र की प्रतिष्ठा की विधि कहता हूँ ॥ ८५ ॥

## यन्त्रप्रतिष्ठाविधानम्

सुवर्णं रजतं ताम्रं श्रेष्ठं मध्यमथाऽधमम् ।
ताम्रे लक्षगुणं प्रोक्तं रौप्ये कोटिगुणं भवेत् ॥ ८६ ॥

श्रेष्ठ, मध्यम और अधम तीन प्रकार के यन्त्र कहे गये हैं । सुवर्ण, रजत और ताम्रपट्ट पर यन्त्र श्रेष्ठ है । ताम्र पट्ट का यन्त्र लक्षगुणा और पीतल पर कोटिगुणा फल होता है ॥ ८६ ॥

सुवर्णेऽनन्तफलदं स्फाटिकेऽपि तथा समम् ।
एकतोलं द्वितोलं वा त्रितोलं पञ्चतोलकम् ॥ ८७ ॥
रसतोलं चतुस्तोलं सप्ततोलं पलन्तु वा ।
साधकस्य मनोज्ञं वा कृत्वा पीठे सुसाधकः ॥ ८८ ॥
पूर्वोक्तधातुद्रव्यैश्च सुन्दरं सुमनोहरम् ।
सुरेखं सुमुखं यन्त्रं लेखयित्वा विधानतः ॥ ८९ ॥

सुवर्ण यन्त्र अनन्त फल प्रदान करता है, स्फटिक का यन्त्र भी उतना ही फल देता है । उसका परिमाण एक तोला, दो तोला, तीन तोला, पाँच तोला, छह तोला, चार तोला या सात तोला जो साधक के लिये रुचिकर हो, इस प्रकार का यन्त्र किसी पीठ पर पूर्वोक्त धातुओं के द्रव्य से सुन्दर, मनोहर, उत्तम रेखा वाला, सुमुख विधानपूर्वक यन्त्र लिखे ॥ ८७-८९ ॥

अथवा प्रतिमां कृत्वा निजदेवस्वरूपिणीम् ।
प्रतिष्ठाञ्च ततः कुर्याद् यथाशास्त्रप्रमाणतः ॥ ९० ॥

अथवा अपने इष्ट देवता की मनोहर प्रतिमा निर्माण कर उसमें शास्त्रीय विधि के अनुसार प्राणप्रतिष्ठा करे ॥ ९० ॥

स्नात्वा सङ्कल्पयेन्मन्त्री ततो न्यासादिकञ्चरेत् ।
पञ्चगव्यं ततः कृत्वा शिवमन्त्रेण शोधितम् ॥ ९१ ॥
तत्र यन्त्रं क्षिपेन्मन्त्री प्रणवेन समाकुलम् ।
तस्मादुद्धृत्य तच्चक्रं स्थापयेत् स्वर्णपट्टके ॥ ९२ ॥
पञ्चामृतेन सुस्नाप्य शीतलेन जलेन च ।
वाससा जलमुत्तोल्य स्थापयेद्धेमपीठके ॥ ९३ ॥

फिर स्नान कर पूजा का सङ्कल्प करे । फिर न्यास आदि क्रिया करे । फिर पूर्वोक्त शिव मन्त्र (हौं) मन्त्र से शुद्ध पञ्चगव्य में मन्त्रज्ञ साधक प्रणव मन्त्र पढ़कर यन्त्र को डाल देवे । फिर उस चक्र को, वहाँ से निकालकर, स्वर्ण के पट्ट पर स्थापित करे । फिर उसे पञ्चामृत से, अथवा शीतल जल से स्नान करावे । वस्त्र

से उसका जल पोंछकर सुवर्ण निर्मित पीठ पर स्थापित करे ॥ ९१-९३ ॥

**पीठपूजां विधायाथ कुशैर्यन्त्रञ्च संस्पृशन् ।**
**प्रणवं यन्त्रराजाय विद्महे तदनन्तरम् ॥ ९४ ॥**
**महायन्त्राय धीमहि तन्नो यन्त्रः प्रचोदयात् ।**
**गायत्रीमिति सञ्जप्य शतमष्टोत्तरं ततः ॥ ९५ ॥**

तदनन्तर पीठपूजा कर कुशा समूह से यन्त्र का स्पर्श करते हुये 'ॐ यन्त्रराजाय' से आरम्भ कर 'प्रचोदयात्' पर्यन्त इस यन्त्र की गायत्री का एक-सौ आठ बार जप करे ॥ ९४-९५ ॥

**आवाह्य पूजयेद् देवीं जीवन्यासपुरःसरम् ।**
**उपचारैः षोडशभिर्नानाविधरसायनैः ॥ ९६ ॥**

फिर उसमें देवी का आवाहन कर प्राण प्रतिष्ठा सहित षोडश उपचारों से एवं अनेक प्रकार के रसायनों से देवी की पूजा करे ॥ ९६ ॥

**नानाविधफलैर्द्रव्यैर्नानाङ्गरागविस्तरैः ।**
**स्वकल्पोक्तविधानेन सम्पूज्य परमेश्वरीम् ॥ ९७ ॥**

अनेक प्रकार के फल, अनेक प्रकार के द्रव्य, अनेक प्रकार के राग आदि द्वारा अपने सम्प्रदाय के अनुसार परमेश्वरी का पूजन करे ॥ ९७ ॥

**ततो जाप्यं सहस्रं तु कुर्यादीप्सितसिद्धये ।**
**बलिदानं ततः कृत्वा प्रणमेच्चक्रमुत्तमम् ॥ ९८ ॥**

तदनन्तर मनोरथ सिद्धि के लिये एक सहस्र जप कर बलिदान कर उस चक्र को प्रणाम करे ॥ ९८ ॥

**अष्टोत्तरशतं होमं घृतेन कारयेत् सुधीः ।**
**गुरवे दक्षिणां दद्यात्तथा च शिल्पिने ततः ॥ ९९ ॥**

फिर सुधी साधक एक सौ आठ की संख्या में घी का होम कर गुरु को दक्षिणा देवे और कारीगर को भी सन्तुष्ट करे ॥ ९९ ॥

### देवताप्रतिष्ठा

**देवतायाः प्रतिष्ठानमेवं तु कारयेद् बुधः ।**
**न्यासादिकं स्वकल्पोक्तं गायत्रं तत्र सन्दिशेत् ॥ १०० ॥**

बुद्धिमान् साधक इसी प्रकार देवता की प्रतिष्ठा करे । उसमें अपने सम्प्रदायानुसार न्यास एवं उसकी गायत्री द्वारा प्रतिष्ठा करे ॥ १०० ॥

**देवताया: प्रतिष्ठाने विशेषे: कथितो मया ।**
**अथ वक्ष्यामि मन्त्राणां पुरश्चरणमुत्तमम् ॥ १०१ ॥**

देवता की प्रतिष्ठा में होने वाली विशेषता हमने कह दी । अब मन्त्रों के पुरश्चरण के विषय में कहता हूँ ॥ १०१ ॥

पुरश्चरणकथनम्

**भाग्यहीनोऽपि मूर्खोऽपि यद्बोधादमरो भवेत् ।**
**साधयेत् सिद्धिसकलान् साक्षात् सिद्धीश्वरो भवेत् ॥ १०२ ॥**

**मन्त्रों के पुरश्चरण**—जिसके ज्ञान मात्र से भाग्यहीन भी मनुष्य देवत्व प्राप्त कर लेता है और समस्त सिद्धियाँ प्राप्त कर लेता है । किं बहुना साक्षात् सिद्धेश्वर बन जाता है । उस पुरश्चरण की प्रक्रिया मैं कहता हूँ ॥ १०२ ॥

**आदौ पुरस्क्रियां कुर्यान्नियमेन यथाविधि ।**
**तत: सिद्धमनुर्मन्त्री प्रयोगार्हो न चान्यथा ॥ १०३ ॥**

पुरस्क्रिया के आरम्भ में शास्त्र में कहे गये नियमों का पालन करे । पुरस्क्रिया के अनन्तर मन्त्र की सिद्धि होती है, तभी मन्त्रज्ञ उसके अनुष्ठान का अधिकारी होता है, अन्यथा नहीं ॥ १०३ ॥

**पुरश्चरणसम्पन्नो मन्त्रो हि फलदायक: ।**
**किं होमै: किं जपैश्चैव किं मन्त्रन्यासविस्तरै: ॥ १०४ ॥**

पुरश्चरण करने पर ही मन्त्र फलदायक होते हैं । होम, जप एवं मन्त्र के न्यास के विस्तार मात्र से कोई फल नहीं होता ॥ १०४ ॥

**वश्याय सर्वमन्त्राणां यदि न स्यात् पुरस्क्रिया ।**
**जीवहीनो यथा देही सर्वकर्मसु न क्षम: ॥ १०५ ॥**
**पुरश्चरणहीनोऽपि तथा मन्त्र: प्रकीर्त्तित: ।**
**पुरस्क्रिया हि मन्त्राणां प्रधानं जीव उच्यते ॥ १०६ ॥**

यदि पुरश्चरण क्रिया न की जावे तो मन्त्र वश में नहीं होते । जिस प्रकार जीव रहित देह किसी भी कर्म में असमर्थ रहता है, उसी प्रकार पुरश्चरण रहित मन्त्र फलप्रद नहीं होते । अत: मन्त्रों का पुरश्चरण प्रधान होने से वहीं पुरश्चरण उसका जीव कहलाता है ॥ १०५-१०७ ॥

**तस्मादादौ पुरश्चर्यां कृत्वा साधकसत्तम: ।**
**प्रयोगश्च तत: कुर्यात् साधक: सिद्धिहेतवे ॥ १०७ ॥**

इसलिये उत्तम साधक सर्वप्रथम पुरश्चरण करे । तब मन्त्र सिद्धि हो जाने पर

उसका प्रयोग करे ॥ १०७ ॥

स्थानभेदे फलभेदकथनम्

ग्रामे क्रोशमितं स्थानं नद्यादौ स्वेच्छया मतम् ।
नगरात् परतः क्रोशं क्रोशयुग्ममथाऽपि वा ॥ १०८ ॥
आहारादिविहारार्थं तावतीं भूमिमाक्रमेत् ।
गृहे जपः समः प्रोक्तो नद्यां शतगुणः स्मृतः ॥ १०९ ॥

पुरश्चरण के लिये गाँव से दूर, एक कोश की दूरी पर, नदी के तीर पर, जहाँ उसकी इच्छा हो, नगर से चारों ओर एक कोश अथवा दो कोश की दूरी पर, इसी प्रकार आहार-विहार के लिये जितनी भूमि की आवश्यकता हो, उतनी भूमि स्वायत्त करे। घर पर किया गया जप सम फल वाला और नदी के तट पर किया गया जप सौ गुना फल प्रदान करता है ॥ १०८-१०९ ॥

पुण्यारण्ये तथाऽऽरामे सहस्रगुण उच्यते ।
अयुतं पर्वते पुण्यं लक्षं भागीरथीजले ॥ ११० ॥
कोटिर्देवालये प्राहुरनन्तं शिवसन्निधौ ।
यत्र वा कुत्रचिद् देशे लिङ्गे वै पश्चिमामुखे ॥ १११ ॥
स्वयम्भूर्बाणलिङ्गे वा इतरे वा तदन्तिके ।
प्रयागे सुरनद्यां वा वाराणस्यां वराहके ॥ ११२ ॥
उज्जटे पर्वते वापि श्मशाने गहनान्तरे ।
एकलिङ्गे शून्यगेहे चतुष्पथे शिवान्तिके ॥ ११३ ॥
एकवृक्षगिरौ वापि वटमूले शिवालये ।
महानिशिपुरश्चर्यां कुर्यादेषु स्थलेषु च ॥ ११४ ॥

पुण्यारण्य में तथा वाटिका आदि में किया गया जप हजारों गुना फल देता है। पर्वत पर दश हजार गुना तथा भागीरथी के जल में लाख गुना फल देता है। देवालय में करोड़ गुना तथा शिव के सन्निधान में अनन्त फल देता है। जिस किसी भी ऐसे प्रदेश में; जहाँ पश्चिमाभिमुख शिवलिङ्ग हो, स्वयम्भू लिङ्ग, वाणलिङ्ग, अथवा अन्य लिङ्ग के समीप में जप करे। प्रयाग, गङ्गा नदी वाराणसी, वराहक्षेत्र, उज्जट पर्वत, श्मशान, किसी गहन स्थान में, एकलिङ्ग, शून्यगृह, चतुष्पथ, शिव सन्निधान, एक वृक्ष वाले पर्वत, वटमूल और शिवालय—इन स्थानों में अर्धरात्रि के समय पुरश्चरण करे ॥ ११०-११४ ॥

विघ्ननिवारणार्थं पूजाविधानम्

क्षीरवृक्षस्य काष्ठानि दशास्त्रमन्त्रितानि वै ।

पूर्वादिक्रमतो वीरः स्थापयेत् कीलकानि च ॥ ११५ ॥

क्षीरी वृक्ष के काष्ठ को दश बार अस्त्र मन्त्र (हुं फट्) से अभिमन्त्रित कर उसकी कीली पूर्वादि दिशाओं में गाड़कर वीर साधक जप करे ॥ ११५ ॥

इन्द्रमग्निं यमं चैव निर्ऋतिं वरुणं तथा ।
वायुं कुबेरमीशानं ब्रह्मानन्तौ ततः परम् ॥ ११६ ॥
स्वस्वदिक्षु प्रपूज्यैव बलिं पश्चान्निवेदयेत् ।
ईशानशक्रयोर्मध्यमूर्ध्वं ज्ञेयं सदा बुधैः ॥ ११७ ॥
वरुणासुरयोर्मध्यमधश्च परिकथ्यते ।
क्षेत्रे च कीलिते मन्त्री न विघ्नैः परिभूयते ॥ ११८ ॥

इन्द्र, अग्नि, यम, निर्ऋति, वरुण, वायु, कुबेर, ईशान, ब्रह्मा एवं अनन्त की अपनी-अपनी दिशाओं में पूजा कर बलिदान करे। बुद्धिमान पुरुष को ईशान एवं पूर्व के मध्य ऊर्ध्व दिशा तथा वरुण एवं निर्ऋति के मध्य में अधः दिशा समझनी चाहिये। इस प्रकार क्षेत्र को कीलित कर जप करने वाला मन्त्री विघ्न से पराभूत नहीं होता ॥ ११६-११८ ॥

क्षेत्रपालं गणेशञ्च विधिवत्तत्र पूजयेत् ।
दीपस्थाने च वीरेन्द्रो यथाविधि पुरःसरम् ॥ ११९ ॥
मण्डलं तत्र कुर्वीत चतुर्द्वारात्मकं ततः ।
शुचिः पूर्वदिने भूत्वा साधकः स्थिरमानसः ॥ १२० ॥

साधक बलिदान के लिये क्षेत्रपाल और गणेश की विधिवत् पूजा करे। जहाँ दीप स्थापित करना हो, उस स्थान पर चतुर्द्वारात्मक मण्डल बनावे। साधक पूर्व दिन में शुचि एवं सावधान रहे ॥ ११९-१२० ॥

प्रातः स्नात्वा च गायत्रीं सहस्रं प्रयतो जपेत् ।
ज्ञाताज्ञातस्य पापस्य क्षयार्थं प्रथमं पुनः ॥ १२१ ॥
विप्रान् सन्तर्पयेत् सम्यग्भोजनात् सादरादिभिः ।
बहुभिर्वस्त्रभूषाभिः सम्पूज्य गुरुमात्मनः ॥ १२२ ॥
आरभेच्च जपं पश्चात् तदनुज्ञापुरःसरम् ।
आरम्भकाले नियतं परयोषां प्रपूज्य च ॥ १२३ ॥
दीक्षितां वस्त्रपुष्पाद्यैः स्वयं संयतमानसः ।

प्रातःकाल स्नानोपरान्त एक हजार गायत्री का जप करे। तदनन्तर सर्वप्रथम ज्ञाताज्ञात पाप के क्षय के लिये उत्तमोत्तम भोजन कराकर ब्राह्मणों को सन्तुष्ट करे और अनेक वस्त्र एवं आभूषणों से अपने गुरु की पूजा करे। फिर उनकी आज्ञा

लेकर जप प्रारम्भ करे । जपारम्भ काल में साधक नियमपूर्वक दूसरे की स्त्री जो दीक्षित हो, उसकी वस्त्र एवं पुष्प आदि आभूषणों से पूजा करे और इन्द्रियों को वश में रखे ॥ १२१-१२४ ॥

**पायसं पिष्टकं चैव नानारससमन्वितम् ॥ १२४ ॥**
**दुग्धं दधि तथा तक्रं नवनीतं सशर्करम् ।**
**ऐक्षवं मोदकं चैव नानाविधरसायनम् ॥ १२५ ॥**
**नानाविधफलं चैव नानागन्धविलेपनम् ।**
**चन्दनं मृगनाभिञ्च श्रीखण्डं कुङ्कुमं तथा ॥ १२६ ॥**
**आसनं पादुकां वस्त्रं तथा चाऽऽभरणादिकम् ।**
**धूपदीपञ्च कौषेयं पुष्पमालां तथा परम् ॥ १२७ ॥**
**पञ्चतत्त्वं कुलाष्टञ्च शून्यगेहे समानयेत् ।**
**द्वारदेशे ततो वीरः पूजयेद् द्वारदेवताम् ॥ १२८ ॥**

फिर पायस (खीर), पिष्टक (पूआ), जो अनेक रसों से पूर्ण हो, दूध, दही, मट्ठा, नवनीत, शर्करा, गुड़ अनेक प्रकार के मोदक, अनेक प्रकार के फल, अनेक प्रकार के इत्रादि विलेपन पदार्थ, चन्दन, मृगनाभि (कस्तूरी), श्री खण्ड, कुङ्कुम, आसन, पादुका (खड़ाऊँ), वस्त्र अनेक प्रकार के आभूषण, धूप, दीप, रेशमी, वस्त्र, पुष्प-माला, इसके अतिरिक्त मधु, मांसादि, पञ्चत्त्व और कुलाष्टक इन सभी वस्तुओं को शून्यगृह में लाकर एकत्रित करे । फिर वीर साधक द्वारदेवता की पूजा करे ॥ १२४-१२८ ॥

**गणेशं वटुकं चैव क्षेत्रपालञ्च योगिनीम् ।**
**चतुर्द्वारेषु सम्पूज्य पूर्वादिक्रमतो बुधः ॥ १२९ ॥**
**तेभ्यो बलिं प्रदद्यात्तु साधकश्च ततः परम् ।**
**भूतापसरणं कृत्वा दीपस्थानं समाचरेत् ॥ १३० ॥**

गणेश, बटुक, क्षेत्रपाल और योगिनी इनकी पूर्वादि क्रम से चारों द्वारों पर पूजा कर साधक पूजा के बाद उनको बलि प्रदान करे और भूतापसारण कर दीपक किसी निश्चित स्थान पर स्थापित करे ॥ १२९-१३० ॥

**नानालङ्कारचितो विहितासनमाश्रितः ।**
**स्वकल्पोक्तं विधायाऽथ प्रोक्षयेत्तदनन्तरम् ॥ १३१ ॥**
**अर्घ्योदकेन सम्भारमात्मानञ्च ततः परम् ।**

इसके बाद अनेक प्रकार के अलङ्कारों से भूषित होकर, अपने आसन पर बैठकर, अपने सम्प्रदायानुसार अर्घ्योदक स्थापित कर, उस अर्घ्योदक से यज्ञ की

समस्त सामग्री का तथा स्वयं अपने को प्रोक्षित करे ॥ १३१-१३२ ॥

**नानालङ्कारसंयुक्तमर्घ्योदकविशोधितम् ॥ १३२ ॥**
**अमृतीकरणं कृत्वा शक्तीरष्टौ सुखं नयेत् ।**
**अष्टकन्यारूपभेदं विलोमयाऽऽमर्शचेष्टितम् ॥ १३३ ॥**

**कुलाष्टक कन्या पूजन**—तदनन्तर अर्घ्योदक से सर्वथा संशुद्ध, अनेक अलङ्कारों से संयुक्त, अष्ट शक्तियों को बुलाकर, उनका अमृतीकरण करे । फिर सुखपूर्वक उन्हें बिठावे । ये अष्ट कन्यायें अनुलोम एवं विलोम जाति वाली हों, जिनके रूप में भी परस्पर भेद हो ॥ १३२-१३३ ॥

**ब्राह्मणी क्षत्रिया वैश्या शूद्रा च कुलभूषणा ।**
**वेश्या नापितकन्या च रजकी योगिनी तथा ॥ १३४ ॥**
**विदग्धाः सर्वजातीनां प्रशस्ताः सर्वसिद्धिदाः ।**
**ब्रह्माण्याद्यष्टशक्तीनां नामभिः कृतसञ्ज्ञकाः ॥ १३५ ॥**

ब्राह्मणी, क्षत्रिया, वैश्या और शूद्रा—ये चार प्रकार की कन्यायें, जो अपने कुल की भूषण हैं, इसके बाद वेश्या, नापित कन्या, रजकी तथा योगिनी—ये प्रकार की विलोम जाति की चार कन्यायें । इस प्रकार कुल आठो जाति की कन्यायें, जो विदग्धा (चतुर) हों वो प्रशस्त कही गई हैं और समस्त सिद्धियाँ प्रदान करने वाली बतलाई गयी हैं । इनका ब्राह्मणी, क्षत्रिया, वैश्या आदि नामकरण भी करना चाहिये ॥ १३४-१३५ ॥

**आसनं प्रथमं दत्त्वा स्वागतञ्च पुनः पुनः ।**
**अर्घ्यं पाद्यञ्च पानीयं मधुपर्कं जलंततः ॥ १३६ ॥**
**स्नापयेद् गन्धपुष्पाद्भिः केशसंस्कारमाचरेत् ।**
**धूपयित्वा ततः केशान् कौषेयञ्च निवेदयेत् ॥ १३७ ॥**

सर्वप्रथम इन कन्याओं को आसन प्रदान करना चाहिये । तदनन्तर स्वागत पूंछना चाहिये । तदनन्तर अर्घ्य, पाद्य, आचमनीय, मधुपर्क और पुनः आचमनीय देना चाहिये । इनको सुगन्ध युक्त जल से स्नान कराकर केश संस्कार करे । इनके केशों को धूपित करे एवं रेशमी वस्त्र पहनावे ॥ १३६-१३७ ॥

**ततः स्थानान्तरे पीठे आस्तीर्य पादुकायुगम् ।**
**दत्त्वा तत्र समासीनां नानालङ्कारभूषणैः ॥ १३८ ॥**
**भूषयित्वाऽनुलेपञ्च गन्धं माल्यं निवेदयेत् ।**
**तां तां शक्तिं ततो ध्यायेद् यथाक्रमविधानतः ॥ १३९ ॥**

फिर दो पादुका पहना कर, किसी अन्य स्थान में बने हुये पीठ पर बिठावे

वहाँ बैठाकर अनेक प्रकार के आभूषणों से अलंकृत कर, गन्ध, माल्य निवेदन करें, फिर क्रमानुसार उन ब्राह्मणी आदि कन्याओं का जो तत्-तत् शक्ति स्वरूपा हैं उनका इस प्रकार ध्यान करे ॥ १३८-१३९ ॥

ब्रह्माण्याद्यष्टशक्तिध्यानम्

**हंसारूढां सुवर्णाभां चतुर्वक्त्रां त्रिलोचनाम् ।**
**ब्रह्मकूर्चाब्जदण्डाक्षसूत्राणि करपङ्कजैः ॥ १४० ॥**
**दधतीं चारुरूपाङ्ग जटामुकुटमण्डिताम् ।**
**स्त्र्यलङ्कारसमायुक्तां ब्रह्माणीं संस्मरेत् सुधीः ॥ १४१ ॥**

१. **ब्रह्माणी का ध्यान**—हंस पर बैठी हुई, सुवर्ण के आभा के समान जाज्वल्यमान कान्ति वाली, चारमुख एवं तीन नेत्रों से संयुक्त, अपने हाथों में ब्रह्मकुर्च, कमल, दण्ड एवं अक्षमाला धारण किये हुये, अत्यन्त सुन्दर वेश तथा जटा, मुकुट मण्डित, स्त्रियोचित अलङ्कारों से विभूषित ब्रह्माणी का साधक को ध्यान करना चाहिए ॥ १४०-१४१ ॥

**माहेश्वरीं वृषारूढां शुक्लां नेत्रत्रयान्विताम् ।**
**कपालं डमरुं बाणं शूलं टङ्कमभीतिदम् ॥ १४२ ॥**
**कराब्जैर्दधतीं चन्द्रचूडारत्नविभूषिताम् ।**
**त्रिनेत्रां कुङ्कुमनिभां कौमारीं शिखिवाहनाम् ॥ १४३ ॥**
**शक्तिपाशाङ्कुशाभीतिकरां चारुविभूषिताम् ।**
**वैष्णवीं गरुडारूढां श्यामां मधुमदाकुलाम् ॥ १४४ ॥**
**घण्टां शङ्खं कपालञ्च चक्रञ्च करपङ्कजैः ।**
**दधानां पीतवसनां मुक्तामणिविभूषिताम् ॥ १४५ ॥**

२. **माहेश्वरी का ध्यान**—बैल पर चढ़ी हुई, शुक्ल वर्ण वाली, तीन नेत्रों संयुक्त, कपाल, डमरु, बाण, शूल, टङ्क एवं अभयमुद्रा अपने हाथों में धारण किये हुये, चन्द्रमा रूप चूडामणि को धारण किये हुये माहेश्वरी का ध्यान करे ।

३. **कौमारी का ध्यान**—तीन नेत्रों वाली, कुङ्कुम के समान लाल वर्ण वाली, मोर पर चढ़ी हुई, शक्ति, पाश, अङ्कुश एवं अभय मुद्रा धारण की हुई उत्तम भूषणों वाली कौमारी का ध्यान करे ।

४. **वैष्णवी का ध्यान**—गरुड़ के ऊपर चढ़ी हुई, श्यामा, मधु के मद से इठलाती हुई, अपने हाथों में घण्टा, शङ्ख, कपाल और चक्र लिये हुई, पीत वस्त्र और अनेक प्रकार के मुक्ता एवं मणियों का आभूषण धारण किये हुये वैष्णवी शक्ति का ध्यान करे ॥ १४२-१४५ ॥

वराहवाहिनीं धूम्रां वराहसदृशाननाम् ।
फलकां मूषलं चैव वरं खड्ग तथा परम् ॥ १४६ ॥
पाणिपङ्कजविभ्राणां चारुभूषणभूषिताम् ।
इन्द्रनीलप्रभामैन्द्रीमैरावतनिषेदुषीम् ॥ १४७ ॥
चन्द्रवक्त्राञ्च दधतीं वज्रशङ्खधनुः शरान् ।
नानालङ्काररचितां सदा भक्तानुरागिणीम् ॥ १४८ ॥

५. **वाराही का ध्यान**—वराह पर चढ़ी हुई, धूम्र वर्ण वाली, वराह सदृश मुख वाली, हाथ में फलका (ढाल), मूसल, वर और खड्ग धारण किये हुये वाराही शक्ति का ध्यान करे ।

६. **इन्द्राणी का ध्यान**—इन्द्रनील की कान्ति से युक्त, ऐरावत पर चढ़ी हुई, चन्द्रमा के समान मनोहर मुख वाली, हाथ में व्रज, शङ्ख, धनुष-बाण लिये हुये, अनेक प्रकार के अलङ्कारों से अलंकृत, भक्तों के ऊपर अनुराग करने वाली इन्द्राणी का ध्यान करे ॥ १४६-१४८ ॥

भीमवक्त्राञ्च चामुण्डां मुण्डमालावलीयुताम् ।
साट्टहासां शवासीनां मणिमुक्ताविराजिताम् ॥ १४९ ॥
कपालं खेटकं शूलं खङ्गञ्च करपङ्कजैः ।
विभ्राणां नीलमेघाभां भावयेद् भक्तवत्सलाम् ॥ १५० ॥

७. **चामुण्डा का ध्यान**—भयानक मुख वाली, मुण्डमाला धारण की हुई, अट्टहास करती हुई, शवासन पर विराजमान, मणि-मुक्ता के आभूषणों से सुशोभित, कपाल, खेटक, शूल एवं खङ्ग अपने हाथों में लिये हुये, नीलमेघ के समान काले वर्णो वाली भक्तवत्सला भगवती चामुण्डा का मन्त्रज्ञ साधक को ध्यान करना चाहिए ॥ १४९-१५० ॥

सिंहासनां महालक्ष्मीं पीताभां रत्नभूषिताम् ।
मातुलुङ्गफलाभीतिमालापद्मविधारिणीम् ॥ १५१ ॥

८. **महालक्ष्मी का ध्यान**—सिंह के आसन पर बैठी हुई, पीताम्बर पहने हुये, रत्नों से भूषित, मातुलुङ्ग का फल, अभय, कमल तथा अक्षमाला हाथों में लिये हुये इस प्रकार की महालक्ष्मी का ध्यान करे ॥ १५१ ॥

एवं ध्यात्वा क्रमाद्वीर आवाहन्यादिमुद्रया ।
तां तां शक्तिं समावाह्य मूर्ध्नि तासां प्रपूजयेत् ॥ १५२ ॥

इस प्रकार तत्तन्महाशक्तियों के स्वरूपों का ध्यान कर वीर साधक आवाहनी आदि मुद्राओं से उनका आवाहन कर उनके शिर पर पूजन करे ॥ १५२ ॥

पुनः पाद्यादिकं दत्त्वा साधकः स्थिरमानसः ।
भोज्यमण्डलमध्ये तु स्वर्णादिस्थानके ततः ॥ १५३ ॥
चर्व्यं चोष्यं लेह्यपेयं भोज्यं भक्ष्यं निवेदयेत् ।
अदीक्षिताश्चेत्तत्रैव ततो मायां निवेदयेत् ॥ १५४ ॥
तासां सव्येषु कर्णेषु ततः स्तोत्रं पठेन्नरः ।

फिर समाहित चित्त वाला साधक उन शक्तियों को पाद्यादि उपचार प्रदर्शित करे । इनके स्वर्णादिपात्रों में रखे हुये भोज्य मण्डलों के चर्व्य, चोष्य, लेह्य पेय भोज्य एवं भक्ष्य पदार्थों को निवेदित करे । यदि वे अदीक्षित हों तो उन्हें माया (ह्रीं) मन्त्र देवे । इसके बाद साधक तत्तत् महाशक्तियों के बायें कान में तत्तत् स्तोत्र इस प्रकार निवेदन करे ॥ १५३-१५५ ॥

### ब्रह्माण्याद्यष्टशक्तिस्तोत्रम्

मातर्देवि नमस्तेऽस्तु ब्रह्मरूपधरेऽनघे ।
कृपया हर विघ्नं मे मन्त्रसिद्धिं प्रयच्छ मे ॥ १५५ ॥

१. 'मातर्देवि.................मन्त्रसिद्धि प्रयच्छ मे' ब्रह्माणी के बायें कान में साधक यह श्लोक मन्त्र कहे ॥ १५५ ॥

माहेशि वरदे देवि परमानन्दरूपिणि ।
कृपया हर विघ्नं मे मन्त्रसिद्धिं प्रयच्छ मे ॥ १५६ ॥

२. 'माहेशि..................प्रयच्छ मे' माहेश्वरी के बायें कान में साधक यह श्लोक मन्त्र कहे ॥ १५६ ॥

कौमारि सर्वविघ्नेशि कुमारक्रीडने वर ।
कृपया हर विघ्नं मे मन्त्रसिद्धिं प्रयच्छ मे ॥ १५७ ॥

३. 'कौमारि.................प्रयच्छ मे' कौमारी के बायें कान में साधक यह श्लोक मन्त्र कहे ॥ १५७ ॥

विष्णुरूपधरे देवि विनतासुतवाहिनि ।
कृपया हर विघ्नं मे मन्त्रसिद्धिं प्रयच्छ मे ॥ १५८ ॥

४. 'विष्णुरूपधरे...........प्रयच्छ मे' वैष्णवी के बायें कान में साधक यह श्लोक मन्त्र कहे ॥ १५८ ॥

वाराहि वरदे देवि दंष्ट्रोद्धृतवसुन्धरे ।
कृपया हर विघ्नं मे मन्त्रसिद्धिं प्रयच्छ मे ॥ १५९ ॥

५. 'वाराहि वरदे............प्रयच्छ मे' वाराही के बायें कान में साधक यह श्लोक मन्त्र कहे ॥ १५९ ॥

**शक्ररूपधरे देवि शक्रादिसुरपूजिते ।**
**कृपया हर विघ्नं मे मन्त्रसिद्धिं प्रयच्छ मे ॥ १६० ॥**

६. 'शक्ररूपधरे.........प्रयच्छ मे' इन्द्राणी के बायें कान में साधक यह श्लोक मन्त्र कहे ॥ १६० ॥

**चामुण्डे मुण्डमालासृक्चर्चिते भयनाशिनि ।**
**कृपया हर विघ्नं मे मन्त्रसिद्धिं प्रयच्छ मे ॥ १६१ ॥**

७. 'चामुण्डे..................प्रयच्छ मे' चामुण्डा के बायें कान में साधक यह श्लोक मन्त्र कहे ॥ १६१ ॥

**महालक्ष्मि महोत्साहे क्षोभसन्तापनाशिनि ।**
**कृपया हर विघ्नं मे मन्त्रसिद्धिं प्रयच्छ मे ॥ १६२ ॥**

८. 'महालक्ष्मी...............प्रयच्छ मे' महालक्ष्मी के बायें कान में साधक यह श्लोक मन्त्र कहे ॥ १६२ ॥

**मितिमातृमये देवि मितिमातृबहिष्कृते ।**
**एके बहुविधे देवि विश्वरूपे नमोऽस्तु ते ॥ १६३ ॥**

'मितिमातृमये...............विश्वरूपे नमोऽस्तु ते' सभी देवियों के वाम कर्ण में इस स्तुति को पढ़े ॥ १६३ ॥

**एतत् स्तोत्रं पठेद्यस्तु कर्मारम्भेषु संयतः ।**
**विदग्धाञ्च समालोक्य तस्य विघ्नं न जायते ॥ १६४ ॥**

जो साधक कर्मारम्भ में विदग्धा (कन्या) को देखकर इस स्तुति का पाठ करते हैं । उनके कार्य में विघ्न नहीं होता ॥ १६४ ॥

**कुलीनस्य द्वारदेव्यः कथितास्तव पुत्रक ।**
**दीक्षाकाले नित्यपूजासमये नाऽर्चयेद् यदि ॥ १६५ ॥**
**तस्य पूजाफलं सर्वं लीयते यक्षराक्षसैः ।**
**यदि व्रीडापरा सा तु भोजयेत्तद्गृहाद् बहिः ॥ १६६ ॥**
**स्थित्वा स्तोत्रं पठेत्तावद्यावत्तृप्तिः प्रजायते ।**
**आचम्य मुखवासादिताम्बूलञ्च निवेदयेत् ॥ १६७ ॥**

हे पुत्रक ! यहाँ तक हमने कौलों के सम्प्रदायानुसार द्वार देवियों का वर्णन

किया । दीक्षा काल के आरम्भ में अथवा नित्यपूजा काल में यदि साधक इनकी अर्चना नहीं करते तो उसकी पूजा के समस्त फल यक्ष और राक्षस ग्रहण कर लेते हैं । यदि वे अत्यन्त लज्जा के कारण वहाँ भोजन नहीं करना चाहती तो उन्हें घर के बाहर भोजन कराना चाहिये । उस काल में इस स्तोत्र का तब तक पाठ करना चाहिए; जब तक वे कुमारियाँ भोजन से तृप्त नहीं हो जाती । पुनः भोजनोपरान्त उन्हें आचमन करावे और मुखवासादि के लिये ताम्बूलादि शुद्धि द्रव्य समर्पित करे ॥ १६५-१६७ ॥

**ततो दद्यात् पुनर्माल्यं गन्धचन्दन पंकिलम् ।**
**बिन्दुयुक्तस्य दीर्घस्य एकैकान्ते नियोजयेत् ॥ १६८ ॥**
**स्वस्वनाम चतुर्थ्यन्तं हृन्मनुं तदनन्तरम् ।**
**मन्त्राणि कथितान्येव तासां वीरस्ततो जपेत् ॥ १६९ ॥**

फिर विन्दु युक्त दीर्घ मन्त्रों से (आं ई ऊँ ऐं औं अं अः) इस मन्त्र से एक एक को 'ॐ ब्रह्माण्यै नमः' ॐ माहेश्वर्यै नमः इत्यादि नामों से उनका नामकरण करे । उनके मन्त्रों को हमने पहले कह दिया है । वीर साधक पुनः उसी मन्त्र का जप करे ॥ १६८-१६९ ॥

**यथाशक्ति क्रमाज्जप्त्वा समर्प्याऽथ स्तुतिं पठेत् ।**
**विसृज्य च नमस्कृत्य वरं प्रार्थ्य सुखी भवेत् ॥ १७० ॥**

यथाशक्ति क्रमशः उस मन्त्र का जप करे तथा स्तुति का पाठ करे । अन्त में साधक वरदान की प्रार्थना करते हुये उनका विसर्जन करे और वर प्राप्त कर आनन्दित हो जावे ॥ १७० ॥

**अन्या यदि नाऽऽगच्छन्ति निजकन्या निजानुजा ।**
**अग्रजा वा मातुलानी माता वा तत्सपत्निका ॥ १७१ ॥**
**वयसा जातितो वापि हीनाऽपि परमा कला ।**
**पूज्याः कुलरसैः सर्वा निजाहङ्कारवर्जितैः ॥ १७२ ॥**

यदि अन्य जाति की कन्यायें न आवें, तो साधक अपनी कन्या अथवा अपनी बहन, अपनी जेठी बहन, भाभी, माता अथवा स्वकीय सौतेली माता अथवा अन्य जो जाति एवं अवस्था से भी हीन हों, उनकी पूजा साधक अहङ्काररहित होकर कुलरसों से करे ॥ १७१-१७२ ॥

**सर्वाभावे एकतरा पूजनीया प्रयत्नतः ।**
**संस्कृताऽसंस्कृता वापि जननी वापि निष्पतिः ॥ १७३ ॥**

साधक उक्त सभी के अभाव में केवल एक ही की प्रयत्नपूर्वक पूजा करे ।

चाहे संस्कृत हो, चाहे असंस्कृत हो, चाहे माता ही क्यों न हो, चाहे विधवा ही क्यों न हो, उसकी ही पूजा करे ॥ १७३ ॥

**पूर्वाभावेऽपरा पूज्या देव्यंशा योषितो यतः ।**
**एकश्चेत् कुलशास्त्रज्ञः पूजार्हस्तत्र निश्चितम् ॥ १७४ ॥**

पूर्व पूर्व के अभाव में साधक पर पर की पूजा करे । क्योंकि समस्त स्त्रियाँ ही देवी का स्वरूप हैं । यदि कुलशास्त्र का ज्ञाता एक ही है तो निश्चित रूप से वह पूजार्ह है ॥ १७४ ॥

**सर्वत्रैव सुराः पूज्याः ब्रह्माविष्णुशिवादयः ।**
**एका चेद्युवती तत्र पूजिता चाऽवलोकिता ॥ १७५ ॥**
**सर्वा एव परा देव्यः पूजिताः साधकोत्तमैः ।**
**आदावन्ते च मध्ये च लक्षपूर्त्तौ विशेषतः ॥ १७६ ॥**

ब्रह्मा, विष्णु एवं महेशादि देवताओं की पूजा करनी चाहिये । साधक ने यदि एक ही देवी की पूजा की अथवा शुद्धभाव से उनका अवलोकन ही कर लिया; तो उसने सभी देवियों की पूजा कर ली । अतः अपने लक्ष्य की पूर्ति के आदि, अन्त एवं मध्य में विशेष रूप से इनकी पूजा करे ॥ १७५-१७६ ॥

**न पूजयति चेत् कान्तां तदा विघ्नैर्विलिप्यते ।**
**पूर्वार्जितफलं नास्ति का कथा परजन्मनि ॥ १७७ ॥**

यदि लक्ष्यपूर्ति के लिये आरम्भ, मध्य में तथा अन्त में शक्ति की पूजा नहीं होती, तो वह कार्य विघ्न पड़ने से नष्ट हो जाता है । पूर्वार्जित पुण्य का भी फल नहीं होता, इस जन्म के पुण्यफल की बात तो बहुत दूर है ॥ १७७ ॥

**तस्मात् सर्वप्रयत्नेन यदीच्छेदात्मनो हितम् ।**
**देवीनां क्रोधसन्तापशमनं विघ्ननाशनम् ॥ १७८ ॥**

अतः यदि साधक सभी प्रयत्न से अपना हित चाहे, तो इतना अवश्य विचार करे कि देवी की पूजा, उसके क्रोध और सन्ताप का शमन करने वाली है और विघ्नों का विनाश करने वाली है ॥ १७८ ॥

**सर्वथा च प्रयत्नेन पूजयेत् कुलयोषितम् ।**
**शक्तिपूजां समाप्याऽथ प्रकृतञ्च समाचरेत् ॥ १७९ ॥**

अतः कार्यारम्भ में सब प्रकार से कुलयोषित की पूजा अवश्य करे । इस प्रकार शक्ति की पूजा समाप्त कर प्रकृत कार्य आरम्भ करे ॥ १७९ ॥

**स्वकल्पोक्तविधानेन देवीं सम्पूजयेत्ततः ।**

प्रातरेव ततः पश्चाज्जपेन्मध्यन्दिनावधि ॥ १८० ॥

शक्तिपूजा के बाद साधक अपने सम्प्रदायानुसार देवी की पूजा करे । फिर प्रात:काल से आरम्भ कर मध्याह्न पर्यन्त मन्त्र का जप करे ॥ १८० ॥

अन्यूनं नातिरिक्तञ्च न दिनञ्चाऽतिलङ्घयेत् ।
एककालं द्विकालं वा त्रिकालं वाथ साधकः ॥ १८१ ॥
स्नानं कुर्याच्छुद्धतोयैर्हविष्यान्नं सुभोजयेत् ।
एकग्रामे स्थितो नित्यं गत्वा वन्देत्ततो गुरुम् ॥ १८२ ॥

विद्वान् साधक प्रतिदिन समान संख्या में जप करे । न्यून अथवा अधिक न करे । एक दिन का भी व्यवधान न डाले, निरन्तर प्रतिदिन जप करे । प्रतिदिन एक काल, द्विकाल अथवा त्रिकाल में शुद्ध जल से स्नान करे । हविष्यान्न भोजन करे । यदि गुरु अपने ही ग्राम के रहने वाले हैं तो वहाँ जाकर उनकी प्रतिदिन वन्दना भी करे ॥ १८१-१८२ ॥

प्रणमेत्तद्दिशोऽन्यत्र देवतावन्दनं सदा ।
प्रातरुत्थाय पूजायां स्नानकालेऽथवा पुनः ॥ १८३ ॥

यदि दूर में रहने वाले हैं, तो उसी दिशा को प्रणाम करे । इसी प्रकार प्रातः उठकर अथवा पूजाकाल में अथवा स्नान काल में देवता वन्दन करे ॥ १८३ ॥

संस्कृताऽसंस्कृता वापि हीनजाताऽपि वा तथा ।
नमस्या सर्वजातीनां कुलीनानां कुलार्चने ॥ १८४ ॥

कुलार्चन में चाहे संस्कृत अथवा असंस्कृत अथवा हीन जाता ही क्यों न हों कौलों के लिये सभी जातियों की स्त्रियाँ नमस्कारार्ह हैं ॥ १८४ ॥

वर्जयेद् गीतवाद्यादिश्रवणं नृत्यदर्शनम् ।
अभ्यङ्गगन्धलेपञ्च पुष्पधारणमेव च ॥ १८५ ॥

पुरश्चरणकर्त्ता गाना बजाना न सुने, नृत्य न देखे, शरीर में उपटन तेल न लगावे और इत्रादि, सुगन्ध एवं पुष्प धारण करना वर्जित रखे ॥ १८५ ॥

अस्नातांश्च द्विजान् शूद्रान् स्त्रियं नैव स्पृशेत् क्वचित् ।
त्यजेदुष्णोदकस्नानमनिवेदितभोजनम् ॥ १८६ ॥

ब्राह्मण, शूद्र और स्त्रियाँ यदि अस्नात हों, तो उनका स्पर्श न करे । उष्णोदक से स्नान न करे । बिना दिये हुये अन्न का भोजन न करे ॥ १८६ ॥

नानाचारः प्रकर्त्तव्यो न चारणमितस्ततः ।

**भूतहिंसा न कर्त्तव्या पशुहिंसा विशेषतः ॥ १८७ ॥**

अनाचार न करे । इधर-उधर न घूमे । किसी भी जीव की हिंसा विशेषकर पशु की हिंसा वर्जित करे ॥ १८७ ॥

**बलिदानं विना देव्या हिंसां सर्वत्र वर्जयेत् ।**
**अन्यमन्त्रपुरस्कारं निन्दां चैव विवर्जयेत् ॥ १८८ ॥**

देवी के बलिदान को छोड़कर अन्यत्र सर्वत्र हिंसा कार्य न करे । दूसरे के मन्त्रों की प्रशंसा तथा निन्दा न करे ॥ १८८ ॥

**उष्णीशी कञ्चुकी नग्नो मुक्तकेशोऽप्यनावृतः ।**
**अपवित्रकरोऽशुद्धः प्रलपन्न जपेत् क्वचित् ॥ १८९ ॥**

पगड़ी या टोपी, अथवा कुर्त्ता गञ्जी पहनकर, अथवा नङ्गा होकर, शिखा खोलकर, अथवा बिना आवरण के अपवित्र हाथ से, अथवा अशुद्ध शरीर से, अथवा बातचीत करते हुये जप न करे ॥ १८९ ॥

**अनावृतकरो भूत्वा शिरसा चावृतोऽपि वा ।**
**चिन्ताव्याकुलचित्तो वा क्रुद्धो वा न जपेत् कदा ॥ १९० ॥**

खुले हाथ से, अथवा सिर पर कपड़ा रखकर, अथवा चिन्ता से व्याकुल चित्त होकर अथवा क्रुद्धावस्था में कदापि जप न करे ॥ १९० ॥

**वीरासनशयानो वा गच्छन्नखिल एव वा ।**
**रथ्यायामशिवस्थाने न जपेत्तिमिरालये ॥ १९१ ॥**

वीरासन लगाकर सोते हुये, चलते हुये, जनसमूह में, गली में, बुरे स्थान में, घोर अन्धकार में जप न करे ॥ १९१ ॥

**पतितानामन्त्यजानां दर्शने भाषणे श्रुते ।**
**क्षुतेऽधोवायुगमने जृम्भणे जपमुत्सृजेत् ॥ १९२ ॥**

पतित एवं अन्त्यजों के दिखाई पड़ने पर उनसे भाषण के समय छींक, जँभाई लेते हुये और अधोवायु के त्याग काल में जप का परित्याग करे ॥ १९२ ॥

**उत्थायाऽऽचमनं कृत्वा प्राणायामषडङ्गकम् ।**
**कृत्वा सम्यग्जपेच्छेषमथवा सूर्यदर्शनम् ॥ १९३ ॥**

इन सभी अवस्थाओं में प्रायश्चित्त रूप में आसन से उठकर आचमन करे और प्राणायाम एवं षडङ्ग न्यास करे । इतना कर सम्यक् रूप से शेष जप करे, अथवा सूर्य का दर्शन करे ॥ १९३ ॥

स्त्रियं शूद्रं पशुञ्चैव तथा च भ्रष्टसाधकम् ।
सम्भाषयेत् कदाचिन्न ब्रह्मचर्यं समाचरेत् ॥ १९४ ॥

स्त्री, शूद्र, पशु तथा भ्रष्ट साधक से कभी भी सम्भाषण न करे और ब्रह्मचर्य का पालन करे ॥ १९४ ॥

जपकाले च, सततं भार्यां यत्नेन वर्जयेत् ।
शयीतशुद्धशय्यायां शुचिर्वस्त्रधरः सदा ॥ १९५ ॥

जप काल में सर्वदा प्रयत्नपूर्वक भार्या (के संगम) का त्याग करे, उत्तम एवं पवित्र वस्त्र धारण कर शुद्ध शय्या पर शयन करे ॥ १९५ ॥

प्रत्यहं क्षालयेच्छय्यामेकाकी निर्भयः स्वपेत् ।
नाऽऽलोकयेदन्यशास्त्रं वेदागमं विना सुधीः ॥ १९६ ॥

प्रतिदिन शय्या का प्रक्षालन करे और अकेले निर्भय हो शयन करे । वेद और आगम के अतिरिक्त और शास्त्रों का अवलोकन न करे ॥ १९६ ॥

नक्तं भोजी हविष्यान्नं जपेद्विद्यां दिवा शुचिः ।
दिवसे सर्वथा वीरो ब्रह्मचारी भवेत् सदा ॥ १९७ ॥

रात्रि के समय हविष्यान्न का भोजन करे । दिन में अत्यन्त पवित्र होकर महाविद्या का जप करे । वीर मार्ग का उपासक दिन में सर्वथा ब्रह्मचर्य व्रत का पालन करे ॥ १९७ ॥

देवताध्यानसंयुक्तो गमयेदनिशं बुधः ।
रात्रौ सम्पूजयेद् देवीं कुलाचारक्रमेण तु ॥ १९८ ॥

सारा दिन देवता के ध्यान में तत्पर होकर व्यतीत करे । रात्रि में कुलाचार के क्रम से देवी का पूजन करते हुये व्यतीत करे ॥ १९८ ॥

पञ्चतत्त्वैः प्रपूज्यैव यथाशक्ति जपञ्चरेत् ।
पुरश्चरणकाले तु यदि स्यात् पीठदर्शनम् ॥ १९९ ॥
तदा तत्र पीठपूजा मनसापि न हीयते ।
प्रसङ्गात् कथ्यते पीठपूजा तन्त्रविधानतः ॥ २०० ॥

वीर साधक पञ्चतत्त्व से ही पूजन करे फिर यथाशक्ति जप करे । यदि पुरश्चरणकाल में पीठ का दर्शन हो जावे, तब उस समय साधक पीठ पूजा मन से भी कदापि त्याग न करे । अब आगे प्रसङ्गवश तन्त्रशास्त्र के अनुसार पीठ पूजा कहता हूँ ॥ १९९-२०० ॥

चतुःपीठे पूज्यदेवीनामानि

देवीकूटे महाभागे उड्डीयाने तथा पुनः ।
योगनिद्रा कामरूपे महिषासुरमर्द्दिनी ॥ २०१ ॥

अत्यन्त भाग्यशाली देवीकूट में एवं उड्डीयान पीठ में योग निद्रा की पूजा करे और कामरूप पीठ में महिषमर्द्दिनी की पूजा करे ॥ २०१ ॥

कात्यायनी कामभूमौ कामाख्या कामदायिनी ।
जालन्धरे च पूर्णेशी पूर्ण शैले च चण्डिका ॥ २०२ ॥

कामभूमि में कात्यायनी की, कामाख्या पीठ में कामदायिनी की, जालन्धर में पूर्णेशी की और पूर्णशैल पीठ में चण्डिका की पूजा करे ॥ २०२ ॥

कामरूपे तु वेहारे पूज्या दिक्करवासिनी ।
अथवा कामरूपस्य दर्शनं यदि भाग्यतः ॥ २०३ ॥
तदा भगादिदेवीनां पूजा तत्र विधीयते ।
वक्ष्यमाणविधानेन तासां ज्ञात्वा स्वनामकम् ॥ २०४ ॥

कामरूप पीठ में साधक बेहार में दिक्करवासिनी की पूजा करे, अथवा यदि भाग्यवश कामरूप का दर्शन हो जाय, तो उस समय वहाँ भगादि देवियों की पूजा का विधान कहा गया है । आगे बतलायी गयी विधि के अनुसार उनका नाम लेकर पूजा करनी चाहिए ॥ २०३-२०४ ॥

कुलनाथं पुनर्ध्यात्वा स्वयमच्युतमानसः ।
पूजां समापयेद्वीरः तदनुस्मृतिपूर्वकम् ॥ २०५ ॥

फिर कुलनाथ का ध्यान कर साधक विष्णु का मन से स्मरण करते हुये पूजा समाप्त कर देवे ॥ २०५ ॥

पूजाकाले हीनजाता स्वयोषिद्वा विधानतः ।
पूजनीया प्रयत्नेन द्वैधं तत्र विवर्जयेत् ॥ २०६ ॥

पूजा के समय नीचकुल में उत्पन्न, अथवा अपनी स्त्री की विधानपूर्वक पूजा करे और सन्देह विवर्जित होकर पूजा करे ॥ २०६ ॥

कुलाचारस्य मन्त्रगुप्तिकथनम्

यथा विष्णुपुरं गोप्यं यथा वा शम्भुरीश्वरः ।
यथा कमलजन्मापि ये वा व्यासमुखा द्विजाः ॥ २०७ ॥
इन्द्राद्यालोकपालाश्च सर्वगन्धर्वकिन्नराः ।

**यक्षरक्षःपिशाचाद्या गुह्यचारणवन्दिनः ॥ २०८ ॥**
**तैर्यथा गोपितं गुप्तं तदुक्तं शास्त्रसम्भवम् ।**
**तथा शैवेन गोप्तव्यः कुलाचारः सुदुर्लभः ॥ २०९ ॥**

जिस प्रकार विष्णु ने, शम्भु ने, ईश्वर ने, जिस प्रकार ब्रह्मदेव ने व्यासादि प्रसिद्ध द्विजों ने, इन्द्रादि समस्त लोकपालों ने, सभी गन्धर्व और किन्नरों ने, यक्ष राक्षस और पिशाचों ने, गुह्यचारण बन्दियों ने, इन लोगों ने जिस प्रकार कुलाचार को गुप्त रखा था वह शास्त्रों में कह दिया गया है। उसी प्रकार शैवों को भी जो अत्यन्त दुर्लभ है उस कुलाचार को गुप्त रखना चाहिये ॥ २०७-२०९ ॥

युगभेदे जपसंख्याभेदः

**अनेन विधिना मन्त्री पुरश्चर्यां समाचरेत् ।**
**येषां जपे च होमे च संख्या नोक्ता मनीषिभिः ॥ २१० ॥**
**तेषामष्टसहस्राणि संख्योक्ता जपहोमयोः ।**
**यस्मिंश्च निगदे चैव मन्त्रे संख्या विधीयते ॥ २११ ॥**
**तत्र सर्वत्र मन्त्राणां संख्यावृद्धिर्युगक्रमात् ।**
**कल्पोक्ते यत् कृतासंख्या त्रेतायां द्विगुणा भवेत् ॥ २१२ ॥**

मन्त्रज्ञ साधक इस प्रकार पुरश्चरण करे। मनीषियों ने जिन मन्त्रों से होम तथा उसके जप की संख्या नहीं कही है, वहाँ उन मन्त्रों के जप तथा होम की संख्या आठ हजार समझनी चाहिये। किन्तु जहाँ होम तथा जप में संख्या कह दी गई है, वहाँ-वहाँ उन मन्त्रों में युग के अनुरूप मन्त्र की संख्या में वृद्धि समझना चाहिये। तन्त्र कल्प में जहाँ मन्त्र के जप की संख्या का निर्देश है, त्रेता में उस जप की संख्या दूनी समझनी चाहिये ॥ २१०-२१२ ॥

**द्वापरे त्रिगुणा प्रोक्ता कलौ संख्या चतुर्गुणा ।**
**न दिव्यवीरयोरेव युगसेवापरिश्रमः ॥ २१३ ॥**

द्वापर में तीन गुनी तथा कलि में उस मन्त्र के जप की संख्या चतुर्गुणी समझनी चाहिये। किन्तु दिव्य और वीर मार्ग वालों के लिये युगानुसार जप की संख्या के बढ़ाने के परिश्रम का नियम नहीं है ॥ २१३ ॥

**पशूनां विद्यते चात्र संख्यावृद्धिर्युगक्रमात् ।**
**तेषां पूजा त्रिकालं हि रात्रौ नैव कदाचन ॥ २१४ ॥**

यह युग के अनुसार जप की संख्या की वृद्धि का क्रम पशुमार्ग वालों के लिये कहा गया है। उनके लिये त्रिकाल पूजा का क्रम बतलाया गया है। रात्रि में कदापि नहीं ॥ २१४ ॥

**कथितं सर्वशास्त्रेषु विधानं तन्त्रवर्त्मना ।**
**चतुर्गुणं तु ताराया विना शङ्खाक्षमालया ॥ २१५ ॥**

इस प्रकार हमने तन्त्रमार्ग के अनुसार पुरश्चरण का विधान कह दिया । तारा मन्त्र का जप शङ्ख की माला से न करे । तारा के मन्त्रों की जप संख्या चतुर्गुणित समझनी चाहिये ॥ २१५ ॥

**एवं कृत्वा हविष्याशी जपेल्लक्षचतुष्टयम् ।**
**नरास्थिमालामादाय जपेद्वा लक्षमेककम् ॥ २१६ ॥**

शङ्ख की माला के बिना साधक हविष्य भोजन कर तारा मन्त्र का जप करे । यदि मनुष्य के हड्डी की माला हो तब एक लाख जप करे ॥ २१६ ॥

**भावनारहितानाञ्च क्षुद्राणां क्षुद्रचेतसाम् ।**
**चतुर्गुणजपः प्रोक्तः सिद्धये नान्यथा भवेत् ॥ २१७ ॥**

जो भावना से रहित है, जन्मना क्षुद्र है, अथवा जिनका चित्त क्षुद्र है, उनकी सिद्धि के लिये यह चतुर्गुण जप का विधान है ॥ २१७ ॥

### उन्मुखीकालिकाविधानम्

**सिद्धविद्या यथा नात्र युगसेवापरिश्रमः ।**
**विशेषतः कलियुगे तारा काली तथोन्मुखी ॥ २१८ ॥**
**आसामेव कदा नास्ति युगसेवाविधिः स्मृतः ।**

तारा, काली और उन्मुखी—ये सिद्धविद्या कही गई हैं । इनके मन्त्रों में युगानुसार मन्त्र जप की संख्यावृद्धि का क्रम नहीं है । इनकी युगानुसार सेवा विधि की वृद्धि का क्रम भी नहीं है ॥ २१८ ॥

**उन्मुख्याः कालिकायाश्च विशेषः कथ्यतेऽधुना ॥ २१९ ॥**

अब उन्मुखी तथा काली के विषय में जो विशेष है उसे कहता हूँ ॥ २१९ ॥

**दिवसे ब्रह्मचर्येण स्वीयसंख्यं जपं पठेत् ।**
**रात्रौ मांसासवैर्मत्स्यैर्मुद्राभिर्मैथुनोद्भवैः ॥ २२० ॥**
**सम्पूज्य च महादेवीं गन्धपुष्पादिभिस्तथा ।**
**ततो नग्नां स्त्रियं नग्नो रमणक्लेशतोऽपि वा ॥ २२१ ॥**

दिन में इनके मन्त्रों का जप ब्रह्मचर्यपूर्वक उतने ही संख्या में करे । किन्तु रात्रि में जप करना हो तो मांस, मद्य, मत्स्य, मुद्रा तथा मैथुनादि पञ्चमकारों से गन्ध एवं पुष्पादि उपचारों से देवी की पूजा करे । अथवा नग्न स्त्री के साथ, नग्न होकर मैथुन के खेद से खिन्न होकर इनका जप करे ॥ २२०-२२१ ॥

जपेल्लक्षं प्रयत्नेन साधको मन्त्रसिद्धये ।
द्विजन्मनां तु सर्वेषां द्विधा विधिरिहोच्यते ॥ २२२ ॥
शूद्राणां तु तथा प्रोक्तं रात्राविष्टं महाफलम् ।
ततः सर्वे स्वकल्पोक्तजपसंख्यां समाप्य च ।
ततस्तु तद्दशांशेन होमयेद्धविषाऽनले ॥ २२३ ॥

॥ इति श्रीमज्ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये
द्वादशोल्लासः ॥ १२ ॥

साधक अपने मन्त्र की सिद्धि के लिये इनके मन्त्र का एक लाख जप करे । हमने केवल द्विजातियों के लिये उक्त प्रकार की दो विधि कही है । शूद्रों के लिये तो रात्रि में इस प्रकार का जप अभीष्ट है, जो महाफल प्रदान करता है । इस प्रकार सभी लोग अपने अपने कल्प के अनुसार जप संख्या समाप्त कर उसके दशांश से अग्नि में हवि द्वारा हवन करे ॥ २२२-२२३ ॥

**महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय के ज्येष्ठ पुत्र पण्डित रामरञ्जन मालवीय कृत श्रीमज्ज्ञानानन्द परमहंस विरचित कौलावलीनिर्णय नामक तन्त्र के द्वादश उल्लास की निरञ्जन हिन्दी व्याख्या पूर्ण हुई ॥ १२ ॥**

# त्रयोदश उल्लासः

होमविधिः

अथ होमविधिं वक्ष्ये यथातन्त्रानुसारतः ।
आदौ भूमिं परीक्षेत वास्तुज्ञानविशारदः ॥ १ ॥

अब तन्त्र शास्त्र के अनुसार होम का विधान कहता हूँ । वास्तुज्ञान का पण्डित सर्वप्रथम भूमि की परीक्षा करे ॥ १ ॥

कुण्डविधानम्

शल्यादीन् शोधयेद्यत्नादथवा पुरुषं खनेत् ।
नवहस्तप्रमाणं वा सप्तहस्तमथापि वा ॥ २ ॥
पञ्चहस्तप्रमाणं वा चतुरस्त्रसमन्वितम् ।
विच्छिद्रं तु चतुर्द्वारं दिव्यदृष्टिविभूषितम् ॥ ३ ॥

शल्योद्धरण करे अथवा एक पोरसा, अथवा नव हाथ, अथवा सात हाथ, अथवा पाँच हाथ भूमि खनन करना चाहिये । जितना विस्तार हो उतना चौड़ा, उतना ही गहरा इस प्रकार चतुरस्त्र कुण्ड होना चाहिये । उसमें कहीं से छेद न हो और देखने में भी अच्छा लगे ॥ २-३ ॥

दिव्यमालापरिवृतं तन्तुना परिवेष्टितम् ।
आदौ कुण्डं प्रकुर्वीत साधकः सिद्धिहेतवे ॥ ४ ॥

उसके चारो ओर सूत्र परिवेष्टित करे, उसे दिव्यमाला से विभूषित करे, इस प्रकार साधक मन्त्र सिद्धि के लिये कुण्ड का निर्माण करे ॥ ४ ॥

विविधाकाराणिकुण्डानि

चतुरस्त्रं योनिमर्धचन्द्रं त्र्यस्त्रं सुवर्त्तुलम् ।
षडस्त्रं पङ्कजाकारं अष्टास्त्रं तानि नामतः ॥ ५ ॥

**मण्डल में कुण्ड विधान**—चतुरस्त्र, योनि, अर्द्धचन्द्र, त्र्यस्त्र, सुवर्त्तुल, षडस्त्र, पङ्कजाकार और अष्टास्त्र—ये आठ प्रकार के कुण्डों के नाम हैं ॥ ५ ॥

विमर्श—ग्रन्थकार ने मण्डप में कुण्ड विधान के ४ श्लोक से लेकर ६७ श्लोक तक मूल शारदातिलक के ३.४९ से लेकर ३.१०२ पर्यन्त श्लोक तक लिया है ।

(१) चतुरस्त्र कुण्डमानम्

**हस्तमात्रमितां भूमिं पूर्ववत् परिसूत्रयेत् ।**
**समन्तात् कुण्डमेतत् स्याच्चतुरस्त्रं शुभावहम् ॥ ६ ॥**

**१. चतुरस्त्र कुण्ड**—एक हाथ लम्बा, एक हाथ चौड़ा और एक हाथ गहरा इस प्रकार का शुभावह चतुरस्त्र कुण्ड कहा जाता है ॥ ६ ॥

**चतुर्विंशत्यंगुलाढ्यं हस्तं तन्त्रविदो विदुः ।**
**कर्त्तुर्दक्षिणहस्तस्य मध्यमाङ्गुलिपर्वणः ॥ ७ ॥**
**मध्यस्य दैर्घ्यमानेन मानाङ्गुलमुदीरितम् ।**
**यवानामष्टभिः क्लृप्तं मानाङ्गुलमितीरितम् ॥ ८ ॥**

कोई कोई तन्त्रवेत्ता कर्त्ता के हाथ से चौबीस अङ्गुल का प्रमाण मानते हैं । कर्त्ता के दाहिने हाथ के मध्यम अङ्गुलि के मध्य पर्व पर्यन्त मान को चौबीस अङ्गुल का प्रमाण माना गया है । शास्त्रकारों ने आठ यव के प्रमाण को एक अङ्गुल प्रमाण माना है ॥ ७-८ ॥

(२) योनिकुण्डम्

**चतुरस्त्रीकृतं क्षेत्रं पञ्चधा विभजेत् सुधीः ।**
**न्यसेत् पुरस्तादेकांशं कोणार्धार्धप्रमाणतः ॥ ९ ॥**
**भ्रामयेत्तेन मानेन तथान्यदपि मन्त्रवित् ।**
**सूत्रयुग्मं ततो दद्यात् कुण्डं योनिनिभं भवेत् ॥ १० ॥**

**२. योनि कुण्ड**—बुद्धिमान् साधक एक हाथ वाले चतुरस्त्र के क्षेत्रफल को पाँच भागों में प्रविभक्त करे । यह पाँचवाँ भाग चार अङ्गुल साढ़े छह यव के आस-पास होगा । (यह चतुरस्त्र सभी कुण्डों का प्रकृतिभूत है । पुनः मध्य रेखा जो उत्तर से दक्षिण की ओर खींची गई है । उसमें उत्तर की ओर पञ्चमांश बढ़ा देवे । तदनन्तर उत्तर की ओर बढ़ी हुई उस रेखा को पूर्व और पश्चिम की रेखा से मिला देवे । इसी प्रकार पूर्व-दक्षिण और पश्चिम-दक्षिण को भी मिला देवे । पुनः पूर्व-दक्षिण रेखा के अर्ध भाग से तथा पश्चिम-दक्षिण की रेखा के अर्द्ध भाग से अर्धवृत्त का निर्माण कर देवे । ऐसा करने से योनि कुण्ड बन जायेगा ॥ ९-१० ॥

(३) अर्धचन्द्रकुण्डम्

**चतुरस्त्रीकृतं क्षेत्रं दशधा विभजेत् सुधीः ।**

एकमेकं त्यजेदंशमध ऊर्ध्वञ्च मन्त्रवित् ॥ ११ ॥
ज्यासूत्रं पातयेदग्रे तन्मानात् भ्रामयेत् पुनः ।
अर्धचन्द्रनिभं कुण्डं रमणीयमिदं भवेत् ॥ १२ ॥

**३. अर्धचन्द्रकुण्ड**—सर्वप्रथम चतुरस्रीकृत क्षेत्र को दश भागों में प्रविभक्त करे। तदनन्तर एक भाग ऊपर की ओर और एक भाग नीचे की ओर छोड़ देवे। फिर नीचे से ऊपर पर्यन्त प्रमाण में अर्धवृत्त का निर्माण करे और दोनों ज्या (जीवा) को मिला देवे ऐसा करने से अर्धचन्द्र कुण्ड बन जाता है। यह कुण्ड अत्यन्त मनोहर होता है ॥ ११-१२ ॥

(४) त्र्यस्रकुण्डम्

चतुर्धा भेदिते क्षेत्रे विन्यसेत् पार्श्वयोर्द्वयोः ।
एकैकमंशं तन्मानादग्रतो लाञ्छयेत् पुनः ॥ १३ ॥
सूत्रयुग्मं बुधः कुर्यात् त्र्यस्रं कुण्डमुदाहृतम् ।

चतुरस्र क्षेत्र का निर्माण कर पुनः मध्य रेखा से दोनों ओर उसके चार भाग करे। तत्पश्चात् मध्य रेखा में पड़े लम्ब को पूर्व की ओर चतुर्थांश बढ़ा दें, इसी प्रकार आधार रेखा को दोनों ओर चतुर्थांश बढ़ा देवे। फिर लम्ब से बढ़ी रेखा को दोनों बढ़े क्षेत्रों से मिला देवे। ऐसा करने से त्र्यस्र कुण्ड होता है ॥१३-१४॥

(५) वृत्तकुण्डम्

अष्टादशांशके क्षेत्रे न्यसेदेकं बहिर्बुधः ॥ १४ ॥
भ्रामयेत्तेन मानेन वृत्तं कुण्डमनुत्तमम् ।

**५. वृत्तकुण्ड**—बुद्धिमान् साधक उस चतुरस्र क्षेत्र को कुल अट्ठारह भागों में प्रविभक्त करे। फिर मध्य के पूर्व-पश्चिम तथा उसका एक-एक बढ़ा देवे। उसके पश्चात् व्यास के केन्द्र बिन्दु से चारों ओर वृत्त खींच देवे। इसे वृत्त कुण्ड कहा जाता है ॥ १४-१५ ॥

(६) षडस्रकुण्डम्

अष्टधा विभजेत् क्षेत्रं मध्यसूत्रस्य पार्श्वयोः ॥ १५ ॥
भागं न्यसेदेकमेकं मानेनाऽनेन मध्यतः ।
कुर्यात् पार्श्वद्वये मत्स्यचतुष्कं तन्त्रवित्तमः ॥ १६ ॥
सूत्रषट्कं ततो दद्यात् षडस्रं कुण्डमुत्तमम् ।

**६. षडस्रकुण्ड**—सर्वप्रथम चतुरस्र क्षेत्र के मध्य से दोनों ओर की रेखा को आठ भागों में प्रविभक्त करे। तदनन्तर मध्य की उत्तर दक्षिण और पूर्व पश्चिम की रेखाओं को अष्टमांश बढ़ा देवे। तदनन्तर बढ़ी हुई रेखाओं से सम्बद्ध व्यास के

केन्द्र से एक वृत्त का निर्माण करे । तदनन्तर बढ़ी हुई रेखा के दोनों ओर तन्त्रवेत्ता साधक चार चिह्न लगावे । फिर छओं सूत्रों को मिला देवे तो षडस्र कुण्ड हो जाता है ॥ १५-१७ ॥

(७) पद्मकुण्डम्

**चतुरस्रीकृतं क्षेत्रं विभज्याऽष्टादशांशतः ॥ १७ ॥**
**एकं भागं बहिर्न्यस्य भ्रामयेत्तेन वर्त्तुलम् ।**
**वृत्तानि कर्णिकादीनां बहिस्त्रीणि प्रकल्पयेत् ॥ १८ ॥**
**पद्मकुण्डमिदं प्रोक्तं विलोचनमनोहरम् ।**

७. **पद्मकुण्ड विधान**—उस चतुरस्र कुण्ड के क्षेत्र को अट्ठारह भागों में प्रविभक्त करे । पुनः एक भाग बाहर छोड़कर चारों ओर वृत्त बनावे । पुनः साधक कर्णिका के बाहर तीन वृत्त का निर्माण करे तो देखने में अत्यन्त मनोहर पद्मकुण्ड बन जाता है ॥ १७-१९ ॥

(८) अष्टास्रकुण्डम्

**पूर्वोक्तं विभजेत् क्षेत्रं चतुर्विंशतिभागतः ॥ १९ ॥**
**एकं भागं बहिर्न्यस्य चतुरस्रं प्रकल्पयेत् ।**
**अन्तःस्थचतुरस्रस्य कोणार्धार्धप्रमाणतः ॥ २० ॥**
**बाह्यस्य चतुरस्रस्य कोणाभ्यां परिलाञ्छयेत् ।**
**दिशं प्रति यथान्यायमष्टसूत्राणि पातयेत् ॥ २१ ॥**
**अष्टास्रं कुण्डमेतद्धि तन्त्रविद्भिरुदाहृतम् ।**

८. **अष्टास्रकुण्डविधान**—पूर्वोक्त चतुरस्र कुण्ड के क्षेत्र को साधक कुल चौबीस भागों में प्रविभक्त करे । तदनन्तर चारों ओर एक भाग बाहर छोड़कर पुनः उसे चौकोर निर्माण करे । तदनन्तर अन्तःस्थ चतुरस्र के कोण के आधे भाग को बाहर के चतुरस्र कोणों से मिला देवे । फिर साधक आठो दिशाओं में आठो सूत्रों को एक में मिला देवे । तन्त्रवेत्ताओं ने इस प्रकार से बने हुये कुण्ड को अष्टास्र कुण्ड कहा है ॥ २०-२१ ॥

खातमानम्

**यावान् कुण्डस्य विस्तारः खननं तावदीरितम् ॥ २२ ॥**

मेखलालक्षणं तन्मानञ्च

**कुण्डानां यादृशं रूपं मेखलानाञ्च तादृशम् ।**
**कुण्डादेर्द्व्यङ्गुलं त्यक्त्वा कर्त्तव्या मेखलाः शुभाः ॥ २३ ॥**

**खात और मेखला की माप**—कुण्ड का जितना विस्तार हो उतने ही प्रमाण

में उसकी गहराई होनी चाहिये। कुण्ड का जैसा स्वरूप हो उसकी मेखला भी उसी प्रकार की होनी चाहिये अर्थात् चतुरस्र कुण्ड में चतुरस्र मेखला और योनि कुण्ड में योनिरूपा इत्यादि मेखलायें बनानी चाहिये । कुण्ड के आदि में दो अङ्गुल छोड़कर मेखला बनानी चाहिये ॥ २२-२३ ॥

**कुण्डानां मेखलास्तिस्रो मुष्टिमात्रेण ताः क्रमात् ।**
**उत्सेधायामतो ज्ञेया द्व्येकार्धाङ्गुलिसम्मिताः ॥ २४ ॥**
**अरत्निमात्रकुण्डस्य तास्त्रिद्विकाङ्गुलात्मिकाः ।**
**अष्टादशाङ्गुलं ज्ञेयम् अरत्निमानं धीमता ॥ २५ ॥**
**द्वादशाङ्गुलिभिश्चैव हस्तार्धं परिकीर्त्तितम् ।**

हर प्रकार के कुण्डों में तीन-तीन मेखलायें बनानी चाहिये । त्रिमेखला पक्ष में उसकी ऊँचाई तथा चौड़ाई क्रमशः एक-एक मुष्टि के बराबर होनी चाहिये । प्रथम मेखला दो अङ्गुल चौड़ी और दो अङ्गुल ऊँची, दूसरी मेखला प्रथम की अपेक्षा एक अङ्गुल चौड़ी और एक अङ्गुल ऊँची । इसी प्रकार तृतीय मेखला द्वितीय की अपेक्षा आधा अङ्गुल चौड़ी तथा आधा अङ्गुल ऊँची होनी चाहिये । यदि अरत्नि प्रमाण का कुण्ड हो तो तीनों मेखलायें क्रमशः तीन, दो और एक अङ्गुल चौड़ी तथा ऊँची होनी चाहिये । यदि एक हाथ का कुण्ड हो तो चार, तीन और दो अङ्गुल चौड़ी तथा ऊँची मेखला होनी चाहिये । बारह अङ्गुल का आधा हाथ समझना चाहिये ॥ २४-२६ ॥

### नेमिलक्षणम्

**एकहस्तमिते कुण्डे वेदाग्निनयनाङ्गुलाः ॥ २६ ॥**
**मेखलानां भवेदन्तः परितो नेमिरङ्गुलात् ।**
**एक हस्तस्य कुण्डस्य वर्धयेत् तत्क्रमात् सुधीः ॥ २७ ॥**

**नेमि का लक्षण**—यदि एक हाथ का कुण्ड हो तो मेखला के भीतर चारों ओर एक अङ्गुल का कण्ठ निर्माण करे । इसी प्रकार कुण्ड के विस्तार के अनुसार उसका कण्ठ भी बढ़ाते रहना चाहिये । इसी प्रकार दश हाथ के कुण्ड में पृथक्-पृथक् आधा अङ्गुल कण्ठ बढ़ाते रहना चाहिये ॥ २६-२७ ॥

**कुण्डे द्विहस्ते ता ज्ञेया रसवेदगुणाङ्गुलाः ।**
**चतुर्हस्तेषु कुण्डेषु वसुतर्कयुगाङ्गुलाः ॥ २८ ॥**
**कुण्डे रसकरे ताः स्युर्दशाष्टरससम्मिताः ।**
**वसुहस्तमिते कुण्डे भानुपङ्क्त्याष्टकाङ्गुलाः ॥ २९ ॥**
**दशहस्तमिते कुण्डे मनुभानुदशाङ्गुलाः ।**
**विस्तारोत्सेधतो ज्ञेया मेखलाः सर्वतो बुधैः ॥ ३० ॥**

यदि दो हाथ का कुण्ड हो तो मेखला भी क्रमशः छह, चार और तीन अङ्गुल की ऊँची और चौड़ी करनी चाहिये। यदि चार हाथ का कुण्ड हो तो आठ, छह और चार अङ्गुल की ऊँचाई और चौड़ाई में मेखला बनानी चाहिये। यदि कुण्ड छह हाथ का हो तब मेखला भी क्रमशः दश, आठ और छह अङ्गुल चौड़ी और ऊँची बनानी चाहिये। यदि कुण्ड आठ हाथ का हो तो मेखला भी बारह, दश तथा आठ अङ्गुल चौड़ी और ऊँची बनावे। यदि कुण्ड दश हाथ का हो तो मेखलायें भी चौदह, बारह और दश अङ्गुल की होनी चाहिये। इसी प्रकार बुद्धिमान् साधक कुण्ड के अनुसार मेखलाओं की ऊँचाई तथा चौड़ाई का विचार कर लेवे ॥ २८-३० ॥

### योनिलक्षणम्

**होतुरग्रे योनिरासामुपर्यश्वत्थपत्रवत् ।**
**मुष्ट्यरत्न्येकहस्तानां कुण्डानां योनिरीरिता ।**
**षट्चतुर्द्व्यङ्गुलायामविस्तारोन्नतिशलिनी ॥ ३१ ॥**

**योनि का लक्षण**—होता के आगे इन मेखलाओं के ऊपर अश्वत्थ पत्र के आकार की योनि बनानी चाहिये। मुष्टि, अरत्नि एवं एक हाथ के कुण्ड में छह, चार एवं दो अङ्गुल की चौड़ी तथा ऊँची योनि होनी चाहिये ॥ ३१ ॥

### नाललक्षणम्, तन्मानञ्च

**योन्याः पश्चिमतो नालं विस्तारं चतुरङ्गुलम् ।**
**त्रिद्व्येकाङ्गुलमानेन क्रमान्मूलाग्रमिष्यते ॥ ३२ ॥**

योनि के पीछे चार अङ्गुल का नाल निर्माण करना चाहिये। उसके मूल का अग्रभाग क्रमशः तीन, दो और एक अङ्गुल का होना चाहिये ॥ ३२ ॥

**नालमेखलयोर्मध्ये परिधिस्थापनाय च ।**
**स्थलादारभ्य नालं स्यात् योन्या मध्ये सरन्ध्रकम् ॥ ३३ ॥**
**नार्पयेत् कुण्डकोणेषु योनिं तां तन्त्रवित्तमः ।**
**मुष्ट्यरत्न्येकहस्तानां कुण्डानां योनिरीरिता ॥ ३४ ॥**
**एकैकाङ्गुलतो योनिं कुण्डेष्वन्येषु वर्धयेत् ।**
**यवद्वयक्रमेणैव योन्यग्रमपि वर्धयेत् ॥ ३५ ॥**

नाल और मेखला के मध्य में परिधि स्थापन के लिये स्थल से आरम्भ कर छिद्रसहित नाल का निर्माण करना चाहिये। तन्त्रवेत्ता विद्वान् कोणों पर योनि का निर्माण न करे। मुष्टि, अरत्नि तथा एक हाथ के कुण्ड में योनि निर्माण की विधि कही गई है। अन्य कुण्डों में एक-एक अङ्गुली योनि का विस्तार करे। दो-दो

यव के क्रम से योनि को भी बढ़ाता रहे ॥ ३३-३५ ॥

### नाभिप्रमाणम्

**कुण्डानां कल्पयेदन्तर्नाभिमम्बुजसन्निभाम् ।**
**तत्तत् कुण्डानुरूपं वा मानमस्य निगद्यते ॥ ३६ ॥**

कुण्ड के भीतर कमल के आकार की नाभि बनानी चाहिये अथवा कुण्ड की जैसी आकृति हो वैसी नाभि निर्माण करे ॥ ३६ ॥

**मुष्ट्यरत्न्येकहस्तानां नाभिरुत्सेधतारतः ।**
**नेत्रवेदाङ्गुलोपेता कुण्डेष्वन्येषु वर्धयेत् ॥ ३७ ॥**
**यवद्वयक्रमेणैव नाभिं पृथगुदारधीः ।**
**योनिकुण्डे योनिमब्जकुण्डे नाभिं विवर्जयेत् ॥ ३८ ॥**
**नाभिक्षेत्रं त्रिधा भित्वा मध्ये कुर्वीत कर्णिकाम् ।**
**बहिरंशद्वयेनाष्टौ पत्राणि परिकल्पयेत् ॥ ३९ ॥**
**मुष्टिमात्रमितं कुण्डं शतार्धे सम्प्रचक्षते ।**
**शतहोमेऽरत्निमात्रं हस्तमात्रं सहस्रके ॥ ४० ॥**

मुष्टि, अरत्नि तथा एक हाथ के कुण्ड में नाभि की ऊँचाई क्रमशः दो, तीन और चार अङ्गुल की होनी चाहिये । इसी प्रकार अन्य कुण्डों में इसकी ऊँचाई बढ़ाते रहना चाहिये । उदार बुद्धि वाले बुद्धिमान् साधक को अन्य कुण्डों में दो-दो यव के क्रम से पृथक् पृथक् नाभि बढ़ाते रहना चाहिये । योनि कुण्ड में योनि का तथा पद्मकुण्ड में नाभि का निर्माण न करे । नाभि के क्षेत्र का तीन भागकर मध्य भाग में कर्णिका का निर्माण करना चाहिये । बाहर के दो भाग में आठ कमल पत्र का निर्माण करे । सौ के आधे अर्थात् पचास आहुति वाले होम में मुष्टिमात्र का कुण्ड निर्माण करे । सौ आहुति वाले होम में अरत्नि मात्र का कुण्ड और सहस्र आहुति वाले होम में एक हाथ के कुण्ड का निर्माण विहित है ॥ ३७-४० ॥

**कोणसूत्रप्रमाणेन कुर्याद्धस्तकुण्डकम् ।**
**चतुर्हस्तादिकेऽप्येवं कर्त्तव्यं साधकेन च ॥ ४१ ॥**
**द्विहस्तमयुते लक्षे चतुर्हस्तमुदीरितम् ।**
**दशलक्षेषु षट्करं कोट्यामष्टकरं स्मृतम् ॥ ४२ ॥**

दश हजार की आहुति में दो हाथ का, एक लाख की आहुति में चार हाथ का, दश लाख की आहुति में छह हाथ का और एक करोड़ की आहुति में आठ का कुण्ड निर्माण करना चाहिये ॥ ४१-४२ ॥

(यद्वा) **एकहस्तमितं कुण्डमेकलक्षे विधीयते ।**

**लक्षाणां दशकं यावत् तावद्धस्तेन वर्धयेत् ॥ ४३ ॥**
**दशहस्तमितं कुण्डं कोटिहोमे च दृश्यते ।**

अथवा एक लाख की आहुति के लिये एक हाथ । इसी प्रकार दश लाख की आहुति पर्यन्त एक एक हाथ बढ़ाना चाहिये । एक कोटि होम में दश हाथ का कुण्ड बनाना चाहिये ॥ ४३-४४ ॥

कुण्डानां फलकथनम्

**सर्वसिद्धिकरं कुण्डं चतुरस्त्रमुदाहृतम् ॥ ४४ ॥**

चतुरस्त्र कुण्ड सभी प्रकार की सिद्धि देने वाला कहा गया है ॥ ४४ ॥

**पुत्रप्रदं योनिकुण्डं अर्धचन्द्रं शुभप्रदम् ।**
**शत्रुक्षयकरं त्र्यस्त्रं वर्त्तुलं शान्तिकर्मणि ॥ ४५ ॥**

योनि कुण्ड साधक को पुत्र प्रदान करता है । अर्ध चन्द्र कुण्ड सभी के लिए कल्याणकारी है । त्र्यस्त्र कुण्ड शत्रु का क्षय करता है । वृत्त कुण्ड शान्ति के लिये प्रशस्त कहा गया है ॥ ४५ ॥

**छेद मारणयोः कुण्डं षडस्त्रं पद्मसन्निभम् ।**
**वृष्टिदं रोगशमनं कुण्डमष्टास्त्रमीरितम् ॥ ४६ ॥**

भेद और मारणकर्म के लिये षडस्त्र और पद्मकुण्ड कहे गये हैं और अष्टास्त्र कुण्ड वर्षा कराने वाला एवं रोग नष्ट करने वाला कहा गया है ॥ ४६ ॥

(यद्वा) **योनिकुण्डं वाक्प्रदं स्यादब्जमाकृष्टिकरणम् ।**
**लक्ष्मीप्रदं वर्त्तुलञ्चचन्द्रार्धं तु भयं हरेत् ॥ ४७ ॥**

अथवा योनिकुण्ड विद्या प्रदान करने वाला, पद्मकुण्ड आकर्षण कराने वाला कहा गया है । वृत्त कुण्ड लक्ष्मी प्रदान करने वाला तथा अर्धचन्द्र कुण्ड सब प्रकार का भय दूर करता है ॥ ४७ ॥

**वृत्तं त्रिकोणकुण्डं हि खेचरीसिद्धिदायकम् ।**
**चतुरस्त्रं शान्तिलक्ष्मीपुष्टिऋद्धिप्रदायकम् ॥ ४८ ॥**

वृत्त एवं त्रिकोण कुण्ड खेचरी की सिद्धि करता है । चतुरस्त्र कुण्ड शान्ति, लक्ष्मी, पुष्टि एवं समृद्धि प्रदान करता है ॥ ४८ ॥

**कारणं सर्वसम्पत्तेर्धनसौभाग्यवर्द्धनम् ।**
**षडस्त्रं सर्वसम्पत्तिकारणं पौरुषप्रदम् ॥ ४९ ॥**

षडस्त्र कुण्ड सम्पूर्ण सम्पत्ति का कारण है, धन सौभाग्य बढ़ाता है और

पुरुषार्थ प्रदान करता है ॥ ४९ ॥

**अष्टास्रं तु तथा ज्ञेयं समीहितफलप्रदम् ।**
**गुणानि सर्वकार्याणि चतुरस्रे भवन्ति हि ॥ ५० ॥**

अष्टास्र कुण्ड उन-उन फलों को तो देता ही है और मनोरथपूर्ण भी करता है चतुरस्रकुण्ड में सभी कार्य सम्पादन के गुण हैं ॥ ५० ॥

**विप्राणां चतुरस्रं स्याद् राज्ञां वर्त्तुलमिष्यते ।**
**वैश्यानामर्धचन्द्राभं शूद्राणां त्र्यस्रमीरितम् ॥ ५१ ॥**

तन्त्रशास्त्र में ब्राह्मणों के लिये चतुरस्र कुण्ड, क्षत्रियों के लिये वर्त्तुलाकार कुण्ड, वैश्यों के लिये अर्धचन्द्राकार कुण्ड और शूद्रों के लिये त्र्यस्र कुण्ड का विधान कहा गया है ॥ ५१ ॥

**चतुरस्रं तु सर्वेषां किञ्चित्तान्त्रिकसम्मतिः ।**
**कुण्डस्य रूपं जानीयात् परमं प्रकृतेर्वपुः ॥ ५२ ॥**

कुछ विद्वान् तान्त्रिकों की सम्मति है कि चतुरस्र कुण्ड सबके लिये हितकारी है । जो परम प्रकृति का स्वरूप है, वहीं कुण्ड का भी स्वरूप है ऐसा जानना चाहिये ॥ ५२ ॥

### कुण्डाकृतिभेदेनफलभेदः

**प्राच्यां शिरः समाख्यातं बाहू दक्षिणसौम्ययोः ।**
**उदरं कुण्डमित्युक्तं योनिः पादौ तु पश्चिमे ॥ ५३ ॥**

कुण्ड का पूर्व दिशा में शिर है, उत्तर और दक्षिण में बाहू है, कुण्ड उदर है; और पश्चिम में रहने वाली योनि पैर है ॥ ५३ ॥

**नित्यं नैमित्तिकं काम्यं स्थण्डिले वा समाचरेत् ।**
**हस्तमात्रं तु तत् कुर्याद्वालुकाभिः सुशोभनम् ॥ ५४ ॥**

अथवा नित्य, नैमित्तिक एवं काम्य कर्म स्थण्डिल में ही करे । बालू के द्वारा एक हाथ का लम्बा चौड़ा स्थण्डिल निर्माण करे ॥ ५४ ॥

**अङ्गुलोत्सेधसंयुक्तं चतुरस्रं समन्ततः ।**
**एषामेकतमं कुण्डं निष्पाद्य स्रुक्स्रुवौ ततः ॥ ५५ ॥**

चौकोर तथा एक अङ्गुल ऊँचा स्थण्डिल होना चाहिये । ऊपर कहे गये अनेक प्रकार के कुण्डों में से एक कुण्ड का निर्माण कर साधक स्रुक् और स्रुवा का निर्माण करे ॥ ५५ ॥

प्रकल्पयेत् स्रुचं यागे वक्ष्यमाणेन वर्त्मना ।
श्रीफलशिंशपाक्षीरशाखिष्वेकतमं बुधः ॥ ५६ ॥
गृहीत्वा विभजेद्धस्तमात्रं षट्त्रिंशता पुनः ।
विंशत्यंशैर्भवेद्दण्डो वेदी तैरष्टभिर्भवेत् ॥ ५७ ॥
एकांशेन मितं कण्ठं सप्तभागमितं मुखम् ।
वेदीत्र्यंशेन विस्तारः कण्ठस्य परिकीर्त्तितः ॥ ५८ ॥
अग्रं कण्ठसमानं स्यात् मुखे मार्गं प्रकल्पयेत् ।
कनिष्ठाङ्गुलिमानेन सर्पिषो निर्गमाय च ॥ ५९ ॥

**स्रुचा निर्माण विधि**—यज्ञ कार्य में आगे कही जाने वाली विधि के अनुसार स्रुचा का निर्माण करना चाहिये । आचार्य श्रीपर्णी, शिंशपा (शीशम) अथवा बट आदि क्षीरी वृक्ष में किसी एक की शाखा का एक हाथ का काष्ठ लावे । पुनः उसे छत्तीस भाग में प्रविभक्त करे; जिसमें बीस भाग दण्ड के लिये छोड़ देवे । आठ भाग वेदी के लिये छोड़े । फिर एक भाग में कण्ठ तथा सात भाग में उसका मुख निर्माण करे । वेदी के तीन अंश में कण्ठ का विस्तार कहा गया है । उसका अग्रभाग (मुख) कण्ठ के समान अर्थात् वेदी के तीन भाग पर्यन्त विस्तृत होना चाहिये । मुख में भी घी गिरने के लिये कनिष्ठाङ्गुली के प्रमाण का छेद करना चाहिये ॥ ५६-५९ ॥

### उद्दिष्टवेध्या रचनाप्रकारम्

वेदीमध्ये विधातव्या भागेनैकेन कर्णिका ।
विदधीत बहिस्तस्या एकांशेनाऽभितोऽवटम् ॥ ६० ॥
तस्य खातं त्रिभिर्भागैर्वृत्तमर्धांशतो भवेत् ।
अंशेनैकेन परितो दलानि परिकल्पयेत् ॥ ६१ ॥
मेखला मुखवेद्योः स्यात् परितोऽर्धांशमानतः ।
दण्डमूलाग्रयोर्गण्डी गुणवेदाङ्गुलैः क्रमात् ॥ ६२ ॥

**वेदी निर्माण विधि**—वेदी के मध्य के एक भाग में कर्णिका का निर्माण करना चाहिये । उसके बाहर चारों ओर एक अंश में गर्त्त बनाना चाहिये । तीन भाग (दो अङ्गुल) में उसका खात तथा आधे अंश (एक अङ्गुल) में उसका वृत्त बनाना चाहिये । उसके चारो ओर एक अंश (एक अङ्गुल) में दल बनाना चाहिये । पुनः मुख और वेदी के मध्य में मेखला का निर्माण करना चाहिये । यह मेखला चारों ओर आधे अङ्गुल के प्रमाण में की जानी चाहिये । दण्ड तथा मूल के अग्रभाग में तीन और चार अङ्गुल के क्रम से गण्डी (कङ्गनाकार) का निर्माण करना चाहिये ॥ ६०-६२ ॥

गण्डीयुग्मं यमांशैः स्याद्दण्डस्याऽऽनाह ईरितः ।
षड्भिरंशैः पृष्ठभागो वेद्याः कूर्माकृतिर्भवेत् ॥ ६३ ॥
हंसस्य वा हस्तिनो वा पोत्रिणो वा मुखं लिखेत्।
मुखस्य पृष्ठभागस्य सम्प्रोक्तं लक्षणं स्रुचः ॥ ६४ ॥

दो दो अङ्गुल का दो गण्डी (कङ्कनाकार) निर्माण करे । दण्ड की विशालता ६ अंशों में करनी चाहिये । वेदी का पृष्ठभाग कूर्म की पीठ के आकार का होना चाहिये । स्रुचा के पृष्ठभाग में हंस, हाथी अथवा शूकर का मुख बनाना चाहिये । इस प्रकार हमने मुख तथा पृष्ठ का और स्रुचा का लक्षण कहा ॥ ६३-६४ ॥

स्रुचश्चतुर्विंशतिभिर्भागैर्वा रचयेत् स्रुवम् ।
द्वाविंशत्या दण्डमानमंशैरेतस्य कीर्त्तितम् ।
चतुर्भिरंशैरानाहः कर्षाज्यग्राहि तच्छिरः ॥ ६५ ॥
अंशद्वयेन निखनेत् पङ्के मृगपदाकृति ।

स्रुचा के चौबीस भाग में स्रुव का निर्माण करना चाहिये । जिसमें बाइस भाग दण्ड के लिये छोड़ना चाहिये । चार अंशों में उसका विस्तार और दो अंशों में सोलह माष प्रमाण का उसका शिर निर्माण करना चाहिये । पङ्क में मृग के पद की आकृति के समान उसका खात होना चाहिये ॥ ६५-६६ ॥

दण्डमूलाग्रयोर्गण्डी भवेत् कङ्कणभूषिता ।
मूलात् षडङ्गुलं त्यक्त्वा अग्रेचैन द्विसप्तकम् ॥ ६६ ॥
स्रुवन्तु धारयेन्मन्त्री मूलमेव न दर्शयेत् ।
स्रुवस्य विधिराख्यातो यथातन्त्रविधानतः ॥ ६७ ॥

दण्ड के मूल भाग तथा अग्रभाग में कङ्कण भूषित गण्डी होनी चाहिये । मूल से छह अङ्गुल छोड़कर तथा आगे चौदह अङ्गुल छोड़कर मन्त्रज्ञ स्रुवा धारण करे जिससे उसका मूल भाग दिखाई न पड़े । यहाँ तक तन्त्र के विधान के अनुसार हमने स्रुवा की विधि कहीं ॥ ६६-६७ ॥

### कुण्डस्य अष्टादश संस्काराः

संस्काराणि च वा कुर्यात् कुण्डस्य साधकोत्तमः ।
अष्टादशाः स्युःसंस्काराः कुण्डानां तन्त्रचोदिताः ॥ ६८ ॥

**कुण्ड के अट्ठारह संस्कार**—इसके बाद उत्तम साधक कुण्ड का संस्कार करे। तन्त्रशास्त्रों में कुण्ड के अट्ठारह संस्कार बताये गये हैं ॥ ६८ ॥

मूलेन वीक्षणं कृत्वा अस्त्रेण प्रोक्षणं ततः ।

**तेनैव ताडनं दर्भैर्वर्मणाऽभ्युक्षणं मतम् ॥ ६९ ॥**
**अस्त्रेण खनोद्धारौ हन्मन्त्रेण प्रपूरणम् ।**
**समीकरणमस्त्रेण वर्मणा सेचनं मतम् ॥ ७० ॥**

मूल मन्त्र पढ़कर कुण्ड का वीक्षण करे । यह प्रथम संस्कार है । शर मन्त्र अस्त्र मन्त्र (अस्त्राय फट्) पढ़कर प्रोक्षण करना—यह दूसरा संस्कार है । पुनः उसी अस्त्र मन्त्र से दर्भ द्वारा कुण्ड का ताड़न करना तीसरा संस्कार है । वर्म मन्त्र (कवचाय हुं) से अभ्युक्षण करना चौथा संस्कार है ॥ ६९-७० ॥

**कुट्टनं हेतिमन्त्रेण कवचेन तु मार्जनम् ।**
**विलेपनं कलारूपकल्पनं तदनन्तरम् ॥ ७१ ॥**
**त्रिसूत्रीकरणं पश्चात् हृदयेनाऽर्चनं तथा ।**
**शरेण वज्रीकरणं हृदयेन कुशैः शुभैः ॥ ७२ ॥**
**चतुष्पथं तनुत्रेण तनतयादक्षपाटनम् ।**
**यागे कुण्डानि संस्कुर्यात्संस्कारैरेभिरीरितैः ॥ ७३ ॥**

अस्त्र मन्त्र से कुण्ड की मिट्टी खनना पुनः उसे बाहर निकालना । पुनः अन्य मिट्टी लाकर नमः मन्त्र से उस खात को पूर्ण करना पाँचवाँ, छठाँ एवं सातवाँ संस्कार है । अस्त्र मन्त्र पढ़कर मिट्टी को समतल बनाना, कवच मन्त्र पढ़कर उसका अभिसिञ्चन करना, अस्त्र मन्त्र से उसे कूटना और वर्म मन्त्र से उसका मार्जन करना—ये आठ, नव, दश तथा ग्यारह संस्कार हुये । फिर कुण्ड को लीपना उसमें सूर्य, चन्द्र, अग्नि की कला की कल्पना करना, तीन सूत्र लपेटना । पुनः नमः पढ़कर अर्चन करना, क्रमशः बारह, तेरह और चौदह संस्कार हुये । अस्त्र मन्त्र से कुण्ड को दृढ़ बनाना, नमः मन्त्र पढ़कर उत्तम कुशों से चतुष्पथ निर्माण करना, वर्म मन्त्र पढ़कर इन्द्रियार्चन करना तथा हुङ्कार से राक्षसों का अपसारण करना—ये क्रमशः पन्द्रह, सोलह, सत्रह तथा अट्ठारह संस्कार कुण्ड के निष्पन्न हुये । इस प्रकार यज्ञ में ऊपर कहे गये इन अट्ठारह प्रकार के संस्कारों से कुण्ड का संस्कार करना चाहिये ॥ ७१-७३ ॥

### प्रकारान्तरसंस्कारकथनम्

**अथवा तानि संस्कुर्याच्चतुर्भिर्वीक्षणादिभिः ।**
**तिस्रस्तिस्रो लिखेद् रेखा हृदा प्रागुदगग्रगाः ॥ ७४ ॥**

अथवा अशक्त होने पर केवल तत्तन्मन्त्रों से वीक्षण, प्रोक्षण, ताड़न एवं अभ्युक्षण—ये चार ही संस्कार करना चाहिये । पुनः उस कुण्ड में दक्षिण दिशा से आरम्भ कर उत्तर तक और पश्चिम दिशा से आरम्भ कर पूर्व तक तीन-तीन रेखा खीचे ॥ ७४ ॥

प्रागग्राणां स्मृता देवा मुकुन्देशपुरन्दराः ।
रेखाणामुदगग्राणां ब्रह्मवैवस्वेन्दवः ॥ ७५ ॥

जिन तीन रेखाओं के अग्रभाग पूर्व की ओर हैं, उनके मुकुन्द, ईश्वर तथा पुरन्दर देवता हैं, जिन रेखाओं के अग्रभाग उत्तर की ओर हैं उनके ब्रह्मा, विवस्वान् और चन्द्रमा देवता हैं ॥ ७५ ॥

षट्कोणान्तर्गतां योनिं मण्डलं चाष्टपत्रकम् ।
वृत्तं क्षितिगृहं चैव कुण्डमध्ये लिखेत्ततः ॥ ७६ ॥

फिर साधक कुण्ड के भीतर में षट्कोण के भीतर योनि मण्डल, अष्टपत्र, वृत्त एवं भूपुर का निर्माण करे ॥ ७६ ॥

तारेण प्रोक्षणं कृत्वा पूजयेत् पीठदेवताः ।
मण्डले कालवह्निञ्च रुद्रमेव ततः परम् ॥ ७७ ॥

तार (प्रणव) से उनका प्रोक्षण कर पीठ देवता का तथा मण्डल में कालवह्नि और रुद्र का पूजन करे ॥ ७७ ॥

आधारशक्तिं कूर्मञ्च पृथिवीं रत्नद्वीपकम् ।
मणिगेहं प्रपूज्याथ कल्पवृक्षं ततः सुधीः ॥ ७८ ॥
सुवर्णवेदिकामध्ये आग्नेयादिषु तत्परम् ।
धर्मं ज्ञानञ्च वैराग्यं ऐश्वर्यञ्च यथाक्रमात् ॥ ७९ ॥

फिर विद्वान् साधक आधारशक्ति, कूर्म, पृथ्वी, रत्नदीप और मणिगृह का पूजन कर कल्पवृक्ष का पूजन करे । फिर सुवर्ण वेदी के मध्य में आग्नेयादि कोणों में अधर्मादि का तथा पूर्वादि दिशाओं में धर्म, ज्ञान, वैराग्य एवं ऐश्वर्य का क्रमशः पूजन करे ॥ ७८-७९ ॥

पूर्वाद्येतांश्च मध्ये च पुनर्मध्ये ततो यजेत् ।
परमानन्दकन्दञ्च सम्विन्नालं ततः परम् ॥ ८० ॥
सर्वतत्त्वार्थकाब्जञ्च प्रकृतिपत्रकं ततः ।
विकारमयकेशरं मातृकामयकर्णिकाम् ॥ ८१ ॥
सूर्यस्य मण्डलं सोममण्डलं वह्निमण्डलम् ।
सत्त्वरजस्तमश्चैव आत्मानमन्तरात्मनाम् ॥ ८२ ॥
परमात्मानमभ्यर्च्य ज्ञानात्मानं ततः परम् ।
नामाद्यक्षरबीजाद्यान् चतुर्थ्यन्तान्नमोऽन्वितान् ॥ ८३ ॥
प्रणवाद्यान् यजेदेतान् वर्त्तुले भुवनेश्वरीम् ।

वागीश्वरीञ्च वागीशं यजेद्योगस्वरूपकम् ॥ ८४ ॥
पीठाय नम इत्युक्त्वा कर्णिकायां प्रपूजयेत् ।

वागीश्वरीध्यानम्

वागीश्वरीमृतुस्नातां नीलेन्दीवरसन्निभाम् ॥ ८५ ॥
वागीश्वरेण संयुक्तामुपचारैः प्रपूजयेत् ।
मायाबीजं समुच्चार्य वागीश्वरीञ्च ङेयुताम् ॥ ८६ ॥
नमोऽन्तोऽयं महामन्त्रो वागीश्वर्याः प्रकीर्त्तितः ।
योगीश्वरं स्वमन्त्रेण ततो वह्निं समानयेत् ॥ ८७ ॥

फिर पूर्वादि दिशाओं में, मध्य में, पुनः मध्य में, परमानन्द कन्द संवित् नाल उसके बाद सर्वतत्त्वकमल, प्रकृति पत्र, विकारमय केशर और मातृकामय कर्णिका सूर्यमण्डल, सोममण्डल, वह्निमण्डल, सत्त्व, रज, तम, आत्मा, अन्तरात्मा एवं परमात्मा का अर्चन कर, ज्ञानात्मा का नाम के आदि अक्षर रूप बीज, तदनन्तर चतुर्थ्यन्त नाम, फिर 'नमः' इस मन्त्र से पूजा करे। आदि में प्रणव लगावे। वर्त्तुल में भुवनेश्वरी तथा एक मिले हुये वागीश एवं वागीश्वरी का 'पीठाय नमः' इस मन्त्र को पढ़कर जप करे। कर्णिका में नील कमल के समान ऋतुस्नाता वागीश्वरी का जो वागीश्वर से संयुक्त हैं; ध्यान करे। अनेक उपचारों से, मायाबीज (ह्रीं), फिर चतुर्थ्यन्त वागीश्वरी (वागीश्वर्यै), तदनन्तर 'नमः' यह 'ह्रीं वागीश्वर्यै नमः' वागीश्वरी का महामन्त्र है; इससे पूजन करे। इसी प्रकार 'ह्रीं वागीश्वराय नमः' इस मन्त्र से वागीश्वर का पूजन करे। फिर अग्नि ले आवे ॥ ८०-८७ ॥

सूर्यकान्तादिसम्भूतं यद्वा श्रोत्रियगेहजम् ।
ताम्रपात्रे पुटीकृत्य क्रव्यादांशं परित्यजेत् ॥ ८८ ॥
वह्निबीजेन चाऽस्त्रेण नैर्ऋत्यां दिशि साधकः ।
संस्कुर्यात्तं यथान्यायं चतुर्भिर्वीक्षणादिभिः ॥ ८९ ॥

इस अग्नि को सूर्यकान्त मणि से उत्पन्न करे, अथवा श्रोत्रिय के गृह से ताम्र पात्र में रखकर उसे ढक कर ले आवे। उसमें क्रव्याद अंश का परित्याग करे। (पात्र में स्थित अग्नि का कुछ अंश) 'रं' इस मन्त्र को तथा 'अस्त्राय फट्' इस अस्त्र मन्त्र को पढ़कर नैर्ऋत्यकोण में त्याग दे। (यह क्रव्यादंश के त्याग की विधि है)। इसके बाद वीक्षणादि चार संस्कार से अग्नि को शुद्ध करे ॥८८-८९॥

औदर्यवैदवाग्निभ्यां भौमस्यैक्यं स्मरन् वसोः ।
योजयेद्वह्निबीजेन चैतन्यं पावके ततः ॥ ९० ॥

तदनन्तर उस भौम अग्नि का औदर्य और वैन्दव अग्नि से एकत्व की सम्भावना करते हुये 'रं' इस मन्त्र को पढ़कर उसमें चैतन्य स्थापित करे ॥ ९० ॥

तारेण मन्त्रितं मन्त्री धेनुमुद्रामृतीकृतम् ।
अस्त्रेण रक्षितं पश्चात् कवचेनाऽवगुण्ठितम् ॥ ९१ ॥
अर्चितं त्रिः परिभ्राम्य कुण्डस्योपरि देशिकः ।
प्रदक्षिणं तदा तारमन्त्रोच्चारणपूर्वकम् ॥ ९२ ॥
आत्मनोऽभिमुखं वह्निं जानुस्पृष्टमहीतलः ।
शिवबीजधिया देव्या योनावेव विनिःक्षिपेत् ॥ ९३ ॥
पश्चाद् देवस्य देव्याश्च दद्यादाचमनादिकम् ।
ज्वालिनीं दर्शयित्वा च ज्वालयेन्मनुनाऽमुना ॥ ९४ ॥

प्रणव मन्त्र से उसे अभिमन्त्रित करे । धेनुमुद्रा से अमृतीकरण, अस्त्र मन्त्र से संरक्षण, कवच मन्त्र से अवगुण्ठन तथा पुनः अर्चन कर, कुण्ड के ऊपर, उस अग्नि को तीन बार दाहिनी ओर से घुमाकर, प्रणव मन्त्र का उच्चारण कर, स्वयं आचार्य पृथ्वी पर जानु रखकर, अपने सामने कुण्ड में देवी की योनि में, शिव बीज का ध्यान करते हुये उस योनि में अग्नि स्थापित करे । अग्नि स्थापन के पश्चात् स्वयं आचार्य वागीश्वर और वागीश्वरी को आचमन करावे । फिर वक्ष्यमाण मन्त्र से ज्वालिनी मुद्रा प्रदर्शित कर उस अग्नि को प्रज्वलित करे ॥ ९१-९४ ॥

वह्निमन्त्रकथनम्

चित्पिङ्गल हन दह पचयुग्मान्युदीर्य च ।
सर्वज्ञाऽऽज्ञापय स्वाहा मन्त्रोऽयं समुदीरितः ॥ ९५ ॥
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखम् ॥ ९६ ॥
उपतिष्ठेत विधिवत् मनुनाऽनेन पावकम् ।
विन्यसेदात्मनो देहे मन्त्री जिह्वा हविर्भुजः ॥ ९७ ॥

'चित् पिङ्गल हन हन दह दह पच पच सर्वज्ञाज्ञापय स्वाहा' यह मन्त्र अग्नि प्रज्वलित करने का है । अग्नि प्रज्वलित करने के अनन्तर आचार्य 'अग्नि प्रज्वलितं.......विश्वतोमुखम्' इस मन्त्र से अग्नि की स्तुति करे । फिर अग्नि की सप्तजिह्वा के वर्ण मन्त्रों से अपने शरीर में न्यास करे ॥ ९५-९७ ॥

लिङ्गपायुशिरोवक्त्रघ्राणनेत्रेषु सर्वतः ।
वह्नीराधीशसंयुक्ताः सादियान्ताः सविन्दवः ॥ ९८ ॥
वह्नेर्मन्त्राः समुद्दिष्टाः जिह्वानां सप्त देशिकैः ।
जिह्वास्तास्त्रिविधाः प्रोक्ता गुणभेदेषु कर्मसु ॥ ९९ ॥

लिङ्ग, पायु, शिर, मुख, घ्राण, नेत्र और सर्वाङ्ग इन सात स्थानों में वह्नि (र)

इर् य् और आर्धीश (ऊ) से संयुक्त आदि में स, अन्त में य वर्ण जो सविन्दुक हो, उनसे न्यास करे। यथा—'स्यूं ष्यूं श्यूं व्यूं ल्यूं ट्यूं र्यूं'—ये अग्नि की सप्त जिह्वाओं के बीज मन्त्र हैं; यथा—'स्यूं हिरण्यायै नमः' लिङ्गे इत्यादि। इस प्रकार आचार्यों ने अग्नि की सात जिह्वायें कहीं हैं। वे ही गुण भेद से कर्म की अवस्था में तीन-तीन प्रकार की हो जाती है ॥ ९८-९९ ॥

**सत्त्वरजस्तमोभेदेन वह्निजिह्वाकथनम्**

**हिरण्या गगना रक्ता कृष्णाऽन्या सुप्रभा मता।**
**बहुरूपाऽतिरिक्ता च सात्विक्यो यागकर्मसु ॥ १०० ॥**

**अग्नि की सात्त्विकी जिह्वा**—हिरण्या, गगना, रक्ता, कृष्णा, सुप्रभा, बहुरूपा और अतिरिक्ता—ये सात अग्नि की सात्विकी जिह्वायें है। जिनका प्रयोग यज्ञ कर्म में किया जाता है ॥ १०० ॥

**पद्मरागा सुवर्णाऽन्या तृतीया भद्रलोहिता।**
**लोहिताऽनन्तरं श्वेता धूमिनी च करालिका ॥ १०१ ॥**
**राजस्यो रसना वह्नेर्विहिताः काम्यकर्मसु।**

**अग्नि की राजसी जिह्वा**—पद्मरागा, सुवर्णा, भद्रलोहिता, लोहिता, श्वेता, धूमिनी और करालिका—ये सात अग्नि की राजसी जिह्वायें हैं जिनका प्रयोग काम्य कर्म में किया जाता है ॥ १०१-१०२ ॥

**विश्वमूर्त्तिस्फुलिङ्गिन्यौ धूम्रवर्णा मनोजवा ॥ १०२ ॥**
**लोहिताऽन्या करालाख्या काली तामस्य ईरिताः।**
**एताः सप्त प्रयुज्यन्ते क्रूरकर्मसु मन्त्रिभिः ॥ १०३ ॥**

**अग्नि की तामसी जिह्वा**—विश्वमूर्ति, स्फुलिङ्गिनी धूम्रवर्णा, मनोजवा, लोहिता, कराला और काली—ये अग्नि की तामसी जिह्वायें हैं। मन्त्रवेत्ता लोग इनका प्रयोग क्रूरकर्मों तथा अभिचारादि कर्मों में करते हैं ॥ १०२-१०३ ॥

**स्वस्वनामसमाभाः स्युर्जिह्वाः कल्याणरेतसः।**
**अमर्त्यपितृगन्धर्वयक्षनागपिशाचकाः ॥ १०४ ॥**
**राक्षसाः सप्तजिह्वानामीरितास्त्वधिदेवताः।**
**वह्नेरङ्गमनून् न्यस्येत्तनावुक्तेन वर्त्मना ॥ १०५ ॥**

अग्नि की ये जिह्वायें जैसा नाम है वैसा ही फल देती हैं, देवता, पितर, गन्धर्व, यक्ष, नाग, पिशाच और राक्षस—ये सात इन जिह्वाओं के अधि देवता बतलाये गए हैं। तदनन्तर ऊपर कही गई विधि के अनुसार अग्नि के अङ्गमन्त्रों का अपने शरीर में न्यास करे। प्रयोगविधि—यथा 'सहस्रार्चिषे हृदयाय नमः'

इत्यादि ॥ १०४-१०५ ॥

सहस्रार्चिः स्वस्तिपूर्ण उत्तिष्ठपुरुषः पुनः ।
धूमव्यापी सप्तजिह्वो धनुर्धर इतीरितः ॥ १०६ ॥
षडङ्गमनवः प्रोक्ता जातिभिः सह संयुताः ।
मूर्त्तीरष्टौ तनौ न्यस्येद् देशिको जातवेदसः ॥ १०७ ॥
मूर्द्धांशपार्श्वकट्यन्धु कटी पार्श्वांशुकेषु च ।
प्रदक्षिणवशान्न्यस्येदुच्यन्ते ता यथाक्रमम् ॥ १०८ ॥

सहस्रार्चि, स्वस्तिपूर्ण, उत्तिष्ठ पुरुष, धूमव्यापी, सप्तजिह्वा, धनुर्धर—ये क्रमशः अग्नि के षडङ्ग मन्त्र कहे गये हैं । ये मन्त्र अपने-अपने नाम के अनुसार तत्तद् गुणों से युक्त हैं । आचार्य अग्नि की आठ मूर्त्तियों से अपने शरीर, मूर्धा, बायाँ कन्धा, वामपार्श्व, वामकटि, लिङ्ग, पुनः दाहिनी कटि, दाहिने पार्श्व, दाहिने कन्धे में प्रदक्षिण क्रम से न्यास करे । अब अग्नि के उन आठ मूर्त्तियों के नामों को कहते हैं ॥ १०६-१०८ ॥

### वह्निसंज्ञा

जातवेदाः सप्तजिह्वो हव्यवाहनसञ्ज्ञकः ।
अश्वोदरजसञ्ज्ञोऽन्यः पुनर्वैश्वानराह्वयः ॥ १०९ ॥
कौमारतेजाः स्याद्विश्वमुखो देवमुखः स्मृतः ।
ताराग्नये पदाद्याः स्युर्नत्यन्ता वह्निमूर्त्तयः ॥ ११० ॥
आसनं कल्पयित्वाऽग्नेर्मूर्त्तिं तस्य चिन्तियेत् ॥ १११ ॥

जातवेद, सप्तजिह्व, हव्यवाहन, अश्वोदरज, वैश्वानर, कौमारतेजा, विश्वमुख एवं देवमुख इन पदों के आदि में 'ॐ अग्नये शब्द' अन्त में नमः पद लगाकर न्यास करना चाहिये यथा—'अग्नये जातवेदसे नमः' मूर्ध्नि, तदनन्तर 'रं अग्न्यासनाय नमः' इस मन्त्र से अग्नि को आसन देकर उन अग्नि की मूर्त्तियों का इस प्रकार ध्यान करे ॥ १०९-१११ ॥

### वह्निध्यानम्

इष्टं शक्तिं स्वस्तिकाभीतिमुच्चै-
दीर्घैर्दोर्भिः धारयन्तं जवाभम् ।
हेमाकल्पं पद्मसंस्थं त्रिनेत्रं
ध्यायेद्वह्निं बद्धमौलिं जटाभिः ॥ ११२ ॥
परिषिञ्चेत्ततस्तोयैर्विशुद्धैर्मेखलोपरि ।
दर्भैरगर्भमध्यस्थमेखलायां परिस्तरेत् ॥ ११३ ॥

**अग्नि का ध्यान**—जिनके नीचे के दाहिने विशाल हाथ में वर, ऊपर के दाहिने हाथ में शक्ति और ऊपर के बायें हाथ में स्वस्तिक तथा नीचे के बायें हाथ में अभयमुद्रा है, जिनके बाहु विशाल तथा ऊँचे हैं, जिनके शरीर का वर्ण जवाकुसुम के सदृश है और आभूषणों से जगमगा रहा है, कमलासन पर विराजमान जिन अग्नि देव के तीन नेत्र और शिर पर जटायें हैं; इस प्रकार के अग्नि देव का ध्यान कर कुण्ड की मेखला पर शुद्ध जल छिड़के। फिर आचार्य मध्य मेखला में दर्भ का परिस्तरण करे ॥ ११२-११३ ॥

**निःक्षिपेद्दिक्षु परिधीन् प्राचीवर्जञ्च मन्त्रवित् ।**
**प्रादक्षिण्येन सम्पूज्यास्ते ब्रह्माद्यष्टमूर्त्तयः ॥ ११४ ॥**

पुनः आचार्य पूर्वदिशा को छोड़कर शेष सभी दिशाओं में परिधि का निक्षेप करे। उसके बाद प्रदक्षिण क्रम से पुनः उन परिधियों पर ब्रह्मादि की आठ मूर्त्तियों का पूजन करे। (पलाश, वैकङ्कत, काश्मर्य तथा बिल्ववृक्ष की एक-एक हाथ लम्बी तथा आर्द्र समिधा परिधि कही गई है) ॥ ११४ ॥

**ध्यायन् वह्निं यजेन्मध्ये गन्धाद्यैर्मनुनाऽमुना ।**
**वैश्वानर जातवेदपदं पश्चादिहाऽऽवह ॥ ११५ ॥**
**लोहिताक्ष पदस्यान्ते सर्वकर्माणि साधय ।**
**वह्निजायावधिः प्रोक्तो मनुः पावकवल्लभः ॥ ११६ ॥**

तदनन्तर पूर्वोक्त रीति से ध्यान की गई अग्नि का षोडशोपचार पूजन करना चाहिए। 'वैश्वानर जातवेद इहाऽऽवह लोहिताक्ष सर्वकर्माणि साधय स्वाहा' इस मन्त्र से अग्निदेव का आवाहन करना चाहिए। यह मन्त्र अग्निदेव को अत्यन्त प्रिय है ॥ ११५-११६ ॥

**मध्ये षट्स्वपि कोणेषु जिह्वा वह्नेस्ततो यजेत् ।**
**केशरेषूक्तमार्गेण पूजयेदङ्गदेवताः ॥ ११७ ॥**

तदनन्तर अग्नि के षट्कोण के मध्य में अग्नि की छह जिह्वाओं का ईशानादि कोण के क्रम से पूजन करे। केशरों के मध्य में पूर्वोक्त रीति से अङ्ग देवता का पूजन करे ॥ ११७ ॥

**दलेषु पूजयेन्मूर्त्तीः शक्तिस्वस्तिकधारिणीः ।**
**दलाग्रे मातरः पूज्याः सासिताङ्गादिभैरवाः ॥ ११८ ॥**
**लोकपालांस्ततो दिक्षु पूजयेदुक्तलक्षणान् ।**
**पश्चादादाय पाणिभ्यां स्रुक्स्रुवौ तावधोमुखौ ॥ ११९ ॥**

अष्टदलों में शक्ति तथा स्वस्तिक धारण करने वाली अग्नि की अष्टमूर्त्तियों का

यजन करे। पत्र के अग्रभाग में असितादि भैरवों से युक्त अष्ट मातृकाओं का, तदनन्तर पूर्व में कहे गये लोकपालों का पूजन करे ॥ ११८-११९ ॥

**त्रिः सम्प्रतापयेद्वह्नौ दर्भानादाय देशिकः ।**
**तदग्रमध्यमूलानि शोधयेत्तौ यथाक्रमात् ॥ १२० ॥**
**गृहीत्वा वामहस्तेन प्रोक्षयेद्दक्षिणेन तौ ।**
**पुनः प्रताप्य तौ मन्त्री दर्भानग्नौ विनिःक्षिपेत् ॥ १२१ ॥**
**आत्मनो दक्षिणे भागे स्थापयेत्तौ कुशास्तरे ।**

पुनः अपने दोनों हाथों में स्रुव् तथा स्रुवा लेकर उन्हें अधोमुख कर तीन बार अग्नि में प्रतप्त करे। फिर कुशा लेकर उन दोनों के अग्रभाग, मध्यभाग तथा मूल भाग को यथाक्रम कुशा के मूलादि भाग से संशुद्ध करे। तदनन्तर अपने बायें हाथ में रखकर दाहिने हाथ से प्रोक्षणी के जल से आसिञ्चन करे। फिर उन दोनों को अग्नि में प्रतप्त कर मार्जन करने वाले कुशों को अग्नि में प्रक्षिप्त कर देवे और उन्हें कुशा का आसन देकर अपने दक्षिण भाग में स्थापित करे।

**वीक्षणादिषट्संस्काराः**

**आज्यस्थालीमथाऽऽदाय प्रोक्षयेदर्घवारिणा ॥ १२२ ॥**
**तस्यामाज्यं विनिःक्षिप्य संस्कुर्याद्वीक्षणादिभिः ।**

**१. वीक्षण संस्कार**—तदनन्तर आज्यस्थाली को लेकर अर्घ्य के जल से प्रक्षालित करे। फिर उस आज्यस्थाली में घी रखकर वीक्षणादि से उसे सुसंस्कृत करे ॥ १२२-१२३ ॥

**निरुह्य वायव्येङ्गारान् हृदा तेषु निवेशयेत् ॥ १२३ ॥**
**इदं तापनमुद्दिष्टं देशिकैस्तन्त्रवेदिभिः ।**

**२. तापन संस्कार**—फिर कुण्ड से अग्नि निकाल कर उसे वायव्यकोण में स्थापित करे, फिर 'नमः' मन्त्र पढ़कर घृत संयुक्त उस आज्यस्थाली को उस अग्नि पर स्थापित करे। इसे तन्त्रवेत्ता आचार्यों ने इस प्रकार के सम्पन्न आज्य का तापन संस्कार कहा है ॥ १२३-१२४ ॥

**दीप्तदर्भयुग्ममाज्ये क्षिप्त्वाऽनले क्षिपेत्ततः ॥ १२४ ॥**
**गुरुर्हृदयमन्त्रेण पवित्रीकरणन्त्विदम् ।**

**३. पवित्रीकरण संस्कार**—फिर दो कुशा अग्नि में प्रतप्त कर घी में डुबोकर 'नमः' मन्त्र से अग्नि में प्रक्षिप्त कर देवे तो इसे आज्य का पवित्रीकरण कहा गया है ॥ १२४-१२५ ॥

दीप्तेन दर्भयुग्मेन नीराज्याज्यं सवर्मणा ॥ १२५ ॥
अग्नौ विसर्जयेद्दर्भमभिद्योतनमीरितम् ।
घृते प्रज्वलितान् दर्भान् प्रदर्श्याऽस्त्राणुना गुरुः ॥ १२६ ॥
जातवेदसि तान् न्यस्येदुद्योतनमीरितम् ।

**४. अभिद्योतन संस्कार**—जलते हुये कुशा से कवच मन्त्र द्वारा आरती कर उसे अग्नि में डाल देवे तो उसे अभिद्योतन संस्कार कहा जाता है । जलते हुये कुशा को अणु मन्त्र से घृत को दिखा कर पुनः उसे अग्नि में डाल देने पर उद्योतन संस्कार कहा गया है ॥ १२५-१२७ ॥

गृहीत्वा घृतमङ्गारान् संयोज्याऽग्नौ जलं स्पृशेत् ॥ १२७ ॥
अङ्गुष्ठोपकनिष्ठाभ्यां दर्भौ प्रादेशसम्मितौ ।
धृत्वोत्पुनीयादस्त्रेण घृतमुत्पवनन्त्विदम् ॥ १२८ ॥

**५. उत्पवन संस्कार**—आज्यस्थाली को नीचे उतार कर उस अग्नि को कुण्ड की अग्नि में संयुक्त कर जल का स्पर्श करे । पुनः प्रादेशमात्र कुशा अङ्गुष्ठ तथा अनामिका अङ्गुली में धारण कर अस्त्र मन्त्र पढ़ते हुये घृत को पवित्र करे । इसे घृत का उत्पवन संस्कार कहते हैं ॥ १२७-१२८ ॥

तद्वद्धृदयमन्त्रेण कुशाभ्यामात्मनो मुखम् ।
घृतेन प्लावनं कुर्यात् संस्काराः षडुदीरिताः ॥ १२९ ॥

**६. उत्प्लवन संस्कार**—पुनः नमः मन्त्र पढ़ते हुये दो कुशाओं से अपने सम्मुख घृत को उछाले । इस क्रिया का नाम उत्प्लवन है । यहाँ तक हमने घृत के छह संस्कारों का वर्णन किया ॥ १२९ ॥

प्रादेशमात्रं सग्रन्थि दर्भयुग्मं घृतान्तरे ।
निःक्षिप्य भागौ द्वौ कृत्वा पक्षौ शुक्लेतरौ स्मरेत् ॥ १३० ॥
वामे नाडीमिडां भागे दक्षिणे पिङ्गलां पुनः ।
सुषुम्णां मध्यतो ध्यात्वा कुर्याद्धोमं यथाविधि ॥ १३१ ॥
स्रुवेण दक्षिणभागादादायाऽऽज्यं हृदा सुधीः ।
जुहुयादग्नये स्वाहा अग्नेर्दक्षिणलोचने ॥ १३२ ॥

प्रादेश मात्र के ग्रन्थियुक्त दो दर्भ घृत मध्य में डुबोकर उसका दो भाग कर बाईं या दाहिनी ओर फेंक देवे । तदनन्तर बाईं ओर शुक्ल पक्ष का तथा दाहिनी ओर कृष्णपक्ष का ध्यान करे । पुनः बाईं ओर इडा नाड़ी का तथा दाहिनी ओर पिङ्गला नाड़ी का और मध्य में सुषुम्ना नाड़ी का ध्यान कर स्रुवा से अपनी दाहिनी ओर से घृत लेकर 'नमः' मन्त्र पढ़ते हुये होम प्रारम्भ करे । सर्वप्रथम

'अग्नये स्वाहा' इस मन्त्र से अग्नि के दाहिने नेत्र में हवन करे ॥ १३०-१३२ ॥

**वामतस्तद्वदादाय वामे वह्निविलोचने ।**

इसी प्रकार 'अग्नये स्वाहा' इस मन्त्र को पढ़कर बाईं ओर से घृत लेकर अग्नि के वाम नेत्र में हवन करे ॥ १३३ ॥

**जुहुयादथ सोमाय स्वाहेति हृदयाणुना ॥ १३३ ॥**
**हृन्मन्त्रेण स्रुवेणाऽऽज्यं भागादादाय दक्षिणात् ।**
**जुहुयादग्नये स्विष्टकृते स्वाहेति तन्मुखे ॥ १३४ ॥**
**इति सम्पातयेद् भागेष्वाज्यस्याऽथाऽऽहुतिं क्रमात् ।**
**इत्यग्निनेत्रवक्त्राणां कुर्यादुद्घाटनं सुधीः ॥ १३५ ॥**

पुनः नमः इस मन्त्र को पढ़कर मध्य भाग से स्रुवा से घृत लेकर 'सोमाय स्वाहा' मन्त्र पढ़ते हुये अग्नि के भालस्थ तृतीय नेत्र में आहुति प्रदान करे । पुनः दक्षिण भाग से 'नमः' इस मन्त्र को पढ़कर स्रुवा से घृत लेकर 'आग्नीषोमाभ्यां स्वाहा हृदयाय नमः' मन्त्र से होम करे । 'अग्नये स्विष्टकृते स्वाहा' इस मन्त्र से अग्नि के मुख में आहुति प्रदान करे । तत्तद्देवता के लिये दी जाने वाली आहुति से शेष आज्य को अग्नि के नेत्र, हृदय तथा मुख में गिरावे । इस प्रकार आचार्य अग्नि के नेत्र, हृदय तथा मुख का उद्घाटन करे ॥ १३३-१३५ ॥

### वह्नेः गर्भाधानादिसंस्काराः

**सतारभिर्व्याहृतिभिराज्येन जुहुयात् पुनः ।**
**जुहुयादग्निमन्त्रेण त्रिवारान् साधकोत्तमः ॥ १३६ ॥**
**गर्भाधानादिकां वह्नेः क्रियां निर्वर्तयेत् क्रमात् ।**
**अष्टाभिराज्याहुतिभिः प्रणवेन पृथक् पृथक् ॥ १३७ ॥**

फिर प्रणव युक्त व्याहृतियों द्वारा घृत का होम कर पश्चात् 'अग्नये स्वाहा' इस मन्त्र से तीन आहुति प्रदान करे । इतना कर लेने के पश्चात् क्रमशः अग्नि का गर्भाधानादि संस्कार सम्पन्न करे । प्रणव के द्वारा प्रत्येक संस्कारों में घृत से पृथक् पृथक् आठ-आठ आहुति प्रदान करे ॥ १३६-१३७ ॥

**गर्भाधानं पुंसवनं सीमन्तोन्नयनं पुनः ।**
**अनन्तरं जातकर्म स्यान्नामकरणं तथा ॥ १३८ ॥**
**उपनिष्क्रमणं पश्चादन्नप्राशनमीरितम् ।**
**चूडोपनयने भूयो महानाम्ना महाव्रतम् ॥ १३९ ॥**
**तथोपनिषदं पश्चात् गोदानोद्वाहकौ मृतिः ।**
**शुभेषु स्युर्विवाहान्ताः क्रियास्ताः क्रूरकर्मसु ॥ १४० ॥**

**मरणान्ताः समुद्दिष्टा वह्नेरागमवेदिभिः ।**
**ततश्च पितरौ तस्य सम्पूज्याऽऽत्मनि योजयेत् ॥ १४१ ॥**

गर्भाधान, पुंसवन, सीमन्तोन्नयन, जातकर्म, नामकरण, उपनिष्क्रमण, अन्नप्राशन, चौल, उपनयन (महानाम), समावर्तन, महाव्रत स्नान तथा उपनिषद के पश्चात् गोदान, उद्वाह और मृति—ये संस्कारों के नाम हैं । शुभ कार्यों में अग्नि का विवाहान्त संस्कार करे और क्रूरकर्म में अग्नि का मरणान्त संस्कार करे; ऐसा आगम शास्त्र के विद्वानों ने कहा है । इतने संस्कार कर लेने के पश्चात् आचार्य उन अग्नि के समक्ष माता-पिता की पूजाकर उस अग्नि को अपनी आत्मा में स्थापित करे ॥ १३८-१४१ ॥

**समिधः पञ्च जुहुयादादाय घृतसंप्लुताः ।**
**मन्त्रैर्जिह्वाङ्गमूर्त्तीनां क्रमाद्वह्नेर्यथाविधि ॥ १४२ ॥**

फिर पाँच समिधायें जो मूल से अग्र भाग तक घी में डुबोई गई हैं, उनका हवन करे । इसी प्रकार यथाविधि अग्नि की जिह्वा, उनके अङ्ग और उनकी मूर्त्तियों के प्रत्येक मन्त्र से आचार्य एक-एक आहुति प्रदान करे ॥ १४२ ॥

**प्रत्येकं जुहुयादेकामाहुतिं मन्त्रवित्तमः ।**
**अवदाय स्रुवेणाऽऽज्यं चतुः स्रुचि पिधाय ताम् ॥ १४३ ॥**
**स्रुवेण तिष्ठन्नेवाग्नौ देशिको यतमानसः ।**
**जुहुयाद्वह्निमन्त्रेण वौषडन्तेन सम्पदे ॥ १४४ ॥**
**विघ्नेश्वरस्य मन्त्रेण जुहुयादाहुतीर्दश ।**

पुनः आचार्य दत्तचित्त हो कर स्रुवा से चार बार घृत लेकर स्रुचा में स्थापित कर उस स्रुचा को स्रुवा से ढककर 'वौषट्' अन्त वाले अग्नि के मन्त्रों से हवन करे । इसके बाद महागणेश मन्त्र से पूर्व-पूर्व मिलाते हुये दश आहुति प्रदान करनी चाहिये ॥ १४३-१४५ ॥

विघ्नराजमन्त्रोद्धारः

**तारं रमा तथा मायां क्लीं ग्लौं तदनन्तरम् ॥ १४५ ॥**
**गं गणपतये वरवरदान्ते सर्वपदं जनम् ।**
**मे वशमानय प्रोच्य वह्निजाया ततः परम् ॥ १४६ ॥**
**कथितं विघ्नराजस्य मन्त्रराजं सुदुर्लभम् ।**
**सामान्यं सर्वदेवानामेतदग्निमुखं मतम् ॥ १४७ ॥**

तार (ॐ), रमा (श्रीं), माया (ह्रीं), क्लीं, ग्लौं इसके बाद 'गं गणपतये वर वरद सर्वजनं मे वशमानय स्वाहा' यह विघ्नराज गणेश का अत्यन्त दुर्लभ महामन्त्र

बतलाया गया है । सभी सामान्य कर्म में इतना अग्निकार्य मुख्य रूप से होना चाहिये ॥ १४५-१४७ ॥

### एकीकरणम्

**ततः पीठं समभ्यर्च्य देवताया हुताशने ।**
**अर्चयेद्वह्निरूपां तां देवतामिष्टदायिनीम् ॥ १४८ ॥**
**तन्मुखे जुहुयान्मन्त्री पञ्चविंशतिसंख्यया ।**
**आज्येन मूलमन्त्रेण वह्न्यैकीकरणं त्विदम् ॥ १४९ ॥**
**वह्निदैवतयोरैक्यमात्मना सह भावयन् ।**

इसके बाद अग्नि में प्रकृत देवता के पीठ का पूजन करना चाहिये । तदनन्तर इष्ट फल प्रदान करने वाले उस प्रकृत देवता का अग्नि रूप से पूजन कर मन्त्रज्ञ पच्चीस आहुति उनके मुख में प्रदान करे । इस प्रकार मूल मन्त्र से आज्य के द्वारा अग्नि का एकीकरण किया जाता है । तदनन्तर उस अग्नि एवं प्रकृत देवता का एकीकरण अपनी आत्मा में करे ॥ १४८-१५० ॥

### नाडीसन्धानम्

**मूलमन्त्रेण जुहुयादाज्यैरेकादशाऽऽहुतीः ॥ १५० ॥**
**नाडीसन्धानमुद्दिष्टमेतदागमवेदिभिः ।**
**जुहुयादङ्गमुख्यानामावृतीनामनुक्रमात् ॥ १५१ ॥**
**एकैकामाहुतिं सम्यक् सर्पिषा देशिकोत्तमः ।**
**त्रिमध्वक्तैस्तिलैर्मन्त्री हुनेज्जपदशांशतः ॥ १५२ ॥**

फिर मूल मन्त्र से ग्यारह घृत की आहुति अग्नि में प्रदान करे । आगम शास्त्र के विद्वानों ने इसको 'नाडी संधान' की सञ्ज्ञा कहा है । तदनन्तर अनुक्रम से अग्नि के अङ्ग देवताओं और आवरण देवताओं के मूल मन्त्र से घी की एक-एक आहुति प्रदान करे । फिर त्रिमधु घी (मधु शर्करा) से मिश्रित तिल से जप का दशांश होम करे ॥ १५१-१५२ ॥

**मुद्रा ज्ञेया च धीरेण पाणिहोमेषु सर्वदा ।**
**शूकरी करसङ्कोची हंसी मुक्तकनिष्ठिका ॥ १५३ ॥**
**कनिष्ठा तर्जनी मुक्ता मृगीति कथिता त्रिधा ।**
**अभिचारे च पुष्टौ च शान्त्यादौ च यथाक्रमात् ॥ १५४ ॥**

पाणि होम में साधक मुद्रा का प्रदर्शन करे । पाणि के सङ्कोच करने से शूकरी, उसी में कनिष्ठा को हटा देने से हंसी तथा जिसमें कनिष्ठा तर्जनी का सम्बन्ध न हो उसे मृगी मुद्रा कहते हैं । अभिचार (मारण) में, शूकरी पुष्टिकर्म में

हंसी तथा शान्ति में मृगी मुद्रा प्रदर्शित करनी चाहिये ॥ १५३-१५४ ॥

**रिक्तहस्तेन हवने फलाभावः**

**रिक्तहस्तेन यद्दानं हूयते च हुताशने ।**
**दातुः पुण्यफलं नास्ति होता च नरकं व्रजेत् ॥ १५५ ॥**

रिक्त हस्त से जो दान दिया जाता है अथवा होम किया जाता है; उससे दाता को कोई फल नहीं होता है बल्कि इस प्रकार से होम करने वाले साधक को नरक प्राप्त होता है ॥ १५५ ॥

**एवं ज्ञात्वा विशेषज्ञो होमं कुर्यात् प्रयत्नतः ।**
**आज्येन मधुना चैव शर्करा च मधुत्रयम् ॥ १५६ ॥**

इतना विचार कर विशेषज्ञ प्रयत्नपूर्वक आज्य, मधु एवं शर्करा इन तीन मधुत्रय से होम करे ॥ १५६ ॥

**द्रव्यैः पूर्वोदितैर्वापि होमयेत् संस्कृतेऽनले ।**
**स्वकल्पविहितैर्द्रव्यैः साधको यतमानसः ॥ १५७ ॥**

अथवा पूर्व में कहे गये द्रव्यों से सुसंस्कृत अग्नि में होम करे । अथवा अपने सम्प्रदायानुसार विहित द्रव्यों से दत्तचित्त हो साधक होम करे ॥ १५७ ॥

**जपसंख्यादशांशेन होमयेद्विधिपूर्वकम् ।**
**अनुक्ते तु हविर्द्रव्ये तिलाज्यं हविरुच्यते ॥ १५८ ॥**

जप संख्या के दशांश से विधिपूर्वक होम करे । जहाँ हवि पदार्थ नहीं कहा गया है वहाँ तिलमिश्रित घृत हवि समझना चाहिये ॥ १५८ ॥

**छिन्नायाः कालिकायाश्च विशेषस्तन्यतेऽधुना ।**
**दिवा जपदशांशेन मधुरत्रयसंयुतम् ॥ १५९ ॥**

अब छिन्नमस्ता तथा महाकाली की विशेषता कहता हूँ । दिन में किये गये जपों का दशांश मधुर त्रय (आज्य, मधु, शर्करा) संयुक्त तिल पुष्प फल अथवा जो हविष्यान्न प्राप्त हो, इनमें से किसी एक के द्वारा हवन करे ॥ १५९ ॥

**हुत्वा संख्यां समाप्याथ रात्रिकल्पं समाचरेत् ।**
**योनिकुण्डे स्थिते सर्पिर्मांसमत्स्ययुतं भृशम् ॥ १६० ॥**

उतनी संख्या द्वारा होम कर लेने के पश्चात् रात्रि कल्प में किये गये जप का विधान सम्पादित करे । इस प्रकार योनि कुण्ड में पर्याप्त मांस, मत्स्य युक्त घी का होम करे ॥ १६० ॥

## काम्यकर्मवर्णनम्

अथ काम्यविधिं वक्ष्ये सर्वशाक्तेषु सिद्धिदम् ।
मल्लिकाजातिपुन्नागैर्होमाद् भाग्योदयो भवेत् ॥ १६१ ॥

**काम्यकर्म विधान**—अब सभी शाक्त मत वालों के लिये काम्य कर्म का विधान कहता हूँ जो सिद्धि प्रदान करने वाले हैं। मल्लिका, जाती और पुन्नाग के होम से भाग्य की अभिवृद्धि होती है ॥ १६१ ॥

फलैर्विल्वसमुद्भूतैस्तत्पत्रैर्वा हुताद् भवेत् ।
राजपुत्त्रस्य राज्याप्तिः पङ्कजैः श्रियमाप्नुयात् ॥ १६२ ॥

बिल्व फल के होम से तथा बिल्व पत्र के होम से राजपुत्र को राज्य की प्राप्ति होती है और कमलपुष्प के होम से श्री की प्राप्ति होती है ॥ १६२ ॥

उत्पलैर्वशयेद्विश्वं लक्ष्मीं पुष्पैस्तथा नरः ।
बन्धूकपुष्पैर्वकुलैर्जवोत्थैः किंशुकोद्भवैः ॥ १६३ ॥
वश्याय जुहुयान्मन्त्री मधुना सह सिद्धये ।
लवणैर्मधुरोपेतैर्हुत्वा कर्षति सुन्दरीम् ॥ १६४ ॥

उत्पल के होम से विश्व वशीभूत हो जाता है तथा पुष्प के होम से लक्ष्मी प्राप्त होती है। बन्धूक पुष्प, वकुलपुष्प, जवापुष्प, पलाश पुष्प को मधु के साथ मिलाकर मन्त्रज्ञ वशीकरण के लिये होम करे। त्रिमधु युक्त लवण के होम से सुन्दरी स्त्रियाँ आकृष्ट होती हैं ॥ १६३-१६४ ॥

वञ्जुलस्य समिद्धोमात् वृष्टिं वितनुतेऽचिरात् ।
क्षीराक्तैरमृताखण्डैर्होमो नाशयति ज्वरम् ॥ १६५ ॥
दूर्वाभिरायुराप्नोति कदम्बैर्वश्यमाप्नुयात् ।
राजीलवण होमेन शत्रून मारयतेऽचिरात् ॥ १६६ ॥

वञ्जुल (बेंत) की समिधा के होम से स्वल्पकाल में वृष्टि होती है। दूध में डुबोये गये अमृता (गुरुच) के टुकड़ों से होम करने पर ज्वर नष्ट होता है। दूर्वा के होम से आयु की प्राप्ति, कदम्ब से वशीकरण, राजी (राई) मिश्रित लवण का होम निश्चय ही शत्रु का विनाश करता है ॥ १६५-१६६ ॥

अन्नेन मधुयुक्तेन निर्धनो धनमाप्नुयात् ।
सर्वं त्रिमधुरोपेतं होमद्रव्यमुदाहृतम् ॥ १६७ ॥

त्रिमधुयुक्त अन्न के होम से निर्धन को धन प्राप्त होता है। ऊपर जितने भी द्रव्य कहे गये हैं उनमें त्रिमधु अवश्य मिलाना चाहिये ॥ १६७ ॥

**नन्द्यावर्त्तभवैः पुष्पैर्होमाद्वाग्मी भवेन्नरः ।**
**बिल्वप्रसूनैर्जुहुयादीप्सितां श्रियमाप्नुयात् ॥ १६८ ॥**

नन्द्यावर्त्त के पुष्प से होम करने पर मनुष्य वाग्मी होता है। बिल्व के फूल से होम करने पर अभीष्ट लक्ष्मी की प्राप्ति होती है ॥ १६८ ॥

**पलाशकुसुमैर्होमात्तेजस्वी जायते नरः ।**
**चन्दनागुरुकर्पूररोचनाकुङ्कमादिभिः ॥ १६९ ॥**
**वश्याय जुहुयान्मन्त्री वशयेदखिलं जगत् ।**
**निर्गुण्डीमूलहोमेन निगडान्मुच्यते नरः ॥ १७० ॥**

पलाश पुष्प के होम से मनुष्य तेजस्वी होता है, चन्दन, अगुरु, कपूर, रोचना और कुङ्कुम का होम वशीकरण के लिये करे तो वह सारे जगत् को वश में कर लेता है। निर्गुण्डी के मूल के होम से साधक मनुष्य निगड (जेलखाना) से छूट जाता है ॥ १६९-१७० ॥

**निम्बतैलान्वितैर्लोणैर्होमः शत्रुविनाशनः ।**
**हरिद्राचूर्णसंमिश्रैर्लवणैः स्तम्भयेत् परान् ॥ १७१ ॥**

तैल संयुक्त निम्ब और लवण के होम से शत्रु नष्ट होते हैं, हरदी के चूर्ण से मिश्रित लवण के होम से शत्रु का स्तम्भन हो जाता है ॥ १७१ ॥

**रसवद्भिः फलैः पक्वैः पुष्पैः परिमलान्वितैः ।**
**हुत्वा सम्यगवाप्नोति साधकः सर्वमीप्सितम् ॥ १७२ ॥**

रस युक्त पके हुये फलो तथा सुगन्ध युक्त पुष्पों के होम से साधक अपना समस्त अभीष्ट प्राप्त करता है ॥ १७२ ॥

**मालतीपुष्पहोमेन वाग्मी द्रुतकविर्भवेत् ।**
**वशयेद्वचहोमेन नरान्नरपतीनपि ॥ १७३ ॥**

मालती पुष्प के होम से वाग्मी तथा द्रुत कवि होता है। वचा के होम से मनुष्यों की बात क्या राजा को भी वश में कर लेता है ॥ १७३ ॥

**पद्मैर्हुत्वा जयेत् शत्रून् दूर्वाभिः शान्तिमाप्नुयात् ।**
**पलाशकुसुमैः पुष्टिं धनं धान्यं श्रियं लभेत् ॥ १७४ ॥**

कमल पुष्प के होम करने से शत्रु पर विजय तथा दूर्वा के होम से शान्ति प्राप्त होती है। पलाश पुष्प के होम से पुष्टि, धन-धान्य तथा श्रीसमृद्धि की प्राप्ति होती है ॥ १७४ ॥

शशकस्य तु मांसेन मधुना लोडितेन च ।
हुत्वा हेममवाप्नोति वित्तविद्यावरस्त्रियः ॥ १७५ ॥

मधु से विलोडित शशक (खरगोश) के मांस के होम से सुवर्ण, वित्त, विद्या एवं उत्तमोत्तम स्त्री की प्राप्ति होती है ॥ १७५ ॥

काकपक्षैः कृते होमे विद्वेषं तनुते नृणाम् ।
मरीचहोमैर्मरणं रिपुराप्नोति निश्चितम् ॥ १७६ ॥

काक पक्ष के होम से मनुष्यों में विद्वेष होता है । मरीच के होम से निश्चित रूप से शत्रु का मरण हो जाता है ॥ १७६ ॥

अयुतं वटवृक्षोत्थैः संशुद्धिरर्चितेऽनले ।
होमं समिद्वरैः कुर्यान्नाशयत्यापदां कुलम् ॥ १७७ ॥

वट वृक्ष की श्रेष्ठ दश हजार समिधाओं द्वारा सुसंस्कृत अग्नि में होम करने से समस्त आपत्तियाँ नष्ट हो जाती हैं और आत्मशुद्धि होती है ॥ १७७ ॥

अपामार्गसमिद्भिर्वा तिलैर्वा काननोद्भवैः ।
व्रीहिभिर्जुहुयाद्धीरो वत्सरात् व्रीहिमान् भवेत् ॥ १७८ ॥

अपामार्ग की समिधा से अथवा बन में उत्पन्न होने वाली तिल (जर्तिला) से अथवा धान के होम से मनुष्य एक वर्ष के भीतर बहुत धन धान्य से समृद्ध हो जाता है ॥ १७८ ॥

दूर्वाहोमेन दीर्घायुर्मधुना वत्सराद् भवेत् ।
आरग्वधैःसमृद्धिः स्यादाज्येन लभते धनम् ॥ १७९ ॥

मधु युक्त दूर्वा के होम से मात्र एक वर्ष में दीर्घायु की प्राप्ति होती है । घृत संयुक्त आरग्वध के होम से समृद्धि की प्राप्ति निश्चित है ॥ १७९ ॥

गोदुग्धेन गवां वृद्धिमाप्नुयान्नात्र संशयः ।
काम्यहोमं सदा धीरः कुर्यादयुतसंख्यया ॥ १८० ॥

गोदुग्ध से हवन करने पर गायों की वृद्धि होती है इसमें संशय नहीं । धीर पुरुष काम्य होम दश हजार की संख्या में करे ॥ १८० ॥

लतापुष्पान्वितं कृत्वा पर्णानां शतकं सुधीः ।
तानि संमन्त्र्य विधिवदसकृत् साधकोत्तमः ॥ १८१ ॥
ततो वै होमयेत्तानि संस्कृतेऽग्नौ यथाविधि ।
युगानामयुतं तेन पूजनं जायते तथा ॥ १८२ ॥

**अनेन क्रमयोगेन यश्चरेद् भुवि साधकः ।**
**न तस्य दुर्लभं किञ्चित्त्रिषु लोकेषु विद्यते ॥ १८३ ॥**

सौ पत्तों को (आरग्वध की) लता के फूले हुये पुष्पों से गूंथ कर उन्हें अनेक बार मन्त्रों से अभिमन्त्रित कर उत्तम साधक संस्कृत अग्नि में विधि के अनुसार हवन करे । इतने मात्र से उसे दश हजार युगों के पूजा का फल प्राप्त हो जाता है। इस क्रम से वह समस्त पृथ्वी पर विचरण करे तो तीनों लोकों में ऐसा कोई पदार्थ नहीं है जो दुर्लभ हो ॥ १८१-१८३ ॥

**वीरो भवति वाग्मीकः सर्वसिद्धिमुपालभेत् ।**
**हुनेदाज्येन तक्रेण मांसेन रुधिरेण च ॥ १८४ ॥**
**रक्तपुष्पेण साज्येन सरक्तेन विशेषतः ।**
**आमिषादिभिरप्येवं श्मशाने जुहुयात् सुधीः ॥ १८५ ॥**

तक्र, मांस, रुधिर घृत मिश्रित तथा रुधिर मिश्रित रक्त पुष्प से एवं आमिषादि से सुधी साधक श्मशान में होम करे तब वह वीर वाग्मी हो जाता है और उसे समस्त सिद्धियाँ प्राप्त हो जाती हैं ॥ १८४-१८५ ॥

**मांसं रक्तं तिलं केशं नखं भक्तञ्च पायसम् ।**
**आज्यं चैव विशेषेण जुहुयात् सर्वसिद्धये ॥ १८६ ॥**
**एवं कृतेन सर्वत्र लभते सिद्धिमुत्तमाम् ।**
**यत् यत् कामयते कामं तत्तदाप्नोति निश्चितम् ॥ १८७ ॥**

साधक सभी सिद्धियों के लिये मांस, रक्त, तिल, केश, नख, भात, पायस और विशेष रूप से आज्य मिलाकर हवन करे । ऐसा करने से सर्वत्र उसे सिद्धि प्राप्त होती है । इतना ही नही वह जो जो भी अभिलाषा करता है वह सब निश्चित रूप से पूर्ण हो जाती है । १८६-१८७ ॥

**देववन्मानुषो भूत्वा भुनक्ति बहुलं सुखम् ।**
**योनिकुण्डे हुनेद्विद्वान् यथावत् साधितेऽनले ॥ १८८ ॥**
**हविषा चैव भक्तेन मांसेन रुधिरेण च ।**
**रक्तचन्दनपुष्पेण कृष्णोन च विशेषतः ॥ १८९ ॥**
**श्मशाने जुहुयान्मन्त्री शुद्धामिक्षाभिरप्यथ ।**
**धने धनेश्वरो भूयादाज्ञया च शचीपतिः ॥ १९० ॥**
**बलेन पवनो भूत्वा देववद्विचरेद् भुवि ।**

वह मनुष्य होकर भी देवता के समान हो जाता है समस्त सुखों का उपभोग करता है विद्वान् साधक या योनिकुण्ड की सुसंस्कृत अग्नि में विधि के अनुसार

हविः, भात, मांस और रुधिर से रक्त चन्दन से विशेषकर काले पुष्प से शुद्ध आमिक्षा से श्मशानाग्नि में होम करे तो वह धन में धनेश्वर (कुबेर) के समान हो जाता है और आज्ञा में साक्षात् इन्द्र के समान हो जाता है तथा वह पुरुष बल में वायु के समान होकर पृथ्वी में विचरण करता है ॥ १८८-१९० ॥

**अथ ध्यात्वा चरेद्धोमं दधिसिद्धान्नतण्डुलैः ॥ १९१ ॥**
**सहस्रैकविधानेन समस्तफलसिद्धये ।**
**विद्याकामेन होतव्यं शर्करायुतपायसैः ॥ १९२ ॥**

महाभगवती का ध्यान कर सभी सिद्धियों के लिये दधि, पक्वान्न एवं अक्षत से विधानपूर्वक एक सहस्र हवन करे । विद्या चाहने वाला शर्करायुक्त पायस (खीर) से होम करे ॥ १९१-१९२ ॥

**मलनाश्यं भवत्येव सद्यो विद्याचतुर्दश ।**
**रजस्वलाया वस्त्रेण मधुना सह सर्पिषा ॥ १९३ ॥**
**अयुतैकं विधानेन सिद्धयोऽष्टौ भवन्ति हि ।**

ऐसा करने से उस साधक के पाप दूर हो जाते हैं और तत्क्षण चतुर्दश विद्या उसको प्राप्त हो जाती है । रजःस्वला के वस्त्र में यदि मधु और घृत मिलाकर दश हजार की संख्या में होम करे तो निश्चय ही मन्त्री साधक को समस्त सिद्धि प्राप्त हो जाती है ॥ १९३-१९४ ॥

**सद्योमार्जारमांसेन घृतेन मधुना सह ॥ १९४ ॥**
**चाण्डालकेशयुक्तेन सर्वसिद्धिर्भवेद् ध्रुवम् ।**
**बन्धूककुसुमैर्होमं कृत्वा रक्तान्वितैर्ध्रुवम् ॥ १९५ ॥**
**दुर्भगाया भवेद् भाग्यं सर्वसिद्धिर्न संशयः ।**

टटके विलाव के मांस में घृत और मधु मिलाकर चाण्डाल के केश के साथ होम करे तो सब सिद्धि हो जाती है इसमें संशय नहीं । रुधिर मिश्रित बन्धूक के पुष्पों से होम करने पर दुर्भाग्य युक्त मानव का भी भाग्य जाग जाता है और उसे सब सिद्धि प्राप्त होती है इसमें संशय नहीं ॥ १९४-१९६ ॥

**रम्भापुष्पं शालमत्स्यं जुहुयान्मन्त्रवित्तमः ॥ १९६ ॥**
**सर्वसिद्धिमनुप्राप्य अन्ते मोक्षमवाप्नुयात् ।**
**साक्षतं विल्वपत्रञ्च जुहुयाच्च सहस्रकम् ॥ १९७ ॥**
**लभते मञ्जुलां वाणीं महाष्टम्यां विशेषतः ।**
**एवं ज्ञात्वा प्रकुर्वीत द्रव्यमानमथोच्यते ॥ १९८ ॥**

यदि मन्त्रवेत्ता साधक केला का पुष्प, शाल और मत्स्य का होम करे तो वह

समस्त सिद्धियों को प्राप्त कर अन्त में मोक्ष प्राप्त कर लेता है । अक्षत सहित बिल्वपत्र से यदि एक हजार की संख्या में होम करे तो उस साधक की वाणी अत्यन्त मीठी हो जाती है । विशेषकर महाष्टमी के दिन यह कार्य प्रशस्त बतलाया गया है । साधक ऐसा समझ कर उक्त सारा कार्य करे । अब यहाँ होम के लिये द्रव्य का परिमाण कहते हैं ॥ १९६-१९८ ॥

होमद्रव्यादिमानम्

**कर्षमानं घृतं होमे शुक्तिमात्रं पयः स्मृतम् ।**
**पञ्चगव्यञ्च तत्संख्यं भवेन्मधु तथा समम् ॥ १९९ ॥**

**हवन सामग्री का परिमाण**—होम में कर्ष परिमाण का घृत तथा शुक्ति की मात्रा में दूध कहा गया है इसी प्रकार उतनी ही मात्रा में पञ्चगव्य तथा मधु भी प्रदान करना चाहिये ॥ १९९ ॥

**दुग्धान्नमक्षसदृशं दधि प्रसृतिमानकम् ।**
**लाजा मुष्टिमिता ज्ञेया पृथुकं शुक्तिमेव च ॥ २०० ॥**

दूध में पकाया-गया अन्न अक्ष (कवलगट्टा) की मात्रा में होना चाहिये । दही एक पसर की मात्रा में होना चाहिये, लावा का परिमाण मुष्टि तथा पृथुक (चिउड़ा) का परिमाण एक शुक्ति भर होना चाहिये ॥ २०० ॥

**गुडं पलार्धमानं स्यात् शर्कराऽपि तथा समा ।**
**मत्स्यं मांसं तथा ज्ञेयं रुधिरं शुक्तिमात्रकम् ॥ २०१ ॥**

गुड़ की मात्रा आधा पल, उतनी ही मात्रा में शर्करा भी देना चाहिये । मत्स्य मांस तथा रुधिर एक शुक्ति मात्रा देना चाहिये ॥ २०१ ॥

**ग्रासार्धं चरुमानं स्यादिक्षु पर्वावधि स्मृतम् ।**
**एकैकपत्रपुष्पाणि तथापूपानि कल्पयेत् ॥ २०२ ॥**

चरु (खीर) की मात्रा आधा ग्रास, इक्षु पर्व (गाँठ) की मात्रा में और पत्र, पुष्प तथा अपूप एक संख्या में देना चाहिये ॥ २०२ ॥

**कदलीफलनारङ्गफलान्येकैकशो विदुः ।**
**मातुलुङ्गं चतुःखण्डं पनसं दशधा भवेत् ॥ २०३ ॥**

केला फल और नारङ्गी फल एक एक कहा गया है किन्तु मातुलुङ्ग का चार खण्ड तथा पनस (कटहल) दश भाग कर आहुति देनी चाहिये ॥ २०३ ॥

**अष्टधा नारिकेलञ्च मालूरञ्च त्रिधा भवेत् ।**
**कपित्थञ्च त्रिधा ज्ञेयं ऊर्वारुकं त्रिधा भवेत् ॥ २०४ ॥**

नारिकेल आठ भाग में तथा बिल्व तीन भाग में, कपित्थ भी तीन ही भाग में ऊर्वारुक (कर्कटी) भी तीन भाग में करके देना चाहिये ॥ २०४ ॥

**फलान्यन्यान्यखण्डानि समिधः स्युर्दशाङ्गुलाः ।**
**दूर्वात्रयं समुद्दिष्टं गुडूचो चतुरङ्गुला ॥ २०५ ॥**

अन्य फल बिना खण्ड किये ही देवे । होम की समिधा दश अङ्गुल की होनी चाहिये । दूर्वा तीन की संख्या में तीन अङ्गुल की तथा गुडूची चार अङ्गुल की होनी चाहिये ॥ २०५ ॥

**व्रीहयो मुष्टिमानाः स्युर्मुद्गमाषयवा अपि ।**
**तण्डुलाः स्युस्तदर्धश्च अथवा मुष्टिसम्मिताः ॥ २०६ ॥**

व्रीहि का परिमाण एक मुट्ठी, इसी प्रकार मूग, माष और यव भी एक मुट्ठी परिमाण में होना चाहिये । चावल उसका आधा अथवा उसे भी एक मुट्ठी मात्रा में होम करना चाहिये ॥ २०६ ॥

**गोधूमा रक्तकलभा मुष्टिमानास्तिलास्तथा ।**
**मुष्टिमानाः सर्षपाश्च लवणं शुक्तिमानकम् ॥ २०७ ॥**

विद्वानों द्वारा गो धूम (गेहूँ), रक्त, कलभ (शालिधान्य) और तिल एक मुट्ठी परिमाण में कहे गये हैं । सर्षप (सरसों) भी एक मुष्टि मात्रा में तथा एक शुक्ति ही कहा गया है ॥ २०७ ॥

**मरीचानि च विंशतिः पुरं बदरसंमितम् ।**
**रामठं तत्समं ज्ञेयं रोचना तत्समा भवेत् ॥ २०८ ॥**

मरीच बीस संख्या में, पुर (गुग्गुल) बैर की मात्रा में, रामठ (हींग) तथा रोचना (हल्दी) भी उतनी ही मात्रा में देनी चाहिये ॥ २०८ ॥

**चन्दनागुरुकर्पूरकस्तूरीकुङ्कुमानि च ।**
**तिन्तिडीबीजमानानि समुद्दिष्टानि देशिकैः ॥ २०९ ॥**

चन्दन, अगुरु, कपूर, कस्तूरी, कुङ्कुम का परिमाण इमली के बीज की मात्रा में आचार्यों ने बतलाया है ॥ २०९ ॥

**वैश्वानरं स्थितं ध्यायेत् समिद्धोमेषु देशिकः ।**
**शयानमाज्यहोमेषु निषण्णः शेषवस्तुषु ॥ २१० ॥**

आचार्य समिधा का होम करते समय उसमें अग्नि की स्थिति का ध्यान करे । घी की आहुति में उन्हें सोते हुये तथा शेष वस्तुओं के होम में उन्हें बैठा हुआ ध्यान करे ॥ २१० ॥

**आस्यान्तर्जुहुयाद्वह्नेर्विपश्चित् सर्वकर्मसु ।**
**ज्वलत् शिखा मुखं वह्नेर्बोद्धव्यं साधकोत्तमैः ॥ २११ ॥**

विद्वान् को सभी कामों में अग्नि के मुख में ही होम करना चाहिये । शिखा पर्यन्त जलते रहना अग्नि का मुख कहा गया है ॥ २११ ॥

वह्निवर्णादिभेदतः शुभाशुभकथनम्

**शुभाशुभं तथा ज्ञेयं वह्नेर्वर्णादिभेदतः ।**
**स्वर्णसिन्दूरवालार्ककुङ्कुमक्षौद्रसन्निभः ॥ २१२ ॥**
**सुवर्णरितसो वर्णः शोभनः परिकीर्त्तितः ।**
**भेरीवारिदहस्तीन्द्रध्वनिर्वह्नेः शुभावहः ॥ २१३ ॥**

**अग्नि की ज्वाला एवं धूम का शुभाशुभ विचार**—अग्नि के वर्ण का भेद देखकर शुभाशुभ का विचार करना चाहिये । यदि सुवर्ण सिन्दूर, उदीयमान सूर्य, कुङ्कुम तथा क्षौद्र (मधु) एवं सुवर्ण रेत (लाल) के समान अग्नि जलती हो तो शुभ है, इसी प्रकार नगाड़ा, बादल और हाथी के समान अग्नि का शब्द हो तो वह भी शुभावह है ॥ २१२-२१३ ॥

**नागचम्पकपुन्नागपाटलायुथिकानिभः ।**
**पद्मेन्दीवरकल्हारसर्पिर्गुग्गुलसन्निभः ॥ २१४ ॥**
**पावकस्य शुभो गन्ध इत्युक्तस्तन्त्रवेदिभिः ।**
**प्रदक्षिणास्त्यक्तकम्पाःसुप्रभाः शिखिनः शिखाः ॥ २१५ ॥**
**शुभदाः साधकानां तु अन्यथाऽनिष्टदा भवेत् ।**
**कुन्देन्दुधवलो धूमो वह्नेः प्रोक्तः शुभावहः ॥ २१६ ॥**

यदि नागकेशर, चम्पक, पुन्नाग, पाटल (गुलाब), यूथिका, कमल, इन्दीवर, कह्लार, घृत तथा गुग्गुल के समान अग्नि से गन्ध निकल रहा हो तो वह भी शुभावह है ऐसा तन्त्रवेत्ताओं ने कहा है । कम्पनरहित दाहिनी ओर ज्वाला जा रही हो तो साधक के लिये इष्टकारक है अन्यथा अनिष्ट समझना चाहिये । कुन्द तथा चन्द्रमा के समान उज्ज्वल धूम वाली अग्नि शुभावह कही गई है ॥२१४-२१६॥

**कृष्णवर्णो भवेद् धूमो मन्त्रिणं नाशयेद् ध्रुवम् ।**
**श्वेतो राष्ट्रं दहत्याशु वायसस्वरसन्निभः ॥ २१७ ॥**

यदि अग्नि से काला वर्ण का धूम निकल रहा हो तो निश्चय ही वह मन्त्रज्ञ साधक को विनष्ट करेगा । कौवे के समान कर्कश स्वर करने वाला श्वेत धूआँ राष्ट्र को जला देने वाला होता है ॥ २१७ ॥

**खरस्वरसमो वह्नेर्ध्वनिः सर्वविनाशकृत् ।**

**पूतिगन्धो हुतभुजो होतुर्दुःखप्रदो भवेत् ॥ २१८ ॥**

अग्नि के द्वारा गदहे के समान निकलने वाला शब्द सब कुछ नष्ट कर देता है और दुर्गन्ध युक्त अग्नि से निकलने वाला धुआँ हवनकर्त्ता साधक को दुःख प्रदान करता है ॥ २१८ ॥

**छिन्नावर्त्ता शिखा कुर्यान्मृत्युं धनपरिक्षयम् ।**
**शुकपक्षिनिभो धूमः पारावतसमप्रभः ॥ २१९ ॥**
**हानिं तुरगजातीनां गवाञ्च कुरुतेऽचिरात् ।**
**एवंविधेषु दोषेषु प्रायश्चित्ताय साधकः ॥ २२० ॥**

बीच-बीच में कटी हुई ज्वाला वाली अग्नि मृत्यु प्रदान करती है और धन का विनाश करती है । तोते के पक्ष के समान हरित वर्ण तथा कपोत के समान निकलने वाला धूआँ घोड़ों तथा गौ को शीघ्रातिशीघ्र हानि प्रदान करता है । इस प्रकार अशुभ सङ्केत करने वाली अग्नि के ज्वाला का वर्ण, शब्द तथा धूआँ को देखकर साधक इस प्रकार का प्रायश्चित्त करे ॥ २१९-२२० ॥

### प्रायश्चित्त निरूपणम्

**मूलेनाऽऽज्येन जुहुयात् पञ्चविंशतिमाहुतीः ।**
**स्वीयसंख्याविधानेन हुत्वाशेषं समाचरेत् ॥ २२१ ॥**
**स्रुचा पूर्णाहुतिं कृत्वा मूलमन्त्रेण देशिकः ।**
**उद्वास्य देवतां कुम्भे साङ्गावरणपूर्विकाम् ॥ २२२ ॥**

साधक मूल मन्त्र पढ़कर घी से पच्चीस आहुति अग्नि में देवे । फिर मन्त्र के अक्षर की अथवा अपने नाम के अक्षर की जितनी संख्या हो उतनी आहुति देवे । फिर शेष द्रव्य को स्रुचा में भरकर मूल मन्त्र से पूर्णाहुति करे, फिर अङ्ग और आवरण सहित देवता को कुम्भ में उद्वासन करे ॥ २२१-२२२ ॥

**पुनर्व्याहृतिभिर्हुत्वा जिह्वादीनां विभावसोः ।**
**एकैकामाहुतिं हुत्वा परिषिच्याद्भिरात्मनि ॥ २२३ ॥**

फिर व्याहृतियों से हवन कर अग्नि की जिह्वाओं को एक एक आहुति प्रदान कर अपने ऊपर जल छिड़के ॥ २२३ ॥

**पावकं योजयित्वा स्वे परिधीन् सपरिस्तरान् ।**
**नैमित्तिके काम्यहोमे दहेत्तात्र तु नित्यके ॥ २२४ ॥**

अग्नि का अपनी आत्मा में ध्यान कर पूर्वोक्त परिस्तरण एवं परिधियों को नैमित्तिक और काम्य होम में हवन कर देवे, किन्तु नित्यकर्म न करे ॥ २२४ ॥

काम्यतर्पणविधानम्

**होमस्य विधिराख्यातस्तर्पणस्यापि कथ्यते ।**
**ततः सन्तर्पयेन्मन्त्री होमस्यापि दशांशतः ॥ २२५ ॥**

यहाँ तक हमने होम का विधान कहा अब तर्पण का विधान कहता हूँ । होम के बाद मन्त्रज्ञ साधक होम की संख्या के दशांश से तर्पण करे ॥ २२५ ॥

**तीर्थतोयेन दुग्धेन सर्पिषा सुरयाऽपि वा ।**
**गन्धोदकेन वा कुर्यात् सर्वत्र साधकोत्तमः ॥ २२६ ॥**

यह तर्पण उत्तम साधक तीर्थ के जल से, दूध से, घृत से, अथवा मद्य से, अथवा गन्धोदक से सर्वत्र करे ॥ २२६ ॥

**होमान्ते देवतायाश्च पीठं तोये विचिन्तयेत् ।**
**अथवा होमपात्रादौ यन्त्रं कृत्वा ततः परम् ॥ २२७ ॥**
**पूजयित्वा ततो देवीं परिवारगणान्विताम् ।**
**आदौ सन्तर्पयेद्यन्त्रे गुर्वादींस्तु यथाक्रमात् ॥ २२८ ॥**

होम कर लेने के पश्चात् जल में देवता के पीठ का ध्यान करे अथवा होम पात्र में यन्त्र निर्माण करे । इसके बाद उस पर आवरण सहित देवी की पुजा कर सर्वप्रथम गुर्वादि का तर्पण करे ॥ २२७-२२८ ॥

**एकैकमञ्जलिं कृत्वा सन्तर्प्य रश्मिवृदकम् ।**
**पूर्वद्रव्यैर्देवमुखे तर्पयेद्विधिना ततः ॥ २२९ ॥**

तदनन्तर एक एक अञ्जलि से रश्मिवृन्दों का तर्पण कर पूर्व द्रव्यों से विधि के अनुसार देवमुख में तर्पण करे ॥ २२९ ॥

**होमस्यापि दशांशेन तर्पणञ्च समाचरेत् ।**
**प्रसङ्गात् कथ्यते काम्यतर्पणञ्च विशेषतः ॥ २३० ॥**

इस प्रकार होम का दशांश तर्पण करे । अब प्रसङ्ग वश काम्य तर्पण विशेष रूप से कहते हैं ॥ २३० ॥

**इष्टदेवीं ततः पश्चात् यथोक्तसंख्यया बुधः ।**
**तर्पयित्वा महादेवीं काम्यतर्पणमाचरेत् ॥ २३१ ॥**

फिर पूर्वोक्त संख्या में इष्टदेवी का तर्पण करे । महादेवी के तर्पण के पश्चात् काम्य तर्पण करे ॥ २३१ ॥

**तर्पयेच्च पयोभिश्च रक्तधारायुतैस्तथा ।**
**मज्जाभिश्च यथा तत्तत् स्वकीयेन कचेन च ॥ २३२ ॥**

आकर्षितायाः कन्यायाः कुलप्रक्षालनेन च ।
मेषमाहिषरक्तेन नररक्तेन चैव हि ॥ २३३ ॥
मूषामार्जाररक्तेन . तर्पयेत् परदेवताम् ।
एवं तर्पणमात्रेण साक्षात् सिद्धीश्वरो भवेत् ॥ २३४ ॥

रक्त धारा संयुक्त दूध से, मज्जा से तथा अपने केश से तर्पण करे अथवा आकर्षण से वश में रहने वाली कन्या के कुल (योनि) के प्रक्षालन से अथवा मेष या महिष के रक्त से, अथवा मूषक एवं मार्जार के रक्त से परदेवता का तर्पण करे। इस प्रकार उक्त विधान से तर्पण करने पर साधक सभी सिद्धियों का ईश्वर बन जाता है ॥ २३२-२३४ ॥

कविता जायते तस्य द्राक्षारसपरम्परा ।
बृहस्पतिसमो भूत्वा देवीवद्भुवि मोदते ॥ २३५ ॥

उसकी कविता द्राक्षा रस के समान मधुर होती है, वह बृहस्पति के समान होकर देवताओं के समान पृथ्वी पर सुखी हो जाता है ॥ २३५ ॥

न तस्य पापपुण्यानि जीवन्मुक्तो भवेद् ध्रुवम् ।
कालागुरुद्रवोपेतैर्वशयेज्जगतीमिमाम् ॥ २३६ ॥

उसको पाप पुण्य का फल नहीं लगता, वह निश्चय ही जीवन्मुक्त बन जाता है। कालागुरु के द्रव से तर्पण करने वाला इस सारे जगत् को अपने वश में कर लेता है ॥ २३६ ॥

सचन्दनेन तोयेन सौभाग्यं लभते नरः ।
तोयैःकुङ्कुममिश्रैश्च स्तम्भयेदखिलं जगत् ॥ २३७ ॥

चन्दन युक्त जल के द्वारा तर्पण करने से मनुष्य अचल सौभाग्य प्राप्त करता है कुङ्कुम मिश्रित जल से तर्पण करने वाला साधक समस्त जगत् को स्तम्भित कर देता है ॥ २३७ ॥

सितामिश्रिततोयेन बृहस्पतिसमो भवेत् ।
कर्पूराक्तजलेनैव कर्षयेदसुरानपि ॥ २३८ ॥

सिता (मिश्री) युक्त जल से तर्पण करने वाला बृहस्पति के समान वाग्मी हो जाता है। कर्पूर मिश्रित जल से तर्पण करने वाला असुरों को भी आकृष्ट कर लेता है ॥ २३८ ॥

रोचनायुततोयेन मुच्यते सर्वदुर्ग्रहात् ।
सर्वशास्त्रेषु कथितं तर्पणं शुभदायकम् ॥ २३९ ॥

रोचनायुक्त जल से तर्पण करने वाला सभी दुष्टग्रहों से मुक्त हो जाता है। यह तर्पण का कल्याणकारी विधान सभी शास्त्रों में कहा गया है ॥ २३९ ॥

उन्मुखीकालिकाविधानम्

**उन्मुख्याः कालिकायाश्च रात्रिकल्पस्य साधकः ।**
**तर्पयेन्मदिराभिश्च मत्स्यमांसैः समं बुधः ॥ २४० ॥**

रात्रि कल्प का साधन करने वाला विद्वान् साधक उन्मुखी एवं कालिका का तर्पण मदिरा, मत्स्य तथा मांस से करे ॥ २४० ॥

**ततः सम्पूर्णसंख्यायां स्वकल्पोक्तप्रमाणतः ।**
**स्थापयेदात्महृत्पद्मे परिवारगणैः सह ॥ २४१ ॥**

इस प्रकार अपने कल्प (=सम्प्रदाय) के प्रमाण से सम्पूर्ण संख्या में तर्पण करने वाला साधक अपने हृदय रूप कमल में परिवार समन्वित भगवती देवी का ध्यान करे ॥ २४१ ॥

**देवताञ्च ततः पश्चात्तर्पणस्य दशांशतः ।**
**अभिषेकं प्रकुर्वीत गन्धतोयैः सुसाधकः ॥ २४२ ॥**

इसके बाद तर्पण संख्या के दशांश से गन्ध जल द्वारा उत्तम साधक इष्ट देवता का अभिषेक करे ॥ २४२ ॥

**गृहीत्वा गन्धतोयञ्च मुद्रया कुम्भसञ्ज्ञया ।**
**मूलमन्त्रं समुच्चार्य ततश्चाऽमुकदेवताम् ॥ २४३ ॥**
**अभिषिञ्चामि तत्पश्चात् हृन्मनुस्तदनन्तरम् ।**
**इत्युच्चार्य स्वमूर्ध्नि तं चिन्तयित्वा समन्त्रकम् ॥ २४४ ॥**

कुम्भ नाम वाली मुद्रा से गन्ध जल लेकर मूल मन्त्र का उच्चारण कर 'अमुक देवतामभिषिञ्चाभि नमः' इस मन्त्र का उच्चारण कर देवता का ध्यान कर अपने सिर पर जल छिड़के ॥ २४३-२४४ ॥

**ततः सञ्चिन्तयेद् देवीं साङ्गावरणदेवताम् ।**
**क्षिपेत्तोयं यथासंख्यं गणान् सिञ्चेत्ततः परम् ॥ २४५ ॥**
**अभिषेकं स्वीयसंख्यं विधाय तदनन्तरम् ।**
**तत्तन्मन्त्रयुतान् विप्रान् भोजयेद् देवताधिया ॥ २४६ ॥**

इस प्रकार अङ्ग और आवरण देवता सहित देवी का ध्यान करते हुये तर्पण का दशांश अभिषेक करे, उसके बाद गणों का अभिषेक करे। फिर अपनी संख्या के अनुसार तर्पण कर अभिषेक का दशांश ब्राह्मण भोजन करावे। उन ब्राह्मणों में

उन-उन मन्त्रों से युक्त देवता बुद्धि रखे ॥ २४५-२४६ ॥

**विधिवत् पूजयित्वा च भोजयित्वा च साधकः ।**
**तत्तद्देवप्रियैर्द्रव्यैरभिषेकदशांशतः ॥ २४७ ॥**

मन्त्री साधक उन ब्राह्मणों का विधिवत् पूजन करे, पश्चात् उन्हें भोजन करावे। उन ब्राह्मणों की संख्या तत्तद् द्रव्यप्रिय देवताओं के अभिषेक की संख्या का दशांश होना चाहिये ॥ २४७ ॥

छिन्नाकालिकायाः दिवाकल्पः

**छिन्नायाः कालिकायाश्च दिवाकल्पस्य साधकः ।**
**तद्दशांशान् हविष्यान्नैः भोजयेद् भक्तिभावतः ॥ २४८ ॥**

दिवा कल्प में छिन्नमस्तका तथा कालिका का उपासक दशांश होम, दशांश तर्पण, दशांश अभिषेक उसके भी दशांश संख्या में हविष्यान्न द्वारा ब्राह्मणों को भेजन करावे ॥ २४८ ॥

**तत्तन्मन्त्रविदो विप्रान् रात्रिकल्पं समाचरेत् ।**
**हेतुं मांसञ्च मत्स्यञ्च चर्वणञ्च प्रदापयेत् ॥ २४९ ॥**

अब रात्रिकल्प जिस प्रकार से करे, उसको कहता हूँ । तत्तन्मन्त्रवेत्ता ब्राह्मणों को मद्य, मांस, मत्स्य और चर्वण प्रदान करे ॥ २४९ ॥

विप्रभोजनादिकथनम्

**ब्राह्मणान् देवताबुद्ध्या भोजयित्वा च साधकः ।**
**सिद्धमन्त्री भवेत् सोऽपि नात्र कार्या विचारणा ॥ २५० ॥**

उन-उन ब्राह्मणो को देवता बुद्धि से भोजन कराने वाला साधक सिद्ध मन्त्र वाला हो जाता है इसमें संशय नहीं ॥ २५० ॥

**जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम् ।**
**पञ्चाङ्गेयञ्च कथिता पुरस्क्रिया सुसिद्धये ॥ २५१ ॥**

जप, होम, तर्पण, अभिषेक और ब्राह्मण भोजन—ये पाँच पुरश्चरण के अङ्ग हैं, जिन्हें मैंने कह दिया ॥ २५१ ॥

(अथवा) **जपहोमतर्पणञ्चाऽभिषेकोऽप्यघमर्षणम् ।**
**सूर्यार्घ्यं जलपानञ्च प्रणामं चैव पूजनम् ॥ २५२ ॥**
**ब्राह्मणानां भोजनञ्च दशाङ्गेयं पुरस्क्रिया ।**
**तत्तत्कर्मदशांशेन कुर्याद्धोमादिकं बुधः ॥ २५३ ॥**

अथवा जप, होम, तर्पण, अभिषेक, अघमर्षण, सूर्यार्घ्य, जलपान, प्रणाम, पूजन और ब्राह्मण भोजन—ये पुरश्चरण के दश प्रकार हैं । इसमें भी जपादि का दशांश होम, उसका दशांश तर्पण, उसका दशांश अभिषेक इत्यादि तत्तद्दशांश कर्म करना चाहिये ॥ २५२-२५३ ॥

**अघमर्षणं दिनेशार्घ्यं कृत्वा पूर्वविधानतः ।**
**रव्यर्घ्यस्य दशांशेन जलपानं समाचरेत् ॥ २५४ ॥**

इसमें अघमर्षण और सूर्यार्घ्य पूर्व की भाँति विधानपूर्वक सम्पादन कर सूर्यार्घ्य का दशांश जलपान करे ॥ २५४ ॥

**आत्मानं देवतारूपं विभाव्य यतमानसः ।**
**दक्षहस्ते जलं नीत्वा मूलान्तेऽमुकदेवताम् ॥ २५५ ॥**
**पाययामि नमः पश्चात् स्ववक्त्रैस्तत् पिबेत्ततः ।**
**तत्संख्याञ्च समाप्याऽथ मूलान्ते स्वीयदेवताम् ॥ २५६ ॥**
**नमामीति नमस्कुर्याज्जलपानदशांशतः ।**
**पूजनञ्च ततः कुर्यात् यथाविधिविधानतः ॥ २५७ ॥**

साधक स्थिरचित्त हो स्वयं अपने को देवतारूप में भावना कर दाहिने हाथ में जल लेकर मूलमन्त्र पढ़कर, फिर 'अमुकदेवतां पाययामि नमः' इस मन्त्र को पढ़कर स्वयं अपने मुख से उस समर्पित जल को पी जावे । इस प्रकार जलपान की संख्या समाप्त कर मूल मन्त्र पढ़कर 'स्वीय देवतां नमामि' कहकर जलपान के दशांश की संख्या में नमस्कार करे । इसके बाद सम्प्रदायानुसार विधानपूर्वक यथाविधि पूजन करे ॥ २५५-२५७ ॥

**विप्राणां भोजनं कुर्यान्नमस्कारदशांशतः ।**
**विप्राराधनमात्रेण व्यङ्गं साङ्गं भवेद् यतः ॥ २५८ ॥**

भोजन करने वाले ब्राह्मणों की संख्या, नमस्कार की संख्या का दशांश होना चाहिये । ब्राह्मणों के भोजन कराने मात्र से कार्य में होने वाली समस्त त्रुटियाँ पूर्ण हो जाती हैं ॥ २५८ ॥

**अथवा तद्दिने कुर्यात्तत्तज्जपदशांशतः ।**
**द्विजादीनाञ्च वर्णानां विधिः प्रोक्तः शुभावहः ॥ २५९ ॥**

अथवा अभाव में उसी दिन, जप का दशांश, पुनः जप, उसका भी दशांश, पुनः जप, उसका भी दशांश जप और उसका भी दशांश, फिर उसका भी दशांश जप करे । इस प्रकार हमने समस्त द्विजाति मात्र के लिये पुरश्चरण की शुभावह विधि कही ॥ २५९ ॥

होमकर्माद्यशक्तानां द्विगुणो जप ईरितः ।
इतरेषाञ्च वर्णानां त्रिगुणादिसमीरितः ॥ २६० ॥

अथवा जो होम कर्म में अशक्त हैं, वे केवल जप की संख्या के दशांश संख्या वाले किये जाने वाले होमादि के स्थान में मात्र होम का द्विगुणित जप करे। यह विधान ब्राह्मणों के लिये कहा गया है । इतर वर्ण होम की संख्या का त्रिगुणित जप करे ॥ २६० ॥

कुत्रापि यदि हीनं स्यादृशकस्याऽङ्गकर्मणि ।
तत्तद्दशैव कार्याणि दशशून्यं न कारयेत् ॥ २६१ ॥

यदि इस दशांश अङ्ग वाले होमादि कार्य में कहीं से त्रुटि हो गई हो, तो उसे पुनः दशांश में ही करे । दशांश से शून्य जपादि न करे ॥ २६१ ॥

ततः सम्पूजयेद् भक्त्या सम्भारैर्विविधैर्गुरुम् ।
दक्षिणां गुरवे दद्यात् मन्त्राणाञ्च विशुद्धये ॥ २६२ ॥
गुरवे गुरुपुत्राय तत्पत्न्यै वा प्रदापयेत् ।
तत्तदभावतो मन्त्री कुलीनाय कुलाय वा ॥ २६३ ॥
दत्त्वा च साधकश्रेष्ठो महापूजां समापयेत् ।
तत्तत्कल्पसमाचारान्मन्त्रसिद्धिः प्रजायते ॥ २६४ ॥

॥ इति श्रीमज्ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये
त्रयोदशोल्लासः ॥ १३ ॥

इस प्रकार पुरश्चरण समाप्त कर शिष्य अनेक प्रकार की सामग्रियों से गुरु का पूजन करे । मन्त्र की शुद्धि के लिये गुरु को दक्षिणा देवे । यह दक्षिणा गुरु को ही देवे । उनके अभाव में गुरु के पुत्र को दे । उनके अभाव में गुरु की पत्नी को देवे । उनके अभाव में कौलमार्ग वाले किसी सिद्ध कौल को देवे । इस प्रकार दक्षिणा देने के अनन्तर महापूजा समाप्त करे । इस प्रकार तत् तत् सम्प्रदायानुसार आचरण करने से मन्त्रसिद्धि हो जाती है ॥ २६२-२६४ ॥

**महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय के ज्येष्ठ पुत्र पण्डित रामरञ्जन मालवीय कृत श्रीमज्ज्ञानानन्द परमहंस विरचित कौलावलीनिर्णय नामक तन्त्र के त्रयोदश उल्लास की निरञ्जन हिन्दी व्याख्या पूर्ण हुई ॥ १३ ॥**

# चतुर्दश उल्लासः

पुरश्चरणनिरूपणम्

अथवाऽन्यप्रकारेण पुरश्चरणमिष्यते ।
श्मशाने तु पुरश्चर्या कथिता भुवि दुर्लभा ॥ १ ॥

अथवा अन्य प्रकार से भी पुरश्चरण किया जाता है । श्मशान भूमि में जो पुरश्चरण किया जाता है वह पृथ्वी में दुर्लभ है ॥ १ ॥

सर्वमन्त्रसाधकानां श्मशानसाधनेऽधिकारिता

वैष्णवे गाणपत्ये च शैवे चैवाऽन्यमन्त्रके ।
शाक्ते चैव विशेषेण साधयेत् साधकोत्तमः ॥ २ ॥

वैष्णव, गाणपत्य, शैव, अन्य मन्त्र (=सम्प्रदाय) वाले तथा शक्ति वाले स्थानों में भी उत्तम साधक पुरश्चरण की सिद्धि करे ॥ २ ॥

श्मशानसाधनविधानम्

भौमवारे तमिस्रायां यामे याते च साधकः ।
अष्टम्याञ्च चतुर्दश्यां पक्षयोरुभयोरपि ॥ ३ ॥
कृष्णपक्षे विशेषेण साधयेदनया हितम् ।
अक्षालितचितायां तु साधको निर्भयः सुधीः ॥ ४ ॥

दोनों पक्ष की अष्टमी एवं चतुर्दशी की तिथि में मङ्गलवार को एक प्रहर रात्रि बीत जाने पर, घोर अन्धकार में, विशेषकर कृष्णपक्ष में, साधक अक्षालित (नही धोई गई) चिता में पुरश्चरण द्वारा सिद्धि प्राप्त करने के लिये निर्भय होकर श्मशान में जाए ॥ ३-४ ॥

सामिषान्नं गुडं छागं सुरापिष्टकपायसम् ।
नानाफलञ्च नैवेद्यं स्वकल्पोक्तेन साधितम् ॥ ५ ॥
पुष्पादिकं समानीय सुहृद्भिः शस्त्रपाणिभिः ।
समानगुणसम्पन्नैः साधको वीतभीः स्वयम् ॥ ६ ॥

अपने कल्प के अनुसार मांस सहित अन्न, गुड़, बकरा, मद्य, अपूप, पायस अनेक प्रकार के फल नैवेद्य एवं पुष्पादि सामग्री से युक्त तथा अपने समान गुण वाले शस्त्र हाथों में लिये, सुहृदों के साथ साधक स्वयं भी निर्भय होकर श्मशान में जावे ॥ ५-६ ॥

**भीतश्चेत् साधकस्तत्र चतुर्दिक्षु च साधकाः ।**
**नो चेत् स्वयं केवलोऽसौ भैरवः परिकीर्त्तितः ॥ ७ ॥**

यदि उसे डर लगता हो तो अपने चारों ओर साधकों के साथ जावे, अन्यथा स्वयं भैरव बनकर जावे ॥ ७ ॥

**वस्त्रालङ्कारभूषाद्यैर्भूषितः पूर्वसम्मुखः ।**
**चितायाः पश्चिमे भागे उपविश्य स्थिरः शुचिः ॥ ८ ॥**
**अस्त्रान्तमूलमन्त्रेण प्रोक्षणं यागभूमिषु ।**
**गुरुपादरजो ध्यात्वा वामपादपुरःसरः ॥ ९ ॥**
**गणेशं वटुकं चैव योगिनीं मातृकास्तथा ।**
**विधिवत् पूजयित्वा तु पुटाञ्जलिः पठेदिमम् ॥ १० ॥**

वस्त्र अलङ्कार भूषणों को धारण किये हुये, पूर्वाभिमुख हो, चिता के पश्चिम भाग में पवित्र होकर स्थिरता के साथ बैठे । मूल मन्त्र सहित अस्त्र मन्त्र (अस्त्राय फट्) इस मन्त्र से यागभूमि का प्रोक्षण करे । फिर गुरु के चरण कमलों की धूलि का ध्यान कर अपना बायें पैर आगे निकाल कर गणेश, बटुक, योगिनी तथा मातृकाओं का विधिवत् पूजन पुष्पाञ्जलि लेकर करे ॥ ८-१० ॥

आत्मरक्षामन्त्रः

**ये चात्र संस्थिता देवा राक्षसाश्च भयानकाः ।**
**पिशाचयक्षसिद्धाश्च गन्धर्वाप्सरसां गणाः ॥ ११ ॥**
**योगिन्यो मातरो भूता सर्वाश्च खेचराः स्त्रियः ।**
**सिद्धिदास्ता भवन्त्वत्र तथा च मम रक्षकाः ॥ १२ ॥**
**प्रणम्येति चितामध्ये पुष्पाञ्जलित्रयं क्षिपेत् ।**
**श्मशानाधिपतिं पश्चाद् भैरवं कालभैरवम् ॥ १३ ॥**
**महाकालं यजेद्यत्नात् पूर्वादिदिक्चतुष्टये ।**
**पाद्यादिभिश्च मन्त्रज्ञो बलिं पश्चान्निवेदयेत् ॥ १४ ॥**

'ये चात्र संस्थिता देवा राक्षसाश्च भयानकाः, पिशाचयक्षसिद्धाश्च गन्धर्वाप्सरसां गणा, योगिन्यो मातरो भूता सर्वाश्च खेचराः स्त्रियः, सिद्धिदास्ता भवन्त्वत्र तथा च मम रक्षकाः' पर्यन्त श्लोक मन्त्र पढ़कर प्रणाम करते हुये चिता के मध्य में तीन

पुष्पाञ्जलि समर्पित करे। फिर पूर्वादि दिशाओं के क्रम से श्मशानाधिपति इसके बाद भैरव, फिर काल भैरव, तदनन्तर महाकाल का प्रयत्नपूर्वक यजन करे। फिर मन्त्रज्ञ साधक पाद्यादि निवेदन कर उन्हें बलि समर्पित करे ॥ ११-१४ ॥

### बलिप्रदानम्

**प्रणवं कूर्चबीजं तु श्मशानाधिप तत्परम् ।**
**इममन्ते सामिषान्नं बलिं गृह्णद्वयं वदेत् ॥ १५ ॥**
**गृह्णापय द्वयं विघ्ननिवारणं ततः कुरु ।**
**सिद्धिं मे च प्रयच्छाऽन्ते स्वाहान्तेऽपि बलिं दिशेत्॥ १६ ॥**
**दुग्धेनाप्युत्सृजेद्वापि पञ्चगव्येन वा तथा ।**

प्रणव (ॐ), कूर्चबीज (हुं), फिर 'श्मशानाधिप फिर 'इमं सामिषान्नं बलिं गृह्ण गृह्ण गृह्णापय गृह्णापय विघ्न निवारणं कुरु सिद्धिं मे प्रयच्छ स्वाहा'—इस मन्त्र से बलि प्रदान करे और दूध अथवा पञ्चगव्य का उत्सर्जन करे ॥ १५-१७ ॥

**भैरवभयानकात् पूर्वं मायाबीजं पठेत् सुधीः ॥ १७ ॥**
**पूर्ववद्बलिमुद्धृत्य दक्षिणे बलिमाहरेत् ।**
**कूर्चान्ते कालशब्दान्ते भैरवेति ततः परम् ॥ १८ ॥**
**श्मशानाधिपतये पूर्वपश्चिमे बलिमाहरेत् ।**
**हूमन्ते च महाकाल पूर्ववदुत्तरे हरेत् ॥ १९ ॥**

'ह्रीं भैरवभयानक ! बलिं गृहाण' इस मन्त्र से पात्र से बलि निकाल कर श्मशान के दक्षिण दिशा में बलि देवे। कूर्च (हुं) इसके बाद 'कालभैरव श्मशानाधिपतये बलिं समर्पयामि' इस मन्त्र से श्मशान के पूर्व तथा पश्चिम में बलि देवे। फिर 'हूं महाकालबलिं समर्पयामि' इस मन्त्र से साधक उत्तर दिशा में बलि देवे ॥ १७-१९ ॥

**चितामध्ये ततो दत्त्वा बलित्रयमनुत्तमम् ।**
**कालरात्रि महाकालि कालिके घोरनिःस्वने ॥ २० ॥**
**गृहाणेमं बलिं मातर्देहि सिद्धिमनुत्तमाम् ।**
**कालकायै बलिं दत्त्वा भूतनाथाय दापयेत् ॥ २१ ॥**

इसके बाद साधक चिता के मध्य में तीन बार बलि प्रदान कर 'कालरात्रि महाकालि कालिके घोरनिःस्वने, गृहाणेमं बलिं मातर्देहि सिद्धिमनुत्तमाम्' पर्यन्त श्लोक मन्त्र पढ़कर कालिका को बलि प्रदान करे। फिर साधक भूतनाथ को इस प्रकार बलि देवे ॥ २०-२१ ॥

**हूमन्ते भूतनाथान्ते श्मशानाधिप इत्यपि ।**

**प्रणवाद्येन मनुना दापयेद्बलिमुत्तमम् ॥ २२ ॥**

'ॐ हूं भूतनाथश्मशानाधितये बलिं समर्पयामि' इस मन्त्र को पढ़कर भूतनाथ को उत्तम बलि प्रदान करे ॥ २२ ॥

**कूर्चं सर्वगणनाथाधिपतये ततो वदेत् ।**
**श्मशानमस्तकेचैव बलिं पूर्ववदाहरेत् ॥ २३ ॥**

इसके अनन्तर '(ॐ) कूर्च (हूं) सर्वगणनाथाधिपतये बलिं समर्पयामि' इस मन्त्र से श्मशान के मस्तक पर पूर्ववत् बलि प्रदान करे ॥ २३ ॥

**ताराद्येन बलिं दत्त्वा पञ्चगव्येन चैव हि ।**
**अस्थिसम्प्रोक्षणं कृत्वा तत्र पीठे मनुं न्यसेत् ॥ २४ ॥**
**भूर्जे वा वटपत्रे वा लिखित्वा चक्रमुत्तमम् ।**
**लिखित्वा स्वीयमन्त्रञ्च स्थापयेदासनोपरि ॥ २५ ॥**

इस प्रकार बलि प्रदान कर पञ्चगव्य से 'अस्थि' का सम्प्रोक्षण कर उसकी पीठ पर मन्त्र लिखे । फिर भोजपत्र पर अथवा बटपत्र पर चक्र तथा अपना मन्त्र लिखकर आसन के ऊपर स्थापित करे ॥ २४-२५ ॥

### विघ्ननिवारणार्थं वीरार्दनमन्त्रकथनम्

**पीठमास्तीर्य तस्मिन् वै बद्धपद्मासनः सुधीः ।**
**कूर्चबीजद्वयं पश्चात् मायायुग्मं समुद्धरेत् ॥ २६ ॥**
**कालिके बज्रदंष्ट्रे च प्रचण्डे चण्डनायिके ।**
**दानवान् दारयेत्युक्त्वा हनेति द्वितयं ततः ॥ २७ ॥**
**शवशरीरे महाविघ्नं छेदय द्वितयं ततः ।**
**स्वाहान्ते वर्मचाऽस्त्रान्तो वीरार्दनमनुर्मतः ॥ २८ ॥**
**अनेन मन्त्रितं लोष्ट्रं दश दिक्षु विनिःक्षिपेत् ।**
**तन्मध्ये भैरवो देवो न विघ्नैःपरिभूयते ॥ २९ ॥**

सुधी साधक आसन बिछाकर पद्मासन से बैठे । फिर दो कूर्च बीज (हूं हूं), फिर माया बीज (ह्रीं), तदनन्तर 'कालिके बज्रदंष्ट्रे प्रचण्डे चण्डनायिके दानवान् दारय हन हन शवशरीरे महाविघ्नं छेदय छेदय स्वाहा कवचाय हुं अस्त्राय फट्' यह वीरार्दन मन्त्र है । इस मन्त्र से अभिमन्त्रित कर मिट्टी के ढेले को दशों दिशाओं में फेंक देवे । ऐसा करने से उसके मध्य में रहने वाले भैरव स्वरूप साधक को विघ्न नहीं होता ॥ २६-२९ ॥

**यदि प्रमादवशेनैव साधको भयविह्वलः ।**

अर्केन्दुसितवाट्यालमूलैर्निर्मितवर्त्तिकाम् ॥ ३० ॥
प्रदीपं गर्त्ते संस्थाप्य अस्त्रमन्त्रेण साधकः ।
अस्त्रं प्रपूजयेत्तत्र दीपं संरक्षयेत्ततः ॥ ३१ ॥

यदि किसी भूल या प्रमादवश साधक भय से विह्वल हो तो, अर्क इन्दु (कपूर) सितवाट्याल (=सफेद अतिबला) के मूल से बनी हुई बत्ती का दीपक जलाकर अस्त्र मन्त्र (अस्त्राय फट्) इस मन्त्र से किसी गड्ढे में स्थापित करे। उसमें अस्त्र की पूजा करे, तदनन्तर दीप की रक्षा करे ॥ ३०-३१ ॥

हते तस्मिन् महादीपे विघ्नैश्च परिभूयते ।
स्वस्वकल्पोक्तविधिना भूतशुद्ध्यादिकञ्चरेत् ॥ ३२ ॥

यदि कदाचित् वह महादीप बुझ जावे, तब साधक को महाविघ्न उपस्थित होते हैं। फिर अपने सम्प्रदायानुसार भूत शुद्ध्यादि कर्म करे ॥ ३२ ॥

### षोढान्यासकथनम्

षोढां वा तारकं वापि विन्यस्य पूजयेत्ततः ।
नानाविद्याप्रभेदेन षोढा च बहुधाभवेत् ॥ ३३ ॥

षोढा अथवा तारक से न्यास कर उसकी पूजा करे। अनेक विद्याओं के भेद के कारण षोढा अनेक हैं ॥ ३३ ॥

तारकः सर्वशास्त्रेषु कथ्यते तन्त्रवर्त्मना ।
विन्यसेन्मातृकास्थाने मातृकां तारसम्पुटाम् ॥ ३४ ॥

तारक जो सभी शास्त्रों में तन्त्र के अनुसार कहा गया है उसे कहता हूँ। मातृका के स्थान में प्रणव सम्पुट मातृका से न्यास करे ॥ ३४ ॥

मातृकापुटितं तारं तारकः परिकीर्त्तितः ।
विधिवत् पूजयित्वा च निजदेवीं सुसाधकः ॥ ३५ ॥
मन्त्रध्यानपरो भूत्वा जपेन्मन्त्रमनन्यधीः ।

मातृका से सम्पुटित तार (ॐ) तारक कहा जाता है। फिर उत्तम साधक अपनी इष्टदेवी की पूजाकर मन्त्र का ध्यान करते हुये, स्थिर चित्त हो, मन्त्र का जप करे ॥ ३५-३६ ॥

### मन्त्राक्षरसंख्याभेदेन जपसंख्या

एकाक्षरं यदि भवेद् दिक्सहस्रं ततो जपेत् ॥ ३६ ॥
द्व्यक्षरे चाऽष्टसाहस्रं त्र्यक्षरे त्वयुतार्धकम् ।
अतः परन्तु मन्त्रज्ञो गजान्तक सहस्रकम् ॥ ३७ ॥

साधक यदि मन्त्र एक अक्षर का हो, तो दश हजार की संख्या में जप करे। दो अक्षर का मन्त्र हो तो आठ हजार, और तीन अक्षर का मन्त्र हो, तो पाँच हजार जप करे। इससे अधिक अक्षर वाले मन्त्र का गजान्तक (सिंह) अर्थात् एक हजार की संख्या में जप करे ॥ ३७ ॥

**निशायां वा समारभ्य उदयान्तं समाचरेत् ।**
**जपादौ तु बलिं दद्यात् पश्चादपि बलिं हरेत् ॥ ३८ ॥**

अथवा रात्रि से आरम्भ कर सूर्योदय पर्यन्त जप करे। जप के आदि में तथा जप के अन्त में भी बलि प्रदान करे ॥ ३८ ॥

**जपान्ते जपमध्ये वा देहि देहीति भाषिते ।**
**तदापि च बलिंदद्यात् महिषं छागमेव वा ॥ ३९ ॥**

जप के अन्त में अथवा जप के मध्य में 'देहि देहि' ऐसा शब्द करे उस समय भी भैंसे तथा छाग (बकरे) की बलि देनी चाहिये ॥ ३९ ॥

### बलिदानविधानम्

**बलिदानविधानं हि वक्ष्येऽहं सिद्धिहेतवे ।**
**तरुणं सुन्दरं कृष्णं क्षतादिदोषवर्जितम् ॥ ४० ॥**

अब सिद्धि के लिये बलिदान का विधान कहता हूँ। बलिदान के लिये लाया गया बकरा या महिषादि युवा, सुन्दर और काले वर्ण का तथा व्रणादि रहित होना चाहिये ॥ ४० ॥

**स्वयं पूर्वमुखो भूत्वा बलिमुत्तरवक्त्रकम् ।**
**समानीय स्ववामे च प्रोक्षयेत्तदनन्तरम् ॥ ४१ ॥**

बलिदान कर्त्ता को बलि प्रदान करने के समय स्वयं पूर्वाभिमुख और बलि के जीव को उत्तराभिमुख होना चाहिये। उसे अपने बायें से लाकर उसका प्रोक्षण करना चाहिये ॥ ४१ ॥

**अर्घोदकेन वीरेन्द्रस्तारादिमनुनाऽमुना ।**
**नर्मदा यमुना गङ्गा करतोया सरस्वती ॥ ४२ ॥**
**कावेरी चन्द्रभागा च सिन्धुभैरवसागराः ।**
**अजस्नाने महेशानि सान्निध्यमिह कल्पय ॥ ४३ ॥**
**ॐ पशुपाशविनाशाय हेमकूटस्थिताय च ।**
**परापराय परमेष्ठिने हुङ्काराय च मूर्त्तये ॥ ४४ ॥**
**सम्प्रोक्षणं विधायाऽथ बलिं सम्पूजयेत्ततः ।**

ब्रह्मरन्ध्रे च ब्रह्माणं मस्तके मेदिनीं तथा ॥ ४५ ॥
कर्णयोश्च तथाऽऽकाशं ग्रीवायां सर्वतोमुखम् ।
ज्योतींषि नेत्रयोर्विष्णुं वदने परिपूज्य च ॥ ४६ ॥

वीरेन्द्र साधक आदि में तार (ॐ), फिर नर्मदा यमुना.......हुङ्काराय च मूर्त्तये' पर्यन्त श्लोक मन्त्र से सम्प्रोक्षण करे । इस प्रकार बलि का पूजन करे । ब्रह्मरन्ध्र में ब्रह्मा का, मस्तक में मेदिनी, दोनों कानों में आकाश का, ग्रीवा में सर्वतोमुख का नेत्र में ज्योतियों का और मुख में विष्णु का पूजन करे ॥ ४२-४६ ॥

ललाटे पूजयेच्चन्द्रं शक्रं दक्षिणगण्डतः ।
वामगण्डे तथा वह्निं ग्रीवायां समवर्त्तिनम् ॥ ४७ ॥
केशाग्रे नैर्ऋतिं मध्ये भ्रुवोश्चापि प्रचेतसम् ।
नासामूले च श्वसनं स्कन्धे चैव धनेश्वरम् ॥ ४८ ॥
हृदये सर्पराजेन्द्रं पूजयित्वा पठेदिमम् ।
इतोऽन्यथा पापयुतं मलमूत्रवसायुतम् ॥ ४९ ॥
तं बलिं नहि गृह्णाति देवता च कदाचन ।
अन्येषां महिषादीनां बलीनामथ पूजनात् ॥ ५० ॥
कायोमेध्यत्वमायाति रक्तं गृह्णाति वै शिवा ।
भूषयेद्रक्तमाल्येन सिन्दूरेण विशेषतः ॥ ५१ ॥

ललाट में चन्द्रमा का, दक्षिण गण्डस्थल में इन्द्र का, बामगण्डस्थल में अग्नि का, ग्रीवा में समवर्त्ति का, केशाग्र में निर्ऋति का, भ्रूमध्य में प्रचेता का, नासामूल में वायु का, दोनों कन्धों में धनेश्वर का, हृदय में सर्पराजेन्द्र वासुकि, अथवा शेष का नाम एवं मन्त्र से पूजन करे । पूजन न करने पर बलि जीव का शरीर पापयुक्त, मल, मूत्र और वसायुक्त रहता है, उस प्रकार की बलि को देवता कदापि ग्रहण नहीं करते । महिषादि बलि, जीवों के पूजन से उनका शरीर पवित्र हो जाता है, तब उसके रक्त पहना कर शिवा ग्रहण करती है । बलि प्रदान के जीव को लाल माला को विशेषकर सिन्दुर से भूषित करना चाहिये ॥ ४७-५१ ॥

पशुपूजामन्त्रः

तं निरीक्ष्य पठेद्धीरो निजदेवस्वरूपकम् ।
छाग त्वं बलरूपेण मम भाग्यादुपस्थितः ॥ ५२ ॥
प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ।
चण्डिकाप्रीतिदानेन दातुरापद्विनाशिने ॥ ५३ ॥
चामुण्डाबलिरूपाय बले तुभ्यं नमोऽस्तुते ।

यज्ञार्थे बलयः सृष्टाः स्वयमेवस्वयम्भुवा ॥ ५४ ॥
अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोऽवधः ।
ततो वाग्भवो माया च कमला तदनन्तरम् ॥ ५५ ॥
इत्युच्चार्य बलेमूर्ध्नि पुष्पाञ्जलित्रयं क्षिपेत् ।

बलिदान कर्त्ता उस प्रकार के बलिदान वाले भूषित जीव को अपने इष्टदेव के रूप में देखकर यह मन्त्र पढ़े—'छाग त्वं बलिरूपेण.....तस्माद् यज्ञे बधोऽवधः' पर्यन्त श्लोक मन्त्र पढ़े । फिर वाग्भव (ऐं), माया (ह्रीं), कमला (श्रीं), इस मन्त्र को पढ़कर उसके ऊपर तीन पुष्पाञ्जलि प्रदान करे ॥ ५२-५६ ॥

### पशुच्छेदमन्त्रः

शिवबुद्धया सुसञ्चिन्त्य तं पूज्य च ततः परम् ॥ ५६ ॥
ततः सम्पूजयेत् खड्गं गृहीत्वा तं पठेद् बुधः ।
कृष्णं पिनाकपाणिञ्च कालरात्रिस्वरूपिणम् ॥ ५७ ॥
उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनम् ।
रक्ताम्बरधरं चैव पाशहस्तं कुटुम्बिनम् ॥ ५८ ॥
पिवमानञ्च रुधिरं भुञ्जानं क्रव्यसंहतिम् ।
इति ध्यात्वा सुसम्पूज्य नमस्कुर्यात् प्रयत्नतः ॥ ५९ ॥

इस प्रकार उसके कल्याण की दृष्टि से अथवा साक्षात् शिव की दृष्टि से पूजा कर खड्ग ग्रहण करे और उसकी पूजा करे । सर्वप्रथम उसका इस प्रकार ध्यान करे । आप काले वर्ण वाले साक्षात् पिनाकपाणि कालरात्रि स्वरूप उग्र रक्त मुख एवं रक्त नेत्र वाले रक्त वस्त्र धारण किये हुये हाथ में पाश लिये हुये कुटुम्बयुक्त रक्त का पान एवं मांस का भोजन करने वाले हैं । इस प्रकार के खड्ग का ध्यान कर उसकी पूजा करे और प्रयत्नपूर्वक नमस्कार करे ॥ ५६-५९ ॥

आशीविषसमः खड्गस्तीक्ष्णधारो दुरासदः ।
श्रीगर्भो विजयश्चैव धर्मपाल नमोऽस्तु ते ॥ ६० ॥
पुटाञ्जलिं विधायाथ पठेदमुं मनुं बुधः ।
रसना त्वं चण्डिकायाः सुरलोकप्रसाधकः ॥ ६१ ॥
मायायुग्मं ततः प्रोच्य कालिकाकालि ततो वदेत् ।
वज्रेश्वरि पदस्यान्ते लौहदण्डञ्च ङेयुतः ॥ ६२ ॥
हृदयञ्च पठित्वा च अङ्गाय नमो यजेत् ।
विषं मायायुगं कालियुग्मं विकटशब्दतः ॥ ६३ ॥
दंष्ट्रे च स्फेंद्वयं पश्चात् फेत्कारिणि च खादय ।

**द्वयं छेदययुग्मञ्च सर्वदुष्टांश्च मारय ॥ ६४ ॥**
**द्वयमजञ्च खड्गेन छिन्धिद्वयं किलिद्वयम् ।**
**चिकिद्वन्द्वं पिबद्वन्द्वं रुधिरं स्फ्रों (स्फ्रो) युगन्ततः ॥ ६५ ॥**
**किलिद्वयं कालियुग्मं हृन्मनुं तदनन्तरम् ।**

फिर 'आशीविषसमः.....नमोऽस्तु ते' पर्यन्त श्लोक मन्त्र पढ़कर हाथ में पुष्पाञ्जलि लेकर इस मन्त्र को पढ़े । 'रसना त्वं...सुरलोक प्रसाधकः' के बाद दो बार माया (ह्रीं ह्रीं), फिर कालि कालि स्फ्रीं वज्रेश्वरि लोहदण्डाय, फिर नमः पढ़कर, खड्गाय नमः पढ़े । फिर विष (मं), फिर मायायुग (ह्रीं ह्रीं), फिर दो बार कालि कालि, फिर विकटदंष्ट्रे, फिर दो बार 'स्फें', फिर फेत्कारिणि, फिर खादय, दो बार, फिर दो बार छेदय, फिर सर्वदुष्टांश्च, फिर दो बार मारय मारय, अजञ्च खड्गेन' इसके बाद दो बार छिन्धि, फिर दो बार किलि शब्द, फिर दो बार चिकि फिर, दो बार पिब, फिर रुधिरं, फिर दो बार 'स्फ्रों' शब्द पढ़े । फिर दो बार किलि, फिर दो बार कालि, इसके बाद नमः शब्द पढ़े ।

**विमर्श**—मन्त्र का स्वरूप—रसना त्वं चण्डिकायाः सुरलोक प्रसाधकः, ह्रीं ह्रीं कालि कालि वज्रेश्वरि लोहदण्डाय नमः, खड्गाय नमः, मं ह्रीं ह्रीं कालि कालि विकटदंष्ट्रे स्फें स्फें फेत्कारिणि खादय खादय छेदय छेदय सर्व दुष्टांश्च मारय मारय अजञ्च खड्गेन छिन्धि छिन्धि किलि किलि चिकि चिकि पिब पिब रुधिरं स्फ्रों स्फ्रों किलि किलि कालि कालि नमः ॥ ६०-६६ ॥

**अनेन मन्त्रितं खड्गमुत्तोल्य साधकोत्तमः ॥ ६६ ॥**
**देत्ता पूर्वमुखो भूत्वा बलिमुत्तरवक्त्रकम् ।**
**आं हूं फडिति मन्त्रेण छेदयित्वा ततः परम् ॥ ६७ ॥**
**रुधिरं जलसैन्धवशर्करामधुसंयुतम् ।**
**गन्धपुष्पान्वितं कृत्वा उत्सृजेन्मन्त्रमुच्चरन् ॥ ६८ ॥**

इस मन्त्र से खड्ग ऊपर उठाकर वेत्ता साधक पूर्वाभिमुख होकर उत्तरमुख वाले बलि जीव को 'आं हूं फट्' इस मन्त्र से काटकर उस बलि के रुधिर में जल, सैन्धव, शर्करा और मधु से संयुक्त कर उसमें गन्ध पुष्प मिलाकर इस मन्त्र को पढ़ते हुये छोड़ देवे ॥ ६६-६८ ॥

आप्यायनमन्त्रोद्धारः

**प्रणवं वाग्भवं मायां लक्ष्मीं कौशिकिशब्दतः ।**
**रुधिरेण ततः पश्चादाप्यायतां ततः परम् ॥ ६९ ॥**
**निवेद्य रुधिरं वीरः शिरो दद्यात् सदीपकम् ।**
**न दिक्षु वीक्षणं कुर्यात् न च बन्धुसमागमम् ॥ ७० ॥**

प्रणव (ॐ), वाग्भव (ऐं), माया (ह्रीं), फिर लक्ष्मी (श्रीं), फिर कौशिकि ! रुधिरेणाप्यायताम्' इस मन्त्र से रुधिर का निवेदन कर वीर बलि जीव का शिर दीपक के साथ निवेदन करे। उस समय दिशाओं में इधर-उधर न देखे और न आगत बन्धुओं की ओर देखे ॥ ६९-७० ॥

**जलादिदुर्गसर्पाणां गजानां दंष्ट्रिणां तथा ।**
**पक्षिकीटपिशाचानां यद्वा मनसि संस्थितम् ॥ ७१ ॥**
**तत्सर्वं स्वप्नवद्ध्यात्वा भयं सर्वत्र वर्जयेत् ।**
**साधनञ्च समाप्याथ दक्षिणां गुरवे ददेत् ॥ ७२ ॥**

जलादि, दुर्ग, सर्प, हाथी, दाँत से काटने वाले कुत्ता, सिंह, पक्षि, कीट एवं पिशाचों से होने वाले अथवा अकस्मात् मन से उत्पन्न हुये समस्त भय का त्याग कर देवे उसे स्वप्न की तरह झूठा समझे। सब प्रकार के भय से रहित हो साधक निर्भय रहे। इस प्रकार साधक बलि साधन क्रिया की समाप्ति कर गुरु को दक्षिणा प्रदान करे ॥ ७१-७२ ॥

**पूजाद्रव्यं जले चैव गर्त्ते वा निःक्षिपेत्ततः ।**
**सम्यक् सिद्धैकमन्त्रस्य नाऽसाध्यं विद्यते क्वचित् ॥ ७३ ॥**
**बहुमन्त्रवतः पुंसः का कथा शिव एव सः ।**
**स्वकुलान्ते पुरश्चर्या रात्रौ कार्या न चान्यथा ॥ ७४ ॥**

पूजा के लिये एकत्र सभी द्रव्यों को जल में छोड़ देवे, अथवा गड्ढे में डाल देवे, इस प्रकार एक ही मन्त्र को सम्यक् सिद्ध करने वाले साधक के लिये कोई भी कार्य असाध्य नहीं है, फिर जिसने बहुत मन्त्रों की सिद्धि कर ली है उसके लिये क्या कहना, वह तो साक्षात् शिव ही है। कौल सिद्धान्त प्रतिपादन करने वाली इस पुरश्चर्या को रात्रि में करे, जिससे वह निष्फल न हो ॥ ७३-७४ ॥

**सर्वसिद्धिप्रदं साक्षात् सर्वदेवनमस्कृतम् ।**
**सर्वपापहरं चैव सर्वरोगविनाशनम् ॥ ७५ ॥**

यह पुरश्चरण सर्वसिद्धिप्रद, साक्षात्, सर्वदेवनमस्कृत् सर्वपापहारी और सर्व रोगविनाशक है ॥ ७५ ॥

**नान्यत् सिद्धिप्रदं चैव वीरसाधनवर्जितम् ।**
**महाबलो महाबुद्धिर्महासाहसिकः शुचिः ॥ ७६ ॥**
**महास्वच्छो दयावांश्च सर्वभूतहिते रतः ।**
**तेषां कृते प्रवक्ष्यामि वीरसाधनमुत्तमम् ॥ ७७ ॥**

वीर साधना को छोड़कर और साधन सिद्धिप्रद नहीं है। अब जो

महाबलवान्, महाबुद्धिमान्, महासाहसिक, शुचि, महास्वच्छ, दयालु, सम्पूर्ण प्राणियों के हित में लगे रहने वाले तत्वज्ञ साधक हैं, उनके लिये सर्वोत्तम वीर साधन कहता हूँ ॥ ७६-७७ ॥

### वीरसाधनम्

**नास्मात् परतरं किञ्चित् सत्वरं सिद्धिदायकम् ।**
**सर्वसिद्धिर्भवत्येव अहोरात्रे कलौ युगे ॥ ७८ ॥**
**द्वापरे तच्च मासेन त्रेतायां हायनेन तु ।**
**कृते तु दशभिर्वर्षैः सत्यं सिद्धिर्न संशयः ॥ ७९ ॥**

इस वक्ष्यमाण साधन से बढ़कर अन्य साधन सत्त्वर सिद्धि नहीं प्रदान करते । इस साधन से कलियुग में अहोरात्र मात्र में सिद्धि प्राप्त हो जाती है । द्वापर में एक मास में, त्रेता में एक वर्ष में, और सत्ययुग में दश वर्ष में सिद्धि होती है इसमें संशय नहीं ॥ ७८-७९ ॥

**कटीबन्धेन वस्त्रञ्च मूलेन परिधापयेत् ।**
**द्वाह्ये च पुनर्वस्त्रं मूलेन चन्दनादिकम् ॥ ८० ॥**

मूल मन्त्र द्वारा कमर को कसकर वस्त्र धारण करे । उसके बाद पुनः वस्त्र धारण करे । फिर मूल मन्त्र से चन्दनादिक धारण करे ॥ ८० ॥

**कृतोष्णीशश्च मूलेन सिन्दूरेणाऽर्धपुण्ड्रकम् ।**
**इष्टदेवं गुरुं नत्वा रात्रौ प्रहरमध्यतः ॥ ८१ ॥**
**कार्या च साधकैः सार्धं कुलमन्त्रं परामृशन् ।**
**अक्षुब्धो भुक्तभोज्यस्तु यदि स्याद्वीरसाधकः ॥ ८२ ॥**
**दिव्यो बलिः पशुस्तत्र भुक्त्वा साधनमाचरेत् ।**

टोपी या पगड़ी बाँधकर मूलमन्त्र से सिन्दूर का ऊर्ध्व पुण्ड्र धारण करे । अपने इष्टदेव तथा गुरुगणों को नमस्कार करे । अर्धरात्रि के समय साधकों के साथ कुलमन्त्र के विषय में विचार करते हुये चाञ्चल्यरहित हो, भोजनोपरान्त वीरसाधक इस पुरश्चरण क्रिया का प्रारम्भ करे । देवता को दिये गये पशु का भोजन कर साधन प्रारम्भ करे ॥ ८१-८३ ॥

### शवसाधनम्

**पूर्वोक्तदिवसे वीरो नानोपचारसंयुतः ॥ ८३ ॥**
**मत्स्यमांसयुतं भक्तं गुडं छागञ्च पिष्टकम् ।**
**पायसान्नं सुरां चैव माषभक्तबलिं तथा ॥ ८४ ॥**
**तिलं कुशं सर्षपञ्च दीपं चैव सुधूपकम् ।**

एलालवङ्गकर्पूरजातिखदिरमार्द्रकम् ॥ ८५ ॥
ताम्बूलं पट्टसूत्रञ्च एलाजिनञ्च कम्बलम् ।
चषकं यज्ञकाष्ठञ्च स्वप्रादेशप्रमाणकम् ॥ ८६ ॥
पञ्चगव्यं स्वकल्पोक्तं पूजाद्रव्यं प्रगृह्य च ।
यष्टिविद्धं शूलविद्धं खड्गविद्धं पयोमृतम् ॥ ८७ ॥
वज्रविद्धं सर्पदष्टं चाण्डालं वाऽतिभूतकम् ।
तरुणं सुन्दरं शूरं रणे नष्टं समुज्ज्वलम् ॥ ८८ ॥
पलायनविशून्यञ्च सम्मुखे रणवर्त्तिनम् ।
न स्वयं घातयेद्विद्वान् मन्त्राणि तत्र वर्जयेत् ॥ ८९ ॥

ऊपर कहे गये दिनों में (द्र.१४.१-२) वीर साधक मत्स्य, मांस युक्त भात, गुड़, बकरा, पूआ, खीर, मद्य, माष (उड़द) और भक्त की बलि तिल, कुश, सरसो, दीपक, धूप, एला, लवङ्ग, कर्पूर, जाति पुष्प, खदिर (=कत्था), आदि, ताम्बूल, पट्टवस्त्र, इलायची, कृष्ण मृगचर्म, कम्बल, मद्य पीने वाला पात्र, अपने प्रादेश मात्र यज्ञ काष्ठ, पञ्चगव्य इस प्रकार अन्य भी स्वकल्पोक्त पूजाद्रव्य लेकर यष्टि (लाठी) से मारे गये, शूल से मारे गये, खड्ग से मारे गये, पयोमृत (रुधिर) वज्र से मारे गये, साँप विष से मारे गये, अथवा चाण्डाल, अथवा भूत से मारे गये, तरुण, सुन्दर शूर जो युवा हो, प्रशस्त हो, पलायनरहित हो, युद्ध में आमने-सामने मारे गये हो, ऐसे में किसी एक शव को एकत्रित करे, जो स्वयं न मारा गया हो क्योंकि उसमें मन्त्र वर्जित है ॥ ८३-८९ ॥

स्वेच्छामृतं द्विवर्षं च वृद्धं स्त्रियं द्विजं तथा ।
अनातुरमृतं कुष्ठि सप्तरात्रोर्ध्वगं तथा ॥ ९० ॥
अङ्गहीनञ्च सन्त्यज्य पूर्वोक्तान्यतमं परम् ।
गृहीत्वा मूलमन्त्रेण पूजास्थाने समानयेत् ॥ ९१ ॥

अपनी इच्छा से मरे हुये आत्मघाती, दो वर्ष की अवस्था में मरे हुये, वृद्ध स्त्री, ब्राह्मण, स्वस्थावस्था में मरे हुये, कोढ़ी, सात रात से पहले का मरा हुआ, अङ्गहीन शव का परित्याग करे । पूर्वोक्त में किसी एक शव को पकड़कर पूजा स्थान में लावे ॥ ९०-९१ ॥

शून्यागारे नदीतीरे पर्वते निर्जने तथा ।
बिल्वमूले श्मशाने वा तत्समीपे वनस्थले ॥ ९२ ॥

शून्यागार में नदी के तट पर पर्वत में निर्जन स्थान में, बिल्व मूल में, श्मशान में अथवा उसके समीपवर्ती वनस्थल में क्रिया आरम्भ करे ॥ ९२ ॥

दीपस्थानं समाश्रित्य भूमौ वीरार्दनं लिखेत् ।
वीरार्दनाङ्किते भूमौ माया मोहो न विद्यते ॥ ९३ ॥

जिस स्थान पर दीपक रखना हो, उस स्थान पर भूमि में 'वीरार्दन' मन्त्र (१४.२६) लिखे । जिस स्थान पर 'वीरार्दन' मन्त्र लिख दिया जाता है, वहाँ माया मोह का प्रवेश नहीं होता ॥ ९३ ॥

गुरुपूजादिकम्

गुरुपूजादिकं सर्वं पूर्वोक्तमतमाचरेत् ।
ये चात्रेत्यादिमन्त्रेण भूमौ पुष्पाञ्जलिं क्षिपेत् ॥ ९४ ॥

इसके बाद गुरु पूजादि कार्य सम्पन्न कर पूर्वोक्त क्रिया आरम्भ करे, 'ये चात्र' द्र. १४.११-१२' इस श्लोक मन्त्र से भूमि में पुष्पाञ्जलि देवे ॥ ९४ ॥

अघोरास्त्रादिमन्त्राः

अघोरास्त्रेण रक्षां वै सुदर्शनेन वा पुनः ।
मायास्फुरद्वयं भूयः प्रस्फुरद्वितयं पुनः ॥ ९५ ॥
घोरघोरतरेऽत्यन्ते तत्त्वरूपे पदंततः ।
चटयुग्मं तदन्ते च प्रचटद्वितयं पुनः ॥ ९६ ॥
कहद्वयं वमद्वन्द्वं ततो दहयुगंततः ।
घातयद्वितयं वर्मफडन्तोऽघोरको मनुः ॥ ९७ ॥

पुनः अघोरास्त्र से अथवा सुदर्शन से आत्मरक्षा करे । माया (ह्रीं), फिर दो बार स्फुर, फिर दो बार प्रस्फुर, फिर घोरतरे अतितत्त्वरूप, फिर दो बार चट, इसके अन्त में दो बार 'प्रचट', फिर दो बार 'कह', दो बार 'वम', दो बार 'दह', दो बार 'घातय', हुं फट्' यह अघोरमन्त्र है ॥ ९५-९७ ॥

**विमर्श**—अघोरास्त्रमन्त्र का स्वरूप—ह्रीं स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोरतरे तत्त्वरूपे चर चर प्रचट प्रचट कह कह वम वम दह दह घातय घातय हुँ फट्।

हालाहलं समुद्धृत्य सहस्रारस्वरूपकम् ।
वर्मास्त्रान्तो महामन्त्रः सुदर्शनस्य कीर्त्तितः ॥ ९८ ॥

'हलाहल', इसके बाद 'सहस्रार' फिर 'हुं फट्' यह सुदर्शन का मन्त्र है । मन्त्र का स्वरूप—सहस्रार हुँ फट् ॥ ९८ ॥

प्रणवाद्यास्त्रमन्त्रेण प्रोक्षितं पूजयेत्ततः ।
प्रणवं कूर्चवजं तु मृतकाय नमश्च फट् ॥ ९९ ॥
पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् स्पर्शपूर्वकम् ।

अतीव परमानन्द शिवानन्द कुलेश्वर ॥ १०० ॥
आनन्दभैरवाकार देवीपर्यङ्क शङ्कर ।
बीरोऽहं त्वां प्रपद्यामि सन्तिष्ठ देविकार्चने ॥ १०१ ॥
प्रणम्यानेन मनुना क्षालयेत्तदनन्तरम् ।

शवशोधनम्

प्रणवं शब्दबीजञ्च मृतकाय नमस्ततः ॥ १०२ ॥
इत्युच्चार्य गन्धतोयैः प्रक्षाल्य शवमुत्तमम् ।
रक्तयुक्तो यदि भवेत् भक्षयेत् कुलसाधकम् ॥ १०३ ॥

फिर प्रणव (ॐ) के साथ अस्त्र मन्त्र (फट्) से शव का प्रोक्षण कर उसकी पूजा करे। फिर प्रणव (ॐ), कूर्च बीज (हुं) मृतकाय नमः 'फट्' इस मन्त्र से शव पर तीन बार पुष्पाञ्जलि प्रदान करे। तदनन्तर 'अतीव परमानन्द शिवानन्द कुलेश्वर, आनन्दभैरवाकार देवीपर्यङ्क शङ्कर, बीरोऽहं त्वां प्रपद्यामि सन्तिष्ठ देविकार्चने' पर्यन्त श्लोक मन्त्र पढ़कर प्रणाम करते हुये शव का प्रक्षालन करे। फिर प्रणव (ॐ), शब्द बीज (ऐं) फिर 'मृतकाय नमः' इस मन्त्र को पढ़कर गन्धयुक्त जल से उस शव का प्रक्षालन करे। यदि प्रक्षालन करते समय उसमें से रक्त प्रवाहित हो तो वह उस कुल साधक को खा जाता है ॥ ९९-१०३ ॥

**विमर्श**—प्रोक्षणमन्त्र—ॐ फट्, पुष्पाञ्जलि मन्त्र—ॐ हुं मृतकाय नमः फट्। शवप्रक्षालनमन्त्र—(गन्धयुक्त जल से) ॐ ऐं मृतकाय नमः।

सुधूपैर्धूपयेत्तञ्च लेपयेद् गन्धचन्दनैः ।
उपचारं स्वदक्षे तु स्थापयित्वा सुसाधकः ॥ १०४ ॥
अधिकारिविशेषेण सुरया तत्र पूजयेत् ।
गृहीत्वा तत्र दातव्यं सर्वं नैव च संस्पृशेत् ॥ १०५ ॥

शव को उत्तम धूप देवे और गन्ध चन्दन का लेप करे। फिर अपनी दाहिनी ओर उपचार स्थापित कर सुसाधक विशेष-अधिकारी के हाथ से सुरा लेकर शव को प्रदान करे। किन्तु शव का स्पर्श न करे ॥ १०४-१०५ ॥

रक्षां दिक्षु प्रकल्प्याथ बीरार्दनमनुं स्मरन् ।
मृद्वासने ततो बीरो बीरासन परिग्रहः ॥ १०६ ॥

दशो दिशाओं में रक्षा का प्रबन्ध करने के पश्चात् बीरार्दन मन्त्र का स्मरण करे (द्र. १४.२६-२८)। फिर वीर साधक बीरासन के परिग्रहभूत मृदु आसन (शवासन) पर बैठे ॥ १०६ ॥

भूतशुद्ध्यादिकं कृत्वा न्यासजालं प्रविन्यसेत् ।

आत्मरक्षां विधायाथ अघोरेण समाहितः ॥ १०७ ॥
ओं दुर्गे दुर्गे रक्षणीति वह्निजाया ततः परम् ।
अनेन मनुना वीरः सर्षपान् दिक्षु निःक्षिपेत् ॥ १०८ ॥

फिर भूतशुद्धि आदि करन्यास जाल से शरीर का न्यास करे । तदनन्तर समाहित चित्त हो अघोरमन्त्र से आत्मरक्षा कर 'ॐ दुर्गे दुर्गे रक्षिणि स्वाहा' इस मन्त्र से दशो दिशाओं में सर्षप प्रक्षिप्त करे ॥ १०७-१०८ ॥

ॐ तिलोऽसि सोमदैवत्यो सर्वेषां तृप्तिकारकः ।
पितृणां स्वर्गदाता त्वं मर्त्यानां मम रक्षकः ॥ १०९ ॥
भूतप्रेतपिशाचानां विघ्नेषु शान्तिकारकः ।
इति क्षिप्त्वा तिलांस्तत्र चतुर्भागं शवादितः ॥ ११० ॥
इति संरक्षणं कृत्वा शवमात्मपुरो नयेत् ।
कुशशय्यां परिस्तीर्य तत्र संस्थापयेच्छवम् ॥ १११ ॥

फिर 'ॐ तिलोऽसि सोमदैवत्यो सर्वेषां तृप्तिकारकः, पितृणां स्वर्गदाता त्वं मर्त्यानां मम रक्षकः, भूतप्रेतपिशाचानां विघ्नेषु शान्तिकारकः' पर्यन्त श्लोक मन्त्र पढ़कर तिल का चौथा भाग शव पर प्रक्षिप्त करे । इस प्रकार संरक्षण कर उस शव को साधक अपने आगे ले आवे । कुश की शय्या बिछाकर उस पर शव को स्थापित करे ॥ १०९-१११ ॥

एलादिसहितं वीरस्ताम्बूलं तस्य वक्त्रके ।
निःक्षिप्य च ततः कुर्याच्छवं पश्चादधोमुखम् ॥ ११२ ॥
स्थापयित्वा च तत्पृष्ठं चन्दनेन विलेपयेत् ।
बाहुमूलादिकट्यन्तं चतुरस्रं विभाव्य च ॥ ११३ ॥
मध्ये पद्मं चतुर्द्वारं दलाष्टकसमन्वितम् ।
तत्र चैलेयमजिनं कम्बलान्तरितं न्यसेत् ॥ ११४ ॥
श्मशानाधिपतीनाञ्च बलिं दद्याच्च पूर्ववत् ।
निःक्षिपेद्दश काष्ठानि पूर्वादिदशदिक्षु च ॥ ११५ ॥
क्षिप्त्वा सम्पूजयेत्तत्र इन्द्रादिदशदेवताः ।
विषमिन्द्रपदं लिख्य सुराधिपतये ततः ॥ ११६ ॥
इमं बलिं गृह्णयुग्मं गृह्णापययुगं ततः ।
विघ्ननिवारणं कृत्वा सिद्धिं प्रयच्छ ठद्वयम् ॥ ११७ ॥
अनेन मनुना पूर्वे बलिं दद्याच्च सामिषम् ।
स्वस्वनामादिकं कृत्वा पूर्ववद्बलिमुद्धरेत् ॥ ११८ ॥

उसके मुख में इलायची सहित पान देवे, तदनन्तर शव को अधोमुख करे। अधोमुख शव को स्थापित कर उसकी पीठ में चन्दन का अनुलेप करे। फिर बाहुमूल से कटिपर्यन्त उसके चौकोर भाग को अच्छी तरह समझकर मध्य में आठ दल वाला पद्म, उसके बाद चतुर्द्वार भूपुर निर्माण करे। पहले कम्बल, उस पर कृष्णमृग चर्म, फिर उसपर सूती वस्त्र का आसन रखे। पूर्ववत् दशों दिशाओं में बलि देवे और पूर्वादि दिशाओं में रक्षा के लिये दश काष्ठ रखे। फिर उन काष्ठों पर इन्द्रादि दश देवताओं का पूजन करे। विष (मं), फिर 'इन्द्र सुराधिपतये इमं बलिं गृह्ण गृह्ण गृह्णापय गृह्णापय विघ्न निवारणं कृत्वा सिद्धिं प्रयच्छ स्वाहा' इस मन्त्र से मांस युक्त बलि पूर्व दिशा में इन्द्र को देवे। इसी प्रकार तत्तन्नामों को लेकर तत्तद्देवताओं को दशों दिशाओं में बलि देवे ॥ ११२-११८ ॥

**शवाधिष्ठातृभूतेभ्यो बलिञ्च सुरया सह ।**
**चतुःषष्टियोगिनीभ्यो डाकिनीभ्योऽपि सन्दिशेत् ॥ ११९ ॥**

शवाधिष्ठातृ भूतों के लिये और चतुःषष्टि (६४) योगिनियों के लिये एवं डाकिनियों के लिये मद्य के साथ बलिदान प्रदान करे ॥ ११९ ॥

**द्वारदेशे ततो वीरः कुर्यादुत्तरसाधकम् ।**
**समानगुणसम्पन्नं मान्त्रिकं विजितेन्द्रियम् ॥ १२० ॥**
**अभिषेकविधिज्ञं च दैववीरविशारदम् ।**
**संस्थाप्यासनमभ्यर्च्य स्वमन्त्रान्ते परान्ततः ॥ १२१ ॥**
**फडित्यनेन मन्त्रेण ततश्चाऽऽवाहनं विशेत् ।**
**कुशान् पादतले दत्त्वा शवकेशान् प्रगृह्य च ॥ १२२ ॥**
**दृढं निबध्य जुटिकां कृतसङ्कल्पसाधकः ।**
**तत्र देवीं सुसम्पूज्य उपचारैः सुविस्तरैः ॥ १२३ ॥**

फिर द्वार देश पर अपने समान गुण वाले मन्त्रवेत्ता जितेन्द्रिय, अभिषेक विधान को जानने वाले, दिव्य वीर मत में विशारद, अपने से कनिष्ठ किसी साधक को स्थापित करे। फिर आसन का पूजन करने के उपरान्त अपने मन्त्र के बाद 'परां फट्' इस मन्त्र से आवाहन करे। फिर उस पर बैठ जावे और अपने पैर के नीचे कुशा रखे। शव के केशों को पकड़कर उसकी जटा बनावे फिर उस पर सङ्कल्पपूर्वक अनेक विस्तृत उपचारों से देवी की पूजा करे ॥ १२०-१२३ ॥

### शवं प्रति प्रार्थना

**उत्थाय सम्मुखे स्थित्वा पठेद् भक्तिपरायणः ।**
**ॐ वशो मे भव देवेश मम वीरपदन्ततः ॥ १२४ ॥**
**सिद्धिं देहि महाभाग कृताश्रयपरायण ।**

**अनेन मनुना मन्त्री अभिलप्य कृताञ्जलिः ॥ १२५ ॥**

तदनन्तर खड़े होकर भक्तिपरायण होकर इस प्रकार प्रार्थना करे—'ॐ वशो मे भव देवेश मम वीर' पद पढ़े; फिर 'सिद्धिं देहि महाभाग कृताश्रय परायण' इस मन्त्र से साधक हाथ जोड़कर प्रार्थना करे ॥ १२४-१२५ ॥

**ॐ भीम भीरुभयाभाव भव्यलोचन भावुक ।**
**त्राहि मां देवदेवेश शवानामधिपाधिप ॥ १२६ ॥**
**इति पादतले तस्य त्रिकोणं चक्रमुद्धरेत् ।**
**तदोत्थातुं न शक्नोति शवस्तु निश्चलो भवेत् ॥ १२७ ॥**
**अथवा मूलमन्त्रञ्च संस्मरन् साधकोत्तमः ।**
**पट्टसूत्रेण बध्नीयात् शवपादद्वयं ततः ॥ १२८ ॥**
**उपविश्य पुनस्तस्य बाहू निःसार्य पार्श्वयोः ।**
**हस्तयोः कुशमास्तीर्य पादौ तत्र निधापयेत् ॥ १२९ ॥**
**ओष्ठौ तु सम्पुटौ कृत्वा स्थिरचित्तः स्थिरेन्द्रियः ।**
**सदा देवीं हृदि ध्यात्वा मौनी जपनमाचरेत् ॥ १३० ॥**

फिर 'ॐ भीम भीरुभयाभाव भव्यलोचन भावुक त्राहि मां देवदेवेश शवानामधिपाधिप' इस श्लोक मन्त्र को पढ़कर उस शव के पैर के नीचे त्रिकोण चक्र लिखे। ऐसा करने से वह शव खड़ा नहीं हो सकता और निश्चल रहता है। अथवा उत्तम साधक मूलमन्त्र का स्मरण करते हुये उसके दोनों पैरों को पट्टसूत्र से बाँध देवे। फिर बैठकर उसके दोनों बाहुओं को निकाल कर दोनों बाहुओं के पार्श्वभाग में तथा दोनों हाथों में कुशा का आस्तरण करे। उस पर स्वयं अपना पैर रखे। अपने दोनों होठों को सम्पुटित कर स्थिर चित्त, स्थिरेन्द्रिय होकर देवी का हृदय में ध्यान करते हुये मौन होकर जप करे ॥ १२६-१३० ॥

**ततोऽर्धरात्रिपर्यन्तं यदि किञ्चिन्न लभ्यते ।**
**जयदुर्गामनुनाऽर्घ्यं तेनैव सर्षपान् क्षिपेत् ॥ १३१ ॥**

इस प्रकार अर्धरात्रि पर्यन्त जप करते हुये यदि कुछ दिखाई न पड़े तब 'जय दुर्गे' इस मन्त्र को पढ़कर अर्घ्य प्रदान करे और सर्षप प्रक्षिप्त करे ॥ १३१ ॥

**पूर्ववत्तिलमुत्क्षिप्य गत्वा सप्तपदानथ ।**
**देवीं तत्रापि सम्पूज्य प्रजपेन्मनुमुत्तमम् ॥ १३२ ॥**
**निर्भयः प्रजपेद् देवि सिद्धिं वा लभते नरः ।**
**पूर्वोक्तक्रमयोगेन अक्षमालां विधानतः ॥ १३३ ॥**
**चलासनाद्भयं नास्ति भये जाते वदेत्ततः ।**

यत् प्रार्थयसि देवेशि दातव्यं कुञ्जरादिकम् ॥ १३४ ॥
दिनान्तरे च दास्यामि स्वनाम कथयस्व मे ।
इत्युक्त्वा संस्कृतेनैव निर्भयस्तु पुनर्जपेत् ॥ १३५ ॥

पूर्ववत् तिल प्रक्षेपण कर सात पद चलकर वहाँ देवी का पूजन कर पुनः मन्त्र का जप करे। पूर्वोक्त क्रम के अनुसार जपमाला पर विधि के अनुसार निर्भय होकर जप करे। मनुष्य को सिद्धि प्राप्त होगी। यदि आसन चलायमान हो तो भी भय न करे। यदि भय हो तो कहे कि 'हे देवि! यदि आप मेरे देने योग्य कुञ्जर (हाथी) आदि चाहती हो तो मैं दिन में प्रदान करूँगा अपना नाम बताओ'। इतना कहकर निर्भय हो शुद्ध रूप से पुनः जप करे ॥ १३२-१३५ ॥

पुनश्चेन्मधुरं वक्ति वक्तव्यं मधुरं ततः ।
ततः सत्यं कारयित्वा वरन्तु प्रार्थयेन्नरः ॥ १३६ ॥

इसके बाद यदि वह मीठी वाणी में बोले, तब स्वयं भी उससे मधुर वाणी में बोले। इस प्रकार उससे 'सत्य' की प्रतिज्ञा कराकर वर की प्रार्थना करे ॥ १३६ ॥

यदि सत्यं न करोति वरं तु न प्रयच्छति ।
तदा पुनर्जपेद्धीमान् एकाग्रमानसं यथा ॥ १३७ ॥

यदि सत्य की प्रतिज्ञा न करे और वरदान देने को स्वीकार न करे। तब पुनः धीमान् साधक एकाग्रमन होकर जप करे ॥ १३७ ॥

नररूपं विना तत्र देवोऽपि न हि सर्पति ।
यत्नतस्तेन बोद्धव्यं नरो वा देवयोनिजः ॥ १३८ ॥

उस समय प्रयोगकर्त्ता उस साधक के पास मनुष्य रूप धारण किये बिना कोई देवता भी नहीं जा सकता। अतः यत्नपूर्वक तत्त्वज्ञ साधक मनुष्य अथवा देवता की पहचान करे ॥ १३८ ॥

माता मातृस्वसा वापि मातुलानी तथैव च ।
आगत्य विघ्नं कुरुते माययाऽऽच्छाद्य विग्रहम् ॥ १३९ ॥
उत्तिष्ठ वत्स ते कार्यं सर्वं जातं न संशयः ।
प्रभातसमयो जातस्त्वत्पिता क्रोशते गृहे ॥ १४० ॥

उस समय स्वयं देवी माया से अपना शरीर छिपाकर माता, मौसी और मामी का रूप धारण कर इस प्रकार विघ्न करने लगती है। वत्स ! उठो, तुम्हारा काम पूर्ण हो गया। अब संशय मत करो। देखो, प्रातःकाल हो गया और घर पर तुम्हारे पिता दुःखी हो रहे हैं ॥ १३९-१४० ॥

प्रायो विमत्सरा लोका राजानो दण्डधारिणः ।
कदाचित्केन वा दृष्टस्तदाऽनिष्टं भविष्यति ॥ १४१ ॥
इत्यादिविविधैर्वाक्यैर्न च जापं परित्यजेत् ।

देखो सारा संसार मत्सर से ग्रस्त है । राजा भी दण्ड देने वाले होते हैं । यदि किसी ने तुम्हें इस प्रकार देख लिया तो निश्चय ही अनिष्ट की सम्भावना हो सकती है—इत्यादि अनेक वाक्यों से योगिनियाँ विघ्न करती हैं । फिर भी जप का परित्याग न करे ॥ १४१-१४२ ॥

मृताः पितृगणास्तत्र दूरदेशनिवासिनः ॥ १४२ ॥
बान्धवास्तत्र चायान्ति देवरूपधरास्ततः ।
स्त्रीपुत्रसेवकादींश्च गृहीत्वा नीयते परैः ॥ १४३ ॥
रुदन्ति पुत्रकाः सर्वे भ्रातरोऽनुजसेवकाः ।
निजकान्ताङ्गसंस्पर्शवस्त्राद्याभरणादिकम् ॥ १४४ ॥
गृहीत्वा नीयते पत्तिपालकैस्तद्भयं त्यजेत् ।
दिवसे यत्र वा शङ्का सैव तत्र प्रजायते ॥ १४५ ॥
यदि न क्षुभ्यते तत्र तदा किं वा न लभ्यते ।
स्त्रीरूपधारिणी देवी द्विजरूपधरः पुमान् ॥ १४६ ॥
वरं गृह्णेति शब्दे वै त्रिरात्रं ते वरं लभेत् ।

उस समय उसके पास मरे हुये पितृगण, दूर देश में रहने वाले बान्धव, देव रूप धारण करके आते हैं । शत्रुगण उसके स्त्री, पुत्र एवं सेवकों को पकड़कर ले जाने लगते हैं । उस समय सभी पुत्र, सभी भाई एवं सभी सेवक रोने लगते हैं । बहुत क्या, अपनी स्त्री के अङ्ग का स्पर्श करते हैं । वस्त्र आभरणादि बलात् छीन कर पैदल ले जाने लगते हैं । साधक उनका भय त्याग देवे । दिन में जैसी शङ्का होती है, वही शङ्का उस समय होने लगती है । ऐसी अवस्था में यदि निर्भय साधक का चित्त भयभीत अथवा चञ्चल नहीं हुआ तो साधक क्या नहीं प्राप्त कर सकता । इसके बाद तीन रात बीत जाने पर देवी स्वयं स्त्री रूप धारण कर अथवा ब्राह्मण पुरुष का रूप धारण कर 'वर माँगो' ऐसा कहती है । तब साधक वर प्राप्त करे ॥ १४२-१४७ ॥

साधुनाऽसाधुना वापि योषिच्चेद्वरदायिनी ॥ १४७ ॥
तदा वीरपतेस्तस्य किं न सिध्यति भूतले ।
निष्पापपुरुषेचैव सत्कुलनैश्च संस्कृता ॥ १४८ ॥
असंस्कृतवरा देवी पापयुक्तेन संशयः ।
सम्मुखेऽसम्मुखे वापि संस्कृतं वक्ति चापरम् ॥ १४९ ॥

**सैव देवी न सन्देहः स देवो भैरवः स्वयम् ।**
**न चेदेवं भवेच्चैव मायारचितविग्रहः ॥ १५० ॥**

यदि साधुवेश में अथवा असाधुवेश में स्त्री वर देने के लिये आती है तो उस वीर उपासक का कौन-सा ऐसा कार्य है जो इस पृथ्वी पर सिद्ध न हो? यदि पुरुष निष्पाप है तो देवी सत्कुलीनों से संस्कृत स्त्री का और पापयुक्त पुरुष में असंस्कृता नीच स्त्री का रूप धारण करके आती है, इसमें संशय नहीं । यदि प्रत्यक्ष अथवा अप्रत्यक्ष रूप से संस्कृत बोलती है तो उसे देवी ही समझे सन्देह न करे । यदि देव रूप होकर संस्कृत बोले तो उसे साक्षात् भैरव समझे । यदि ऐसा न हो तब तत्त्वज्ञ साधक समझे कि यह माया का रूप धारण कर विघ्न करने के लिये आया हुआ है ॥ १४७-१५० ॥

**न वरयेद्वरं तत्र न किञ्चित् प्रवदेत् क्वचित् ।**
**सा चेत् संस्कृतमाख्यानं वक्ति वा व्यक्तमीदृशम् ॥ १५१ ॥**
**नो चेत् स्वयं कौलिकोक्त्या वरं ग्राह्यं निराकुलम् ।**
**अथवा उत्कटं किञ्चित् ज्योतिर्वा नीललोहितम् ॥ १५२ ॥**
**शब्दो वा जायते सम्यगमृतं वापि लभ्यते ।**
**विचार्य तद्गृहीतव्यमेवं दिक् परिकीर्तितम् ॥ १५३ ॥**

इस प्रकार मायारूप धारण कर समागत व्यक्ति से वर न माँगे और न भाषण करे । यदि वह संस्कृत में बात करती है, अथवा ऐसा न कर कौलिक बन कर वर माँगने के लिये स्पष्ट रूप से कहती है तब निश्चय ही वर माँग लेना चाहिये, अथवा यदि अत्यन्त उग्र प्रकाश वाली, नीले वर्ण की ज्योति दिखाई पड़े, अथवा आकाश में शब्द स्पष्ट रूप से सुनाई पड़े, अथवा अमृत की प्राप्ति हो, तब विचार कर उसे ग्रहण कर लेवे । इस प्रकार से भी विद्वानों द्वारा सिद्धि बतलाई गई है ॥ १५१-१५३ ॥

**देवकृत्यास्तु बहुधा नरास्त्वकृतबुद्धयः ।**
**अवश्यं तत्र भेतव्यं न तत्र प्रत्ययः क्वचित् ॥ १५४ ॥**

देवता के कृत्य अनेक प्रकार के होते हैं । सामान्यतया मनुष्य के पास बुद्धि नहीं होती । अतः अवश्य ही उस विषय में भयभीत रहना चाहिये उसमें विश्वास नहीं करना चाहिये ॥ १५४ ॥

**भैरवा बटुकाश्चैव कुलशास्त्रपरायणाः ।**
**एतच्छास्त्रप्रसङ्गेन कृत्वा कुटिलविग्रहाः ॥ १५५ ॥**
**पुत्रो भूत्वा हरेद्विद्यां नारी भूत्वा विमोहयेत् ।**
**तस्मात्तत्तु भवन्नो वा विचारे यत्नमाचरेत् ॥ १५६ ॥**

कुलशास्त्र के मर्मज्ञ भैरव और बटुक इस शास्त्र के प्रसङ्ग के अनुसार कपटी शरीर धारण कर पुत्र बनकर विद्या का हरण कर लेते हैं । अथवा स्त्री बनकर मोहित कर लेते हैं । इसलिये वही हैं या दूसरे हैं ? इस प्रकार के विचार में ऊहापोहपूर्वक प्रयत्न करे ॥ १५५-१५६ ॥

**सत्ये कृते वरं लब्ध्वा सन्त्यजेच्च जपादिकम् ।**
**फलं जातमिति ज्ञात्वा जुटिकां मोचयेत्ततः ॥ १५७ ॥**

यदि देवी ने 'सत्य' कह दिया हो, तो वर माँग लेवे और जप का परित्याग कर देवे । 'मेरा मनोरथ मुझको मिल गया'—ऐसा समझकर साधक शव-केश की जटा खोल देवे ॥ १५७ ॥

**अथ तैर्याचितानश्वनरकुञ्जरशूकरान् ।**
**दत्त्वा पिष्टमयानन्ते कर्त्तव्यं समुपोषणम् ॥ १५८ ॥**

इसके बाद उनके द्वारा माँगे गये अश्व, मनुष्य, हाथी एवं शूकरों को अपूप के आकार में बनाकर उन्हें देवे और उस दिन उपवास रखे ॥ १५८ ॥

**परेऽह्नि नित्यमाचर्य पञ्चगव्यं पिबेत्ततः ।**
**ब्राह्मणान् भोजयेत्तत्र पञ्चविंशति संख्यकान् ॥ १५९ ॥**

दूसरे दिन नित्य कर्म सम्पादन करे फिर पञ्चगव्य का पान करे । फिर पच्चीस ब्राह्मणों को भोजन करावे ॥ १५९ ॥

**पञ्च पञ्च विहीनान् वा क्रमाच्चैव दशावधि ।**
**तत्रः स्नात्वा च भुक्त्वा च निवसेदुत्तमे स्थले ॥ १६० ॥**
**यदि न स्याद्विप्रभोज्यं तदा निर्धनतां व्रजेत् ।**
**तेन चेन्निर्धनत्वं स्यात्तदा देवः प्रकुप्यति ॥ १६१ ॥**

यदि पच्चीस ब्राह्मण न प्राप्त हों तो केवल दश ब्राह्मणों को ही भोजन करावे, फिर स्नान करे, भोजन करे और उत्तम स्थान में निवास करे । ब्राह्मण भोजन न करावे, तो साधक निर्धन हो जाता है । यदि इस कारण निर्धनता आती है तो वह देवता का कोपभाजन होता है ॥ १६०-१६१ ॥

**त्रिरात्रं षड्रात्रंवा नवरात्रञ्च गोपयेत् ।**
**शय्यायां यदि गच्छेद्वै तदा व्याधिं विनिर्दिशेत् ॥ १६२ ॥**
**गीतं श्रुत्वा च बधिरो निश्चक्षुर्नृत्यदर्शनात् ।**
**यदि वक्ति दिने वाक्यं तदा स मूकतां व्रजेत् ॥ १६३ ॥**
**पञ्चदशदिनान्तं हि देहे देवस्य संस्थितिः ।**

गोब्राह्मणानां निन्दाञ्च न कुर्याच्च कदाचन ॥ १६४ ॥

तीन रात, छह रात एवं नव रात तक तो रक्षा करते हैं, इसके बाद यदि वह शय्या पर सोता है तो व्याधि आती है, गीत श्रवण करने पर बधिर और नृत्यदर्शन करने से अन्धा हो जाता है। यदि दिन में बोलता है तब गूँगा हो जाता है। इस प्रकार उसके देह में पन्द्रह दिन तक देवता का निवास रहता है। इसके बाद वह साधक गौर ब्राह्मण की निन्दा कदापि न करे ॥ १६२-१६४ ॥

देवगोब्राह्मणादींश्च प्रत्यहं संस्पृशेच्छुचिः ।
प्रातर्नित्यक्रियान्ते तु बिल्वपत्रोदकं पिबेत् ॥ १६५ ॥

पवित्र होकर देव, ब्राह्मण और गौ का प्रतिदिन स्पर्श करे। प्रातःकाल नित्य क्रिया के अनन्तर बिल्वपत्र का जल पान करे ॥ १६५ ॥

ततः स्नात्वा च गङ्गायां प्राप्तषोडशवासरे ।
ततः शतत्रयादूर्ध्वं देवानां तर्पणं जलैः ॥ १६६ ॥

सोलहवाँ दिन प्राप्त होने पर गङ्गा में स्नान कर एक-सौ तीन से ऊपर देवताओं का जल से तर्पण करे ॥ १६६ ॥

स्नानतर्पणशून्यस्य न स्याद्देवस्य तर्पणम् ।
इत्यनेन विधानेन सिद्धिं प्राप्नोति साधकः ॥ १६७ ॥

स्नान तर्पण के बिना देवता प्रसन्न नहीं होते। इस प्रकार के विधान से साधक सिद्धि प्राप्त करता है ॥ १६७ ॥

इह भुक्त्वा वरान् भोगानन्ते याति हरेः पदम् ।
असाङ्ग साङ्गमेवं वा निष्फलं सफलञ्च वा ॥ १६८ ॥
कृत्वा साधनमेवैतत् शक्तेः प्रियतरो भवेत् ।
शवाभावे श्मशाने वा कार्या वै वीरसाधना ॥ १६९ ॥

`इस लोक में वह साधक समस्त भोग भोगता है और अन्त में मुक्ति प्राप्त करता है। साङ्ग अथवा साङ्गरहित, निष्फल अथवा सफल रूप से इस प्रकार साधन करने वाला साधक शक्ति का अत्यन्त प्रिय पात्र बन जाता है। शवाभाव में श्मशान में इस वीरसाधना को करना चाहिये ॥ १६८-१६९ ॥

### प्रकारान्तरेण पुरश्चरणकथनम्

नृणां शीघ्रफलावाप्त्यै प्रकारान्तरमुच्यते ।
चतुष्पथे चतुर्दिक्षु पुरुषं हृदयं खनेत् ॥ १७० ॥
जीवितं ब्रह्मरन्ध्रे वै दीपं प्रज्वालयेत् सुधीः ।

मध्ये तथा खनेदेकं तत्र मृद्वासनं भवेत् ॥ १७१ ॥

अब मनुष्यों को शीघ्र फल प्राप्ति के लिये प्रकारान्तर से पुरश्चरण विधि कहता हूँ। किसी चतुष्पथ में चारों दिशाओं में पुरुष के आकार का एक गड्ढा बनावे। फिर सुधी साधक ब्रह्मरन्ध्र में जहाँ जीव का स्थान है वहाँ दीपक जलावे। चतुष्पथ के मध्य में एक गड्ढा खोदे और उसे मृद्वासन समझे ॥ १७०-१७१ ॥

पूर्वोक्तक्रममार्गेण तत्र संस्कारमाचरेत्।
महाकालादिदेवेभ्यो बलिं पूर्ववदाहरेत् ॥ १७२ ॥
कल्पोक्तपूजां सम्पूज्य जपेत् प्रयतमानसः।
दिग्वासाश्च जपेन्मन्त्रमयुतं सर्वदैवतम् ॥ १७३ ॥
जपान्ते च बलिं दत्त्वा दक्षिणां विभवावधि।
सर्वसिद्धिर्भवेद्विद्वान् सर्वदेवनमस्कृतः ॥ १७४ ॥

पूर्वोक्त क्रम मार्ग से आसन का संस्कार करे। पूर्ववत् महाकालादि देवताओं को बलि देवे। सम्प्रदायानुसार पूजा कर स्थिर चित्त से नङ्गा होकर दश हजार की संख्या में जप करे। जप के अन्त में अपने विभव के अनुसार दक्षिणा देना चाहिये। ऐसा करने से सब प्रकार की सिद्धि हो जाती है ॥ १७२-१७४ ॥

पूर्ववद्वीरवेशेन यात्रां कृत्वा सुसाधकः।
साधकैः सह सामग्रीं पूजायां विविधां तथा ॥ १७५ ॥

अब अन्य पुरश्चरण कहते हैं—सर्वदेवनमस्कृत विद्वान् सुसाधक पूर्ववद् वीर वेश बनाकर साधकों के साथ यात्रा करे। साथ में पूजा के लिये नाना प्रकार की सामग्री भी एकत्रित करे ॥ १७५ ॥

स्थाने पूर्वोदिते वीरः शवं चैव समानयेत्।
वर्मास्त्रमनुना हस्तप्रमाणं चतुरस्रकम् ॥ १७६ ॥
लिखित्वा मण्डलं तत्र तेनैव स्थापयेच्छवम्।
ततो नाथयुगन्त्राहि युगलं तदनन्तरम् ॥ १७७ ॥
मम कार्यं कुरु स्वाहा अस्त्राय फट् ततः परम्।
इत्यात्मानं शवं चैव वेष्टयित्वा च साधकः ॥ १७८ ॥

फिर वह वीर साधक पूर्वोक्त स्थान में शव ले आवे और उसकी पीठ पर चौकोर चिह्न वर्म (हुं) अस्त्र (फट्) इस मन्त्र से निर्माण करे। फिर मण्डल पर पुर्व क्रम के अनुसार अधोमुख शव स्थापित करे। फिर 'नाथ नाथ त्राहि त्राहि मम कार्य कुरु स्वाहा अस्त्राय फट्' इस मन्त्र से प्रयोगकर्त्ता साधक अपने को तथा शव को भी वेष्टित करे ॥ १७६-१७८ ॥

रेखात्रयं प्रकुर्वीत बलिं पश्चान्निवेदयेत् ।
डाकिनीहाकिनीभ्यश्च शाकिनीभ्योऽपि सन्दिशेत् ॥ १७९ ॥
समांसमधुसंयुक्तं पूर्वपश्चिमयोगतः ।
वामदेवाय दत्त्वा वै रक्तदन्ताय दापयेत् ॥ १८० ॥

फिर तीन रेखा बनावे उसके पश्चात् डाकिनी, शाकिनी एवं हाकिनी का आवाहन करे और उन्हें बलि देवे । फिर पूर्व से पश्चिम तक मांस मधु मिश्रित बलि वामदेव को देकर रक्तदन्त को भी देवे ॥ १७९-१८० ॥

तेजसे च बलित्रयं घृतमिरं सशर्करम् ।
दक्षिणे रुद्रकालाय वज्रनाभाय सन्दिशेत् ॥ १८१ ॥
सपिष्टकं घृतान्नञ्च यवपिष्टञ्च दापयेत् ।
उत्तरस्याञ्च वह्नये दत्त्वा च बलिरूपिणे ॥ १८२ ॥
गुडौदनं पायसञ्च बलिं निवेद्य साधकः ।
ततः सम्पूजयेद् देवीं स्वकल्पोक्तविधानतः ॥ १८३ ॥

फिर तेज को शर्करा और घृत मिश्रित तीन बलि देवे दक्षिण दिशा में रुद्र काल और वज्रनाभ को अपूप एवं घृतान्न तथा यवपिष्ट की बलि देवे । फिर उत्तर दिशा में बलि रूप धारण करने वाले अग्नि के लिये गुड़, ओदन और पायस की बलि देकर साधक अपने सम्प्रदायानुसार देवी की पूजा करे ॥ १८१-१८३ ॥

अस्त्रमन्त्रेण संस्थाप्य शवं तैलहरिद्रया ।
उद्वर्त्तनं ततः कृत्वा स्नापयित्वा तु साधकः ॥ १८४ ॥
सम्मार्ज्य वाससा तत्र महाप्रेतासनं यजेत् ।
जीवन्यासं विधायाथ पाद्यादिभिः प्रपूजयेत् ॥ १८५ ॥

फिर अस्त्र (फट्) मन्त्र से शव स्थापित कर तेल मिश्रित हरिद्रा से उसको उपटन लगावे, स्नान करावे । वस्त्र से उसे पोंछे, उस महाप्रेतासन की पूजा निम्न प्रकार से करे । उसमें प्राणप्रतिष्ठा कर पाद्यादि से पूजा करे ॥ १८४-१८५ ॥

मूलेन जुटिकां बद्ध्वा पद्मं पूर्ववदालिखेत् ।
आसनं पूर्ववत् क्षिप्त्वा मूलमुच्चार्य साधकः ॥ १८६ ॥
अश्वारोहणरूपेण स्थित्वा मन्त्रं जपेत् सुधीः ।
अनन्यमानसो भूत्वा जपात् सिद्धिः प्रजायते ॥ १८७ ॥

मूल मन्त्र से शव के केश बाँधकर केश की जटा बनावे । फिर आसन पर कमल का चिह्न बनाकर पूर्ववत् उसे स्थापित करे । जिस प्रकार घोड़ा की सवारी की जाती है उसी प्रकार, उस आसन पर मूल मन्त्र पढ़कर बैठकर सुधी साधक

मन्त्र का जप करे । यदि अनन्य मन (स्थिर चित्त) से जप किया जाय तो सिद्धि हो जाती है ॥ १८६-१८७ ॥

**भीतश्चेत् साधकस्तत्र गुरुपादयुगं स्मरेत् ।**
**गुरुपादप्रसादेन मा हिंसन्ति च हिंसकाः ॥ १८८ ॥**

यदि साधक को भय मालूम पड़े, तो अपने गुरु के चरण कमलों का स्मरण करे । गुरु के चरण कमल की कृपा से हिंसक जन्तु हिंसा नहीं करते ॥ १८८ ॥

**इति चित्तं स्थिरीकृत्य जपेन्मन्त्रमनन्यधीः ।**
**देवता यदि वामे वै आगच्छति कदाचन ॥ १८९ ॥**
**सम्भाषणा च कार्या वै न दातव्यं प्रियं वचः ।**
**हुङ्कारिणैव तां कुर्यात् स्वदक्षे साधकोत्तमः ॥ १९० ॥**

इस प्रकार चित्त स्थिर कर एकाग्र हो मन्त्र का जप करे । यदि कदाचित् बाईं ओर से देवता उपस्थित हों और उनसे सम्भाषण करें किन्तु प्रिय न बोले, तो उन्हें उत्तम साधक अपने हुङ्कार से अपने दाहिने कर देवे ॥ १८९-१९० ॥

**गत्वा च दक्षिणे सापि देहि देहीति भाषिते ।**
**तथापि च बलिं दत्त्वा अशक्तौ मनसाऽथवा ॥ १९१ ॥**

वह देवता दक्षिण भाग में जाकर यदि 'देहि देहि' ऐसा कहे तभी उन्हें बलि देवे । अशक्त होने पर मन से ही बलि देवे ॥ १९१ ॥

**लब्ध्वाभीष्टं निजं वीरो गुरवे दक्षिणां ददेत् ।**
**शवादिकञ्जले क्षिप्त्वा गृहं गच्छेत् यथासुखम् ॥ १९२ ॥**

तदनन्तर उस देवता से अपना अभीष्ट प्राप्त कर वीर साधक गुरु को दक्षिणा प्रदान करे । शव को जल में फेंक देवे और सुखपूर्वक अपने घर जावे ॥ १९२ ॥

**बटमूले शवं नीत्वा तत्र देवीं प्रपूज्य च ।**
**स्नात्वा तत्र मनुं जप्त्वा अयुतं साधकोत्तमः ॥ १९३ ॥**
**सर्वसिद्धीश्वरो वीरो भवेन्नात्र विकल्पनम् ।**
**बिल्वमूले निजक्रोडे शवमारोप्य यत्नतः ॥ १९४ ॥**
**नृसिंहमुद्रया वीक्ष्य जपेन्मातृकया सुधीः ।**
**सहस्रं तत्र जप्त्वा वै सर्वसिद्धीश्वरो भवेत् ॥ १९५ ॥**

अब **सिद्धि का अन्य उपाय** कहते हैं—वट वृक्ष के मूल के नीचे शव लाकर उसपर देवी की पूजा करे । स्नान कर दश हजार मन्त्र जप कर वीर साधक सभी सिद्धियों का ईश्वर बन जाता है, इसमें सन्देह न करे । (अन्य उपाय) बेल के पेड़

रेखात्रयं प्रकुर्वीत बलिं पश्चान्निवेदयेत् ।
डाकिनीहाकिनीभ्यश्च शाकिनीभ्योऽपि सन्दिशेत् ॥ १७९ ॥
समांसमधुसंयुक्तं पूर्वपश्चिमयोगतः ।
वामदेवाय दत्त्वा वै रक्तदन्ताय दापयेत् ॥ १८० ॥

फिर तीन रेखा बनावे उसके पश्चात् डाकिनी, शाकिनी एवं हाकिनी का आवाहन करे और उन्हें बलि देवे । फिर पूर्व से पश्चिम तक मांस मधु मिश्रित बलि वामदेव को देकर रक्तदन्त को भी देवे ॥ १७९-१८० ॥

तेजसे च बलित्रयं घृतमिरं सशर्करम् ।
दक्षिणे रुद्रकालाय वज्रनाभाय सन्दिशेत् ॥ १८१ ॥
सपिष्टकं घृतान्नञ्च यवपिष्टञ्च दापयेत् ।
उत्तरस्याञ्च वह्नये दत्त्वा च बलिरूपिणे ॥ १८२ ॥
गुडौदनं पायसञ्च बलिं निवेद्य साधकः ।
ततः सम्पूजयेद् देवीं स्वकल्पोक्तविधानतः ॥ १८३ ॥

फिर तेज को शर्करा और घृत मिश्रित तीन बलि देवे दक्षिण दिशा में रुद्र काल और वज्रनाभ को अपूप एवं घृतान्न तथा यवपिष्ट की बलि देवे । फिर उत्तर दिशा में बलि रूप धारण करने वाले अग्नि के लिये गुड़, ओदन और पायस की बलि देकर साधक अपने सम्प्रदायानुसार देवी की पूजा करे ॥ १८१-१८३ ॥

अस्त्रमन्त्रेण संस्थाप्य शवं तैलहरिद्रया ।
उद्वर्त्तनं ततः कृत्वा स्नापयित्वा तु साधकः ॥ १८४ ॥
सम्मार्ज्य वाससा तत्र महाप्रेतासनं यजेत् ।
जीवन्यासं विधायाथ पाद्यादिभिः प्रपूजयेत् ॥ १८५ ॥

फिर अस्त्र (फट्) मन्त्र से शव स्थापित कर तेल मिश्रित हरिद्रा से उसको उपटन लगावे, स्नान करावे । वस्त्र से उसे पोंछे, उस महाप्रेतासन की पूजा निम्न प्रकार से करे । उसमें प्राणप्रतिष्ठा कर पाद्यादि से पूजा करे ॥ १८४-१८५ ॥

मूलेन जुटिकां बद्ध्वा पद्मं पूर्ववदालिखेत् ।
आसनं पूर्ववत् क्षिप्त्वा मूलमुच्चार्य साधकः ॥ १८६ ॥
अश्वारोहणरूपेण स्थित्वा मन्त्रं जपेत् सुधीः ।
अनन्यमानसो भूत्वा जपात् सिद्धिः प्रजायते ॥ १८७ ॥

मूल मन्त्र से शव के केश बाँधकर केश की जटा बनावे । फिर आसन पर कमल का चिह्न बनाकर पूर्ववत् उसे स्थापित करे । जिस प्रकार घोड़ा की सवारी की जाती है उसी प्रकार, उस आसन पर मूल मन्त्र पढ़कर बैठकर सुधी साधक

मन्त्र का जप करे। यदि अनन्य मन (स्थिर चित्त) से जप किया जाय तो सिद्धि हो जाती है ॥ १८६-१८७ ॥

**भीतश्चेत् साधकस्तत्र गुरुपादयुगं स्मरेत् ।**
**गुरुपादप्रसादेन मा हिंसन्ति च हिंसकाः ॥ १८८ ॥**

यदि साधक को भय मालूम पड़े, तो अपने गुरु के चरण कमलों का स्मरण करे। गुरु के चरण कमल की कृपा से हिंसक जन्तु हिंसा नहीं करते ॥ १८८ ॥

**इति चित्तं स्थिरीकृत्य जपेन्मन्त्रमनन्यधीः ।**
**देवता यदि वामे वै आगच्छति कदाचन ॥ १८९ ॥**
**सम्भाषणा च कार्या वै न दातव्यं प्रियं वचः ।**
**हुङ्कारेणैव तां कुर्यात् स्वदक्षे साधकोत्तमः ॥ १९० ॥**

इस प्रकार चित्त स्थिर कर एकाग्र हो मन्त्र का जप करे। यदि कदाचित् बाईं ओर से देवता उपस्थित हों और उनसे सम्भाषण करें किन्तु प्रिय न बोले, तो उन्हें उत्तम साधक अपने हुङ्कार से अपने दाहिने कर देवे ॥ १८९-१९० ॥

**गत्वा च दक्षिणे सापि देहि देहीति भाषिते ।**
**तथापि च बलिं दत्त्वा अशक्तौ मनसाऽथवा ॥ १९१ ॥**

वह देवता दक्षिण भाग में जाकर यदि 'देहि देहि' ऐसा कहे तभी उन्हें बलि देवे। अशक्त होने पर मन से ही बलि देवे ॥ १९१ ॥

**लब्ध्वाभीष्टं निजं वीरो गुरवे दक्षिणां ददेत् ।**
**शवादिकञ्जले क्षिप्त्वा गृहं गच्छेत् यथासुखम् ॥ १९२ ॥**

तदनन्तर उस देवता से अपना अभीष्ट प्राप्त कर वीर साधक गुरु को दक्षिणा प्रदान करे। शव को जल में फेंक देवे और सुखपूर्वक अपने घर जावे ॥ १९२ ॥

**बटमूले शवं नीत्वा तत्र देवीं प्रपूज्य च ।**
**स्नात्वा तत्र मनुं जप्त्वा अयुतं साधकोत्तमः ॥ १९३ ॥**
**सर्वसिद्धीश्वरो वीरो भवेन्नात्र विकल्पनम् ।**
**बिल्वमूले निजक्रोडे शवमारोप्य यत्नतः ॥ १९४ ॥**
**नृसिंहमुद्रया वीक्ष्य जपेन्मातृकया सुधीः ।**
**सहस्रं तत्र जप्त्वा वै सर्वसिद्धीश्वरो भवेत् ॥ १९५ ॥**

अब **सिद्धि का अन्य उपाय** कहते हैं—वट वृक्ष के मूल के नीचे शव लाकर उसपर देवी की पूजा करे। स्नान कर दश हजार मन्त्र जप कर वीर साधक सभी सिद्धियों का ईश्वर बन जाता है, इसमें सन्देह न करे। (अन्य उपाय) बेल के पेड़

के नीचे शव को अपनी गोद में यत्नपूर्वक स्थापित कर, उसे नृसिंह मुद्रा से देखकर, मातृका मन्त्र से एक सहस्र की संख्या में जप करे, तो वह तत्त्वज्ञ साधक सर्वसिद्धीश्वर हो जाता है ॥ १९३-१९५ ॥

**जानुमध्ये करौ कृत्वा चिबुकोष्ठौ समावृतौ ।**
**हस्तौ च भूमिसंलग्नौ कम्पमानः पुनः पुनः ॥ १९६ ॥**
**मुखं विवृतकं कुर्यात् लेलिहानञ्च जिह्वया ।**
**नारसिंही भवेन्मुद्रा सर्वसिद्धिप्रदायिका ॥ १९७ ॥**

दोनों हाथ जानु के मध्य में रखकर, चिबुक को ओष्ठ से बन्द कर हाथ को भूमि में लगाकर बारम्बार कम्पन करे और मुख को फैला कर साधक जीभ को लपलपाता रहे, तो यह नारसिंही मुद्रा कही जाती है जो समस्त सिद्धियाँ प्रदान करने वाली कही गई है ॥ १९६-१९७ ॥

**सहस्रं तत्र जप्त्वा वै सर्वसिद्धीश्वरो भवेत् ।**
**कुङ्कुमागुरुकस्तूरीरोचनाघनचन्दनम् ॥ १९८ ॥**
**कर्पूरं पद्मकाष्ठञ्च केशरं हरिचन्दनम् ।**
**एकत्र साधितं कृत्वा प्रत्येकं साधयेन्नरः ॥ १९९ ॥**

वहाँ बैठकर साधक उस मुद्रा से यदि एक सहस्र जप करे तो वह सिद्धीश्वर बन जाता है। प्रयोगकर्त्ता साधक कुङ्कुम, अगुरु, कस्तूरी, रोचना, घन, चन्दन, कपूर, पद्मकाष्ठ, नागकेशर और हरिचन्दन इनको एक में मिलाकर रखे और अलग-अलग भी रखे ॥१९८-१९९ ॥

**विद्युदग्नियुतं चैव नेत्रान्तं चन्द्रविन्दुयुक् ।**
**बीजं प्रत्येकं द्रव्याणां मिलितानाञ्च साधकः ॥ २०० ॥**
**मूलमन्त्रं च मन्त्रज्ञो जपेत् साष्टसहस्रकम् ।**
**अस्य तिलकमात्रेण राजानं वशमानयेत् ॥ २०१ ॥**

अग्नि (रेफ) से युक्त विद्युत् (?) चन्द्र विन्दु (अनुस्वार) से युक्त नेत्रान्त (?) फिर प्रत्येक द्रव्यों के बीज मन्त्र एवं उन मिलित द्रव्यों के बीज मन्त्र, फिर मूल मन्त्र का जप साधक आठ सहस्र करे और उक्त द्रव्यों का तिलक देवे तो राजा को भी वश में किया जा सकता है ॥ २००-२०१ ॥

**जिह्वाग्रे रुधिरं वीर आकाशे स्वयमाहरेत् ।**
**तेनैव गुटिकां कृत्वा तत्र कालीं प्रपूजयेत् ॥ २०२ ॥**

जिह्वा आकाश (बाहर) में कर उसके अग्रभाग से स्वयं रुधिर निकाल कर उसकी गुटिका (गोली) बनाकर उससे काली का पूजन करे ॥ २०२ ॥

नीलां नीलपताकाञ्च लोलजिह्वां कपालिनीम् ।
जिह्वाग्रे रुधिरं गृह्ण चामुण्डे घोरनिःस्वने ॥ २०३ ॥
बलिं गृह्ण वरं देहि रुधिरं गगनेऽमले ।
कालि कालि प्रचण्डोग्रे ततोऽस्त्रं कवचं ततः ॥ २०४ ॥
कालिकेति समाख्याता वीराणां हितकाम्यया ।
कूर्चयुग्मं तु नीलायाः कथितं मन्त्रमुत्तमम् ॥ २०५ ॥

**नीला मन्त्रोद्धार**—अब पूजन के लिये काली का मन्त्र कहते हैं—नीलां नीलपताकां च........प्रचण्डोग्रे पर्यन्त श्लोक मन्त्र पढ़कर अस्त्र (फट्), फिर कवच (हुं) पढ़े । यह वीर साधकों के हित के लिये कालिका का महामन्त्र कहा गया है । दो बार कूर्च (हुं हुं) यह नीला का मन्त्र कहा गया है ॥ २०३-२०५ ॥

वियद्भृगुरमां चैव बलमिन्द्ररवी रतिः ।
चन्द्रखण्डसमीयुक्तं ततो नीलपदं ततः ॥ २०६ ॥
पताके हुं फडन्तः स्यात् पूर्वकूटमनुर्मतः ।
सन्तप्तेयं महाविद्या कथिता सुरदुर्लभा ॥ २०७ ॥
जय श्रीधरणीदेवी पताके वरणस्थले ।
तेन नीलपताकेयं संयोज्या नीलसाधने ॥ २०८ ॥

**सन्तप्त महाविद्या**—वियद् (हं), भृगु (सं), रमा (श्रीं), बल (?), इन्द्र (ल), रवि (मं), रति (णं) इनको चन्द्र खण्ड अनुस्वार से युक्त करे । इसके बाद 'नील' पद का उच्चारण करे फिर 'पताके हुं फट्' यह पूर्वकूट मन्त्र कहा जाता है । यह सन्तप्ता महाविद्या कही गई है जो देवताओं के लिये भी दुर्लभ है । नील साधना के समय 'पताके' के वरणस्थल में 'जय श्री धरणी नीलपताके' इतना जोड़ देना चाहिये ॥ २०६-२०८ ॥

श्रीशक्तिस्मरबीजानि तदन्ते हूमिति स्मरेत् ।
भृगुं सर्गान्वितं पश्चाद्दीर्घं कवचमुद्धरेत् ॥ २०९ ॥
उग्रचण्डे पदं पश्चान्मामन्ते रक्षयुग्मकम् ।
मम शत्रुपदस्यान्ते ततो भक्षपदं वदेत् ॥ २१० ॥
ह्रीं क्लीं सः इत्यन्ते श्रीशक्तिस्मरबीजानि तदन्ते ।
राज्यं मे देहि सम्भाष्य भृगुं सर्गान्वितं वदेत् ॥ २११ ॥
क्लींकारञ्च ततो ब्रूयात् कामं मायां रमान्ततः ।
एकचत्वारिंशदर्णो मनुः प्रोक्तो ध्रुवादिकः ॥ २१२ ॥

**उग्र चण्डा महाविद्या**—'ॐ, श्रीबीज (श्रीं), शक्ति (ह्रीं), स्मर बीज (क्लीं),

इसके बाद 'हूं', फिर सर्गयुक्त भृगु (सः), फिर दीर्घ कवच (हूं), फिर 'उग्रचण्डे मां रक्ष रक्ष मम शत्रुं भक्षय ह्रीं क्लीं सः श्रीं ह्रीं क्लीं राज्यं मे देहि सः क्लीं' फिर काम (क्लीं), फिर माया (ह्रीं), फिर रमा (श्रीं) कहे और आदि में ॐ लगावे। यह एकतालिस अक्षरों का मन्त्र कहा गया है। इसके आदि में ध्रुव (ॐ) लगाना चाहिये ॥ २०९-२१२ ॥

**उग्रचण्डा महाविद्या लोलजिह्वेति कीर्त्तिता।**
**या सा विद्या महातारा सा करालेति कीर्त्तिता ॥ २१३ ॥**

इसे उग्रचण्डा महाविद्या अथवा लोल जिह्वा विद्या कहा जाता है और जो महातारा विद्या है उसे कराला विद्या कहा जाता है ॥ २१३ ॥

**महातारामन्त्रोद्धारः**

**प्रणवं पूर्वमुद्धृत्य तारे तु तारे च तथा।**
**नमः स्वाहेति मन्त्रोऽयं दशाक्षर उदीरितः ॥ २१४ ॥**
**कथिता च महातारा सर्वसिद्धिप्रदायिका।**
**एभिरामन्त्रितं चैव मूलेनैव सहस्रकम् ॥ २१५ ॥**
**ललाटे तिलकं कृत्वा साधको वीतभीः स्वयम्।**

**महातारा मन्त्रोद्धार**—पहले प्रणव (ॐ), फिर तारे तु तारे, फिर 'नमः स्वाहा', यह दश अक्षर का मन्त्र है इसे महातारा मन्त्र कहा जाता है जो सम्पूर्ण सिद्धियों को प्रदान करती है। इनको पहले लगाकर मूल मन्त्र का सहस्र बार जप करे। इस मन्त्र का जप ललाट में तिलक लगाकर करने से साधक निर्भय हो जाता है ॥ २१४-२१६ ॥

**महाष्टमीनवम्योस्तु संयोगे पुरतः स्थितः ॥ २१६ ॥**
**छागमहिषमेषाणां चतुर्दिक्ष शवान् क्षिपेत्।**
**कबन्धं मुण्डपुञ्जञ्च दीपादिभिरलंकृतम् ॥ २१७ ॥**
**मध्ये कबन्धमास्तीर्य तत्र गन्धर्वरूपधृक्।**
**ताम्बूलपूरवक्त्रञ्च अञ्जनाञ्चितलोचनम् ॥ २१८ ॥**
**कृत्वा तारं मनुं जप्त्वा सर्वसिद्धीश्वरो भवेत्।**

जब महाष्टमी एवं महानवमी का संयोग हो, तब देवी के आगे खड़े होकर बकरा, भैंस और भेंड़ का मांस चारों ओर फेंक देवे। कबन्ध तथा मुण्डपुञ्ज पर दीपक जलाकर उसे अलंकृत करे। फिर कबन्ध के मध्य में बैठकर गन्धर्व का नग्न रूप धारण करे। मुख ताम्बूल से पूर्ण करे आँखों में अञ्जन लगावे। इस प्रकार अपना स्वरूप बनाकर तार मन्त्र का जप करे तो वह सर्वसिद्धीश्वर बन

जाता है ॥ २१६-२१९ ॥

**अथ पूर्वोदिते स्थाने चतुष्पथे विशेषतः ॥ २१९ ॥**
**ऊर्ध्वं द्विवर्षाद्यदि वा पञ्च वा तरुणं यदि ।**
**सप्तमाष्टममासीयं गर्भजं यदि वा शवम् ॥ २२० ॥**
**चाण्डालश्चाभिभूतं तु शीघ्रसिद्धिफलप्रदम् ।**
**आनीय स्थापयेदादौ न्यासजालं समाचरेत् ॥ २२१ ॥**
**प्रेतमन्त्रं समालिख्य गन्धपुष्पादिभिस्तथा ।**
**अभ्यर्च्य चाऽऽसनं दत्त्वा रक्षामात्मनि कारयेत् ॥ २२२ ॥**

अब अन्य विधान कहते हैं । पूर्वोक्त किसी स्थान में विशेषकर चौराहे पर दो वर्ष से ऊपर पाँच वर्ष तक, अथवा युवावस्था, अथवा सात महीने, या आठ महीने का गर्भजात शिशु चाण्डाल अथवा नीच जाति का हो तो शीघ्र सिद्धि का फल प्राप्त हो जाता है । उस प्रकार के शव को ले आकर स्थापित करे । फिर न्यास जाल करे । उस पर प्रेत मन्त्र लिखकर गन्ध पुष्पादि द्वारा उसकी पूजा करे और उस पर आसन रखकर आत्म रक्षा करे ॥ २१९-२२२ ॥

### शवसाधनेन सर्वसिद्धिः

**ततः शवास्ये विधिवद्देवताप्यायनं ततः ।**
**ततो जप्त्वा सर्वमन्त्र सर्वसिद्धीश्वरो भवेत् ॥ २२३ ॥**

फिर शव के मुख में देवता का आप्यायन करे । तदनन्तर सर्व मन्त्र का जप कर सर्व सिद्धीश्वर बन जाता है ॥ २२३ ॥

**तारं शब्दं मृतकाय नमोऽन्तं मन्त्रमुच्चरन् ।**
**शवस्थापनमन्त्रोऽयं शवासनमनुं ततः ॥ २२४ ॥**
**मूलान्ते भुवनेशी स्यात् फडन्तो मन्त्र ईरितः ।**
**करकाञ्चीं समादाय मुण्डमालाविभूषितः ॥ २२५ ॥**
**तेनैव तिलकं कृत्वा तत्तद्भस्मविभूषितः ।**
**श्मशाने च सकृज्जप्त्वा सर्वसिद्धीश्वरो भवेत् ॥ २२६ ॥**

तार (ॐ), शब्द (ऐं), मृतकाय नमः'—यह शव स्थापन मन्त्र है । इसके बाद शवासन मन्त्र इस प्रकार है—प्रथम मूल, उसके बाद भुवनेशी, फिर फट्, यह शवासन मन्त्र कहा गया है । शव के हाथ की काञ्ची पहने, उसके मुण्डों की माला पहने, उसी शव का तिलक लगावे, तत्तद् भस्म से विभूषित होकर श्मशान में एक बार के जप से भी साधक सर्वसिद्धीश्वर बन जाता है ॥ २२४-२२६ ॥

**मत्स्यमानीय वीरेन्द्रो निःक्षिपेत् पितृकानने ।**

**तत्र सकृज्जपित्वा तु देवतामेलनं भवेत् ॥ २२७ ॥**

वीर साधक मत्स्य लाकर श्मशान में चारों ओर फेंक देवे। वहाँ एक बार भी जप करे तो साक्षात् देवता प्राप्त हो जाते हैं ॥ २२७ ॥

**तत्र नत्वा महादेवं महादेवीञ्च साधकः ।**
**तद्भस्मतिलकं कृत्वा स्वयं वीरेश्वरो भवेत् ॥ २२८ ॥**

फिर साधक वहाँ महादेव और महादेवी को नमस्कार कर शव के भस्म का तिलक लगावे तो साधक स्वयं वीरेश्वर बन जाता है ॥ २२८ ॥

**निशायां मृतहट्टे च उन्मत्तानन्दभैरवः ।**
**दिग्वासा विमलो भस्मभूषणो मुक्तकेशकः ॥ २२९ ॥**
**कपाली खड्गहस्तश्च जपेन्मातृकया सुधीः ।**
**तदा तस्य महासिद्धिर्जायते शतजापतः ॥ २३० ॥**

रात्रि के समय श्मशान पर जहाँ आनन्द भैरव का निवास है, वहाँ नङ्गा होकर पापरहित हो, भस्म से भूषित हो, केश को खुला रखकर, कपाल एवं खड्ग हाथ में धारण कर मातृका अक्षरों से सुधी साधक जप करे। इस प्रकार केवल सौ संख्याक जप से महासिद्धि प्राप्त हो जाती है ॥ २२९-२३० ॥

**डाकिनीं योगिनीं वापि अन्यां वा भूतलाङ्गनाम् ।**
**तत्राऽप्यानीय सम्पूज्य गजान्तकसहस्रकम् ॥ २३१ ॥**
**जप्त्वा च साधकश्रेष्ठः सर्वसिद्धीश्वरो भवेत् ।**
**महाशवाः प्रशस्ताः स्युः प्रधानशवसाधने ॥ २३२ ॥**

डाकिनी, योगिनी, अथवा अन्य पृथ्वी पर रहने वाली अङ्गना को उस स्थान पर लाकर, पूजा कर, एक हजार जप करे, तो साधक सर्व-सिद्धियों का ईश्वर बन जाता है। प्रधान शव साधन में महाशव प्रशस्त कहे गये हैं ॥ २३१-२३२ ॥

**क्षुद्राः प्रयोगकर्तॄणां प्रशस्ताः सर्वसिद्धिदाः ।**
**सर्वेषां जीवहीनानां जन्तूनां नीलसाधने ॥ २३३ ॥**
**ब्राह्मणं गोमयं त्यक्त्वा साधयेद्वीरसाधनम् ।**
**एवं नीलक्रमं चैव कथितञ्च शुभावहम् ॥ २३४ ॥**

केवल प्रयोग करने वालों के लिये क्षुद्र शव प्रशस्त हैं और सम्पूर्ण सिद्धि प्रदान करते हैं। नील के साधन में सभी जन्तुओं के शव, ब्राह्मण और गौ को छोड़कर प्रशस्त कहे गये हैं। अतः उनसे वीर साधना करे। इस प्रकार नील क्रम जो अत्यन्त कल्याणकारी है, हमने कहा ॥ २३३-२३४ ॥

न कस्मैचित्प्रवक्तव्यं मन्त्रसिद्धेश्च कारणम् ।
कुजे वा शनिवारे वा नरमुण्डं समाहितः ॥ २३५ ॥
पञ्चगव्येन मिलितं चन्दनाद्यैर्विलेपितम् ।
निःक्षिप्य भूमौ हस्तार्धमानतः काननान्तरे ॥ २३६ ॥
तत्र तद्दिवसे रात्रौ सहस्रं यदि मानवः ।
एकाकी प्रजपेन्मन्त्रं स भवेत् कल्पपादपः ॥ २३७ ॥

मन्त्र सिद्धि में कहे गये उपर्युक्त कारणों को किसी भी व्यक्ति से नहीं कहना चाहिये । मङ्गलवार अथवा शनिवार के दिन स्थिर चित्त हो नरमुण्ड को पञ्चगव्य से शुद्ध करे और चन्दनादि का लेप करे । फिर उसे किसी वन में भूमि के भीतर आधा हाथ गड्ढा खोदकर गाड़ देवे । वहाँ यदि मनुष्य उसी दिन से रात्रि पर्यन्त अकेले यदि मनुष्य एक सहस्र की संख्या में जप करे तो वह साधक साक्षात् कल्पवृक्ष हो जाता है ॥ २३५-२३७ ॥

शवमानीय तद्द्वारि तत्रैव परिखन्य च ।
तद्दिनात्तद्दिनं यावत्तावदष्टोत्तरं शतम् ॥ २३८ ॥
स भवेत् सर्वसिद्धीशो नात्र कार्या विचारणा ।
अथवा विजनेऽरण्येऽस्थिशय्यासनो नरः ॥ २३९ ॥
उदयास्तं दिवा जप्त्वा सर्वसिद्धीश्वरो भवेत् ।

शव लाकर उसके द्वार पर खनकर गाड़ देवे । उस दिन से लेकर पुनः आगामी उस दिन तक केवल १०८ संख्या में जप करे, तो वह सर्वसिद्धीश बन जाता है, इसमें सन्देह नहीं । अथवा विजन वन प्रदेश में अस्थिशय्या का आसन बनाकर दिन में सूर्योदय से लेकर सूर्यास्त पर्यन्त जप करने वाला सर्व सिद्धीश्वर बन जाता है ॥ २३८-२४० ॥

अष्टम्याञ्च चतुर्दश्यां पक्षयोरुभयोरपि ॥ २४० ॥
सूर्योदयात् समारभ्य यावत् सूर्योदयान्तरम् ।
तावज्जप्त्वा निरातङ्कः सर्वसिद्धीश्वरो भवेत् ॥ २४१ ॥

दोनों पक्ष में होने वाली अष्टमी और चतुर्दशी तिथि को सूर्योदय से लेकर दूसरे दिन सूर्योदय पर्यन्त जप करे, तो सभी आतङ्कों से रहित होकर सर्व सिद्धीश्वर हो जाता है ॥ २४०-२४१ ॥

### चन्द्रसूर्यग्रहणे पुरश्चरणविधानम्

ग्रहणे चन्द्रसूर्यस्य शुचिः पूर्वमुपोषितः ।
नद्यां समुद्रगामिन्यां नाभिमावस्थितेऽम्भसि ॥ २४२ ॥

यद्वा शुद्धोदके स्नात्वा शुचौ देशे समाहितः ।
ग्रासाद्विमुक्तिपर्यन्तं जपं कुर्यादनन्यधीः ॥ २४३ ॥

चन्द्र सूर्य के ग्रहण काल में, पूर्व काल से ही पवित्र होकर उपवास करते हुये, समुद्रगामिनी नदी के जल में, नाभि मात्र स्थित होकर, अथवा किसी शुद्धोदक से स्नान कर, किसी पवित्र देश में, समाहित हो, ग्रास लगने से आरम्भ कर ग्रहण के मुक्ति पर्यन्त दत्तचित्त हो जप करे ॥ २४२-२४३ ॥

अनन्तरं दशांशेन क्रमाद्धोमादिकञ्चरेत् ।
तदन्ते महतीं पूजां कुर्याद् ब्राह्मणभोजनम् ॥ २४४ ॥
ततश्च मन्त्रसिद्धं तु गुरुं सम्पूज्य तोषयेत् ।
सूर्यग्रहणकालाद्धि नान्यः कालः प्रशस्यते ॥ २४५ ॥

इसके बाद जप के दशांश से होम करे । उसके बाद भगवती की पूजा कर ब्राह्मण भोजन करावे । इसके बाद गुरु की पूजाकर उन्हें सन्तुष्ट करे तो उसे सिद्धि प्राप्त हो जाती है । अतः इस कार्य में सूर्य ग्रहण काल को छोड़कर अन्य काल प्रशस्त नहीं बतलाया गया है ॥ २४३-२४५ ॥

तत्र यद्यत् कृतं कर्म अनन्तफलदं भवेत् ।
शरत्काले चतुर्थ्यादि नवम्यन्तं विशेषतः ॥ २४६ ॥
भक्तितः पूजयित्वा च रात्रौ तावत् सहस्रकम् ।
जपेदेकाकी विजने केवलं तिमिरालये ॥ २४७ ॥
अष्टम्यादि नवम्यन्तमुपवासपरो भवेत् ।
स भवेत् सर्वसिद्धीशो नात्र कार्या विचारणा ॥ २४८ ॥

उस ग्रहण काल में जो-जो भी कार्य किया जाता है, वह अनन्त फलदायी होता है। शरत्काल के आने पर, विशेष कर चतुर्थी से लेकर नवमी पर्यन्त, रात्रि काल में, भक्तिपूर्वक भगवती की पूजा कर, अकेले किसी निर्जन वन में, घोर अन्धकार होने पर जप करे । अष्टमी के आदि से लेकर नवमी के अन्त तक उपवास करे तो वह साधक सर्वसिद्धीश बन जाता है, इसमें किसी प्रकार के विचार की आवश्यकता नहीं ॥ २४६-२४८ ॥

अष्टमीसन्धिवेलायामष्टोत्तरलतागृहम् ।
प्रविश्य मन्त्री विधिवत्ताः समभ्यर्च्य यत्नतः ॥ २४९ ॥
स्वकल्पोक्तविधानेन पूजयित्वा च साधकः ।
केवलं कामभावेन जपेदष्टोत्तरं शतम् ॥ २५० ॥
तासाञ्च पत्रमूलेन उल्कां संगृह्य कर्णके ।

**महासिद्धिर्भवेत् सद्यो लतादर्शनपूजनात् ॥ २५१ ॥**

अष्टमी के दिन सन्ध्या के समय १०८ लताओं वाले गृह में जाकर मन्त्रज्ञ साधक जाकर, प्रयत्नपूर्वक अपने सम्प्रदायानुसार पूजाकर, केवल कामभाव से एक-सौ आठ संख्या में, उन लताओं के पत्र के मूल का उल्का कान में लगाकर जप करे । इस प्रकार पुनः लता का पूजन और दर्शन करे तो उसे महासिद्धि होती है ॥ २४९-२५१ ॥

**कुलाष्टकं लतागारे लिखित्वा यन्त्रमेव च ।**
**प्रपूज्य तत्र संस्कारं कृत्वा तस्यै निवेदयेत् ॥ २५२ ॥**
**किञ्चिज्जप्त्वा मनुं नीत्वा देवताभावनापरः ।**
**तां विसृज्य नमस्कृत्य स्वयं जप्त्वा सुसंयतः ॥ २५३ ॥**
**प्रीतः स्त्रीभ्यो बलिं दत्त्वा मन्त्रसिद्धिर्न संशयः ।**

लतागृह में कुलाष्टक यन्त्र लिखकर, फिर संस्कार कर उसकी पूजा करे । फिर भगवती को निवेदन करे । फिर देवता की भावना में तत्पर हो कर, कुछ जप कर, नमस्कार कर, उसका विसर्जन करे । फिर सुसंयत होकर, स्त्रियों के साथ जप कर, प्रसन्नतापूर्वक देवी को बलि प्रदान करे तो सर्व प्रकार की मन्त्र सिद्धि हो जाती है, इसमें सन्देह नहीं ॥ २५२-२५४ ॥

**अथवा गुरुमानीय देवभावेन पूजयेत् ॥ २५४ ॥**
**वस्त्रालङ्कारहेमाद्यैः सन्तोष्य गुरुमेव च ।**
**तत्सुतं तत्सुतां चैव पत्नीं चैव विशेषतः ॥ २५५ ॥**

अथवा गुरु को अपने घर बुलाकर देवता भाव से पूजन करे और उन गुरु को वस्त्र, अलङ्कार एवं सुवर्ण देकर सन्तुष्ट करे । विशेष रूप से उनके लड़के, लड़की एवं पत्नी को सन्तुष्ट करे ॥ २५४-२५५ ॥

**पूजयित्वा मनुं जप्त्वा स्वयं सिद्धीश्वरो भवेत् ।**
**सहस्रारे गुरोः पादपद्मं ध्यात्वा प्रपूज्य च ॥ २५६ ॥**
**केवलं देवताबुद्ध्या जप्त्वा सिद्धीश्वरो भवेत् ।**
**गुरवे दक्षिणां दद्याद्यथाविभवविस्तरैः ॥ २५७ ॥**

इस प्रकार पूजन कर मन्त्र का जप कर साधक स्वयं सभी सिद्धियों का ईश्वर बन जाता है मस्तिष्क के सहस्रार चक्र में गुरु के चरण कमलों का देवता बुद्धि से ध्यान कर पूजन कर मन्त्र का जप कर स्वयं सिद्धीश्वर बन जाता है । गुरु को अपने समृद्धि के विस्तार के अनुसार दक्षिणा देवे ॥ २५६-२५७ ॥

**गुरोरनुज्ञामात्रेण दुष्टमन्त्रोऽपि सिध्यति ।**

गुरुं विलङ्घ्य शास्त्रेऽस्मिन्नाऽधिकारी सुरोऽपि च॥ २५८ ॥
एषाञ्च मन्त्रहीनानां प्रयोगः क्रियते यदि ।
गुरुवक्त्रं विना चैव सिद्धि हानिः प्रजायते ॥ २५९ ॥
एतत्तन्त्रञ्च मन्त्रञ्च पुत्रेभ्योऽपि न दर्शयेत् ।
अन्यथा प्रेतराजस्य भवनं याति निश्चितम् ॥ २६० ॥

॥ इति श्रीमज्ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये चतुर्दशोल्लासः ॥ १४ ॥

क्योंकि गुरु की आज्ञा से सदोष भी मन्त्र सिद्ध हो जाते हैं । गुरु को त्यागकर इस कौलशास्त्र के देवता भी अधिकारी नहीं हो पाते । यदि गुरु के मुख से मन्त्र लिये बिना मन्त्रहीन कोई भी व्यक्ति इसका प्रयोग करे, तो उसकी सिद्धि में हानि होती है । यह तन्त्र-मन्त्र सर्वथा गुप्त रखे । पुत्र को भी न दिखावे, अन्यथा वह मृत्यु को प्राप्त होता है, यह निश्चित है ॥ २५८-२६० ॥

**महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय के ज्येष्ठ पुत्र पण्डित रामरञ्जन मालवीय कृत श्रीमज्ज्ञानानन्द परमहंस विरचित कौलावलीनिर्णय नामक तन्त्र के चतुर्दश उल्लास की निरञ्जन हिन्दी व्याख्या पूर्ण हुई ॥ १४ ॥**

# पञ्चदश उल्लासः

...

कुमारीपूजननिरूपणम्

अथ वक्ष्ये कुमारीणां पूजां तन्त्रविधानतः ।
होमादिकं हि विफलं कुमारीपूजनं विना ॥ १ ॥

इसके अनन्तर अब मैं तन्त्रशास्त्र के अनुसार कुमारी पूजा का विधान कहता हूँ। क्योंकि कुमारी पूजन के बिना होमादि समस्त कार्य विफल हो जाते हैं ॥ १ ॥

तद्विहीनं होमादिकं निष्फलम्

परिपूर्णफलं नैव जीवहीनं यथा वपुः ।
यथा यथा देवताया पूजनं वा यथागुरोः ॥ २ ॥
तथैव हि कुलीनानां कुमार्याः पूजनं भवेत् ।
यथाशक्त्या हि वितरेत् कुमार्यै यद्यदीप्सितम् ॥ ३ ॥

जिस प्रकार जीव के बिना शरीर निष्फल है उसी प्रकार कुमारी पूजन के बिना पूर्णफल नहीं प्राप्त होता । जिन-जिन विधियों से देवता का पूजन अथवा जिस विधि से गुरु का पूजन किया जाता है, उसी प्रकार कौलों के लिये कुमारी पूजन आवश्यक है । साधक द्वारा कुमारी को जो-जो अभीष्ट हो उसकी पूर्ति यथाशक्ति करनी चाहिये ॥ २-३ ॥

अशक्यं शक्यमेवं हि दानाभावे फलात्ययः ।
पुष्पं कुमार्यै यद्दत्तं तन्मेरुसदृशं मतम् ॥ ४ ॥

चाहे समर्थ हो अथवा असमर्थ हो, कुमारी का मनोरथ पूर्ण करना ही चाहिये क्योंकि बिना अभीष्ट पूर्ति के फल प्राप्ति में बाधा होती है । यदि कुमारी को एक पुष्प भी दिया गया तो वह मेरु के सदृश महान् हो जाता है ॥ ४ ॥

दत्तमन्यच्च यत्किञ्चिद् भक्ष्यभोज्यादिकं तथा ।
अल्पमप्यथवा मन्त्रहीनं बहुगुणं भवेत् ॥ ५ ॥

इसके अतिरिक्त यत्किञ्चिद् उनको दिया गया भक्ष्य-भोज्य पदार्थ आदि स्वल्प एवं मन्त्रहीन होने पर भी बहुगुणित फल देता है ॥ ५ ॥

कुमारीपूजाफलम्

**कुमारीपूजनाच्चैव कुमारीभोजनादपि ।**
**कुमारीवन्दनादेव कुमारीसदृशो भवेत् ॥ ६ ॥**

कुमारी के पूजन से, कुमारी को भोजन कराने से और कुमारी की वन्दना करने से साधक कुमारी के सदृश हो जाता है ॥ ६ ॥

कुमार्यङ्गे सर्वदेवतास्थितिः

**कुमारिका भवेत् देवी शिवोऽपि च कुमारिका ।**
**कुमारी योगिनी साक्षात् कुमारी सर्वदेवता ॥ ७ ॥**
**तस्याः पूजनमात्रेण त्रैलोक्यपूजनं भवेत् ।**
**सुकुमारी महादेवी त्रिधा मूर्त्तिर्व्यवस्थिता ॥ ८ ॥**

कुमारिका देवी है, कुमारिका शिव हैं और कुमारी साक्षात् योगिनी हैं बहुत क्या कुमारी सभी देवता स्वरूप हैं। उसकी पूजा करने मात्र से त्रैलोक्य की पूजा निष्पन्न हो जाती है। महादेवी सुकुमारी तीन रूपों में व्याप्त हैं ॥ ७-८ ॥

**परा चैवाऽपरा चैव तृतीया च परापरा ।**
**यत्र काले न किञ्चित् स्याद् देवासुरमहोरगाः ॥ ९ ॥**
**त्रैलोक्यं लयमानञ्च तदा जाता कुमारिका ।**
**आद्यसृष्टेश्च या शक्तिः प्रत्यक्षा सा तु तत्त्रिधा ॥ १० ॥**

परा एवं अपरा और तीसरा परापरा-इस प्रकार उनके तीन रूप हैं। जिस काल में देवता, मनुष्य, असुर, महोरग किसी की उत्पत्ति नहीं हुई थी, सारा त्रैलोक्य लीयमान था, उस समय सर्वप्रथम कुमारिका की उत्पत्ति हुई। यह सृष्टि की आदिशक्ति है वह प्रत्यक्ष रूप से तीन प्रकार की हो गई है ॥ ९-१० ॥

**तिलतिला तु सा जाता सृष्टिरूपा भवार्णवे ।**
**भूर्भुवोमूर्त्तिरूपा सा एका पूज्या कुमारिका ॥ ११ ॥**

तिल-तिल में (व्याप्त) वह कुमारिका इस संसार समुद्र में सृष्टिरूपा है और भू एवं भुवः मूर्त्तिस्वरूपा वह एक कुमारी का ही स्वरूप है, अतः पूजनीय है ॥११॥

**एकीकृत्य त्रिभिश्चैव सप्ताष्टनवधा पुनः ।**
**नित्यक्रमेण देवेशि पूजयेद्विधिपूर्वकम् ॥ १२ ॥**

उनके इन तीन स्वरूपों को एक में मिलाकर सात, आठ अथवा नव रूपों में

नित्य के क्रम से विधिपूर्वक पूजा करे ॥ १२ ॥

**अष्टोत्तरं शतं वापि एकां कन्यां प्रपूजयेत् ।**
**पूजिताः प्रतिगृह्णन्ते निर्गच्छन्त्यवमानिताः ॥ १३ ॥**

अथवा एक ही कन्या का एक सौ आठ बार पूजन करे । ये कन्यायें पूजा करने पर अनुग्रह करती हैं और अपमान करने पर जला देती हैं ॥ १३ ॥

कुमारीपूजनेन सर्वदेव सन्तुष्टिः

**असुराश्च तथा नागा ये च दुष्टग्रहा अपि ।**
**भूतवेतालगन्धर्वा डाकिनीयक्षराक्षसाः ॥ १४ ॥**
**क्रूराश्च देवताः सर्वे भूर्भुवश्चैव भैरवाः ।**
**पृथिव्यादीनि सर्वाणि ब्रह्माण्डं सचराचरम् ॥ १५ ॥**
**ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।**
**ते तुष्टाः सर्वतुष्टाश्च यस्तु कन्यां प्रपूजयेत् ॥ १६ ॥**

असुर, नाग और दुष्टग्रह, भूत, बेताल, गन्धर्व, डाकिनी, यक्ष, राक्षस, नीच प्रकृति वाले देवता, भूः, भुवः, भैरव, पृथिव्यादि पञ्च महाभूत, समस्त चराचर, ब्रह्माण्ड, ब्रह्मा, विष्णु, रुद्र, ईश्वर एवं सदाशिव ये सभी जो कन्या का पूजन करते हैं उनसे प्रसन्न और सन्तुष्ट रहते हैं ॥ १४-१६ ॥

**कुमारी पूजनाच्चैव कोटिपूजाफलं लभेत् ।**
**घ्नन्ति विघ्नान् पूजितास्तास्तथा शत्रुं महोत्कटम् ॥ १७ ॥**
**व्याधयः सर्वरिष्टानि पलायन्ते न संशयः ।**
**ग्रहा यक्षाः क्षयं यान्ति भूतवेतालपन्नगाः ॥ १८ ॥**
**असुरा गुह्यकाः प्रेता योगिनी गुह्यडाकिनी ।**
**महाभयानि दुर्भिक्षमुत्पातानि सहस्रशः ॥ १९ ॥**
**दुःस्वप्नमपमृत्युश्च अन्ये ये ये समुद्भवाः ।**
**कुमारी पूजनादेव न तस्य प्रभवन्ति च ॥ २० ॥**

मात्र कुमारी के पूजन से करोड़ों पूजा का फल प्राप्त होता है । ये कन्यायें पूजित होने पर समस्त विघ्नों का और अत्यन्त करके उग्र शत्रु का भी विनाश कर देती हैं । किं बहुना, व्याधियाँ और सभी प्रकार के अरिष्ट दूर भाग जाते हैं, इसमें संशय नहीं । ग्रह शान्त हो जाते है । यक्ष, भूत, बेताल एवं पन्नग नष्ट हो जाते हैं । असुर, गुह्यक, प्रेत, योगिनियाँ, गुप्त रूप में रहने वाली डाकिनी सभी दूर भाग जाते हैं । महाभयावह-हजारों दुर्भिक्ष, हजारों लाखों उत्पात, दुःस्वप्न एवं अपमृत्यु और भी जितने सांसारिक उपद्रव हैं वे सभी कुमारी के पूजन मात्र से ही

उत्पन्न नहीं होते ॥ १७-२० ॥

अणिमादीनि सिद्धानि पातालगुटिकाञ्जनाः ।
चतुष्कं दिव्यवेतालं भवेत् कुमारिकार्चनात् ॥ २१ ॥

कुमारी पूजा से अणिमादि सिद्धियाँ, पाताल, गुटिका एवं अञ्जन—ये चारों तथा दिव्य बेताल की सिद्धि हो जाती है ॥ २१ ॥

कुमारीलक्षणम्

लक्षणं यजनं तासां वक्ष्येऽहं तन्त्रवर्त्मना ।
द्वितीयवत्सरादूर्ध्वं यावत् स्यादष्टमाब्दिकम् ॥ २२ ॥
तावत् कुमारी विज्ञेया मन्त्रतन्त्रफलप्रदा ।
अथवा षोडशाब्दान्तं यावत् पुष्पं न जायते ॥ २३ ॥
ताभ्यः पुष्पफलं वापि गन्धचन्दनपायसम् ।
बालप्रियञ्च नैवेद्यं बलाभावविचेष्टितम् ॥ २४ ॥
ताभिः प्रियकरालापैस्तोषयेत् साधकोत्तमः ।

**कन्याओं के लक्षण तथा पूजन की विधि**—अब उन कन्याओं के लक्षण तथा पूजन की विधि तन्त्रशास्त्र के अनुसार कहता हूँ—दो वर्ष से लेकर आठ वर्ष तक कन्यायें कुमारी कही गई हैं जो पूजा से मन्त्र एवं तन्त्र का फल प्रदान करती हैं, अथवा षोडश वर्ष तक की कन्यायें जब तक पुष्पवती नहीं होतीं, अथवा पुष्पवती हो भी जावें तब भी वे कन्यायें हैं उन्हें गन्ध, चन्दन, पायस एवं बाल-प्रिय नैवेद्य और बालभाव की चेष्टा करते हुए तथा प्रियशब्दों से बातचीत कर उत्तम साधक उन्हें सन्तुष्ट करे ॥ २२-२५ ॥

वयोभेदेन कुमारीणां नामभेदः

एकवर्षा भवेत् सन्ध्या द्विवर्षा च सरस्वती ॥ २५ ॥
त्रिवर्षा च त्रिधामूर्त्तिश्चतुर्वर्षा च कालिका ।
सुभगा पञ्चवर्षा च षड्वर्षा च उमा भवेत् ॥ २६ ॥
सप्तभिर्मालिनी साक्षादष्टवर्षा च कुब्जिका ।
नवभिः कालसङ्कर्षा दशभिश्चापराजिता ॥ २७ ॥
एकादशे तु रुद्राणी द्वादशाब्दा तु भैरवी ।
त्रयोदशे महालक्ष्मीर्द्विसप्ता पीठनायिका ॥ २८ ॥
क्षत्रज्ञा पञ्चदशभिः षोडशे वाचिका मता ।
एवं क्रमेण पूज्या तु यावत् पुष्पं न विद्यते ॥ २९ ॥

एक वर्ष की सन्ध्या, दो वर्ष की सरस्वती, त्रिवर्षा त्रिधामूर्त्ति, चतुर्वर्षा कालिका, पञ्चवर्षा सुभगा, षड्वर्षा कन्या उमा, सात वर्ष वाली मालिनी और अष्टवर्षा कन्या साक्षात् कुब्जिका कही गई है। नव वर्ष वाली कालसङ्कर्षा, दश वर्ष की अवस्था वाली अपराजिता, एकादश वर्ष वाली रुद्राणी, बारह वर्ष वाली भैरवी, तेरह वर्ष वाली महालक्ष्मी, चौदह वर्ष वाली पीठनायिका, पन्द्रह वर्ष वाली क्षत्रज्ञा और सोलह वर्ष वाली वाचिका नाम वाली कही गई हैं। इस नाम के क्रम से उनकी पूजा करनी चाहिये यदि वे पुष्पवती न हुई हों ॥ २५-२९ ॥

### प्रशस्तदिवसकथनम्

**प्रतिपदादिदर्शान्तं वृद्धिभेदेन पूजयेत् ।**
**महापर्वसु सर्वेषु विशेषश्च पवित्रके ॥ ३० ॥**

प्रतिपदा से लेकर अमावास्या पर्यन्त वृद्धिभेद से कन्याओं का पूजन करे। (प्रतिपदा को एक द्वितीया को दो.....इत्यादि) सभी महा पर्वों में विशेषकर पवित्र काल में पूजा करे ॥ ३० ॥

**महानवम्यां वीरेन्द्रः कुमारीः सम्प्रपूजयेत् ।**
**पिङ्गलां पूजयेद्यस्तु षोडशैश्चैव भक्तिमान् ॥ ३१ ॥**
**पूजयित्वा भक्तिभावे सर्वसम्पत्तिमालभेत् ।**
**पूजयेत् कुलविद्याञ्च चैकां बालकभैरवीम् ॥ ३२ ॥**

वीर साधक महा नवमी को कुमारी का पूजन करे। जो भक्तिपूर्वक पिङ्गला की षोडशोपचारों से पूजा करते हैं, वे सम्पूर्ण सम्पत्ति प्राप्त कर लेते है, अथवा कुल विद्या स्वरूपा एक बालक भैरवी की ही पूजा करे ॥ ३१-३२ ॥

### कुमारीपूजनमन्त्र कथनम्

**एवं प्रणवयोगेन चैतन्यतनुमर्चयेत् ।**
**वाणी माया तथा लक्ष्मीर्माया कूर्चद्वयन्ततः ॥ ३३ ॥**
**एते च प्रणवा ज्ञेयाः कुमार्याः परिपूजने ।**
**एकादशस्वरेणाऽऽढ्यो भृगुर्विन्द्विन्द संयुतः ॥ ३४ ॥**
**चैतन्यबीजं कथितं साधकानां समृद्धिदम् ।**

**कुमारी पूजन के छह प्रणव**—प्रणव से उन्हें चैतन्य शरीर वाली बनाकर पूजा करनी चाहिये। कुमारी पूजन में वाणी (ऐं), माया (ह्रीं), लक्ष्मी (श्रीं) और माया (ह्रीं) फिर दो कूर्च (हुं हुं)—ये कुल छह कुमारी पूजन में प्रणव बतलाये गये हैं। एकादश स्वर (ए) से युक्त भृगु (स) जो विन्दु और इन्दु से संयुक्त हो (सैं)—ये चैतन्य के बीज बतलाये गये हैं जो साधकों को सिद्धि प्रदान करने वाले

कहे गये हैं ॥ ३३-३५ ॥

एवं द्वाभ्यां त्रिभिश्चैव सप्तधा नवधा पुनः ॥ ३५ ॥
नित्यक्रमेण नियतं पूजयेद्विधिपूर्वकम् ।
वाग्भवेन जलं देयं मायया पादशौचकम् ॥ ३६ ॥
लक्ष्म्या चार्घं प्रदद्यात्तु कूर्चबीजेन चन्दनम् ।
शक्तिबीजेन पुष्पाणि धूपं षष्ठेन दापयेत् ॥ ३७ ॥

इस प्रकार दो, तीन, सात एवं नव कन्याओं की नित्य क्रम से पूजा करनी चाहिये । वाग्भव (ऐं) से जल देवे, माया (ह्रीं) से पाद्य देवे, लक्ष्मी (श्रीं) से अर्घ्य प्रदान करे, कूर्च बीज (हुं) से चन्दन, शक्ति बीज (ह्रीं) से पुष्प और षष्ठ बीज (हुं) से धूप प्रदान करे ॥ ३५-३७ ॥

वाग्भवेन पुरक्षेमो मायया च गुणाष्टकम् ।
श्रींबीजेन श्रियो लाभो ह्रींबीजेनाऽरिसङ्क्षयः ॥ ३८ ॥
भैरवेण तु बीजेन खङ्गत्वमनुगच्छति ।
न्यासादिकं प्रकुर्वीत आदौ स्वीयक्रमेण तु ॥ ३९ ॥

वाग्भव (ऐं) से पुर का कल्याण, माया (ह्रीं) से आठो गुण, श्री बीज से श्री लाभ, ह्रीं बीज से शत्रु का नाश और भैरव बीज (हुं) से खङ्गत्व प्राप्त करता है । इसके बाद अपने क्रम से न्यासादि का विधान करे ॥ ३८-३९ ॥

### कुमार्यङ्गे विशेषन्यासः

कुमार्यङ्गे ततः पश्चाद्विशेषन्यासमुत्तमम् ।

#### विशेषन्यासस्य मन्त्राः

ऐं क्लीं श्रीं क्लौं हसौः कुलकुमारिके हृदयाय नमः॥ ४० ॥
ऐं हैं ह्रीं श्रीं क्लां एं स्वाहा शिरसे स्वाहा ।
ऐं क्लीं सैं शिखायै वषट् ॥ ४१ ॥
ऐं कुलवागीश्वरवागीश्वरि कवचाय हुं ।
क्लीं अस्त्राय फट् ।
ऐं सिद्धि जयाय पूर्ववक्त्राय नमः ॥ ४२ ॥
ऐं जयाय उत्तरवक्त्राय नमः ।
ऐं क्लीं श्रीं कुब्जिके पश्चिमवक्त्राय नमः ।
क्रं कालिके दक्षिणवक्त्राय नमः ॥ ४३ ॥
वर्णन्यासं षडङ्गञ्च कुमार्यङ्गे प्रविन्यसेत् ।
अष्टोत्तरशतं वापि एकां कन्यां प्रपूजयेत् ॥ ४४ ॥

**पाद्यमर्घ्यं पुनर्धूपं कुङ्कुमं चन्दनादिकम् ।**
**भक्तिभावेन सम्पूज्य तस्यै सर्वं निवेदयेत् ॥ ४५ ॥**

इसके बाद कुमारी के अङ्ग में सर्वोत्तम विशेष न्यास करे । ऐं क्लीं श्रीं क्लौं हसौं कुलकुमारिके हृदयाय नमः से हृदय में, ऐं हैं ह्रीं श्रीं क्लां एं स्वाहा शिरसे स्वाहा से शिर में, ऐं क्लीं सैं शिखायै वषट् से शिखा में, ऐं कुलवागीश्वरवागीश्वरि कवचाय हुं से दोनों बाहुओं में, क्लीं अस्त्राय फट् से अस्त्र न्यास करे । फिर ऐं सिद्धि जयाय पूर्ववक्त्राय नमः, ऐं जयाय उत्तरवक्त्राय नमः, ऐं क्लीं श्रीं कुब्जिके पश्चिमवक्त्राय नमः, ऐं कालिके दक्षिणवक्त्राय नमः पर्यन्त मन्त्र पढ़कर मुख के पूर्व, उत्तर, पश्चिम तथा दक्षिण भाग में न्यास करे । इस प्रकार वर्णन्यास और षडङ्गन्यास कुमारी के अङ्ग में करे । जब एक कन्या का पूजन करे तब एक-सौ आठ न्यास करे । फिर पाद्य, अर्घ्य, धूप, कुङ्कुम, चन्दनादि द्वारा भक्तिभाव से पूजा कर उसे सब कुछ समर्पण कर देवे ॥ ४०-४५ ॥

**तरुणोल्लासवान् भूत्वा स्वयमच्युतमानसः ।**
**बालामलङ्कृतां पश्यन् चिन्तयेत् स्वेष्टदेवताम् ॥ ४६ ॥**

युवावस्था से सम्पन्न अत्यन्त उल्लासयुक्त हृदय में भगवान् का स्मरण करते हुये बाला स्त्री को अलंकृत देखकर उसमें अपनी इष्टदेवता (=त्रिपुरसुन्दरी) का ध्यान करे ॥ ४६ ॥

**यथाशक्ति जपेत् पश्चादष्टोत्तरशतादिकम् ।**
**प्रदक्षिणत्रयं कुर्यादादिमध्ये शुभं भवेत् ॥ ४७ ॥**

इसके पश्चात् यथाशक्ति एक-सौ आठ बार जप करे । फिर प्रदक्षिणा करे, ऐसा करने से साधक का कल्याण होता है ॥ ४७ ॥

**ततस्तां देवताबुद्ध्या नमस्कृत्य विसर्जयेत् ।**
**पश्चाच्च दक्षिणा देया रजतस्वर्णमौक्तिकैः ॥ ४८ ॥**

फिर उसमें देवता की बुद्धि कर नमस्कार कर विसर्जन कर देवे । पूजन के बाद रजत, सुवर्ण और मोती की दक्षिणा देवे ॥ ४८ ॥

### कुमारीपूजनफलम्

**कुमारी पूजनाच्चैव कोटिपूजाफलं लभेत् ।**
**कुमारीपूजने चैव जातिमात्रं न चिन्तयेत् ॥ ४९ ॥**

इस प्रकार कुमारी पूजन से करोड़ों गुना पूजा का फल होता है । कुमारी पूजन में जाति का विचार नहीं करना चाहिये ॥ ४९ ॥

**अशेषकुलसम्पन्ना नाजातिसमुद्भवाः ।**
**नानादोषोद्भवा वापि गुणलावण्यसंयुताः ॥ ५० ॥**
**सर्वथैव कुलीनानां पूज्यास्ताः शुभदायिकाः ।**
**यथायथा तत्प्रियकृत् सर्वसिद्धीश्वरो भवेत् ॥ ५१ ॥**

उत्तम कुल में सम्पन्न अनेक जाति वाली अथवा अनेक दोषों वाली अथवा गुण लावण्य से संयुक्त रहने वाली कुमारियाँ इस प्रकार—ये सभी कुलमार्ग वाले कौलों के लिये पूज्य हैं और उनका कल्याण करने वाली हैं । जैसे-जैसे कन्याओं को प्रसन्न करता है वैसे-वैसे सर्व सिद्धीश्वर बन जाता है ॥ ५०-५१ ॥

**महाभये समुत्पन्ने कन्यकाञ्च प्रपूजयेत् ।**
**तत्क्षणाल्लभते मोक्षं सत्यं सत्यं न संशयः ॥ ५२ ॥**

महाभय उपस्थित होने पर कुमारी पूजन करना चाहिये । ऐसा करने से वह तत्क्षण भय से मुक्त हो जाता है, यह सत्य है यह सत्य है; इसमें कोई संशय नहीं है ॥ ५२ ॥

**ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।**
**ते तुष्टाः सर्वतुष्टाश्च यस्तु कन्यां प्रपूजयेत् ॥ ५३ ॥**

यदि कन्या का पूजन करे तो ब्रह्मा, विष्णु, रुद्र, ईश्वर एवं सदाशिव सन्तुष्ट हो जाते हैं फिर कन्या के सन्तुष्ट होने पर तो सभी सन्तुष्ट हो जाते हैं ॥ ५३ ॥

**विवाहयेत् स्वयं कन्यां ब्रह्महत्यादि नश्यति ।**
**गोहत्यां स्त्रीवधं चैव सर्वपापं प्रणश्यति ॥ ५४ ॥**

कन्या का स्वयं विवाह कर दे तो ब्रह्महत्यादि पाप नष्ट हो जाते हैं । इतना ही नही, गोहत्या एवं स्त्री वध का पाप, किं बहुना, सभी प्रकार के पाप विनष्ट हो जाते हैं ॥ ५४ ॥

**मातरः पितरश्चैव भ्रातरश्चैव सर्वतः ।**
**ये तु ये तु पुन सर्वे कन्यादानं प्रकल्पयेत् ॥ ५५ ॥**
**भुक्तिमुक्तिफलं तेषां सौभाग्यं सर्वसम्पदः ।**
**रुद्रलोके वसेन्नित्यं त्रिनेत्रो भगवान् हरिः ॥ ५६ ॥**

माता-पिता, भ्राता जो जो भी कन्यादान करते है, उन्हें भुक्ति-मुक्ति रूप फल सौभाग्य और सभी प्रकार की सम्पत्ति प्राप्त होती है । वह रुद्रलोक में त्रिनेत्र होकर निवास करता है, अथवा विष्णुलोक में जहाँ भगवान् विष्णु रहते हैं, वहाँ निवास करता है ॥ ५५-५६ ॥

**षष्टिकोटिसहस्राणां चाश्वमेधफलं लभेत् ।**
**कुमारीकल्पमाख्यातं अथवाऽन्यतमञ्चरेत् ॥ ५७ ॥**

साठ करोड़ हजार अश्वमेघ का फल उसे प्राप्त होता है । यहाँ तक हमने कुमारी कल्प कहा है । अथवा साधक अन्य विकल्प करे ॥ ५७ ॥

### बटुकपूजनम्

**सन्ध्यादिनवकन्याश्च समानीय प्रपूज्य च ।**
**पूर्ववद्विधिवद्वीरो नव बालकमानयेत् ॥ ५८ ॥**

सन्ध्यादि नाम वाली नव कन्याओं को ले आकर उनकी पूजा कर वीर साधक पूर्ववत् नव बालकों को (बटुक पूजन हेतु) ले आवे ॥ ५८ ॥

### प्रशस्तकालनिर्णयः

**बटुकं पञ्चवर्षञ्च नववर्षं गणेश्वरम् ।**
**गन्धपुष्पाक्षताकल्पैर्यथाविभवविस्तरैः ॥ ५९ ॥**
**अभ्यर्च्य देवता बुद्ध्या पदार्थैः परितोषयेत् ।**
**स्वकार्यफलसिद्ध्यर्थं वित्तशाठ्यविवर्जितः ॥ ६० ॥**

उनमें बटुक पाँच वर्ष के तथा गणेश्वर नव वर्ष के होने चाहिये । अपने विभव के अनुसार गन्ध, पुष्प, अक्षतादि उपचारों से पूजन करे । अपने कार्य की सिद्धि के लिये वित्त शाठय (कंजूसी) न करते हुये देवता बुद्धि से पूजा कर उन्हें तत् पदार्थों से सन्तुष्ट करे ॥ ६० ॥

**नवरात्रं येदेकोत्तरवृद्ध्या क्रमेण तु ।**
**नवरात्रकृतां पूजां महादेव्यै समर्पयेत् ॥ ६१ ॥**

एक एक के वृद्धि-क्रम से नवरात्र पर्यन्त यजन करे । इस प्रकार नवरात्र पर्यन्त की गई पूजा महादेवी को समर्पित करे ॥ ६१ ॥

**ताम्बूलं दक्षिणां दत्त्वा कुमारीस्तान् विसर्जयेत् ।**
**एवं नवकुमारीणामर्चनं प्रतिवत्सरम् ॥ ६२ ॥**
**यः करोति हि पुण्यात्मा देवताप्रीतिमाप्नुयात् ।**
**मनोऽभिलषितं प्राप्य निवसेत्तवसन्निधौ ॥ ६३ ॥**

ताम्बूल और दक्षिणा देकर उन कुमारियों का विसर्जन करे । इस प्रकार प्रत्येक वर्ष नव कुमारियों का जो पुण्यात्मा अर्चन करता है उस पर देवता प्रसन्न हो जाते हैं । वह मनोऽभिलषित प्राप्त कर उन महादेवी के सन्निधान में निवास करता है ॥ ६२-६३ ॥

शक्तिपूजा

अथवा यौवनारूढाः प्रमदा नव शोभनाः ।
पूजयेद्विधिवद्भक्त्या नव रात्रिषु मन्त्रवित् ॥ ६४ ॥
हल्लेखां गगनां रक्तां महोत्सुकां करालिकाम् ।
इच्छां ज्ञानां क्रियां दुर्गां वटुकञ्च गणेश्वरम् ॥ ६५ ॥
पूर्ववत् पूजनाद्यैश्च पदार्थैः परितोषयेत् ।
प्रौढोल्लासेन संयुक्ताः सन्तुष्टा यदि चेत् तदा ॥ ६६ ॥
साधकस्तीर्थमासाद्य निवसेच्छिवसन्निधौ ।
एवं यः पूजयेद् देवीं प्रतिवर्षं यतिव्रतः ॥ ६७ ॥
षण्मासे वा त्रिमासे वा मासे मासेऽथवा बुधः ।
तिस्रो वा पञ्च वा सप्त पूजयेद् देवताधिया ॥ ६८ ॥
सर्वैश्वर्यसमृद्ध्यात्मा स भवेच्छिवयोः प्रियः ।
अथवाऽन्यप्रकारेण कथ्यते मिथुनार्चनम् ॥ ६९ ॥

अथवा चढ़ती हुई जवानी वाली, मस्ती से परिपूर्ण, आभूषणों से अलंकृत, नव युवतियों की मन्त्रवेत्ता साधक भक्तिपूर्वक सविधि रात्रि में पूजा करे । उनमें हल्लेखा, गगना, रक्ता, महोत्सुका, करालिका, इच्छा, ज्ञाना, क्रिया और दुर्गा (इन नौ) की भावना करे । साथ में बटुक और गणेश्वर की पूर्ववत् पूजा कर अनेक पदार्थों से सन्तुष्ट करे । यदि जवानी के मद से इठलाती हुई वे युवतियाँ प्रसन्न हो गईं, तब साधक किसी तीर्थ स्थान को प्राप्त कर शिव का सन्निधान प्राप्त कर लेता है । इस प्रकार नियम से आबद्ध होकर प्रतिवर्ष देवी का पूजन करे, अथवा ६ मास में, अथवा तीन मास में, अथवा एक-एक मास में, तीन, पाँच, सात युवतियों की देवी की बुद्धि से पूजा करे तो साधक सभी ऐश्वर्यों से समृद्ध हो जाता है और शिव शिवा की प्रीति का पात्र हो जाता है । अथवा अन्य प्रकार से अब मिथुनार्चन का विधान कहता हूँ ॥ ६४-६९ ॥

मिथुनार्चनविधानम्

तुलायां वापि मेषे वा सर्वसंक्रान्तिषु भृशम् ।
गौरीशिवौ रमाविष्णू वाणीसरसिजासनौ ॥ ७० ॥
शचीन्द्रौ रोहिणीचन्द्रौ स्वाहाग्नी च प्रभारवी ।
भद्रकालीवीरभद्रौ भैरवीभैरवावपि ॥ ७१ ॥
समानीय प्रयत्नेन पूजयेत् पूर्ववर्त्मना ।
त्रितारादिनमोऽन्तेन तत्तन्नाम्ना विधानतः ॥ ७२ ॥
वाग्बीजं शक्तिबीजञ्च श्रीबीजञ्च त्रितारकम् ।

गन्धपुष्पादिभिः पूज्य तत्त्वाद्यैः परितोषयेत् ॥ ७३ ॥
प्रौढोल्लासेन युक्तानि कुर्वीत मिथुनानि च ।
एवं कृते न सन्देहस्तुष्टा मिथुनदेवताः ॥ ७४ ॥

**मिथुनार्चन विधान**—तुला, मेष, अथवा सभी सङ्क्रान्तियों में गौरी-शिव, रमा-विष्णु, वाणी-ब्रह्मदेव, शची-इन्द्र, रोहिणी-चन्द्र, स्वाहा-अग्नी, प्रभा-रवी, भद्रकाली एवं वीरभद्र तथा भैरवी-भैरव इन आठ जोड़ों को लाकर पूर्व की भाँति आदि में त्रितार (ऐं ह्रीं श्रीं) और अन्त में नमः लगाकर तत्तन्नामों से पूजा करे। वाग्बीज (ऐं), शक्ति बीज (ह्रीं), श्री बीज (श्रीं)—ये त्रितार कहे गये हैं। गन्ध पुष्पादि से इनकी पूजा कर तत्त्वादि (पञ्चमकारों) से इन्हें सन्तुष्ट करे। इस प्रकार की पूजा से उन मिथुनाष्टकों को पूर्ण उल्लास (प्रहर्ष) से संयुक्त कर दे ऐसा करने से वे मिथुन देवता प्रसन्न हो जाते हैं इसमें सन्देह नहीं ॥ ७०-७४ ॥

अनुगृह्णन्ति तं देवाः प्रयच्छन्ति मनोरथम् ।
प्रतिवर्षं तु यः कुर्याद् भक्त्या च मिथुनार्चनम् ॥ ७५ ॥

फिर तो वे मिथुन पूजा से देवता प्रसन्न होकर साधक के सभी मनोरथ पूर्ण कर देते हैं, यह मिथुनार्चन प्रतिवर्ष भक्ति से युक्त होकर करे ॥ ७५ ॥

शिवलोकेषु निवसेत् सर्वैश्वर्यसमन्वितः ।
भृगुवारे यजेद्यत्नात् कान्तामारूढयौवनाम् ॥ ७६ ॥
सर्वलक्षणसम्पन्नामनुकूलां मनोरमाम् ।
कुलाकुलाष्टमां चैवा आमन्त्रयाऽऽहूयपुष्पिणीम् ॥ ७७ ॥
अभ्यङ्गस्नानशुद्धाङ्गीं स्वासने चोपवेशयेत् ।
आत्मानं गन्धपुष्पाद्यैरलंकुर्यात् सुसाधकः ॥ ७८ ॥
आवाह्य देवतां तस्यां यजेन्न्यासक्रमेण हि ।
कृत्वा क्रमार्चनं धूपदीपञ्च कुलदीपकम् ॥ ७९ ॥
प्रदर्श्य देवताबुद्ध्या पदार्थैः षड्रसान्वितैः ।
मांसादिभक्ष्यभोज्याद्यैस्तोषयेद् भक्तिभावतः ॥ ८० ॥
प्रौढोल्लासेन सहितां पश्यंश्च प्रजपेन्मनुम् ।
यौवनोल्लाससहितः स्वयं तद्ध्यानतत्परः ॥ ८१ ॥

वह सर्वैश्वर्य समन्वित होकर शिव लोक में निवास करता है। शुक्रवार को चढ़ती हुई जवानी वाली युवती का पूजन करे। जो सर्वलक्षणसम्पन्न हो, अपने अनुकूल हो और सुन्दरी भी हो, कुलाकुल के सम्प्रदाय में अष्टम संख्या वाली पुष्पिणी को जो सर्वथा उपटन स्नान से शुद्ध शरीर वाली हो उसे आमन्त्रित कर

अपने आसन पर बैठावे। सुसाधक अपने को भी गन्ध, माल्यादि से अलंकृत कर शोभित रहे। उस स्त्री में देवता का आवाहन कर न्यास क्रम से उसकी पूजा करे। क्रमशः धूप देवे, फिर दीपक दिखाकर षड्रस युक्त पदार्थ निवेदन करे। मांस, मत्स्यादि समर्पित कर भक्तिभावपूर्वक उसे सन्तुष्ट करे, फिर जवानी के उमङ्ग से भरी हुई उसको देखते हुये स्वयं जवानी के उत्साह से पूर्ण उसका ध्यान करते हुये जप करे ॥ ७६-८१ ॥

**निर्विकारेण चित्तेन अष्टोत्तरसहस्रकम् ।**
**जपादिकं समाप्याथ तया सह निशां नयेत् ॥ ८२ ॥**
**त्रिसप्तपञ्चनवसु भृगुवारेषु यः सदा ।**
**पूजयेद्विधिना चैव तस्य पुण्यं न गण्यते ॥ ८३ ॥**
**चतुःपीठार्चनफलं स प्राप्नोति सुनिश्चितम् ।**
**अथान्यं सम्प्रवक्ष्यामि समयाचारमुत्तमम् ॥ ८४ ॥**

फिर निर्विकार चित्त से एक-सौ आठ की संख्या में जप कर उसके साथ रहकर रात्रि व्यतीत करे। इस प्रकार तीन, सात, पाँच, नव शुक्रवार को जो उक्त प्रकार से कुलाकुल अष्टमी कन्या का पूजन करता है, उसके पुण्य की गणना नहीं की जा सकती। वह चौसठ पीठों के अर्चन का फल प्राप्त करता है यह निश्चित है। अब इसके बाद अत्यन्त श्रेष्ठ समयाचार कहता हूँ ॥ ८२-८४ ॥

समयाचारकथनम्

**येन हीना न सिध्यन्ति मन्त्राः कोटिसहस्रशः ।**
**मानवः कुलशास्त्राणां कुलचर्यानुसारिणाम् ॥ ८५ ॥**
**उदारचित्तः सर्वत्र वैष्णवाचारतत्परः ।**
**परनिन्दासहिष्णुः स्यादुपकाररतः सदा ॥ ८६ ॥**
**पर्वते विपिने चैव निर्जने शून्यमण्डले ।**
**चतुष्पथे कलाशून्ये यदि दैवाद्गतिर्भवेत् ॥ ८७ ॥**
**क्षणं ध्यात्वा मनुं जप्त्वानत्वा गच्छेद्यथासुखम् ।**
**गृध्रं वीक्ष्य महाकालीं नमस्कुर्यादलक्षितम् ॥ ८८ ॥**

**समयाचार विधान**—जिसके बिना करोड़ों सहस्र वर्ष प्रयत्न करने पर भी मन्त्र सिद्ध नहीं होते। कुल शास्त्र के अनुसार कुलाचार का अनुसरण करने वाला मानव जो उदारचित्त वैष्णवाचार तत्पर दूसरे की निन्दा न सुनने वाला परोपकार में निरत पर्वत या वन या निर्जन या शून्य स्थान या चतुष्पथ या कला शून्य स्थान पर यदि भाग्यवश चला जाय वहाँ क्षण भर भगवती का ध्यान कर मन्त्र जप कर यदि अपनी इच्छानुसार किसी दिशा में गमन करे उस समय यदि गृध्र दिखाई पड़े

तब गुप्त रूप से महाकाली को नमस्कार करे ॥ ८५-८८ ॥

**गृध्रादिनमस्कारमन्त्राः**

क्षेमङ्करीं तथा वीक्ष्य जम्बूकीं यमदूतिकाम् ।
कुररं द्रोणकाकं तु कृष्णमार्जारमेव च ॥ ८९ ॥
कृष्णसारं तथा व्याघ्रं खड्गिनं सिंहमेव च ।
कृशोदरि महाचण्डे मुक्तकेशि बलिप्रिये ॥ ९० ॥
कुलाचारप्रसन्नास्ये नमस्ते शङ्करप्रिये ।
श्मशाने च शिवां दृष्ट्वा प्रदक्षिणमनुव्रजन् ॥ ९१ ॥
प्रणम्यानेन मनुना मन्त्री सुखमवाप्नुयात् ।
घोरदंष्ट्रे कठोराक्षि किटिशब्दनिनादिनि ॥ ९२ ॥
घोरघोररवास्फाले नमस्ते चितिवासिनि ।

क्षेमङ्करी (सफेद चिल्ह), जम्बुकी (सियारिन), यमदूतिका (उलूकी), कुरर काला कौआ, काला बिलाव, कृष्णसार, बाघ, गैंड़ा, सिंह देखे तो कृशोदरि से लेकर शङ्करप्रिये पर्यन्त मन्त्र पढ़कर नमस्कार करे । श्मशान में शिवा (शृङ्गाली) देखकर उसकी प्रदक्षिणा करते हुये घोर दंष्ट्रे..............नमस्ते चितिवासिनि पर्यन्त मन्त्र पढ़ते हुये नमस्कार करे तो सुखी हो जाता है ॥ ८९-९३ ॥

रक्तवस्त्रां रक्तपुष्पां विलोक्य त्रिपुराम्बिकाम् ॥ ९३ ॥
प्रणम्य दण्डवद्भूमाविमं मन्त्रमुदीरयेत् ।
बन्धूकपुष्पसङ्काशे त्रिपुरे भयनाशिनि ॥ ९४ ॥
भाग्योदये समुत्पन्ने नमस्ते वरवर्णिनि ।
कृष्णवस्त्रं तथा पुष्पं राजानं राजपुत्रकम् ॥ ९५ ॥
हस्त्यश्वरथशस्त्राणि फलकान् वीरपुरुषान् ।
महिषं कुलदेवञ्च दृष्ट्वा महिषमर्दिनीम् ॥ ९६ ॥
प्रणम्य जयदुर्गांवा स च विघ्नैर्न लिप्यते ।
जय देवि जगद्धात्रि त्रिपुराद्ये त्रिदैवते ॥ ९७ ॥
भक्तेभ्यो वरदे देवि महिषघ्नि नमोऽस्तु ते ।

रक्त वस्त्र वाली एवं रक्तपुष्प वाली को त्रिपुराम्बिका समझकर दण्डवद् भूमि में गिर कर प्रणाम कर बन्धूक पुष्प सङ्काशे..............नमस्ते वरवर्णिनि' पर्यन्त इस श्लोक मन्त्र को पढ़े तो सुखी हो जाता है । काला वस्त्र, या काला पुष्प, या राजा, या राजपुत्र, हाथी, घोड़ा, शस्त्रफलक, वीरपुरुष, महिष और कुलदेव (कौलिकाचार्य) को देखकर महिषमर्दिनी को प्रणाम कर 'जय दुर्गे' इत्यादि मन्त्र

कहे तो उसे विघ्न नहीं होता। 'जय देवि जगद्धात्रि............महिषघ्नि नमोऽस्तुते' यह श्लोक महिषघ्नी के नमस्कार का मन्त्र है ॥ ९३-९८ ॥

मद्यभाण्डं समालोक्य मत्स्यं मांसं वरस्त्रियम् ॥ ९८ ॥
दृष्ट्वा च भैरवीं देवीं प्रणम्यविमृशेन्मनुम् ।
घोरविघ्नविनाशाय कुलाचारसमृद्धये ॥ ९९ ॥
नमामि वरदे देवि मुण्डमालाविभूषिते ।
रक्तधारासमाकीर्णवदने त्वां नमाम्यहम् ॥ १०० ॥
सर्वविघ्नहरे देवि नमस्ते हरवल्लभे ।
एतेषां दर्शने चैव यदि नैवं प्रकुर्वते ॥ १०१ ॥
शक्तिमन्त्रं पुरस्कृत्य तेषां सिद्धिर्न जायते ।
एतेषां मारणोच्चाटहिंसनं वा भयादिभिः ॥ १०२ ॥
क्रियते यदि पापात्मा देवीभक्तः कथं भवेत् ।
प्रधानांशसमुद्भूता एते कुलजनाः प्रिये ॥ १०३ ॥

मद्य का पात्र, मत्स्य, मांस एवं सौभाग्यवती स्त्री इनको देखकर भैरवी देवी को प्रणाम कर 'घोरविघ्नविनाशाय.....नमस्ते हरवल्लभे' पर्यन्त श्लोक मन्त्र पढ़े। यदि इनके दर्शन होने पर शक्ति के तत्तन्मन्त्रों से प्रणाम न करे तो साधक को सिद्धि नहीं होती। उपर्युक्त गृध्र से लेकर सौभाग्यवती स्त्री (८८-९८) पर्यन्त को यदि साधक भय दिखावे या मारण, उच्चाटन एवं हिंसा करे तो वह पापात्मा भला देवी भक्त किस प्रकार कहा जा सकता है? हे प्रिय! प्रधान के अंश से उत्पन्न हुये—ये सभी कुलजन ही है ॥ ९८-१०३ ॥

डाकिन्यश्च तथा सर्वा देव्यंशा योषितो यतः ।
लब्धसिद्धिसमायोगात् डाकिनीहिंसनं यदि ॥ १०४ ॥
अथवा मानवानाञ्च मद्भक्तानां विशेषतः ।
बटुकानां भैरवाणां तस्य सिद्धिर्न जायते ॥ १०५ ॥

वस्तुतः डाकिनियाँ तथा सभी स्त्रियाँ देवी का अंश ही हैं। यदि भगवती की कृपा से सिद्धि प्राप्त कर कोई डाकिनी का बध करता है, अथवा मेरे भक्तजन मानवों का या बटुक भैरवों का कोई साधक वध करता है तो निश्चय ही उसे सिद्धि नहीं प्राप्त होती ॥ १०४-१०५ ॥

### कामुकीं प्रतिवीरसाधककर्त्तव्यम्

ग्रामे वा नगरे वापि हट्टे वा चत्वरेऽपि च ।
यं दृष्ट्वा युवती नारी कलाकुशलसंयुता ॥ १०६ ॥

भावैकभिन्नहृदया वक्रं दृष्ट्याऽवलोकते ।
उत्क्षिप्य भुजमूलस्य वाससं क्षिप्यते यदि ॥ १०७ ॥
चेलाञ्चलपरीवर्त्तदर्शिता जघनाञ्चला ।
कण्डूयभावव्याजेन शिथिलीकृतवाससा ॥ १०८ ॥
दर्शितस्तनपर्यन्तभूभागा पुनरावृता ।
स्खलत् पादयुगात् पादं पतिता पुनरुत्थिता ॥ १०९ ॥
सखीभिर्व्याजमासाद्य कर्णाकर्णी मनोहरम् ।
इत्यादिभावभावित्तां दृष्ट्वा साधकसत्तमः ॥ ११० ॥
तस्या निजमनोहारि सविशेषं निधाय च ।
तत्र स्थित्वा पुनः क्षोभं कुर्यात् काम वापरः ॥ १११ ॥
वृद्धां वा युवतीं वापि बालां वा सुन्दरीं तथा ।
विदग्धां वा महाभ्रष्टां कुत्सितां वापि हीनजाम् ॥ ११२ ॥
भावैकभिन्नहृदयां ज्ञात्वा वीरवरोत्तमः ।
सम्भोगेन विनोपेक्षां न कुर्याच्च कदाचन ॥ ११३ ॥

ग्राम या नगर या बाजार और चौराहे पर कुलाकुल वाली युवती नारी भाव द्वारा भिन्न हृदय से टेढ़ी निगाहों से देखे, हाथ उठाकर वस्त्र को ऊपर करे, वस्त्र का अञ्चल हटाकर जघन प्रदेश का अञ्चल प्रदर्शित करे, खुजली के बहाने वहाँ के वस्त्र को ढीला करे, स्तनपर्यन्त भू भाग प्रदर्शित करे, चलकर फिर लौट आवे, पैर फिसल जाने का बहाना कर गिर पड़े और पुनः उठ जावे, सखियों से बहाना करती हुई उसके कानों में फुसफुस शब्द कहे इत्यादि उसके भावपूर्ण मन के हरण करने वाले को देखकर, उत्तम साधक उसकी विशेषता समझकर, थोड़ी देर वहीं रहकर, उसके मन को दूसरे कामदेव के समान और भी क्षुब्ध करे । वृद्धा, अथवा युवती, अथवा बाला, अथवा सुन्दरी, कामकला में चतुरा, अथवा महाभ्रष्टा, कुत्सिता, कुरूपा या हीनजाता ही क्यों न हो? यदि कामभाव से उसके हृदय के धैर्य का बाँध टूट गया हो ऐसा समझकर सम्भोग किये बिना उसकी उपेक्षा कदापि न करे ॥ १०६-११३ ॥

आलस्येन भयेनापि अशक्त्या वा यदि त्यजेत् ।
क्रुद्धा भगवती तस्य शापं दद्यात् सुदारुणम् ॥ ११४ ॥
मृते च नरकं गत्वा नानाक्लेशयुतो भवेत् ।
निष्कृतिर्नास्ति तस्यैव यावदाचन्द्रतारकम् ॥ ११५ ॥

यदि आलस्य, भय अथवा अशक्ति वश उससे सम्भोग न कर त्याग कर देता है तो भगवती क्रुद्ध होकर विकटशाप देती हैं । फिर वह मरकर नरक जाता है

और अनेक क्लेश भोगता है। जब तक चन्द्रमा और सूर्य विद्यमान हैं; तब तक उसका कोई प्रायश्चित्त नहीं ॥ ११४-११५ ॥

**फलं पुष्पञ्च ताम्बूलं अन्नपानादिकञ्च यत् ।**
**महादेव्यै विना दत्त्वा न भोक्तव्यं कदाचन ॥ ११६ ॥**
**पतिव्रतायां भार्यायां तथैव ऋतुसङ्गमे ।**
**नमस्कुर्यात् प्रयत्नेन चण्डिकां साधकोत्तमः ॥ ११७ ॥**

फल, पुष्प, ताम्बूल तथा अन्नपानादिक महादेवी को समर्पित किये बिना कदापि भोजन न करे। पतिव्रता भार्या में तथा ऋतुसङ्गम काल में साधकोत्तम चण्डिका को अवश्य नमस्कार करे ॥ ११६-११७ ॥

**शान्तिकं पौष्टिकं वापि तथेष्टापूर्त्तकर्मणि ।**
**यदा कुर्यात्तदा नत्वा देवीं यात्रां समाचरेत् ॥ ११८ ॥**

शान्तिक, पौष्टिक तथा इष्टापूर्त्त (कूप, तड़ागादि प्रतिष्ठा) में कर्म जब करने लगे, तब देवी को नमस्कार कर कार्य प्रारम्भ करे ॥ ११८ ॥

**तौर्यत्रिकं यदा पश्येद्देवानां गीतमेव वा ।**
**तत्र देव्यै निवेद्यैव कर्त्तव्यञ्च प्रपूजनम् ॥ ११९ ॥**

जब भेरी नगाड़ा आदि बाजा बजने लगे अथवा देवता विषयक गीत का गान हो, तब देवी को निवेदित कर ही पूजन प्रारम्भ करे ॥ ११९ ॥

**व्यायामे यदि वा देवसभायां वापि पर्वते ।**
**वने वा दुर्गमेवापि यदि गच्छति साधकः ॥ १२० ॥**
**तत्र स्थित्वा महादेवीं प्रणमेद् भक्तिभावतः ।**
**तर्पणादौ प्रकुर्वीत तृप्यतां ब्रह्मभैरव ॥ १२१ ॥**

व्यायाम, देवसभा, अथवा पर्वत, वन एवं दुर्गम स्थान में जिस समय साधक जाने लगे तो वहाँ स्थित होकर भक्तिभाव से देवी को प्रणाम अवश्य करे। तर्पण करते समय 'तृप्यतां ब्रह्मभैरव' इतना अवश्य कहे ॥ १२०-१२१ ॥

**आवाहने स्वपितॄन् वै भैरवानिति कीर्त्तयेत् ।**
**तृप्यतां भैरवी माता पिता भैरव तृप्यताम् ॥ १२२ ॥**

पितरों के आवाहन काल में भैरव शब्द का प्रयोग करे 'यथा भैरवी माता तृप्यताम्, पिता भैरवं तृप्यताम्' इत्यादि ॥ १२२ ॥

**आदौ च त्रिपुरापूर्वां तर्पणे भैरवीं यजेत् ।**
**ज्योतिष्टोमाश्वमेधादौ यत्र यं यं प्रपूजयेत् ॥ १२३ ॥**

प्रणम्य शिरसा धीरो भैरवीं चिन्तयेद्धिया ।
स्त्रियो दृष्ट्वा तथैकत्र युवत्यतिमनोहराः ॥ १२४ ॥
ताभ्यस्त्रिपुरभैरव्याः प्रीतये चन्दनादिकम् ।
दद्यात्तत्तत्प्रियं द्रव्यं मनसा चिन्त्य चण्डिकाम् ॥ १२५ ॥

तर्पण काल में त्रिपुरा भैरवी का तर्पण सर्वप्रथम करे । ज्योतिष्टोम एवं अश्वमेधादि यज्ञों में जहाँ-जहाँ जिस जिस देवता की पूजा करे वहाँ भैरवी देवी को शिर से प्रणाम कर त्रिपुराभैरवी का ध्यान करना चाहिये । यदि एक ही स्थान में बहुत सुन्दरी युवती स्त्रियाँ दिखाई पड़े तब साधक त्रिपुरभैरवी को प्रसन्न करने के लिये चन्दनादि प्रदान करे और मन में चण्डिका का ध्यान करते हुये उन्हें जो वस्तु अच्छी लगे वह सब देवे ॥ १२३-१२५ ॥

त्रिपुरार्घ्यदानमन्त्रः

भैरवी प्रतिगह्णाति भैरवोऽहं प्रतिग्रहे ।
कन्याया भाषणे श्रीमत्त्रिपुरायाः प्रपूजनम् ॥ १२६ ॥
भैरवाय ददाम्यर्घ्यं देवीं त्रिपुरभैरवीम् ।
एवं वदेत् प्रदाने तु कन्यकायाः प्रपूजने ॥ १२७ ॥

भैरवी ग्रहण करती है, मैं भैरव स्वरूप ग्रहण कर रहा हूँ । कन्या से भाषण मात्र में त्रिपुरा के पूजन का पर्यवसान हो जाता है कन्या के प्रदान करते समय अथवा जब कन्या का पूजन करे तब 'भैरवाय अर्घ्य ददामि' त्रिपुर भैरवीं ददामि' इतना अवश्य कहे ॥ १२६-१२७ ॥

कथितः समयाचारः साधकस्य सुसिद्धये ।
अत्राऽशक्तो भवेद्यस्तु तस्यार्थं लिख्यते स्तवः ॥ १२८ ॥

साधक की सुख से सिद्धि के लिये हमने 'समयाचार' का वर्णन किया । अब इसमें अशक्त लोगों के लिये स्तोत्र लिख रहा हूँ ॥ १२८ ॥

त्रिपुरास्तोत्रम्, तस्याः नव नामानि

त्रिपुरा त्रिपुरेशी च सुन्दरी पुरवासिनी ।
श्रीमालिनी च सिद्धाऽम्बा महात्रिपुरसुन्दरी ॥ १२९ ॥

गुप्तगुप्ततरादिभेदेन योगिनीभेदः

प्रकटाश्च तथागुप्तास्तथा गुप्ततराः पराः ।
सम्प्रदायाः कुलं कौला रहस्यातिरहस्यगाः ॥ १३० ॥
परापररहस्या च तथा कामेश्वरी शुभा ।

भगमालादि महाविद्या नामकथनम्

भगमाला नित्यक्लिन्ना भेरुण्डा वह्निवासिनी ॥ १३१ ॥
महाव्रजेश्वरी दूती त्वरिता कुलसुन्दरी ।
नित्या नीलपताका च विजया सर्वमङ्गला ॥ १३२ ॥
ज्वालांशुमालिनी चित्रा वशिनी शुभगा तथा ।
पूर्णाख्या च तथा ज्ञेया कामेशी मोदिनी तथा ॥ १३३ ॥
विमला चाऽरुणा देवी जयिनी कुलभैरवी ।
सर्वेश्वरी तथा कौली वागीशी सर्वकामिनी ॥ १३४ ॥
सिद्धेश्वरी तथा चोग्रा दुर्गा महिषमर्दिनी ।
स्वप्नावती शूलिनी च मातङ्गी सुरसुन्दरी ॥ १३५ ॥
महाकाली महोग्रा च चित्ररूपा महोदरी ।
प्राणविद्या तथैकाक्षी चैकपादा महाङ्कुशा ॥ १३६ ॥
वामा शिवा तथा ज्येष्ठा सुरूपा चारुभाषिणी ।
त्रिखण्डा त्रिशिरा शौरी गौरी विन्ध्यनिवासिनी ॥ १३७॥
विभुर्जाया मधुमती तथा नीलसरस्वती ।
काली कुण्डमयी कुण्डरूपिणी बन्धुरूपिणी ॥ १३८ ॥
बाला पूर्णा महादेवी नीललक्ष्मीति कथ्यते ।
क्षोभिणी नादिनी भद्रा ललिता बहुरूपिका ॥ १३९ ॥
सर्वसम्पत्करी तारा भवानी विश्ववासिनी ।
त्रोटेश्वरी महाविद्याः कथितास्तव भैरव ॥ १४० ॥

त्रिपुरा, त्रिपुरेशी, सुन्दरी, पुरवासिनी, श्री, मालिनी, सिद्धाऽम्बा, महात्रिपुरसुन्दरी, प्रकटा, गुप्ता, गुप्ततरा, परा, सम्प्रदाया, कुल, कौला, रहस्या, अतिरहस्यगा, परापररहस्या, कामेश्वरी, शुभा, भगमाला, नित्यक्लिन्ना, भेरुण्डा, वह्निवासिनी, महाव्रजेश्वरी, दूती, त्वरिता, कुलसुन्दरी, नित्या, नीलपताका, विजया, सर्वमङ्गला, ज्वालांशुमालिनी, चित्रा, वशिनी, शुभगा, पूर्णाख्या, कामेशी, मोदिनी, विमला, अरुणा, देवी, जयिनी, कुलभैरवी, सर्वेश्वरी, कौली, वागीशी, सर्वकामिनी, सिद्धेश्वरी, उग्रा, दुर्गा, महिषमर्दिनी, स्वप्नावती, शूलिनी, मातङ्गी, सुरसुन्दरी, महाकाली, महोग्रा, चित्ररूपा, महोदरी, प्राणविद्या, एकाक्षी, एकपादा, महाङ्कुशा, वामा, शिवा, ज्येष्ठा, सुरूपा, चारुभाषिणी, त्रिखण्डा, त्रिशिरा, शौरी, गौरी, विन्ध्यनिवासिनी, विभुर्जाया, मधुमती, नीलसरस्वती, काली, कुण्डमयी, कुण्डरूपिणी, बन्धुरूपिणी, बाला, पूर्णा, महादेवी, नीललक्ष्मीति, क्षोभिणी, नादिनी, भद्रा, ललिता, बहुरूपिका, सर्वसम्पत्करी, तारा, भवानी, विश्ववासिनी,

त्रोटेश्वरी, महाविद्या—यहाँ तक भगवती त्रिपुरा की नामावली का स्तोत्र बतलाया गया है ॥ १२९-१४० ॥

त्रिपुरोपासकनामस्तोत्रम्

उपासकान् महादेव शृणुष्वैकमना: स्वयम् ।
मनुश्चन्द्रः कुबेरश्च मन्मथस्तदनन्तरम् ॥ १४१ ॥
लोपामुद्रा मुनिर्नन्दी शक्रः सुन्दः शिवस्तथा ।
क्रोधभट्टारकश्चैव पञ्चमी च प्रकीर्त्तिता ॥ १४२ ॥
दुर्वासा व्याससूर्यौ च वशिष्ठश्च पराशरः ।
और्वो वह्निर्यमश्चैव नैर्ऋतो वरुणस्तथा ॥ १४३ ॥
वायुर्विष्णुः स्वयम्भूश्च भैरवो गणकस्तथा ।
अनिरुद्धो भरद्वाजो दक्षिणामूर्त्तिरेव च ॥ १४४ ॥
गणपः कुलपश्चैव वाणी गङ्गा सरस्वती ।
धात्री शेषः प्रमत्तश्च उन्मत्तः कुलभैरवः ॥ १४५ ॥
क्षेत्रपालो हनूमांश्च दक्षो गरुड एव च ।
प्रह्लादः शुकदेवश्च रामो रावण एव च ॥ १४६ ॥
काश्यपः कुम्भकर्णश्च जमदग्निर्भृगुस्तथा ।
बृहस्पतिर्यदुश्रेष्ठो दत्तात्रेयो युधिष्ठिरः ॥ १४७ ॥
अर्जुनो भीमसेनश्च द्रोणाचार्यो वृषाकपिः ।
दुर्योधनस्तथा कुन्ती सीता च रुक्मिणी तथा ॥ १४८ ॥
सत्यभामा द्रौपदी च उर्वशी च तिलोत्तमा ।
पुष्पदन्तो महाबुद्धो बाणः कालश्च मन्दरः ॥ १४९ ॥
कैलासः क्षीरसिन्धुश्च उदधिर्हिमवांस्तथा ।
नारदो भीष्मकर्णौ च मेरुश्चारुण एव च ॥ १५० ॥
जनकश्च तथा कौत्सः कथिता ब्रह्मसाधकाः ।
महाविद्याप्रसादेन स्वस्वकर्म समन्विताः ॥ १५१ ॥

इसके बाद महादेव को सम्बोधन कर त्रिपुरा के उपासकों के नाम हैं। मनु, चन्द्र, कुबेर, मन्मथ, लोपामुद्रा, नन्दी, शक्र, सुन्द, शिव, क्रोधभट्टारक, दुर्वासा, व्यास, सूर्य, वशिष्ठ, पराशर, और्व, वह्नि, यम, नैर्ऋत, वरुण, वायु, विष्णु, स्वयम्भू, भैरव, गणक, अनिरुद्ध, भरद्वाज, दक्षिणामूर्त्ति, गणप, कुलप, वाणी, गङ्गा, सरस्वती, धात्री, शेष, प्रमत्त, उन्मत्त, कुलभैरव, क्षेत्रपाल, हनूमान, दक्ष, गरुड, प्रह्लाद, शुकदेव, राम, रावण, काश्यप, कुम्भकर्ण, जमदग्नि, भृगु, बृहस्पति, यदुश्रेष्ठ, दत्तात्रेय, युधिष्ठिर, अर्जुन, भीमसेन, द्रोणाचार्य, वृषाकपि,

दुर्योधन, कुन्ती, सीता, रुक्मिणी, सत्यभामा, द्रौपदी, उर्वशी, तिलोत्तमा, पुष्पदन्त, महाबुद्ध, बाण, काल, मन्दर, कैलास, क्षीरसिन्धु, उदधि, हिमवान्, नारद, भीष्म, कर्ण, मेरु, अरुण, जनक और कौत्स—यहाँ तक त्रिपुरा के साधकों के नाम कहे गये हैं । जो महाविद्या की कृपा से अपने अपने कर्मों से सिद्धि प्राप्त कर चुके है ॥ १४१-१५१ ॥

एतेषां शुभनामानि नित्याविद्योपसेविनाम् ।
प्रातःकाले शुचिर्भूत्वा यः पठेत् प्रयतात्मना ॥ १५२ ॥
पूजयेद् वा शुचिर्भूत्वा प्रसीदामि कुलप्रिये ।
अशुचिर्वा निरालम्बो सालम्बो वा कुलान्तिके ॥ १५३ ॥
नित्यपूजाफलं तस्य ददामि वरमीप्सितम् ।
चक्रसङ्केतकं चैव गुरुसङ्केतकं तथा ॥ १५४ ॥
मन्त्रसङ्केतकं चैव नामसङ्केतकं तथा ।
समयाचारसङ्केतमकृत्वा योऽत्र वर्त्तते ॥ १५५ ॥
जपपूजार्चनं होमोऽभिचाराय प्रकल्पते ।
एवं स्तोत्रं पठित्वा तु सङ्केतमानयेद् ध्रुवम् ॥ १५६ ॥

अब फलश्रुति कहते हैं—नित्या महाविद्या की सेवा में परायण इन उपासकों का नाम प्रातःकाल के समय जो साधक पवित्र होकर समाहित चित्त से पढ़ता है अथवा जो पवित्र होकर इनका पूजन करता है; मैं प्रसन्न हो जाती हूँ । कौलों से प्रेम करने वाले अथवा कौलों के समीप अशुचि अथवा निरालम्ब अथवा सालम्ब होकर जो इस स्तोत्र का पाठ करता है उसे मैं नित्यपूजा का फल तो देती ही हूँ। उसे अभीष्ट वर भी प्रदान करती हूँ । चक्रसङ्केतक, गुरुसङ्केतक, मन्त्रसङ्केतक, नामसङ्केतक, अथवा समयाचार सङ्केतक बिना स्तुति किये जो कुलधर्म स्वीकार करता है उस साधक का किया गया समस्त जप, पूजा, अर्चन और होम मृत्यु का कारण बन जाता है । अतः इस स्तोत्र को पढ़कर निश्चय ही सङ्केत प्रारम्भ करना चाहिए ॥ १५२-१५६ ॥

### नैमित्तिकार्चन विधानम्

अथ वक्ष्यामि शाक्तानां नैमित्तार्चनमुत्तमम् ।
अथ वैशाखमासस्य शुक्लप्रतिपदीश्वरि ॥ १५७ ॥
ब्राह्मे मुहूर्त्ते उत्थाय स्नानं सन्ध्यामुपास्य च ।
मनोज्ञे रहसि स्थाने पूर्वाभिमुखमास्थितः ॥ १५८ ॥
आत्मानं गन्धपुष्पाद्यैरलंकृत्य विधानतः ।
कृत्वा पुरोदितान् न्यासान् देवताभावमास्थितः ॥ १५९ ॥

मत्स्यमांसादिविधिवद् भक्ष्यभोज्यसमन्वितम् ।
अर्घ्यं निवेद्य तच्छेषं शक्त्या सह पिबेत्ततः ॥ १६० ॥
यौवनोल्लाससहितो निर्विकल्पेन चेतसा ।
ध्यायंस्तन्मण्डले देवीमष्टोत्तरसहस्रकम् ॥ १६१ ॥
जप्त्वा समर्प्य तत्पूजां देवताञ्च समुद्धरेत् ।

तत्र कालादि निर्णयः

एवं शुक्लप्रतिपदं समारभ्य दिने दिने ॥ १६२ ॥
कुर्याज्जपार्चनं कृष्णाचतुर्दश्यन्तमम्बिके ।
अमावस्यादिने धीरः पूजयेद् भक्तकौलिकान् ॥ १६३ ॥

**शाक्तों का नैमित्तिक अर्चन**—अब इसके बाद शाक्तों के लिये उत्तम नैमित्तिक अर्चन कहता हूँ कृष्णापक्षार्चन—हे ईश्वरि ! वैशाख मास की शुक्ल प्रतिपदा को ब्रह्म मुहूर्त में उठकर स्नान सन्ध्यादि कर्म समाप्त कर किसी मनोज्ञ एकान्त स्थान में जाकर अपने को विधिपूर्वक गन्ध पुष्पादि से अलंकृत कर पूर्व में कहे गये न्यासों को कर देवता भाव में स्थित होकर भक्ष्य-भोज्य समन्वित मत्स्य मांसादि एवं अर्घ्य विधिवत् भगवती को निवेदन कर उस प्रसाद को शक्ति के साथ पान करे । फिर जवानी की मस्ती के उमङ्ग से भरकर निःसन्देह चित्त होकर भगवती का ध्यान करते हुये आठ हजार की संख्या में जप कर देवी को समर्पित कर देवता का पूजन करे । इस प्रकार शुक्ल प्रतिपदा से आरम्भ कर वह जप और पूजा कृष्णपक्ष की चतुर्दशी के अन्त तक प्रतिदिन करे । फिर अमावास्या के दिन भक्त कौलिकों की पूजा करे ॥ १५७-१६३ ॥

त्रि सप्त नव पञ्च वा वित्तशाठ्यविवर्जितः ।
एवं यो मासमात्रन्तु कुर्यात् सूर्योदयार्चनम् ॥ १६४ ॥
देवता तस्य सन्तुष्टा ददाति फलमीप्सितम् ।
यत्किञ्चिदुदिते सूर्ये मण्डले स्वेष्टदेवताम् ॥ १६५ ॥
ध्यात्वा सावरणां सम्यक् प्रजपेत्तु विधानतः ।
षोडशैरुपचारैस्तु चक्रपूजापुरःसरम् ॥ १६६ ॥
कुलदीपान् प्रदर्श्याऽथ साधको भावतत्परः ।
मध्याह्ने पूजयेद्वापि सायाह्ने वापि पूजयेत् ॥ १६७ ॥
स तत्फलमवाप्नोति योगिनीनां प्रियो भवेत् ।
काङ्क्षितां लभते सिद्धिं देववद्विचरेद्भुवि ॥ १६८ ॥

वित्त की शठता (कंजूसी) त्याग कर तीन, सात, नव, पाँच संख्याक कौलिकों का पूजन करे । इस प्रकार जो एक मास तक सूर्योदय के काल में

कृष्णापक्षार्चन करता है उसके ऊपर सन्तुष्ट देवता उसको अभीष्ट फल देते हैं। यत्किञ्चित् सूर्य मण्डल के उदय काल में अपनी इष्ट देवता का ध्यान कर चक्रपूजा पुरःसर षोडशोपचारों से विधानपूर्वक पूजन कर मन्त्र का जप करे। फिर धर्म में तत्पर होकर साधक कुलमार्ग के दीपों का भावतत्पर होकर प्रदर्शन करे। फिर मध्याह्न में अथवा सायाह्न में पूजन करे। वह साधक उस फल को प्राप्त कर लेता है और योगिनियों का प्रिय होता है। अपना अभीष्ट फल प्राप्त करता है और देवता के समान भूलोक में विचरण करता है ॥ १६४-१६८ ॥

शुक्लपक्षार्चनविधानम्

माघशुक्लप्रतिपदि दिवावसानके बुधः ।
स्नात्वा शुक्लाम्बरधरः सायं सन्ध्यामुपास्य च ॥ १६९ ॥
सूर्यार्चनोक्तमार्गेण सर्वद्रव्यसमन्वितः ।
यौवनोल्लाससहितश्चन्द्रस्थां देवतां स्मरन् ॥ १७० ॥
देवीं सम्पूज्य विधिवच्चन्द्रमण्डलवासिनीम् ।
चन्द्रास्तोदयपर्यन्तं जपेन्मन्त्रमनन्यधीः ॥ १७१ ॥
एवं प्रतिदिनं शुक्लचतुर्दश्यन्तमर्चयेत् ।
पौर्णमास्यां यथाशक्त्या पूजयेच्छक्तिकौलिकान् ॥ १७२ ॥
एवं यः कुरुते भक्त्या शुक्लपक्षार्चनं सदा ।
सर्वपापविशुद्धात्मा सर्वैश्वर्यसमन्वितः ॥ १७३ ॥
सर्वलोकैकसम्पूज्यः शिववद्विचरेद्भुवि ।
शुक्लपक्षार्चनं यद्वत्तद्वत् पक्षे सितेतरे ॥ १७४ ॥
यः करोति विधानेन सर्वान् कामान् समश्नुते ।
इह भुक्त्वाऽखिलान् भोगान् देववत् प्रियदर्शनः ॥ १७५ ॥
योगिनीवीरमिलनं लभते नात्र संशयः ।

**शुक्लपक्षार्चन**—माघ शुक्ल प्रतिपदा के दिन सायङ्काल के समय बुद्धिमान् साधक स्नान कर शुक्ल वस्त्र धारण कर सायङ्काल की सन्ध्योपासना कर पूर्वाचन में कही गई विधि के अनुसार समस्त वस्तुओं से समन्वित होकर जवानी की उमङ्ग के सहित उत्साहयुक्त चन्द्रमा में रहने वाली भगवती श्री देवता का स्मरण कर चन्द्रमण्डलवासिनी भगवती महाश्री का पूजन कर चन्द्रमा के अस्त से लेकर उदय पर्यन्त एकाग्रचित्त से मन्त्र का जप करे। इस प्रकार प्रतिदिन शुक्ल चतुर्दशी तक जप करे। पौर्णमासी के दिन अपनी शक्ति के अनुसार कौलिकों की पूजा करे। इस प्रकार जो साधक भगवती महा श्री का शुक्ल पक्षार्चन करता है वह सर्वपाप विशुद्धात्मा सर्वैश्वर्य समन्वित सर्वलोकैक पूज्य शिव के समान होकर भूमण्डल में

विचरण करता है। इसी प्रकार शुक्ल पक्षार्चन के समान जो सितेतर कृष्णपक्ष में भी भगवती महा-श्री का विधानपूर्वक अर्चन करता है, वह अपनी सम्पूर्ण कामनाओं का उपभोग करता है। वह देवता के समान शरीर धारण कर समस्त भोगों का भोग करता है। उसे योगिनियाँ और वीर उपासक प्राप्त हो जाते हैं इसमें संशय नहीं ॥ १६९-१७६ ॥

कृष्णपक्षार्चनम्

**अथ कार्त्तिकमासस्य शुक्लप्रतिपदि ध्रुवम् ॥ १७६ ॥**
**स्नात्वाऽऽचम्य च शुद्धात्मा न्यासान् कृत्वा पुरोदितान् ।**
**प्रसुप्ते जीवलोके तु मुदितात्मा महानिशि ॥ १७७ ॥**
**सूर्यार्चनोक्तविधिना सर्वद्रव्यसमन्वितः ।**
**आज्येनानामिकाङ्गुष्ठे वर्त्तिं प्रज्वाल्य साधकः ॥ १७८ ॥**
**पञ्चवर्णरजश्चित्रे वसुपत्रसरोरुहे ।**
**मधुसम्पूर्णकलसे कांस्यपात्रे मनोहरे ॥ १७९ ॥**
**दीपं संस्थाप्य पुरत उत्तराभिमुखस्थितः ।**
**दीपे सावरणां देवीं ध्यात्वा विधिवदर्चयेत् ॥ १८० ॥**

कार्तिक मास की शुक्ल प्रतिपदा के दिन स्नान कर आचमन करे। इस प्रकार शुद्धात्मा होकर पूर्ववत् न्यास करे। जब सारा संसार सो जावे, उस समय महानिशा (अर्धरात्रि) के समय पूर्वोक्त विधि से सम्पूर्ण पूजा सामग्री एकत्रित कर घी से अनामिकाङ्गुष्ठ अङ्गुलियों से जलाकर दीपक में स्थापित करे। फिर पचरङ्गे रङ्ग से रङ्गे हुये अष्टपत्र कमल पर स्थापित मद्यपूर्ण कलश पर अथवा सुन्दर कांस के पात्र पर उसे स्थापित कर देवे। फिर उत्तराभिमुख होकर आवरण सहित देवी का ध्यान कर विधिवत् उसका अर्चन करे ॥ १७६-१८० ॥

**यौवनोल्लाससहितो दीपस्थां देवतां स्मरन् ।**
**अष्टोत्तरसहस्रं तु जपेन्मन्त्रमनन्यधीः ॥ १८१ ॥**

जवानी के उत्साह से भरा हुआ उक्त साधक दीप में रहने वाली देवी का स्मरण करते हुये एकाग्रचित्त हो आठ हजार जप करे ॥ १८१ ॥

**एवं समर्चयेत् कृष्णाचतुर्दश्यन्तमम्बिके ।**
**अमावस्यादिने शक्त्या पूजयेत् शक्तिकौलिकान् ॥ १८२ ॥**

इस प्रकार कृष्ण चतुर्दशी के अन्त तक अम्बिका का समर्चन करे। अमावास्या के दिन शक्ति के अनुसार कौलिकों का पूजन करे ॥ १८२ ॥

**एवं कृते महादेवी प्रीता भवति सर्वदा**

सर्वकामसमृद्धात्मा सर्वैश्वर्यसमन्वितः ॥ १८३ ॥
सर्वलोकैकसम्मान्यः सञ्चरेच्च यथासुखम् ।
अष्टाष्टकार्चनं कुर्याच्छक्तश्चेदेकवासरे ॥ १८४ ॥

ऐसा करने से महादेवी सदैव के लिये प्रसन्न हो जाती हैं । वह साधक सर्वकामसमृद्धात्मा, सर्वैश्वर्य समन्वित एवं समस्त जनों से सम्मानित होकर इच्छानुसार लोक में सञ्चरण करता है । यदि सामर्थ्य हो तो एक दिन में अष्टकाष्टक का अर्चन करे ॥ १८३-१८४ ॥

### अष्टाष्टकार्चनम्

अथवाऽष्टदिनेष्वेवाथवा द्व्यष्टदिनेषु वा ।
द्वात्रिंशद्दिवसेष्वेव चतुःषष्टिदिनेषु वा ॥ १८५ ॥
गुरुणा कारयेदेतत् क्रमज्ञेनाऽपरेण वा ।
क्रमज्ञश्चेत् स्वयं कुर्याद्वित्तशाठ्यविवर्जितः ॥ १८६ ॥

अथवा आठ दिन में, अथवा सोलह दिन में, अथवा बत्तीस दिन में, अथवा चौसठ दिनों में अष्टकाष्टक का पूजन करे । यह अर्चन गुरु से करावे, अथवा क्रम जानने वाले किसी और से करावे । यदि क्रम का ज्ञान हो तो स्वयं करे । किन्तु वित्त की शठता (कंजूसी) न करे ॥ १८५-१८६ ॥

मूलाष्टकं तु ब्राह्म्याद्यश्चासिताङ्गादिभैरवाः ।
मङ्गलाद्यैश्च निपुणैरष्टभिः शक्तिभिस्तथा ॥ १८७ ॥
मूलाष्टकोद्भवानीति प्रसिद्धानि कुलागमे ।
अक्षोभ्यादिचतुःषष्टिमिथुनानि समर्चयेत् ॥ १८८ ॥
पूर्वोक्तेन विधानेन यथा विभवमर्चयेत् ।
क्रमलोपं न कुर्वीत स्वेष्टकार्यार्थसिद्धये ॥ १८९ ॥
गन्धपुष्पाक्षताद्यैश्च मत्स्यमांसासवादिभिः ।
भक्ष्यभोज्यादिभिर्नानापदार्थैः षड्रसान्वितैः ॥ १९० ॥
सम्यक् सन्तोषयेत्तानि मिथुनान्यतिभक्तितः ।
प्रौढान्तोल्लासपर्यन्तं कुर्यात् श्रीचक्रपूजनम् ॥ १९१ ॥

ब्राह्मी, माहेश्वरी आदि मूलाष्टक हैं । सर्वनिपुण्य मङ्गल आदि आठ शक्तियों के साथ असिताङ्ग आदि भैरव भी मूलाष्टक है । भवानी इत्यादि भी मूलाष्टक कही गई है जो कुलागम में प्रसिद्ध है । अक्षोभ्य आदि चौसठ मिथुन (युग्म या जोड़े) की पूर्वोक्त विधान से अपने विभवानुसार अर्चना करे । अपने इष्टकर्म की सिद्धि के लिये क्रम लोप न करे । गन्ध, पुष्प, अक्षतादि से मत्स्य, मांस, आसवादि से

षड्रस समन्वित भक्ष्य भोज्यादि नाना पदार्थ भक्तिपूर्वक उन मिथुनों को समर्पित कर सन्तुष्ट करना चाहिए । इस प्रकार अत्यन्त प्रौढ़ उल्लास पर्यन्त श्रीचक्र का पूजन करे ॥ १८७-१९१ ॥

**एवं यः कुरुते भक्त्या सकृदष्टाष्टकार्चनम् ।**
**ब्रह्मविष्णुमहेशादि देवताभिः स पूज्यते ॥ १९२ ॥**

इस प्रकार जो एक बार भी अष्टाष्टक का पूजन करता है, ब्रह्मा, विष्णु एवं महेशादि देवताओं से वह पूजित होता है ॥ १९२ ॥

**किं पुनर्मानवाद्यैश्च साक्षाच्छिव इवापरः ।**
**यदर्चनाच्चतुःषष्टि योगिनीगणसंस्तुतः ॥ १९३ ॥**

फिर मनुष्यों की बात ही क्या कही जाय? वह दूसरा साक्षात् शिव है इस अष्टाष्टकादि सहित चक्र के पूजन से वह साधक योगिनीगणों से साक्षात् संस्तुत हो जाता है ॥ १९३ ॥

**अव्याहताज्ञः सर्वत्र पूज्यते देववद् भुवि ।**
**पुनरावृत्तिरहितो निवसेच्छिवसन्निधौ ॥ १९४ ॥**

उस साधक की आज्ञा अप्रतिहत रहती है । वह विद्वान् साधक सर्वत्र देवता के समान पूजित होता है। वह पुनः जन्म नहीं लेता और शिव के सन्निधान में उसका निवास होता है ॥ १९४ ॥

**अस्मात् परतरा पूजा नास्ति सत्यं न संशयः ।**
**कुलपूजां विना चक्रे नाधिकारः कथञ्चन ॥ १९५ ॥**

इससे बढ़कर और कोई पूजा नहीं । यह सत्य है इसमें संशय नहीं । कुलपूजा के बिना चक्रपूजन का अधिकार किसी प्रकार भी नहीं होता ॥ १९५ ॥

**विना यन्त्रेण पूजा चेत् देवता न प्रसीदति ।**
**कुलपूजां सुनियतं यः करोति स कौलिकः ॥ १९६ ॥**

यन्त्र के बिना यदि पूजा की जावे तो देवता प्रसन्न नहीं होते । कौलिक वही है जो नियमपूर्वक नित्य कुलपूजा करता है ॥ १९६ ॥

**सर्वदा समवाप्नोति योगिनीवीरमेलनम् ।**
**नीचोऽपि वा सकृद् भक्त्या कारयेद् यः कुलार्चनम् ॥ १९७ ॥**
**स सद्गतिमवाप्नोति किमुताऽन्ये द्विजातयः ।**
**तस्मात् सर्वप्रयत्नेन सर्वावस्थासु सर्वदा ॥ १९८ ॥**

कुलपूजारतो भूयादभीष्टफलसिद्धये ।
वेदशास्त्रोक्तमार्गेण कुलपूजां करोति यः ॥ १९९ ॥
तत्समीपस्थिता नित्यं शिवेन सह शङ्करी ।
इदं सत्यमिदं सत्यं सत्यं सत्यं न संशयः ॥ २०० ॥

॥ इति श्रीमज्ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये
पञ्चदशोल्लासः ॥ १५ ॥

उसे योगिनियाँ और वीरसाधक मिलते रहते हैं । नीच पुरुष भी यदि एक बार भक्तिपूर्वक कुलार्चन करता है, तो वह सद्गति प्राप्त कर लेता है । फिर उत्तम द्विजाति पुरुषों के लिये कहना ही क्या है? इसलिये सब प्रकार के प्रयत्नों से सभी अवस्थाओं में कुलपूजा में संलग्न रहे । जिससे अपने अभीष्ट फल की सिद्धि हो, वेदशास्त्रोक्त मार्ग से जो कुल पूजा करता है, उसके सन्निधान में शिव के साथ शङ्करी का सदा सन्निवास रहता है; यह सत्य है, यह सत्य है, यह सत्य है; इसमें संशय नहीं ॥ १९७-२०० ॥

**महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय के ज्येष्ठ पुत्र पण्डित रामरञ्जन मालवीय कृत श्रीमज्ज्ञानानन्द परमहंस विरचित कौलावलीनिर्णय नामक तन्त्र के पञ्चदश उल्लास की निरञ्जन हिन्दी व्याख्या पूर्ण हुई ॥ १५ ॥**

# षोडश उल्लासः

कुलदीक्षाविधानम्

अथातः सम्प्रवक्ष्यामि कुलदीक्षां सुसिद्धये ।
अदीक्षितकुलो यो हि साधनं समुपाचरेत् ॥ १ ॥
स महापातकी भूत्वा रौरवं नरकं व्रजेत् ।
अदीक्षितकुलासङ्गात् सिद्धिहानिः प्रजायते ॥ २ ॥

अब उत्तम प्रकार की सिद्धि प्राप्ति के लिये कुलदीक्षा कहता हूँ । जो बिना दीक्षा लिये साधन करता है वह महापातकी होकर रौरव नरक में गिरता है । जिसकी दीक्षा नही हुई है, उसका साथ करने से अपनी सिद्धि में हानि उठानी पड़ती है ॥ १-२ ॥

तत्कथाश्रवणं चेत् स्यात्तत्तल्पागमनं यदि ।
स कुलीनः कथं चैव पूजयेत् परमेश्वरीम् ॥ ३ ॥

यदि उसकी चर्चा अथवा कथा सुने या उसकी शय्या पर बैठे, तब वह कुलीन बनकर किस प्रकार परमेश्वरी का पूजन कर सकता है ॥ ३ ॥

दीक्षिता न च योषा चेत् कथं स्यात्कुलपूजनम् ।
यत्कुले कुलदीक्षा तु न स्यात् पापी स एव हि ॥ ४ ॥

यदि स्त्री दीक्षा न ली हो तो कुलपूजन किस प्रकार सम्भव हो सकता है? जिस कुल में कुल दीक्षा न हो वह निश्चय ही पापी है ॥ ४ ॥

कुल पूजा न चेच्चैव कुलमन्त्राः पराङ्मुखाः ।
परयोषा यदि स्याच्च स्वयं तस्या गुरुर्भवेत् ॥ ५ ॥

कुल दीक्षा के बिना कुलपूजा नहीं होती । फिर तो कुलपूजा के बिना मन्त्र भी पराङ्मुख हो जाते हैं । यदि दूसरे की स्त्री हो तो स्वयं दीक्षा देकर उसका गुरु हो जाना चाहिये ॥ ५ ॥

**निजाकान्तां समानीय सुशीलां सुयशस्विनीम् ।**
**कुलभक्तं गुरुं प्रार्थ्य दीक्षयेत् कुलदीक्षया ॥ ६ ॥**

अपनी सुशीला सुयशःस्विनी स्त्री को लेकर कुलभक्त गुरु से प्रार्थना कर कुलदीक्षा से दीक्षित करावे ॥ ६ ॥

**शिवश्च कौल एव स्याच्छिवाः स्युः सर्वदेशिकाः ।**
**गणेशो गाणपत्यश्च गणदीक्षाप्रभुर्यतः ॥ ७ ॥**

कौल ही शिव है, कुलमार्ग के सभी आचार्य शिवा हैं, गाणपत्य गणेश है क्योंकि वही गणदीक्षा के प्रभु है ॥ ७ ॥

**सुरः सौरास्तथा चैव विष्णुर्विष्णुपरायणाः ।**
**कुलीनः सर्वमन्त्राणामधिकारी भवेत् सदा ॥ ८ ॥**

सौर सुर हैं और विष्णु परायण विष्णु हैं, किन्तु कुलीन साधक सभी मन्त्रों का अधिकारी है ॥ ८ ॥

**ततः सुदीक्षतं कुर्यात् कुलं गुरुः प्रयत्नतः ।**
**दीक्षायां कुलपूजायां शिष्यत्वे यदि वा गुरौ ॥ ९ ॥**
**लज्जापरं कुलं यत्र विद्यापि तत्र निद्रिता ।**
**अधस्तात् दृष्टिपातेन तस्य विद्याऽप्यधोमुखी ॥ १० ॥**

इसलिये गुरु प्रयत्नपूर्वक कुल को दीक्षित करे । दीक्षा में कुल पूजा में जहाँ जहाँ कुल मार्ग वाले गुरु और शिष्य लजाते हैं वहाँ वहाँ महाविद्या भी प्रसुप्त रहती हैं । यतः वह लज्जा से अपना मुख और दृष्टि नीचे किये रहता है, इसलिये उसकी विद्या भी अधोमुखी हो जाती है ॥ ९-१० ॥

**निमीलनात्ततो विद्या साधकं मारयेद् ध्रुवम् ।**
**पार्श्वावलोकनेनैव व्याधिदारिद्र्यपीडिता ॥ ११ ॥**

विद्या के निमीलित हो जाने से वह साधक को निश्चित रूप से विनष्ट कर देती है । दोनों पार्श्व में अवलोकन से विद्या व्याधि और दारिद्र्य से पीड़ित रहती है ॥ ११ ॥

**चतुर्दिगालोकनेन उच्चाटनगतो भवेत् ।**
**एतादृशं कुलं चैव यदि कुर्यात् कथञ्चन ॥ १२ ॥**
**तदा कुलगुरुं प्रार्थ्य कारयेद्दीक्षितं ततः ।**
**एतादृश कुलस्याग्रे प्रयोगः फलदो न हि ॥ १३ ॥**

चारों दिशा में देखने से उच्चाटन की अवस्था हो जाती है। यदि किसी प्रकार कुल की ऐसी दशा हो जावे, तब कुलगुरु से प्रार्थना कर उस कुल को दीक्षित करावे क्योंकि ऐसे कुल के आगे प्रयोग सफल नहीं होते ॥ १२-१३ ॥

**इत्यादि शिक्षया चैव शिक्षिता कुलजा सती ।**
**परानन्दरसाघूर्णहृदया लोललोचना ॥ १४ ॥**
**मालालङ्कारशोभाढ्या रक्तवस्त्रविभूषणा ।**
**ताम्बूलपूरितमुखी सिन्दूराञ्जनसंयुता ॥ १५ ॥**
**गुरुवक्त्रात् प्रयोगार्थं सोत्सुका साधकप्रिया ।**
**देवीवाहं देवदेव उपदेशं समाचर ॥ १६ ॥**

कुलीन की इस प्रकार की शिक्षा से शिक्षित हुई कुलजा सती परानन्द रस से मदमत्त हुई हृदय वाली, चञ्चलनेत्रा, मालालङ्कार से शोभा संयुक्त, लाल वस्त्र धारण कर, मुख में ताम्बूल चबाती हुई, माँग में सिन्दूर और नेत्रों में अञ्जन लगाकर प्रयोग के लिये उत्सुक उस तत्वज्ञ साधक की पत्नी गुरु के मुख से दीक्षा प्राप्त करने के लिये इस प्रकार प्रार्थना करे—'हे देवदेव ! मैं देवी के समान हूँ मुझे उपदेश दीजिये' ॥ १४-१६ ॥

### शक्तिदीक्षाकथनम्

**एवमुक्ते कुले चैव देवोऽहं शृणु पार्वति ।**
**इत्युक्त्वा सर्वशृङ्गारवेशाढ्यः स्थिरमानसः ॥ १७ ॥**
**जप्त्वा ब्राह्मयादिकाः शक्तीः पूर्वमन्त्रेण सेवयेत् ।**
**तद्गात्रे देयमन्त्रस्य न्यासजालं प्रविन्यसेत् ॥ १८ ॥**

इस प्रकार उसके कहे जाने पर गुरु कहे—हे पार्वति ! सुनिए मैं स्वयं देव हूँ। ऐसा कहकर गुरु सभी शृङ्गार वेष से शोभित एवं स्थिर चित्त होकर ब्राह्मी आदि शक्तियों का जप कर पूर्व मन्त्र से उसका प्रोक्षण करे। फिर देयमन्त्र से उसके शरीर में न्यास जाल का न्यास करे ॥ १७-१८ ॥

**निजपुत्रीवदाचार्यस्तद्भालपटले लिखेत् ।**
**शक्तिचक्रं त्रिधाऽऽवेष्ट्य तत्र कामकलां लिखेत्॥ १९ ॥**

आचार्य अपनी पुत्री के समान उसके भालपट्ट पर तीन बार शक्तिचक्र (ह्रीं ह्रीं ह्रीं) लिखे। फिर उससे तीन बार आवेष्टित कर कामकला (क्लीं) लिखे ॥ १९ ॥

**तन्मध्ये देयमन्त्रेण दर्भितं नाम रञ्जितम् ।**
**तत्र देवीं समावाह्य ध्यात्वा तां तु प्रपूजयेत् ॥ २० ॥**

उसके मध्य में देय मन्त्र से दर्भित नाम लिखे। फिर उस पर देवी का आवाहन कर उनकी पूजा करे ॥ २० ॥

**ततस्तत्पुत्रिकाकर्णे ऋषिच्छन्दः समन्विताम् ।**
**मूलविद्यां त्रिधाऽऽवृत्त्या कथयेत् वामकर्णके ॥ २१ ॥**

फिर उस पुत्री के कान में ऋषि छन्द समन्वित मूल विद्या को गुरु तीन आवृत्ति में उसके बायें कान में कहे ॥ २१ ॥

**नाम कुर्यात्ततस्तस्याः कान्तं साधकसत्तमः ।**
**मातृपितृकृतं नाम वर्जयित्वा वदेत्ततः ॥ २२ ॥**
**अद्यप्रभृति पुत्रि त्वं कुलपूजार्चने रता ।**
**सकुलाज्ञां समादाय लज्जालस्यविवर्जिता ॥ २३ ॥**

फिर वह साधक सत्तम उस पुत्री का अत्यन्त सुन्दर नामकरण करे। माता पिता के द्वारा किया हुआ नाम वर्जित कर अपना दिया हुआ नाम उसे बतावे। फिर उससे कहे—हे पुत्रि! आज से तुम कुलपूजा किया करना। लज्जा और आलस्य का त्याग करना तथा 'कौलों की आज्ञा' का आदर करना ॥ २२-२३ ॥

**यथोपदिष्ट विधिना सामरस्यं समाचर ।**
**इत्यनुज्ञां गुरोर्लब्ध्वा प्रणमेद्दण्डवद् भुवि ॥ २४ ॥**
**त्राहि नाथ कुलाचारपक्षिणीपद्मनायक ।**
**हृत्पादाम्भोरुहच्छायां देहि मूर्ध्नि यशोधन ॥ २५ ॥**
**विधिना स्तवनं कृत्वा गुरवे दक्षिणां ददेत् ।**
**सर्वस्वं गुरवे दद्यात्तदर्धं वा दयायुजे ॥ २६ ॥**

जैसा हमने उपदेश किया है, उसी उपदेश के अनुसार सामरस्य स्थापित करना। गुरु की इस प्रकार आज्ञा पाकर वह शिष्या उस गुरु को पृथ्वी में गिरकर दण्डवत् प्रणाम करे। फिर 'त्राहि नाथ कुलाचारपक्षिणीपद्मनायक, हृत्पादाम्भोरुहच्छायां देहि मूर्ध्नि यशोधन' पर्यन्त श्लोक मन्त्र पढ़कर विधिपूर्वक गुरु की स्तुति करे। तदनन्तर गुरु को दक्षिणा प्रदान करे। उन दयालु गुरु को सब कुछ दक्षिणा देवे, अथवा अपने धन का आधा दक्षिणा में देवे ॥ २४-२६ ॥

**दक्षिणाञ्च यथाशक्त्या प्रदत्त्वा गुरवे सुधीः ।**
**स्तुत्वा नत्वा यथाशक्त्या स्वकल्पोक्तं समाचरेत्॥ २७ ॥**

सुधी साधक गुरु को यथाशक्ति दक्षिणा देकर उनकी स्तुति कर उन्हें नमस्कार करे। फिर सम्प्रदायानुसार यथाशक्ति कार्य करे ॥ २७ ॥

### प्रशस्तशक्तिलक्षणानि

**उपदिष्टा यदा देवी तदा देवी तु पुत्रिका ।**
**पूजार्हा च यदा देवी तदा माता न संशयः ॥ २८ ॥**

जब गुरु ने उस कुलाङ्गना को दीक्षा दी और उसे उपदेश दिया, तब तो वह उसकी पुत्री हो गई । यदि देवी पूजा के योग्य हो, तब वह माता बन जाती है; इसमें सन्देह नहीं ॥ २८ ॥

**सर्वथा पितृपुत्रीभ्यां मूलयोगो न दृश्यते ।**
**तत्कृत्वा तेन पापेन उभौ नरकगामिनौ ॥ २९ ॥**

मूल पिता (=मूल उत्पन्नकर्ता) और पुत्री का संयोग नहीं रह जाता । यदि उन दोनों का सम्बन्ध रह जाता है तो दोनों ही नरकगामी होते हैं ॥ २९ ॥

**चुम्बुके चान्यशास्त्रो पशुग्रामे तथैव च ।**
**न कर्त्तव्यं न कर्त्तव्यं न च वाच्यं कदाचन ॥ ३० ॥**
**एवं कृते गुरौ शिष्ये मम शापो भविष्यति ।**

ग्रन्थ चुम्बक (अल्पज्ञ), अन्य शास्त्र के ज्ञाता और पशुग्राम (बनावटी पशु साधक) में कुलधर्म न करे, न करे और न वहाँ कदापि चर्चा ही करे । यदि गुरु या शिष्य ऐसा करते हैं तब उन्हें मेरा शाप लगता है ॥ ३०-३१ ॥

### शक्तिपूजाविधानम्

**साङ्गावरणपूजादौ यदा न क्षरये कुलम् ॥ ३१ ॥**
**तदा मूर्ध्नि गुरुं ध्यात्वा कुलामृतरसेन तु ।**
**तर्पयित्वा कुलं ध्यात्वा जपेन्मन्त्रं निराकुलः ॥ ३२ ॥**

साङ्गावरण पूजादि में यदि कुलमन्त्र सिद्ध न हो । तब साधक को ब्रह्मरन्ध्र में गुरु का ध्यान कर कुलामृतरस से भगवती को तृप्त कर सावधानी से मन्त्र का जप करना चाहिए ॥ ३१-३२ ॥

**नियमः पुरुषे ज्ञेयो न योषित्सु कदाचन ।**
**न न्यासो योषिताञ्चापि न ध्यानं न च पूजनम् ॥ ३३ ॥**

नियम पुरुष के लिये कहे गये हैं । स्त्रियों के लिये कोई कदापि नियम नहीं कहे गये है । स्त्रियों के लिये न्यास, ध्यान और पूजन आवश्यक नहीं है ॥ ३३ ॥

**रात्रौ षडङ्गमाचर्य जपं कुर्यात् समाहितः ।**
**सर्वविद्याप्रयोगं तु ततः कुर्यात् सुसाधकः ॥ ३४ ॥**

रात्रि में षडङ्ग न्यास कर समाहित चित्त से जप करना चाहिये । उसके बाद साधक को समाहित होकर सर्वविद्या प्रयोग करना चाहिये ॥ ३४ ॥

### कुलपुष्पकथनम्

**अथातः कुलपुष्पस्य विधानं कथ्यतेऽधुना ।**
**यत्प्राप्य कुलदेवेन लभ्यते वाञ्छितं महत् ॥ ३५ ॥**

**कुलपुष्पविधान**—अब कुल पुष्प का विधान कहता हूँ जिसे प्राप्त कर कुलाचार्य वाञ्छित फल प्राप्त कर लेते हैं ॥ ३५ ॥

**ऋतुकाले महादेवी सुषुम्णामध्यवर्त्तिनी ।**
**अमृतं वर्षते सा तु त्रिदिनं पृथिवीतले ॥ ३६ ॥**

ऋतुकाल प्राप्त होने के समय महादेवी सुषुम्ना के भीतर निवास करती है। वह ऋतुकाल से तीन दिन तक पृथ्वी में अमृत की वर्षा करती है ॥ ३६ ॥

**तद्दिने तत्र वीरेन्द्रो यदि विद्यां समुच्चरेत् ।**
**पूर्णमिव भवेत्तस्य सफलं च मनोरथम् ॥ ३७ ॥**

उस दिन यदि वीर साधक महाविद्या का पूजन करे तो वह सिद्ध हो जाता है और उसका मनोरथ सफल हो जाता है ॥ ३७ ॥

**तस्मात् सर्वप्रयत्नेन कुलं वीक्ष्य जपं कुरु ।**
**आनीय प्रमदां दिव्यां प्रमत्तां यौवनान्विताम् ॥ ३८ ॥**
**सुस्नापितां सुदीक्षितां सुनासां चारुहासिनीम् ।**
**सर्वदानन्दहृदयां घृणालज्जाविवर्जिताम् ॥ ३९ ॥**
**गुरुभक्तां सुवेशाच्च देवतापूजने रताम् ।**
**स्वकान्तां परकान्तां वा संस्थाप्य तूलिकोपरि ॥ ४० ॥**

इसलिये, हे साधक! कुल का प्रयत्नपूर्वक दर्शन कर जप करे । साधक दिव्य एवं मदमस्त युवती प्रमदा को लावे, जो सुस्नात हो, सुदीक्षित हो, जिसकी नासिका सुन्दर हो, जो मन्द-मन्द मधुर स्मित करने वाली, सर्वदा हृदय से प्रसन्न रहने वाली, घृणा और लज्जा से रहित हो, गुरु में भक्ति रखने वाली, मनोहर वेश धारण किये हुये और देवपूजन में निरत रहने वाली हो । चाहे वह अपनी स्त्री हो अथवा अन्य की स्त्री हो, उसे लाकर रूई के गद्दे पर बैठावे ॥ ३८-४० ॥

**न्यासजालं प्रविन्यस्य साधकोऽक्षुब्धमानसः ।**
**तस्यास्तु मदनागारे पूजयेत् परमेश्वरीम् ॥ ४१ ॥**

फिर स्थिर चित्त वाला साधक विना क्षुब्ध हुए न्यास जाल कर उसके

मदनागार में परमेश्वरी का पूजन करे ॥ ४१ ॥

स्वयमक्षोभितो भूत्वा स्वयम्भूकुसुमं लभेत् ।
शिवहीना यदा शक्तिः सर्वादौ वर्षते हि यत् ॥ ४२ ॥
तदेव परमं पुष्पं स्वयम्भूकुसुमाख्यकम् ।
तद्द्रव्यप्राप्तिमात्रेण किं न सिध्यति भूतले ॥ ४३ ॥
स्वयम्भूकुसुमं द्रव्यं त्रैलोक्ये चाति दुर्लभम् ।
स्वेच्छा ऋतुमती शक्तिः साक्षाद्देवी महेश्वरी ॥ ४४ ॥
तस्याः पुष्पं साधकेन रक्षणीयं प्रयत्नतः ।
वस्त्रालङ्कारपुष्पैश्च शक्तिश्च परिपूजयेत् ॥ ४५ ॥

फिर तो साधक स्वयं अक्षुब्ध रहकर स्वयम्भू कुसुम प्राप्त कर लेता है । शिव (पति) हीन शक्ति (अविवाहित कन्या) जब सबसे पहले रजःस्वला होती है वही सर्वोत्कृष्ट स्वयम्भू कुसुम कहा जाता है । उस द्रव्य के प्राप्त हो जाने पर पृथ्वी में ऐसा कौन पदार्थ है जो सिद्ध न हो । यह स्वयम्भू कुसुम नामक द्रव्य समस्त त्रैलोक्य में दुर्लभ है । क्योंकि शक्तिस्वरूपा महामहेश्वरी देवी ही साक्षात् ऋतुमती होती है । अतः साधक को उनके उस पुष्प की प्रयत्नपूर्वक रक्षा करनी चाहिये और वस्त्र, अलङ्कार तथा पुष्पों से उसकी पूजा करे ॥ ४२-४५ ॥

दीक्षिताया यथाकाले पुष्पं भवति नित्यशः ।
कुलपुष्पं तदेव स्यात् सर्वसिद्धिप्रदायकम् ॥ ४६ ॥

दीक्षित युवती को समय-समय पर नित्य ही पुष्प उत्पन्न होता रहता है । उस समय का उसका पुष्प भी कुल पुष्प कहा जाता है जो समस्त सिद्धियों को प्रदान करता है ॥ ४६ ॥

कुण्डोद्भवञ्च गोलोत्थं पूर्वैव कथितं मया ।
कुण्डोद्भवं सिद्धिप्रदं प्रकारान्तरमुच्यते ॥ ४७ ॥

कुण्डोद्भव तथा गोलोद्भव पुष्प हम पहले कह आये हैं । अब जिस प्रकार कुण्डोद्भव सिद्धि प्रदान करता है उसको अन्य प्रकार से कह रहा हूँ ॥ ४७ ॥

यथायोग्यं समानीय शक्तिं पूर्वोदितां शुभाम् ।
स्वकल्पोक्तं समाचर्य साधको जितमानसः ॥ ४८ ॥
चर्व्यं चोष्यं निवेद्याथ वस्त्रालङ्करणादिकम् ।
पूजयेदक्षतैः शुद्धैः तस्या मदनमन्दिरम् ॥ ४९ ॥

पूर्व में बतलायी गई शुभ लक्षण वाली यथायोग्य शक्ति को ले आकर अपने

सम्प्रदायानुसार उसके साथ व्यवहार कर जितेन्द्रिय साधक चर्व्य, चोष्य एवं वस्त्रालङ्कार देकर शुद्ध अक्षत से उसके मदनमन्दिर की पूजा करे ॥ ४८-४९ ॥

**भावयेत् कामभावेन स्वयमच्युतमानसः ।**
**शुद्धमन्त्रौषधेनैव मथयेन्मदनालयम् ॥ ५० ॥**
**मथ्यमानेऽपि तस्यां हि जायते तत्त्वमुत्तमम् ।**
**गृह्णीयात्तत् प्रयत्नेन द्रव्यं कुण्डोद्भवं शुभम् ॥ ५१ ॥**

फिर भगवान् का ध्यान कर उसमें काम की भावना करे और शुद्ध मन्त्र औषधपूर्वक उसके मदनालय का मन्थन करे । इस प्रकार उसमें मन्थन करते-करते उत्तम तत्त्व प्राप्त हो जायेगा । तन्त्रशास्त्र के अनुसार वही कुण्डोद्भव द्रव्य कहा जाता है । अतः उसे प्रयत्नपूर्वक ग्रहण करे ॥ ५०-५१ ॥

**एतच्चतुष्टयं द्रव्यं मन्त्रसिद्धेश्च कारणम् ।**
**एतेषां द्रव्यमध्ये तु स्वयम्भूकुसुमं महत् ॥ ५२ ॥**

इस प्रकार ये चार द्रव्य (स्वयम्भू कुसुम, कुलपुष्प, कुण्डोद्भव और गोलोद्भव) मन्त्र की सिद्धि में कारण होते हैं । इन द्रव्यों के मध्य में स्वयम्भू कुसुम ही सर्वश्रेष्ठ है ॥ ५२ ॥

**क्वचिद्गन्धर्वराजेन लभ्यते वा नवा पुनः ।**
**लब्ध्वा तत्परमं द्रव्यं लाक्षारससमन्वितम् ॥ ५३ ॥**
**कस्तूरीं कुङ्कुमं चैव चन्दनेन सुमिश्रितम् ।**
**रक्तेन चन्दनेनापि वटीं कृत्वा सुगोपयेत् ॥ ५४ ॥**

गन्धर्वराज कदाचित् इस पुरुष को प्राप्त करते हैं कि नहीं सन्देह है । उस परम द्रव्य को प्राप्त कर उसमें लाक्षारस मिलावे । कस्तूरी, कुङ्कुम और चन्दन मिलावे । फिर तत्त्वज्ञ साधक रक्तचन्दन के साथ उसकी गोली बनाकर गुप्त रूप से रखे ॥ ५३-५४ ॥

**पूर्वोक्तक्रमतो वीरो विशोध्य मन्त्रराजकम् ।**
**लिखित्वा पूजयेद्भक्त्या यां तिथिं प्राप्य साधकः॥ ५५ ॥**

फिर पूर्वोक्त क्रम से वीर साधक उससे मन्त्रराज का संशोधन कर लिखे । उत्तम तिथि प्राप्त होने पर भक्तिपूर्वक उसका पूजन करे ॥ ५५ ॥

**सुप्तादिदोषदुष्टा ये मन्त्रा विद्याश्च कीर्त्तिताः ।**
**प्रबुद्धास्तत्प्रयोगेन यावत् सा पुनरागता ॥ ५६ ॥**

पूर्वोक्त सुप्तादि दोष से दूषित जो मन्त्र और विद्यायें कहीं गई हैं, उसके

प्रयोग से फिर आकर वह प्रबुद्ध हो जाती है ॥ ५६ ॥

द्वितीयायां गते चैव दृश्या जाता कलावती ।
तिथिक्रमेण सा देवी पौर्णमास्यां फलप्रदा ॥ ५७ ॥
तत्र प्रयोगमात्रेण कृष्णपक्षे विशेषतः ।
क्षीणाति पूर्णतां याति यावत् सा तिथिरागता ॥ ५८ ॥
ततः प्रयोगं विद्यानां मन्त्रादीनाञ्च कारयेत् ।
एवं यथा प्रबुद्धा सा नैव तादृक् कदाचन ॥ ५९ ॥

द्वितीया तिथि को (विद्या) कलावती दिखलाई पड़ती है । वह देवी तिथिक्रम से पूर्णमासी को फलदायी होती है । अतः वहाँ विशेषतः कृष्णपक्ष में प्रयोगमात्र से जब तक तिथि नहीं आती तब तक क्षीण होती है और फिर पूर्ण हो जाती है । तब विद्याओं और मन्त्रों का प्रयोग करना चाहिए । इस प्रकार से वह (विद्या) जितनी प्रबुद्ध होती है, वैसी अन्य प्रकार से प्रबुद्ध नहीं होती है ॥ ५७-५९ ॥

## पूजाफलकथनम्

स्वयम्भूकुसुमैः पूजां प्रत्यहं यः समाचरेत् ।
योगिन्यश्च महानागा राक्षसादानवाश्च ये ॥ ६० ॥
राजानश्च स्त्रियः सर्वा नित्यं वश्या भवन्ति हि ।
एतेनाक्षतयोगान् मधुमतीसिद्धिमालभेत् ॥ ६१ ॥
प्रत्येकेन लभेत् सिद्धिं कुसुमाद्यैर्यथाविधि ।
अथ वक्ष्ये च शाक्तानां काम्यपूजनमुत्तमम् ॥ ६२ ॥

**मधुमतीसिद्धि**—यदि साधक स्वयम्भू कुसुम से प्रतिदिन पूजा करे तो योगिनियाँ, महानाग, राक्षस, दानव, राजा, स्त्रियाँ—ये सभी उसके वश में हो जाते हैं । अक्षत में मिलाकर मधुमती की सिद्धि प्राप्त हो जाती है । पूर्वोक्त चार प्रकार के कुसुमों में प्रत्येक से यथाविधि प्रयोग से सिद्धि प्राप्त हो जाती है । अब शाक्तमत वालों के लिये सर्वोत्तम काम्य पूजन कहता हूँ ॥ ६०-६२ ॥

## काम्यपूजनकथनम्

रक्तपद्मैर्यजेद् देवीं समस्तरश्मिसंयुताम् ।
विधिवल्लिखिते यन्त्रे कुलाचारेण रात्रिके ॥ ६३ ॥
मासमात्रेण वीराणां महापातककोटयः ।
जन्मान्तरकृताः सर्वे नाशमायान्ति निश्चितम् ॥ ६४ ॥

**काम्य पूजन**—रक्त वर्ण के पुष्पों से रश्मि सहित महादेवी की पूजा करे । यह पूजा विधिपूर्वक लिखे हुये यन्त्र में रात्रि के समय कुलाचार के अनुसार करे ।

एक महीने तक निरन्तर पूजा करते रहने से जन्मान्तर कृत सभी करोड़ों महापातक निश्चित रूप से नष्ट हो जाते हैं ॥ ६३-६४ ॥

**लक्ष्मीस्तस्य गृहे वश्या सुस्थिरा भवति ध्रुवम् ।**
**जवापुष्पैश्चक्रराजं पूजयेन्मासमात्रकम् ॥ ६५ ॥**
**कुलाचारेण रात्रौ च मन्त्रेण भक्तिभावतः ।**
**ब्रह्महत्यादि पापांश्च पूर्वजन्मकृतानपि ॥ ६६ ॥**
**नाशयेन्नात्र सन्देहो धनवान् जायते नरः ।**
**केतकीतरुणैः पत्रैः पूर्ववत् पूजयेच्छिवाम् ॥ ६७ ॥**
**उपपातकसङ्घांश्च मासमात्रेण नाशयेत् ।**
**सौभाग्यमतुलं तस्य जायते नात्र संशयः ॥ ६८ ॥**

उस साधक के घर में वशीभूत हुई लक्ष्मी निश्चित रूप से सदा निवास करती हैं। जपा पुष्प से एक माह पर्यन्त कुलाचार के अनुसार रात्रि काल में मन्त्र द्वारा भक्तिभाव से चक्रराज का पूजन करे तो इस जन्म में तथा पूर्वजन्म में किये गये ब्रह्महत्यादि पाप नष्ट हो जाते हैं। इसमें सन्देह नहीं कि वह साधक धनवान् हो जाता है। केतकी के पूर्ण रूप से पके हुये पत्रों से पूर्ववत् मास मात्र शिवा की पूजा करे तो उप पातक समूह नष्ट हो जाते हैं और उसके अतुल सौभाग्य का उदय हो जाता है; इसमें संशय नहीं ॥ ६५-६८ ॥

**शतपत्रैर्मनोरम्यैः पूजयेन् मासमात्रकम् ।**
**पूर्ववत् परमेशानि सर्वपापं विनाशयेत् ॥ ६९ ॥**

यदि साधक मनोहर शतपत्र (=गेंदा) से मास मात्र शिवा की पूर्ववत् पूजा करे तो वह सभी पापों को विनष्ट कर देता है ॥ ६९ ॥

**चम्पकैः सुमनोरम्यैः पूजयेत् पूर्ववच्छिवाम् ।**
**मासमात्रेण हन्त्येव पातकान् पूर्वजन्मजान् ॥ ७० ॥**

मनोरम चम्पक पुष्पों से शिवा की मास मात्र भक्तिपूर्वक पूजा करे तो हे परमेशानि ! वह विद्वान् साधक अपने पूर्व जन्म में किये गये सभी पापों को विनष्ट कर देता है ॥ ७० ॥

**सौभाग्यं वा लभेन्मन्त्री भगवत्याः प्रसादतः ।**
**श्वेतपद्मैर्महादेवीं पूजयेद् भक्तिभावतः ॥ ७१ ॥**
**पूर्ववन्नाशयेत् पापान् त्रिंशज्जन्मकृतानपि ।**
**मासमात्रेण सकलान् मोक्षस्तस्य करे स्थितः ॥ ७२ ॥**

वह मन्त्रज्ञ भगवती की प्रसन्नता से सौभाग्य प्राप्त करता है। यदि श्वेत कमल से भक्तिभावपूर्वक पूर्ववत् शिवा का पूजन मास मात्र करे तो वह अपने तीन-सौ जन्मों में किये गये पापों को नष्ट कर देता है और मोक्ष तो उसके हस्तगत हो जाता है ॥ ७१-७२ ॥

**बन्धूककुसुमैर्देवीं मासमात्रेण पूजनात् ।**
**त्रैलोक्यं वशगं तस्य सर्वपापं प्रणाशयेत् ॥ ७३ ॥**

बन्धूक पुष्प से मास मात्र भगवती के पूजन से सारा त्रैलोक्य उसके वश में हो जाता है और वह अपना सारा पाप भी नष्ट कर देता है ॥ ७३ ॥

**बिल्वपत्रैश्च जलजैः सहैव परिपूजयेत् ।**
**पूर्ववत् परमेशानीं मासमात्रं न संशयः ॥ ७४ ॥**
**समृद्धिमान् भवेत् सोऽपि सर्वपापहरः सदा ।**
**मल्लिकामालतीजातीकुन्दैश्च शतपत्रकैः ॥ ७५ ॥**
**श्वेतोत्पलैः प्रसूनैश्च पूजयेन्मासमात्रकम् ।**
**कुलाचारक्रमेणैव पातकान् शतजन्मजान् ॥ ७६ ॥**
**ब्रह्महत्यादिजनितान् नाशयेन्नात्र संशयः ।**
**मुक्तिस्तस्य करे सत्यं वाचांपतिसमो भुवि ॥ ७७ ॥**

बिल्व पत्र और कमल दोनों से एक साथ मास मात्र पूर्ववत् परमेशानी की पूजा करे तो वह निश्चय ही समृद्धि से युक्त और सर्वपापहर हो जाता है। मल्लिका, मालती, जाती कुन्द, शतपत्रक (गेंदा) श्वेतकमल के पुष्पों से एक साथ मास मात्र कुलाचार विधि से पूजा करे तो सैकड़ों जन्म के ब्रह्महत्यादि से होने वाले पापों को नष्ट कर देता है। उसके हाथ में मुक्ति हो जाती है और पृथ्वी में वह बृहस्पति के समान वाग्मी हो जाता है ॥ ७४-७७ ॥

**अगस्त्यबालबन्धूकजवारक्तोत्पलैः समम् ।**
**पूर्वक्रमेण सम्पूज्य मासमात्रं प्रयत्नधीः ॥ ७८ ॥**
**पातकान् पाशयेत् मन्त्री साक्षात्कामलसी भवेत् ।**
**चम्पकैः पाटलैर्देवीं बकुलैर्नागकेशरैः ॥ ७९ ॥**
**कह्लारैः सिन्धुवारैश्च पूजयेत् पूर्ववत् क्रमात् ।**
**सौभाग्यमण्डलं तस्य मासमात्रेण निश्चितम् ॥ ८० ॥**

अगस्त्य, बाल बन्धूक, जवा (=गुड़हल) और लाल कमल के पुष्पों से एक साथ मास मात्र पूर्वक्रम से प्रयत्नपूर्वक पूजा करने वाला मन्त्रज्ञ साधक अपने सभी पापों को नष्ट कर देता है और साक्षात् कामदेव के समान हो जाता है। चम्पक,

गुलाब, वङ्कुल, नागकेशर, कल्हार, सिन्धुवार से पूर्ववत् क्रमशः पूजा करे तो एक महीने मात्र में उसके सौभाग्य का मण्डल उदय हो जाता है ॥ ७८-८० ॥

**महापातकयुक्तो वा यदि देवीं प्रपूजयेत् ।**
**शमीदूर्वाङ्कुराश्वत्थपल्लवैरथवाऽर्कजैः ॥ ८१ ॥**
**मासेन हन्ति कलुषं सप्तजन्मकृतं ध्रुवम् ।**
**अथातः सर्वविद्यानां लिख्यते सिद्धिकारणम् ॥ ८२ ॥**

महापातक से युक्त भी साधक यदि शमी, दूर्वाङ्कुर, अश्वत्थ के पल्लव अथवा मदार के पत्ते से एक मास पर्यन्त अम्बा भगवती की पूजा करे । तब वह अपने सात जन्मों के पापों को नष्ट कर देता है । अब सभी विद्याओं की सिद्धि का कारण लिखता हूँ ॥ ८१-८२ ॥

**ब्राह्म्याद्यष्टकुलैः सार्धं साधकः स्थिरधीः शुचिः ।**
**चतुष्पथे वा नद्यां वा वटमूले त्रिशूलके ॥ ८३ ॥**
**प्रेतभूमौ बिल्वमूले हट्टे वा राजवेश्मनि ।**
**सिन्दूरेण लिखेन्मन्त्रं विपुलं साध्यदर्भितम् ॥ ८४ ॥**
**ततः सम्पूज्य विधिवत् कुलं कुलरसेन च ।**
**तर्पयित्वा तदन्तःस्थः प्रजपेन्निशिचारतः ॥ ८५ ॥**
**ततो लक्षप्रमाणेन सिद्धिस्तावद्भवन्ति हि ।**
**अथ रात्रौ पुण्यगेहे उद्याने वा सुरालये ॥ ८६ ॥**
**आनीय कुलजां देवीं मूलमन्त्रेण दीक्षयेत् ।**
**ततः पूर्वोक्तरूपेण कुलक्षोभं समाचरेत् ॥ ८७ ॥**

**सिद्धि का कारण**—ब्राह्मी आदि आठ शक्तियों के साथ साधक पवित्रतापूर्वक सावधान चित्त हो चतुष्पथ, नदी, वटमूल, त्रिशूल (तिराहा), श्मशान, बिल्व वृक्ष का मूल, हट्ट (बाजार) और राजभवन इनमें किसी स्थान पर अपने साध्य से दर्भित समस्त मन्त्र सिन्दूर से लिखे । फिर कुल रस से उस कुल का पूजन कर उसका तर्पण करे । उसे अपने हृदय में धारण कर रात्रि पर्यन्त एक लाख की संख्या में जप करे तो सद्यः सिद्धि प्राप्त हो जाती है । रात्रि के समय पुण्यगृह, उद्यान, सुरालय (=देवस्थान) में कुलजा कन्या को ले आवे और उसे मूलमन्त्र द्वारा दीक्षा देवे । फिर पूर्वोक्त रूप से उसमें क्षोभ उत्पन्न करे ॥ ८३-८७ ॥

### रत्नपूजाविधानम्

**रत्नपूजाविधानं हि कथयामि विशेषतः ।**
**पुष्पाणि रचयेद्धीरो माणिक्यघटितानि च ॥ ८८ ॥**

तैस्तु पूजा प्रकर्त्तव्या चक्रराजस्य पूर्ववत् ।
नानापुष्पैः सुगन्धैश्च कर्पूरक्षोदचर्चितैः ॥ ८९ ॥
एकविंशतिरात्रेण विंशतिर्धरणीभुजाम् ।
दासभूताः भवन्त्येव महारोगांश्च नाशयेत् ॥ ९० ॥

**रत्नपूजा विधान**—अब विशेष रूप से रत्नपूजा का विधान कहता हूँ । वीर पुरुष माणिक्यों का पुष्प निर्माण करे । उन मणिघटित पुष्पों से चक्रराज की पूर्ववत् पूजा करनी चाहिये । अनेक प्रकार के सुगन्धित पुष्पों एवं कपूर चूर्णों से सुवासित इक्कीस रात्रि पर्यन्त निरन्तर पूजा करे तो बीस बीस राजाओं के समूह उसके दास होकर उसके वशीभूत हो जाते हैं और वह महारोगों के नाश करने में भी समर्थ हो जाता है ॥ ८८-९० ॥

सूर्यवत् कान्तिमान्मन्त्री जायते नात्र संशयः ।
मुक्तारत्नरञ्जितानि स्वर्णपुष्पाणि साधकैः ॥ ९१ ॥
तैस्तु पूजा प्रकर्त्तव्या नानारत्नैश्च पूर्ववत् ।
एकविंशतिरात्रेण राजपुत्री वशीभवेत् ॥ ९२ ॥

वह मन्त्रज्ञ साधक सूर्य के समान कान्तिमान् हो जाता है इसमें संशय नहीं । साधक मोती के पुष्पों से, अथवा सुवर्णमय पुष्पों से, अथवा अनेक रत्नमय पुष्पों से भगवती की पूजा पूर्ववत् २१ दिन पर्यन्त निरन्तर करे तो राजपुत्री उसके वश में निश्चित रूप से हो जाती है ॥ ९१-९२ ॥

कलाकान्तियुतो वीरो जायते सुभगः क्षितौ ।
प्रवालघटितैः स्वर्णपुष्पैस्तु बहुभिर्यजेत् ॥ ९३ ॥
पूर्ववत् परमेशानीं कुलाचारक्रमेण तु ।
पुष्पैश्च विविधैश्चैव सप्ताहाच्च सुनिश्चितम् ॥ ९४ ॥
क्रूरास्तस्य वशाः सर्वे वैरिवर्गांश्च नाशयेत् ।
तथा मरकतक्षिप्तस्वर्णपुष्पैश्च पूजयेत् ॥ ९५ ॥
एकविंशतिरात्रेण नानापुष्पैः क्रमाद्यजेत् ।
विधिवत् तस्य वरदा भैरवी भवति स्थिरम् ॥ ९६ ॥

वह वीर चन्द्रकला की कान्ति से युक्त होकर सुन्दर भाग्यवान् बन जाता है मूँगे से निर्मित पुष्पों द्वारा तथा बहुत सुवर्णमय पुष्पों द्वारा अथवा अनेक पुष्पों द्वारा कुलाचार क्रम से परमेशानी का पूर्ववत् यजन करे तो सात दिन में ही निश्चित रूप से सभी क्रूर स्वभाव वाले भी व्यक्ति उसके वश में हो जाते हैं और वह अपने समस्त शत्रु समूहों के नाश करने में समर्थ हो जाता है । यदि मरकत

मणि के बने हुये पुष्पों एवं स्वर्ण पुष्पों से तथा अनेक प्रकार के पुष्पों से परमेश्वरी का यजन इक्कीस रात्रि पर्यन्त विधिवत् करे, तब निश्चय ही भैरवी उसे स्थिरतापूर्वक वर प्रदान करती है ॥ ९३-९६ ॥

**पद्मरागमहारत्ननिर्मितैः स्वर्णसंयुतैः ।**
**कुसुमैरर्चयेच्चक्रं त्रिसप्ताहात् सुनिश्चितम् ॥ ९७ ॥**
**सुरास्तस्य वशाः सर्वे बृहस्पतिसमो भवेत् ।**
**सुवर्णरचितैः पुष्पैर्वज्रकेशरवर्जितैः ॥ ९८ ॥**
**एकविंशतिरात्रेण मोहयेज्जगतीमिमाम् ।**
**देवा दैत्यावशांस्तस्य जायन्ते नात्र संशयः ॥ ९९ ॥**

स्वर्णयुक्त पद्मरागमणि से निर्मित पुष्पों द्वारा तीन सप्ताह पर्यन्त चक्रार्चन करे तो निश्चय ही सभी देवता उसके वश में हो जाते हैं और वह स्वयं बृहस्पति के समान वाग्मी हो जाता है । वज्र और केशर के बिना सुवर्ण रचित पुष्पों से इक्कीस रात्रि पर्यन्त पूजा करने से साधक समस्त जगत् को मोहित कर लेता है । देवता एवं दैत्य सभी उसके वश में हो जाते हैं इसमें संशय नहीं ॥ ९७-९९ ॥

**इन्द्रनीलमयैः स्वर्णपुष्पैश्चक्रं समर्चयेत् ।**
**एकविंशतिरात्रेण तथा नीलैश्च नीरजैः ॥ १०० ॥**
**वैरिणो नाशमायान्ति शेषा वश्या भवन्ति हि ।**
**गोमेदघटितैः पुष्पैः स्वर्णपुष्पैर्यजेद् बुधः ॥ १०१ ॥**
**किंशुकैः कुन्दपुष्पैश्च पूर्ववत् परमेश्वरीम् ।**
**सप्ताहाद् वैरिणो वश्या घातस्तेषु प्रजायते ॥ १०२ ॥**

इन्द्रनीलमय एवं स्वर्णमय पुष्पों से चक्र की पूजा करे । इक्कीस रात्रि तक नीलमणि और नीलकमल के पुष्पों से पूजा करे तो वैरी विनष्ट हो जाते हैं । शेष सभी उसके वशवर्ती हो जाते हैं । गोमेद रचित पुष्पों से अथवा सुवर्णमय पुष्पों से बुद्धिमान् साधक यजन करे, अथवा कुन्द पुष्प, अथवा किंशुक (पलाश) से पूर्ववत् परमेश्वरी का यजन करे तो सात दिन के भीतर समस्त वैरी वशीभुत हो जाते हैं और उन शत्रुओं के ऊपर विपत्ति कहर डालती है ॥ १००-१०२ ॥

**त्रिसप्ताहान्महापापसञ्चयं नाशयेत्ततः ।**
**स्वर्णरत्नमयैः पुष्पैर्पुनर्नवैः प्रपूज्यते ॥ १०३ ॥**
**तदाऽश्वमेधदशकं फलं भवति निश्चितम् ।**
**क्रव्यादयस्तद्वश्या हि भवन्त्येव न संशयः ॥ १०४ ॥**

इक्कीस दिन पर्यन्त पूर्वोक्त रीति से पूजा करते रहने से महापाप का सञ्चय

नष्ट हो जाता है । स्वर्ण रत्नमय पुष्पों से, अथवा पुनर्नवा से पूजन किया जाय तो दश अश्वमेध का फल प्राप्त हो जाता है; यह निश्चित है । मांसाहारी समस्त जन्तु वश में हो जाते हैं इसमें संशय नहीं ॥ १०३-१०४ ॥

**वैदूर्यघटितैः पुष्पैः पूजयेच्चक्रमुत्तमम् ।**
**सचम्पकादिभिर्धीरस्त्रैलोक्यं स्तम्भयेत् क्षणात् ॥ १०५ ॥**
**एकविंशतिभिर्वारैर्महापापहरो भवेत् ।**

धीर साधक चम्पा पुष्प सहित वैदूर्य रचित पुष्पों से यदि पूर्ववत् २१ दिन तक उत्तम चक्र का पूजन करे तो वह क्षण भर में समस्त त्रिलोकी को स्तम्भित कर सकता है और महापापों को दूर करने वाला हो जाता है ॥ १०५-१०६ ॥

**निर्माल्यभूतैः कुसुमैरर्चितैः परमेश्वरीम् ॥ १०६ ॥**
**नानारत्नमयैः स्वर्णपुष्पैर्यदि शिवां यजेत् ।**
**तदा देवाश्च मुनयः पन्नगा राक्षसादयः ॥ १०७ ॥**
**सर्वे वश्या भवन्त्येव त्रिसप्ताहान्न संशयः ।**
**जन्मकोटिभवं पापं नाशयेन्नात्र संशयः ॥ १०८ ॥**

परमेश्वरी को अर्चित निर्माल्यभूत नानारत्नमय, अथवा सुवर्णमय, अनेक पुष्पों से यदि शिवा का तीन सप्ताह पर्यन्त यजन करे तो देवता, मुनि, नाग, राक्षस सभी वश में हो जाते हैं और वह अपने करोड़ों जन्म के किये गये पापों को नष्ट कर देता है इसमें संशय नहीं ॥ १०६-१०८ ॥

**स्वर्णवर्णमयैः पुष्पैर्मासमेकं प्रपूजयेत् ।**
**तदाश्वमेधदशकफलं भवति सर्वदा ॥ १०९ ॥**

सुवर्ण के वर्ण वाले पुष्पों से यदि एक महीना पर्यन्त पूजन करे तो उसे सर्वदा अश्वमेध का फल प्राप्त हो जाता है ॥ १०९ ॥

**स्वर्णरत्नानि पुष्पाणि यदि न स्युस्तदा शृणु ।**
**पूर्वोदितस्वपुष्पैश्च पूजा कार्या सुसाधकैः ॥ ११० ॥**

यदि स्वर्ण अथवा रत्नों के पुष्प न प्राप्त हों तो सुनो । विद्वान् साधक पूर्व में कहे गये स्वपुष्प (स्वयम्भू कुसुम, कुलपुष्प, कुण्डोद्भव एवं गोलोद्भव) से ही पूजन करे ॥ ११० ॥

**यद्यत् पुष्पं यत्र यत्र देयं तत्र महात्मना ।**
**तत्र तत्रैव दातव्यं यद्दातव्यं सुखेच्छया ॥ १११ ॥**

महात्मा साधक जहाँ-जहाँ जिन-जिन पुष्पों को देना चाहिये, वह उन्हें

वहाँ-वहाँ सुख की इच्छा से प्रदान करे ॥ १११ ॥

**अलङ्कारस्वरूपेण पूजयेच्चक्रनायिकाम् ।**
**केवलं योनिपुष्पैस्तु त्रैलोक्यं स्तम्भयेद्भृशम् ॥ ११२ ॥**

श्री चक्र की अधीष्ठात्री भगवती का अलङ्कारों से पूजन करे । यदि केवल योनि पुष्प से ही साधक उनका पूजन करे तो वह समस्त त्रैलोक्य को क्षणमात्र में स्तम्भित कर सकता है ॥ ११२ ॥

**मासमात्रेण पापानि सप्तजन्मभवान्यपि ।**
**नाशयेन्मोहयेत् सर्वान्समुद्रवलयां धराम् ॥ ११३ ॥**

एक मास पर्यन्त उक्त रीति से पूजा करने वाला सात जन्म तक किये गये अपने पापों को नष्ट कर देता है और समुद्रवलय वाली समस्त पृथ्वी को मोहित कर लेता है ॥ ११३ ॥

### त्रिपुराबीजसाधनम्

**अथेदानीं प्रवक्ष्यामि त्रिपुराबीजसाधनम् ।**
**शुक्लाम्बरधरो धीरः शुक्लगन्धादिभूषितः ॥ ११४ ॥**
**शुक्लालङ्काररचितः शुक्लमाल्यान्वितः शुचिः ।**
**शुक्लगो ब्रह्मचारी तु शुक्लासनपरिग्रहः ॥ ११५ ॥**
**पूजयेत् शुक्लपुष्पैस्तु नैवेद्यैर्धवलैस्तथा ।**
**पिष्टकं पायसं दुग्धं अन्नं बहुविधं तथा ॥ ११६ ॥**
**शर्करा मोदकं चैव नानाफलसमन्वितम् ।**
**कृतसङ्कल्पवीरेन्द्रः साधयेद्वाग्भवाक्षरम् ॥ ११७ ॥**

**त्रिपुराबीज साधना**—अब त्रिपुरा बीज के साधन को कहता हूँ । धीर साधक शुक्ल वस्त्र धारण कर, शुक्ल गन्ध से विभूषित होकर शुक्ल अलङ्कार धारण कर शुक्ल माल्य पहनकर, पवित्रात्मा एवं विशुद्धेन्द्रिय ब्रह्मचारी रहकर शुक्ल वर्ण के आसन पर बैठकर शुक्ल पुष्पों से, धवल वर्ण के नैवेद्यों से, पूआ-पायस, दूध, अन्न आदि शर्करा, मोदक, नाना फल समन्वित उपहारों से, सङ्कल्पपूर्वक पूजन कर वाग्भव (ऐं) बीज वाली वागीश्वरी की साधना करे ॥ ११४-११७ ॥

### वाग्भवबीजसाधनम्

**वाग्भवाख्यां जपेद्विद्यां वागीशीं संस्मरन् बुधः ।**
**कूर्परधवलां शुभ्रपुष्पाभरणभूषिताम् ॥ ११८ ॥**

कपूर के समान श्वेत वर्ण वाली, शुभ्र पुष्प, शुभ्र आभरण वाली, वाग्भवा

विद्या का ध्यान करते हुये वाग्भव (ऐं) मन्त्र का जप करे ॥ ११८ ॥

अत्यन्तशुभ्रवसनां वज्रमौक्तिकभूषणाम् ।
मुक्ताफलसमुद्भूतजपमालालसत्कराम् ॥ ११९ ॥
पुस्तकं बरदानञ्च दधतीमभयप्रदाम् ।
एवं ध्यात्वा प्रपूज्यैव वागीशीं साधकोत्तमः ॥ १२० ॥

अत्यन्त शुभ्र वस्त्र धारण की हुई, हीरे एवं मोती के आभूषणों को धारण की हुई, मोती की माला से सुशोभित हाथों वाली, अन्य हाथ में पुस्तक और बरदान मुद्रा धारण किये, अभयप्रदा भगवती वागीशी का ध्यान कर उत्तम साधक उनकी पूजा करे ॥ ११९-१२० ॥

मूलादिब्रह्मरन्ध्रान्तं स्रवत्पीयूषवर्षिणीम् ।
तस्माज्जोतिर्मयीं ध्यायेत् जिह्वाग्रेऽमृतरूपिणीम् ॥ १२१ ॥
विभाव्य प्रजपेन्मन्त्रं पुरश्चरणसंख्यकम् ।
ततश्च नष्टहृदयो ग्राम्यो मूर्खोऽतिपातकी ॥ १२२ ॥
शठोऽपि यः पदं स्पष्टमक्षरं वक्तुमक्षमः ।
जडो मूर्खोऽतिदुर्मेधा गतप्रज्ञो विनष्टधीः ॥ १२३ ॥
सोऽपि सञ्जायते वाग्मी वाचस्पतिरिवापरः ।
सत्पण्डितघटाटोपजेताऽप्रतिहतप्रभः ॥ १२४ ॥
सत्तर्कपदवाक्यार्थशब्दालङ्कारसारवित् ।
कुमारतरस्फार वृत्तालङ्कारपूर्वकैः ॥ १२५ ॥

मूलाधार से लेकर ब्रह्मरन्ध्र पर्यन्त टपकते हुये अमृत की वर्षा करने वाली, निकलती हुई ज्योतिःस्वरूपा एवं अमृतास्वरूपा का ध्यान कर पुरश्चरण की संख्या (आठ हजार) में जप करे, ऐसा करने से जिसके पास हृदय नहीं है, जो ग्राम्य, मूर्ख, अति पातकी, शठ हैं और जो स्पष्ट अक्षर बोलने में असमर्थ हैं (गूँगा) जड़, मूर्ख, अत्यन्त दुर्बुद्धि, गतप्रज्ञ, विनष्ट बुद्धि वाला है, वह भी वाग्मी (विशुद्ध वक्ता) और अपर वाचस्पति के समान हो जाता है। वह उत्तमोत्तम पण्डितों के घटा टोप (आडम्बर) का विजेता तथा अप्रतिहत ज्ञान वाला हो जाता है। उत्तम तर्क, उत्तम पद, उत्तम वाक्य का तथा शब्दालङ्कार, अर्थालङ्कार तथा शृङ्गारादि रसों का विद्वान् हो जाता है। वृत्त और अलङ्कारों से परिपूर्ण उसकी वाणी में अभूतपूर्व मधुरता टपकती है ॥ १२१-१२५ ॥

पदगुम्फैर्महाकाव्यकर्ता सोऽपि प्रजायते ।
वेदवेदाङ्गवेदान्तसिद्धान्तज्ञानपारगः ॥ १२६ ॥

ज्योतिःशास्त्रेतिहासादिमीमांसास्मृतिसारवित् ।
पुराणरसवादादिगारुडानेकमन्त्रवित् ॥ १२७ ॥
पातालशास्त्रविज्ञानभूततन्त्रार्थतत्त्ववित् ।
विचित्रचित्रकर्मादिशिल्पानेकविचक्षणः ॥ १२८ ॥
सर्वभाषारुतज्ञानी समस्तलिपिकर्मवित् ।
नानाशास्त्रादिशिक्षादिवेत्ताभुवनविश्रुतः ॥ १२९ ॥
सर्ववाङ्मयवेत्ता च सर्वज्ञो भुवि जायते ।

इस प्रकार का वह महामूर्ख वागीश्वरी के पुरश्चरण से उत्तमोत्तम पद से गुँथे हुये काव्यों की रचना करने वाला हो जाता है । वेद, वेदाङ्ग एवं वेदान्त के सिद्धान्त का परगामी हो जाता है । ज्योतिःशास्त्र, इतिहासादि, मीमांसा एवं स्मृति आदि का सारवेत्ता पुराण, रस वादादि तथा गारुड़ (विष) शास्त्र के मन्त्र का वेत्ता हो जाता है । पाताल विद्या, विज्ञान विद्या, भूत विद्याओं एवं तन्त्र विद्या के अर्थों का तत्त्ववेत्ता विचित्र, चित्र-विचित्र कर्म करने वाला, शिल्प कर्म में निपुण, सभी भाषाओं की बोली का ज्ञाता, समस्त लिपि का लिखने वाला, नाना शास्त्र, नाना शिक्षाओं का वेत्ता, त्रिभुवन में प्रसिद्ध, सर्ववाङ्मय का ज्ञाता और इस पृथ्वी पर सर्वज्ञ हो जाता है ॥ १२६-१३० ॥

### कामबीजसाधनम्

अथ कामकलासक्तः साधको रक्तमन्दिरे ॥ १३० ॥
रक्तालङ्कारसंयुक्तो रक्तगन्धानुलेपनः ।
रक्तवस्त्रावृतः सम्यङ्मध्ये कामकलात्मना ॥ १३१ ॥
रक्तपुष्पैश्च विविधैः नैवेद्यै रक्तसन्निभैः ।
नानोपहारबलिभिः कुङ्कुमादिभिरर्चयेत् ॥ १३२ ॥
मूलादिब्रह्मरन्ध्रान्तं स्फुरद्दीप्तिस्वरूपिणीम् ।
बन्धूककुसुमाकारकान्तिभूषणभूषिताम् ॥ १३३ ॥
एवं सञ्चिन्त्य वीरेन्द्रः पूजयेत् परमेश्वरीम् ।
यथोक्तसंख्यं सञ्जप्य कामराजं सुसाधकः ॥ १३४ ॥
चिन्तयेत् परमेशानीं त्रैलोक्यं मोहयेत् क्षणात् ।
राजानो वशमायान्ति पन्नगा राक्षसाः सुराः ॥ १३५ ॥
कन्दर्प इव वीरेन्द्रो योषितां मानहारकः ।
मनश्चिन्तितयोषित्तु दासीवद्वशगाभवेत् ॥ १३६ ॥

कामकला में रुचि रखने वाला साधक लालवर्ण के मकान में, लाल वर्ण के

अलङ्कारों को धारण कर, रक्त वर्ण के गन्ध से अनुलिप्त, रक्त वस्त्र धारण कर, मण्डप के मध्य में स्वयं कामकला का स्वरूप बनकर, रक्त वर्ण के पुष्पों से सरस रक्तवर्ण के नैवेद्यों से युक्त, रक्त वर्ण के अनेक उपहारों से समन्वित, अनेक बलियों एवं कुङ्कुमादिकों से जो मूलाधार से ब्रह्मरन्ध्र पर्यन्त जाज्वल्यमान दीप्ति स्वरूपा, बन्धूक पुष्प के आकार के समान, रक्त कान्ति एवं रक्त भूषण से भूषित हैं अपने हाथों में ऊख का धनुष, पुष्प का बाण, वर एवं अभयमुद्रा धारण की हुई हैं, जिनका भालस्थान उद्दीप्त कान्ति वाले, सिन्दूर से अलंकृत है और जो तीन नेत्रों वाली हैं। इस प्रकार स्वरूप वाली भगवती का ध्यान करते हुए वीरेन्द्र परमेश्वरी का पूजन करे। फिर जितनी संख्या कही गई है, उतनी संख्या में कामराज का मन्त्र जप कर सुसाधक भगवती परमेश्वरी का ध्यान करे; तो वह क्षणमात्र में त्रिलोकी को अपने वश में कर लेता है। राजा, पन्नग, राक्षस और देवता सभी उसके वशीभूत हो जाते हैं। वह वीर साधक दूसरे कामदेव के समान कामिनियों के मान का खण्डन कर देता है और जिस स्त्री को मन से चाहता है वह दासी के समान उसके वश में हो जाती है॥ १३०-१३६ ॥

**तद्दृष्टिपथगा नारी सुरी वाप्यथवाऽसुरी।**
**विद्याधरी किन्नरी वा यक्षी नागाङ्गनाऽथवा ॥ १३७ ॥**
**प्रचण्डतरभूपालकन्यका सिद्धकन्यका।**
**ज्वलन्मदनदुष्प्रेक्ष्यदहनोत्तप्तमानसा ॥ १३८ ॥**
**क्लिन्ना प्रचलितापाङ्गा विमूढा मदविह्वला।**
**निवेदितात्मसर्वस्वा वशगा तस्य जायते ॥ १३९ ॥**

उसके दृष्टिपथ में आने वाली नारी देवी, आसुरी, विद्याधरी, किन्नरी, यक्षी, नागाङ्गना, अथवा अत्यन्त उग्र स्वभाव वाले राजा की कन्या, सिद्ध कन्या, जलती हुई मदनाग्नि से उत्तप्त मन हो स्खलित, मद से विह्वल, चञ्चल कटाक्षों वाली, स्त्रियाँ विकल होकर अपना सर्वस्व उस साधक पर निछावर कर उसके वशीभूत हो जाती हैं॥ १३७-१३९ ॥

**चलज्जलेन्दुसङ्काशा बालार्ककिरणारुणा।**
**चिन्तिता योषितां योनौ क्षोभयति च तत्क्षणात्॥ १४०॥**

जल में पड़ी हुई छाया वाले चन्द्रमा के समान चञ्चल स्वभाव वाली, नवीन उदीयमान सूर्य के किरणों के समान लाल आभा वाली, अरुणा भगवती का स्त्री की योनि में ध्यान करते ही वह तत्क्षण क्षोभ उत्पन्न कर देती हैं॥ १४० ॥

**सैव सिन्दूरवर्णाभा हृदये चिन्तिता सती।**
**सम्मोहोन्मादनारोपचित्तकर्षकरी तथा ॥ १४१ ॥**

सिन्दूर वर्ण के आभा वाली वही अरुणा भगवती हृदय में ध्यान करने से तत्क्षण सम्मोहन करती है, उन्मादन करती है और चित्त में आरूढ़ हो कर आकर्षण करती है ॥ १४१ ॥

**नियोजिताऽथवा मूर्ध्नि वर्षन्ती रक्तबिन्दुभिः ।**
**धारणासम्प्रयोगेण करोति वशगं जगत् ॥ १४२ ॥**

अथवा शिरः स्थान में ध्यान करने से लाल वर्ण के जल की वर्षा करती हुई धारणा के सम्प्रयोग से सारे जगत् को वह वश में कर लेती है ॥ १४२ ॥

**त्रैलोक्यमोहनप्रयोगकथनम्**

**आकर्षयेत्तदा शीघ्रं रम्भाञ्चापि तिलोत्तमाम् ।**
**रक्तवर्णां स्त्रियं ध्यात्वा तदीयमहसा ततः ॥ १४३ ॥**
**तस्या मूर्ध्नि स्मरेद्विद्यां स्रवत्पीयूषवर्षिणीम् ।**
**ध्यायन् सम्मोहयेन्नारीं मदनोत्तप्तमानसाम् ॥ १४४ ॥**

**त्रैलोक्यमोहन प्रयोग**—इस प्रकार योनि, हृदय तथा शिरःस्थान में अरुणा का ध्यान करने वाला पुरुष रम्भा, तिलोत्तमा जैसी अप्सराओं को भी अपने वश में कर लेता है। रक्त वर्ण वाली स्त्री का ध्यान कर तत्त्वज्ञ साधक भगवती के तेज से युक्त उनके शिरःस्थान में टपकते हुये बिन्दुओं से युक्त, अमृत की वर्षा करने वाली भगवती का ध्यान करने से साधक काम से उत्तप्त मन वाली स्त्री को मोहित कर लेता है ॥ १४३-१४४ ॥

**क्षणमात्रेण वीरेन्द्रस्त्रैलोक्यं वशमानयेत् ।**
**एतत्कामकलाध्यानात् पञ्चकाम इवापरः ॥ १४५ ॥**
**श्रीं ह्रीं क्लीं हूं ततः संसु क्रमेण परियोजिताः ।**
**यन्त्रं विदध्यात् कामस्तु मन्मथान्तर्गतो भवेत् ॥ १४६ ॥**
**कन्दर्पसम्पुटं कृत्वा कोणगर्भगतं ततः ।**
**मकरध्वजसञ्ज्ञन्तु सर्वमेतत् सुसाधकः ॥ १४७ ॥**
**मीनकेतुगतं कुर्यात् मोहयेज्जगतीमिमाम् ।**
**त्रैलोक्यमोहनो नाम प्रयोगोऽयं प्रदर्शितः ॥ १४८ ॥**

वह वीरेन्द्र क्षण मात्र में समस्त त्रैलोक्य को अपने वश में कर लेता है। इन कामकला (ईं) का ध्यान करने से वह अपर पञ्च काम के समान बन जाता है। श्रीं ह्रीं क्लीं हूँ संसु इन अक्षरों से संयुक्त यन्त्र का निर्माण करे और काम उस मन्मथ के अन्तर्गत रखे। फिर कन्दर्प बीज (क्लीं) से सम्पुट कर उसे कोण के मध्य में स्थापित करना चाहिए। यह सब मकरध्वज सञ्ज्ञक यन्त्र कहा जाता है।

फिर तत्त्वज्ञ साधक मीनकेतु (=कामदेव) के भीतर उसे स्थापित कर देवे तो वह इस जगत् को मोहित कर देता है। इस प्रकार यह त्रैलोक्यमोहन नामक प्रयोग हमने प्रदर्शित किया ॥ १४५-१४८ ॥

### शक्तिबीजसाधनम्

**अथातः सम्प्रवक्ष्यामि शक्तिबीजस्य साधनम् ।**
**सृष्टिसंहारपर्यन्तां शरीरे चिन्तयेत् पराम् ॥ १४९ ॥**

अब शक्तिबीज (ह्रीं) का साधन कहता हूँ। साधक इस शरीर में सृष्टि का संहार करने वाली भगवती परा का ध्यान करे ॥ १४९ ॥

**स्रवत्पीयूषधाराभिर्वर्षन्तीं विषहारिणीम् ।**
**हेमप्रभाभासमानां विद्युल्लतासमप्रभाम् ॥ १५० ॥**
**स्फुरच्चन्द्रकलापूर्णकपालं वरदाभये ।**
**ज्ञानमुद्राञ्च दधतीं साक्षादमृतरूपिणीम् ॥ १५१ ॥**
**एवं ध्यात्वा जपेन्मन्त्री हेमाभैरुपचारकैः ।**
**पूर्वसंख्यं जपेद्बीजं नानाविघ्नं विनाशयेत् ॥ १५२ ॥**
**एतस्याः स्मरणाद्वीरो नीलकण्ठत्वमागतः ।**
**वैनतेयसमो मन्त्री विषभारं विनाशयेत् ॥ १५३ ॥**
**नागा दर्शनमात्रेण जडीभवन्ति तत्क्षणात् ।**
**भूतप्रेतपिशाचांश्च नाशयेन्नात्र संशयः ॥ १५४ ॥**

जो टपकते हुये अमृत की धारा की वर्षा करती है। विषहारिणी सुवर्ण की आभा के समान देदीप्यमान, बिजली की लता के समान चमकीली, हाथ में चमकते हुये चन्द्रमा के समान पूर्ण कपाल, वर, अभय और ज्ञानमुद्रा को धारण की हुई साक्षात् अमृत स्वरूपा भगवती का इस प्रकार ध्यान कर सुवर्ण के समान दीप्त उपचारों से उसकी पूजा कर साधक पूर्वकथित संख्या में जप करे तो वह सम्पूर्ण विघ्नों को विनष्ट कर देता है। इन भगवती के स्मरण मात्र से भगवान् शिव नीलकण्ठ बन गये। किं बहुना, इनके स्मरण से साधक गरुड़ के समान होकर समस्त विषों को नाश करने में समर्थ हो जाता है। नाग इन साधकों के दर्शन मात्र से तत्क्षण जड़ हो जाते हैं। इस प्रकार भगवती का साधक भूत, प्रेत तथा पिशाचों को नष्ट कर देता है; इसमें संशय न करे ॥ १५०-१५४ ॥

**चातुर्थिकज्वरान् सर्वानपस्मारांश्च नाशयेत् ।**
**दुष्टव्याधिग्रहांश्चैव डाकिनीरूपिका गणाः ॥ १५५ ॥**
**यक्षराक्षसवेतालैस्त्रिनेत्र इव दृश्यते ।**

अथवा येन विद्येयं परिपूर्णा विचिन्त्यते ॥ १५६ ॥

चातुर्थिक ज्वर, सभी प्रकार के अपस्मार, दुष्ट व्याधियाँ और दुष्ट ग्रहों को नाश कर देता है। डाकिनी, रूपिका, गण, यक्ष, राक्षस तथा बेतालों को वह शिव के समान भयङ्कर दिखाई पड़ता है अथवा जो इस विद्या को सिद्ध कर लेता है उसके लिये उपाय कहता हूँ ॥ १५५-१५६ ॥

नाभिमण्डलहृत्पद्ममुखमण्डलमध्यगा ।
पद्मरागमणिस्वच्छा चिन्तनात् साधकस्य च ॥ १५७ ॥
तस्याष्टगुणमैश्वर्यमचिरात् सम्प्रवर्त्तते ।
तन्नामस्मरणान्मन्त्री योगिनीनां भवेत् प्रियः ॥ १५८ ॥
मातृचक्रं तस्य काये तेन सार्धं सुखी भवेत् ।
पुत्रवान् धनवान् धीरो मन्त्रं ध्यात्वा न संशयः ॥ १५९ ॥

अब जो साधक अपने नाभिमण्डल हृत्कमल एवं मुख मण्डल के मध्य में पद्मरागमणि के समान स्वच्छ इस महाविद्या का ध्यान करता है उसे अष्टगुण युक्त ऐश्वर्य की शीघ्र ही प्राप्ति हो जाती है। किं बहुना, उन भगवती के नाम मात्र स्मरण करने वाला साधक योगिनी गणों का प्रिय हो जाता है। उसके शरीर में मातृचक्र के समावेश हो जाने से वह सुखी हो जाता है। मन्त्र के ध्यान करने से धीर साधक पुत्रवान् एवं धनवान् हो जाता है; इसमें संशय नहीं ॥ १५७-१५९ ॥

विलिख्य चक्रराजं तु परिपूर्णां प्रपूजयेत् ।
प्रयच्छति महादेवी खेचरीसिद्धिमुत्तमाम् ॥ १६० ॥
चतुःषष्टियुताः कोट्यो योगिणीनां महोजसाम् ।
चक्रमेतत् समासाद्य स्थितास्ता नात्र संशयः ॥ १६१ ॥

चक्रराज लिख कर सङ्गोपाङ्ग पूजन करे तो महादेवी प्रसन्न होकर उत्तम खेचरी मुद्रा की सिद्धि प्रदान करती हैं। अत्यन्त तेजस्विनी चौसठ करोड़ योगिनियाँ इस चक्र में निवास करती हैं; इसमें संशय नही ॥ १६०-१६१ ॥

पूर्णविद्याजपात् सर्वेवश्या भवन्ति निश्चितम् ।
क्षोभयेत् स्वर्गभूर्लोक पातालतलवासिनः ॥ १६२ ॥

भगवती के मन्त्र के जप को पूर्ण संख्या में जप करने से सभी वशीभूत हो जाते हैं इसमें संशय नहीं। ऐसा साधक स्वर्ग लोक और भूलोक और पाताल लोक के वासियों को क्षुब्ध कर देता है ॥ १६२ ॥

क्षोभयन्त्येव वीरेन्द्राः महाविद्याप्रसादतः ।
वाग्भवात् वाक्पतित्वञ्च कामात् कामसमो भवेत् ॥ १६३ ॥

**शिवत्वं शक्तिबीजेन त्रिकूटे सर्वमालभेत् ।**
**सर्वसिद्धिर्भवत्येव कूटत्रयस्य जापतः ॥ १६४ ॥**

**॥ इति श्रीमज्ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये षोडशोल्लासः ॥ १६ ॥**

किं बहुना, महाविद्या के प्रसाद से वीर उपासक सब को क्षुब्ध कर देता है और वाग्भव के प्रभाव से वाक्पतित्व तथा काम मन्त्र के जप के प्रभाव से काम के समान हो जाता है । शक्ति बीज के जप के प्रभाव से शिवत्त्व प्राप्त हो जाता है तथा तीनों कूटों के जप के परिणाम स्वरूप सब कुछ प्राप्त कर लेता है और उसे सारी सिद्धियाँ प्राप्त हो जाती हैं ॥ १६३-१६४ ॥

**महाकवि पं० रामकुबेर मालवीय के द्वितीय आत्मज डॉ० सुधाकर मालवीय के ज्येष्ठ पुत्र पण्डित रामरञ्जन मालवीय कृत श्रीमज्ज्ञानानन्द परमहंस विरचित कौलावलीनिर्णय नामक तन्त्र के षोडश उल्लास की निरञ्जन हिन्दी व्याख्या पूर्ण हुई ॥ १६ ॥**

# सप्तदश उल्लासः

मन्त्रशिखाविधानम्

**अथ वक्ष्ये च मन्त्राणां शिखां सिद्धिप्रदायिकाम् ।**
**यस्य विज्ञानमात्रेण क्षिप्रं विद्या प्रसीदति ॥ १ ॥**

अब सिद्धि प्रदान करने वाली सभी मन्त्रों की शिखा कहता हूँ, जिसके ज्ञानमात्र से महाविद्या शीघ्र प्रसन्न होकर सिद्ध हो जाती है ॥ १ ॥

**मूलरन्ध्रे तु या शक्तिर्भुजगाकाररूपिणी ।**
**तत्र यश्च भ्रमावर्त्तोऽपान इत्युच्यते बुधैः ॥ २ ॥**
**नीवारयुक्तविधिना कूजन्ती सततोत्थिता ।**
**गच्छन्ती ब्रह्मरन्ध्रेऽपि प्रविशन्ती स्वकेतने ॥ ३ ॥**

मूलाधार में सर्पाकार जो शक्ति है, उसके भ्रमावर्त्त (चकोह) को बुद्धिमान् लोग 'अपान' नाम से कहते हैं । यह नीवार तृण धान्य के विशेष आकार वाली के समान है और शब्द करती हुई मूलाधार से ब्रह्मरन्ध्र तक जाती है और पुनः वहाँ से अपने पूर्वस्थान में लौट आती है ॥ २-३ ॥

**यातायातक्रमेणैव कुर्यात्तत्र मनोलयम् ।**
**तेन मन्त्रशिखा जाता सर्वमन्त्रप्रदीपिका ॥ ४ ॥**

उसके यातायात क्रम से मनोलय करे । उससे मन्त्र शिखा उत्पन्न होती है, जो समस्त मन्त्रों को प्रदीप्त (तेजस्वी) करती है ॥ ४ ॥

**तमःपूर्णगृहे यद्वत् न किञ्चित् प्रतिभासते ।**
**शिखाहीनास्तथा मन्त्रा न सिध्यन्ति कदाचन ॥ ५ ॥**

जिस प्रकार अन्धकार युक्त गृह में कुछ दिखाई नहीं पड़ता, उसी प्रकार शिखारहित मन्त्र कदापि सिद्ध नहीं होते ॥ ५ ॥

**शिखोपदेशः सर्वत्र गोप्तव्यः साधकेन च ।**
**विनाऽनेन न सिध्यन्ति कल्पकोटिशतैरपि ॥ ६ ॥**

साधक को शिखा का उपदेश गोपनीय रखना चाहिये । शिखा के बिना करोड़ों सौ उपाय करने पर मन्त्र सिद्ध नहीं होते ॥ ६ ॥

**चतुर्विधा तु या सृष्टिर्यस्या योनौ प्रजायते ।**
**पुनः प्रलीयते तस्यां कालाग्न्यादिशिवान्तिका ॥ ७ ॥**

योनि में चार प्रकार की सृष्टि उत्पन्न होती है । फिर उसमें काल, अग्नि आदि तथा शिवादि भी लीन हो जाते हैं ॥ ७ ॥

**योनिमुद्रा परा ह्येषा बन्धस्तस्याः प्रकीर्त्तितः ।**
**तस्यास्तु बन्धमात्रेण तन्नास्ति यन्न साधयेत् ॥ ८ ॥**

इसकी श्रेष्ठ योनिमुद्रा को उसका बन्ध कहा जाता है । उसके योनि के बन्ध करने मात्र से ऐसा कोई तत्त्व नहीं है जो सिद्ध न हो ॥ ८ ॥

**अन्यथा जप्यते यस्तु अन्यथा कुरुते तु यः ।**
**नासौ सिध्यति मन्त्रश्च सत्यं सत्यं पुनः पुनः ॥ ९ ॥**

जो अन्यथा जप करता है या अन्यथा कार्य करता है उसको मन्त्र की सिद्धि नहीं होती । यह सत्य है, पुनः पुनः सत्य है ॥ ९ ॥

**छिन्ना रुद्धाश्च ये मन्त्राः कीलिताः स्तम्भिताश्च ये ।**
**दग्धाः सन्त्रासिता हीना मलिनास्तु तिरस्कृताः ॥ १० ॥**
**भेदिता भ्रमसंयुक्ताः शप्ताः सम्मूर्छिताश्च ये ।**
**वृद्धा बालास्तथा स्रस्ताः प्रौढा यौवनगर्विताः ॥ ११ ॥**
**अरिपक्षस्थिता ये च निर्वीर्याः सत्त्ववर्जिताः ।**
**अंशकेन विहीनाश्च खण्डशः शतधा कृताः ॥ १२ ॥**
**विधिनाऽनेन संयुक्ताः प्रभवन्त्यचिरेण तु ।**
**सिद्धिमोक्षप्रदाः सर्वे साधकेन नियोजिताः ॥ १३ ॥**

जो मन्त्र छिन्न, रुद्ध, कीलित, स्तम्भित, दग्ध, सन्त्रासित, हीन, मलिन, तिरस्कृत, भेदित, भ्रम, संयुक्त, शप्त, सम्मूर्च्छित, वृद्ध, बाल, स्रस्त, प्रौढ़, यौवनगर्वित, अरिपक्षस्थित, निर्वीर्य, सत्त्वरहित, अंश से विहीन और सैकड़ों खण्ड किये गये हैं ऐसे निकृष्ट मन्त्र इस शिखा की विधि से संयुक्त कर देने पर साधक को सिद्धि और मोक्ष देने वाले हो जाते हैं ॥ १०-१३ ॥

**यद्यदुच्चार्यते मन्त्री वर्णरूपं शुभावहम् ।**
**तत्तत् सिध्यत्यनायासाद् योनिमुद्रानिबन्धनात् ॥ १४ ॥**

मन्त्रज्ञ साधक इस योनिमुद्रा के निबन्धन करने से वर्ण रूप जिस-जिस मन्त्र

का उच्चारण करता है, वह शुभावह हो जाता है और अनायास ही सिद्ध भी हो जाता है ॥ १४ ॥

दीक्षयित्वा विधानेन अभिषिच्य सहस्रधा ।
ततोऽधिकारी तन्त्रेऽस्मिन् भवेत् साधकसत्तमः ॥ १५ ॥

विधानपूर्वक दीक्षा लेकर हजारों बार अभिषिक्त हो जाने पर साधक सत्तम इस तन्त्रशास्त्र का अधिकारी बनता है ॥ १५ ॥

ब्रह्महत्यासहस्राणि त्रैलोक्यमपि घातयेत् ।
नाऽसौ लिप्यति पापेन योनिमुद्रानिबन्धनात् ॥ १६ ॥
न तस्य पापपुण्यैस्तु कृतैर्दोषैर्न लिप्यते ।
कृत्वा पापसहस्राणि असंख्यातानि सर्वदा ॥ १७ ॥
दहत्युच्चारमात्रेण योनिमुद्रानिबन्धनात् ।
दुष्टमन्त्राश्च सिध्यन्ति मन्त्राश्चान्ये तु किं पुनः ॥ १८ ॥

योनिमुद्रा के निबन्धन से साधक सहस्रों ब्रह्महत्या का पाप तो नष्ट करता ही है, किं बहुना, समस्त त्रिलोकी भी नष्ट कर सकता है । वह किसी प्रकार के पाप से लिप्त नहीं होता । वह पाप-पुण्य के दोषों से लिप्त नहीं होता । सहस्रों, किं बहुना, असंख्य पापों को योनि मुद्रा निबन्धन करने वाला साधक अपने उच्चारमात्र से नष्ट कर देता है । दुष्ट मन्त्र भी ऐसा करने से सिद्ध हो जाते हैं फिर अन्य मन्त्रों की बात क्या ॥ १६-१८ ॥

स्थानस्था वरदा मन्त्रा ध्यानस्थाश्च फलप्रदाः ।
स्थानध्यानविनिर्युक्ताः सुसिद्धा अपि वैरिणः ॥ १९ ॥
सिध्यन्ति येन तत्स्थानं कथयामि विशेषतः ।
सकलं निष्कलं सूक्ष्मं तथा सकलनिष्कलम् ॥ २० ॥
कलाभिन्नं कलातीतं षोढास्थानं शिवोऽब्रवीत् ।
सकलं ब्रह्मबन्धस्थं तदूर्ध्वं विद्धि निष्कलम् ॥ २१ ॥
मानसं सूक्ष्मनामानं हृत्स्थं सकलनिष्कलम् ।
बिन्दुस्थितं कलाभिन्नं कलातीतं तदूर्ध्वतः ॥ २२ ॥

**मन्त्रों का छह स्थान**—अब जिस प्रकार मन्त्र स्व-स्थान पर रहते हुए वर प्रदान करते हैं । ध्यानस्थ होने पर फल देते हैं । स्थान एवं ध्यान दोनों से युक्त होने पर वैरी मन्त्र भी सिद्ध होते हैं । अब उन उन स्थानों को विशेष रूप से कहता हूँ । सकल, निष्कल, सूक्ष्म, सकलनिष्कल, कलाभिन्न और कलातीत मन्त्रों के—ये छह स्थान सदाशिव ने बताये हैं । ब्रह्मरन्ध्र में रहने वाले मन्त्र सकल,

उससे ऊपर रहने वाले निष्कल, मन में रहने वाले सूक्ष्म, हृदय में रहने वाले सकलनिष्कल, उभयात्मक बिन्दु में रहने वाले कलाभिन्न और उसके भी ऊपर रहने वाले कलातीत कहे जाते हैं ॥ १९-२२ ॥

**कलाङ्कशूलिनी सैव नादशक्तिः शिवोदिता ।**
**एषु स्थानङ्गता मन्त्राः स्थानस्थाः परिकीर्त्तिताः ॥ २३ ॥**
**देवतां हृदि सञ्चिन्त्य मन्त्रजापश्च जायते ।**
**ध्यानस्थाश्चैव ते मन्त्रा विज्ञेयाः साधकेन वा ॥ २४ ॥**

वह भगवती कलाङ्कशूलिनी तथा नादशक्ति कही जाती है; ऐसा शिव ने कहा है । इन-इन स्थानों में रहने वाले मन्त्र स्थानस्थ कहे जाते हैं । जब देवता को हृदय में स्थापित कर मन्त्र का जप किया जाता है; तब उसे 'ध्यानस्थ' कहा जाता है । इस प्रकार साधकों को ऐसा विचार करना चाहिये ॥ २३-२४ ॥

**तारसम्पुटितो वापि दुष्टमन्त्रोऽपि सिध्यति ।**
**यस्य यत्र दृढा भक्तिर्जायते सततं यदि ॥ २५ ॥**
**तस्य सिद्धो भवेन्मन्त्रो यथोक्तजपमात्रतः ।**

तार (ॐ) से सम्पुटित करने पर दुष्ट मन्त्र भी सिद्ध हो जाते हैं । जिसकी जिस विषय में दृढ़ भक्ति हो, उसको उक्त मन्त्रों के उक्त प्रकार के जाप से सिद्धि होती है ॥ २५-२६ ॥

**अथातः सर्वविद्यानां लिख्यते सिद्धिकारणम् ॥ २६ ॥**
**ब्राह्म्याद्यष्टकुलैः सार्धं साधकःस्थिरधीः शुचिः ।**
**चतुष्पथे वा नद्यां वा वटमूले त्रिशूलके ॥ २७ ॥**
**प्रेतभूमौ बिल्वमूले हट्टे वा राजवेश्मनि ।**
**सिन्दूरेण लिखेद् यन्त्रं विपुलं साध्यदर्भितम् ॥ २८ ॥**

अब सभी विद्याओं की सिद्धि के कारण को लिखता हूँ । साधक एकाग्रचित्त हो ब्राह्मी आदि अष्टकुलों के साथ किसी चतुष्पथ (चौराहा), नदी, वटमूल, त्रिशूलक (त्रिराहा), श्मशान, बिल्वमूल अथवा हट्ट (=बाजार) अथवा राजभवन में जाकर अपने साध्य से दर्भित मन्त्र को सिन्दूर से लिखे ॥ २६-२८ ॥

**तत्र सम्पूज्य विधिवत् कुलं कुलरसेन च ।**
**तर्पयित्वा तदन्तःस्थं प्रजपेत्रिशिचारतः ॥ २९ ॥**

वहाँ उन कुलों की कुलरस से पूजा करे । फिर उनके अन्तःस्थ देव का पूजन कर रात्रि के समय जप करे ॥ २९ ॥

ततो लक्षप्रमाणेन सिद्धिप्रदा भवन्ति हि ।
रात्रौ पुण्यगृहे चैव उद्याने वा सुरालये ॥ ३० ॥
आनीय कुलजां देवीं मूलमन्त्रेण दीक्षयेत् ।
ततः पूर्वोक्तरूपेण कुलक्षोभं समाचरेत् ॥ ३१ ॥
एवं कृतं न सिद्धिश्चेन्मूलमन्त्रं समभ्यसेत् ।
पीठानां परमं पीठं कामरूपं महाफलम् ॥ ३२ ॥

एक लाख की संख्या में जप करने से मन्त्र सिद्धि प्रदान करते हैं । रात्रि के समय किसी पुण्यगृह अथवा उद्यान अथवा देवालय में किसी कुलजा (कौल मार्गानुगामिनी) स्त्री को लाकर उसे मन्त्र द्वारा दीक्षित करे । फिर पूर्वोक्ति विधि के अनुसार कुलक्षोभ उत्पन्न करे । यदि इतना करने पर सिद्धि न हो, तो पुनः मूलमन्त्र का जप करे । सभी पीठों में कामरूप पीठ सर्वश्रेष्ठ है, क्योंकि यह महाफल प्रदान करता है ॥ ३०-३२ ॥

अत्र या क्रियते पूजा सकृद्वा साधकेन च ।
विहाय सर्वपीठानि तस्य देहे वसेच्छिवा ॥ ३३ ॥

यहाँ पर जिस साधक ने एक बार भी यदि पूजा की, तब शिवा समस्त पीठों को छोड़कर उसके शरीर में निवास करती है ॥ ३३ ॥

ततः शतगुणं प्रोक्तं कामाख्यायोनिमण्डलम् ।
यत्र कोटिगणैः सार्धमाद्या वसति मर्दिनी ॥ ३४ ॥

इसका सौ गुना फल कामाख्या योनि-मण्डल में पूजा से प्राप्त होता है, जहाँ आद्या महिषमर्दिनी अपने करोड़ों गणों के साथ निवास करती हैं ॥ ३४ ॥

यत्पीठं ब्रह्मणो वक्त्रं गुप्तं सर्वसुखावहम् ।
यतो देव्यश्च देवाश्च मुनयश्चैव भावजाः ॥ ३५ ॥
सर्वेऽप्याविर्भवन्त्यत्र तेन गुप्तं महाकुलम् ।
द्विविधं चैव तत्पीठं गुप्तं व्यक्तं सदा पशौ ॥ ३६ ॥
व्यक्तं गुप्तं महापुण्यं दुरापं साधकेन वै ।
व्यक्तं सर्वत्र देवेश लभ्यते कुलसुन्दरैः ॥ ३७ ॥
तत्रापि लक्षमानेन सिद्धिर्भवति निश्चितम् ।
अथवाऽन्यप्रकारेण कथ्यते साधनं महत् ॥ ३८ ॥

यह पीठ अत्यन्त गुप्त है, ब्रह्मदेव का साक्षात् मुख है, सुखकारक है, जहाँ देवियाँ, देवगण एवं मुनिगण भाव करने मात्र से प्रगट हो जाते हैं । इस कारण यह महाकुल गुप्त है । यह पीठ गुप्त और व्यक्त रूप दो भेदों वाला है । दोनों ही

महापुण्य है । साधक के लिये कठिनाई से प्राप्त करने योग्य है । हे देवेश! कुलमार्ग के उपासकों के लिये सभी प्रदेश व्यक्त हैं । उस व्यक्त पीठ में एक लाख की संख्या में जप करने से निश्चित रूप से सिद्धि हो जाती है, अथवा अन्य प्रकार से सिद्धि का महान् साधन कहता हूँ ॥ ३५-३८ ॥

**आनीय देवीं तद्गात्रे व्यापकान्तं प्रविन्यसेत् ।**
**उपचारैः षोडशभिस्तां सम्पूज्य विधानतः ॥ ३९ ॥**
**प्रथमं साधकश्रेष्ठो देवीकूटस्य मस्तके ।**
**मन्त्रं विलिख्य यथोक्तं पूजयेत् कुलवर्त्मना ॥ ४० ॥**

देवी को लाकर उसके शरीर में व्यापक पर्यन्त न्यास करे । फिर षोडशोपचार से विधानपूर्वक उसकी पूजा करे । श्रेष्ठ साधक देवी कूट का प्रथम मन्त्र लिखकर उसके मस्तक में स्थापित कर कुलमार्ग के अनुसार पूजा करे ॥ ३९-४० ॥

**प्रथमे पीठदेवीञ्च पूजयेद् गन्धपुष्पकैः ।**
**महाभागां ततो मूलदेवीमावरणैः सह ॥ ४१ ॥**
**लक्षैकं तत्र सञ्जप्य उड्डीयानं ततो विशेत् ।**
**तत्र पीठे योगनिद्रां पूजयित्वा ततो यजेत् ॥ ४२ ॥**

सर्वप्रथम पीठ की अधिष्ठात्री देवी का गन्ध पुष्प से पूजन करे । फिर आवरण सहित महादेवी का पूजन करे । वहाँ एक लाख जप कर उड्डीयान पीठ में प्रवेश करे । उस पीठ में योग निद्रा का पूजन कर अपनी इष्ट देवता का पूजन कर एक लाख जप करे ॥ ४१-४२ ॥

**निजेष्टदेवतां तत्र जपेल्लक्षं समाहितः ।**
**कामरूपं ततो गत्वा तत्र कात्यायनीं यजेत् ॥ ४३ ॥**
**पूजयित्वा ततो देवीं जपेल्लक्षं समाहितः ।**
**ततो जालन्धरे गत्वा पूर्णेशीं प्रथमं यजेत् ॥ ४४ ॥**
**तत्रापि लक्षमानं तु जप्त्वा मन्त्रं समाहितः ।**
**ततः पूर्णगिरिं गत्वा यजेच्चण्डीं समाहितः ॥ ४५ ॥**

फिर कामरूप में जाकर कात्यायनी का यजन करे । वहाँ कात्यायनी का पूजन कर एक लाख जप करे । फिर जालन्धर पीठ में जाकर पूर्णेशी का पूजन करे । वहाँ भी समाहित चित्त हो एक लाख जप करे । फिर पूर्णगिरि में जाकर समाहित चित्त हो चण्डी का यजन करे ॥ ४३-४५ ॥

**पूजयित्वा महादेवीं जपेल्लक्षमनन्यधीः ।**
**सिन्दूरबिन्दुपीठे च कामाख्यां प्रथमं यजेत् ॥ ४६ ॥**

वहाँ महादेवी का पूजन कर एक लाख की संख्या में सावधानी से जप करे। सर्वप्रथम सिन्दूरबिन्दुपीठ में भगवती कामाख्या का यजन करे ॥ ४६ ॥

**ततः प्रान्ते महादेवीं यजेद्दिक्करवासिनीम् ।**
**एवं पीठेश्वरीं जप्त्वा पूजयेदिष्टदेवताम् ॥ ४७ ॥**

उसके बाद उनके सन्निकट में रहने वाली दिक्करवासिनी की पूजा करे। इस प्रकार पीठेश्वरी का जपकर अपने इष्ट देवता का पूजन करे ॥ ४७ ॥

**सप्तपीठे सप्तलक्षं जप्त्वा रात्रौ समाहितः ।**
**संख्यापूर्वं ततः पृच्छेन्महादेवी कुलोत्तमम् ॥ ४८ ॥**
**तवेष्टदेवतैवाऽहं वृणुष्व वरमुत्तमम् ।**
**ततः प्रणम्य देवेशीं वृणुयाद्वरमुत्तमम् ॥ ४९ ॥**

इस प्रकार सात पीठ में समाहित चित्त हो, रात्रि में सात लाख जप करे। फिर कुलोत्तमा महादेवी साधक का नाम लेकर उससे पूछती हैं। मैं तुम्हारी इष्ट देवता हूँ। तुम सर्वोत्तम वर मुझसे माँग लो। फिर साधक देवी को प्रणाम कर अपने अनुकूल श्रेष्ठ वर वरण करे ॥ ४८-४९ ॥

**यद्येवं नैव सा देवी पुनः पूर्वोक्तमाचरेत् ।**
**अक्षोभितः कुलाचारपरिचर्यापरो भवेत् ॥ ५० ॥**

यदि देवी प्रगट होकर इस प्रकार साधक से न पूछे, तब वह पुनः पूर्वोक्त अनुष्ठान करे और चाञ्चल्यरहित होकर कुलमार्ग के अनुसार ही कौलों की परिचर्या करे ॥ ५० ॥

**अथवा सर्वपीठेषु यजेन् महिषमर्दिनीम् ।**
**ततः प्रसन्ना भवति सैव कुलवरप्रिया ॥ ५१ ॥**
**ततो जप्त्वा मूलमन्त्रं सर्वसिद्धीश्वरो भवेत् ।**
**ततो ध्यात्वा न्यसेदादौ मातृकान्तरसञ्ज्ञकम् ॥ ५२ ॥**

अथवा उक्त समस्त पीठों में महिषमर्दिनी का ही यजन करे। इस पूजन से कुल सम्प्रदाय वालों को वर देने वाली महिषमर्दिनी प्रसन्न हो जाती हैं। तदनन्तर मूल मन्त्र का जप कर साधक सिद्धीश्वर हो जाता है। इसके बाद ध्यान कर अन्य मातृका सञ्ज्ञा से न्यास करे ॥ ५१-५२ ॥

**पूर्ववद्विधिना न्यस्य तेनैव न्यस्य मातृकाम् ।**
**अकारादिक्षकारान्तमेकैकक्रमयोगतः ॥ ५३ ॥**
**पञ्चाङ्गञ्च पुनः कृत्वा पञ्चधा व्यापकं चरेत् ।**

मूर्द्धादिचरणान्तञ्च तस्मान्मूर्द्धावसानकम् ॥ ५४ ॥
मूलेन मनुना मन्त्री कृत्वा सञ्चिन्तयेत्ततः ।
ध्यायेत् कालीं महादैत्ययुद्धरागमहोन्मुखीम् ॥ ५५ ॥
दक्षिणे चक्रखड्गौ च बाणं शूलं तथैव च ।
वामे शङ्खं तथा चर्म धनुस्तर्जनमेव च ॥ ५६ ॥
बिभूतीं तीव्रबाणञ्च महिषे तु निषेदुषीम् ।
पीताम्बरधरां देवीं पीनोन्नतकुचद्वयाम् ॥ ५७ ॥
जटामुकुटशोभाढ्यां पितृभूमिसुखावहाम् ।
एवं ध्यात्वा महादेवीं मानसैरुपचारकैः ॥ ५८ ॥
पूजयेद्विधिवद् भक्त्या स्वकीय हृदि पङ्कजे ।
ततः सोऽहं विभाव्याथ पुष्पं निःक्षिप्य मस्तके ॥ ५९ ॥
घटस्थापनमारभ्य पीठपूजावसानकम् ।
कृत्वा च पूर्ववद्वीरः सदाशिवं यजेत्ततः ॥ ६० ॥

पूर्ववत् विधान से न्यास कर उसी क्रम से अकारादि-क्षकारान्त वर्णों से मातृका न्यास करे । फिर पञ्चाङ्गपूजन कर पाँच प्रकार का व्यापक न्यास करे । प्रथम मूर्धा से लेकर चरण पर्यन्त, फिर चरण से मूर्धा पर्यन्त न्यास कर मन्त्रज्ञ मूल मन्त्र से भगवती महाकाली, जिनका महादैत्यों से युद्ध करने में महोत्साह है । जो अपने दक्षिण हाथ में चक्र, खड्ग, बाण, शूल तथा बायें हाथ में शङ्ख, ढाल, धनुष और तीखा बाण धारण की हुई महिष पर बैठी हैं । पीताम्बर धारण किये हुये ऊँचे-ऊँचे दोनों कुचमण्डलों से सुशोभित हैं । जटामुकुट धारण की हुई हैं । जिन्हें पितृकानन (श्मशान) में सुख प्राप्त होता है । इस प्रकार महादेवी काली का ध्यान कर मानस उपचारों से भक्तिपूर्वक अपने हृदय कमल में पूजन करे । फिर 'सोऽहम्' इस मन्त्र का ध्यान कर भगवती के मस्तक पर पुष्प चढ़ाकर घटस्थापन से लेकर पीठ पूजन पर्यन्त समस्त कार्य सम्पादन कर वीर साधक सदाशिव का यजन करे ॥ ५३-६० ॥

पूर्वोक्तविधिना चैव ध्यात्वा च परदेवताम् ।
यन्त्रमध्ये समावाह्य मूलेन परिकल्पिताम् ॥ ६१ ॥
आवाहनादिकं चैव पूर्ववच्च समाचरेत् ।
सम्पूज्य च महादेवीं पूजयेत्तदनन्तरम् ॥ ६२ ॥
देव्या वामे यजेत् पश्चात्पूर्वोक्तञ्च गुरोःकुलम् ।
शाक्तं जप्त्वा च गुर्वादीन् नारदञ्च ततो यजेत् ॥ ६३ ॥

इसके बाद पूर्वोक्त विधि से परदेवता का ध्यान कर यन्त्र के मध्य में मूल मन्त्र

से आवाहनादि समस्त कार्य करे । इस प्रकार महादेवी का पूजन कर देवी के वाम भाग में शक्ति सम्प्रदाय के गुरुओं का पूजन करे । शाक्त मन्त्र का जप करे फिर नारद का यजन करे ॥ ६१-६३ ॥

**अष्टपत्रे यजेद्देवीं दुर्गाद्यां दीर्घपूर्विकाम् ।**
**दुर्गा च प्रथमा ज्ञेया द्वितीया वरवर्णिनी ॥ ६४ ॥**
**आर्या चैव तृतीया च चतुर्थी कनकप्रभा ।**
**कृत्तिका पञ्चमी प्रोक्ता षष्ठी चैवाभयप्रदा ॥ ६५ ॥**
**काली सुरागिणी चैव जप्त्वा पूर्वोदितक्रमात् ।**
**आयुधानि दलाग्रेषु यादिभिः क्रमतो यजेत् ॥ ६६ ॥**

फिर अष्टपत्र पर दीर्घपूर्वक (आं ईं ऊँ एं ऐं ओं औं अः) दुर्गादि देवियों का पूजन करे । प्रथम दुर्गा, दूसरी वरवर्णिनी, तृतीया आर्या, चौथी कनकप्रभा, पञ्चमी कृत्तिका, षष्ठी अभयप्रदा, फिर काली, इसके बाद सुरागिणी—ये आठ दुर्गादि देवियाँ कही गई हैं । इस प्रकार उनका यजन कर दल के अग्रभाग में यादि वर्णों से (यं रं लं वं शं षं सं हं) उनके आयुधों का पूजन करे ॥ ६४-६६ ॥

**ब्राह्म्याद्याश्च ततः पश्चात् लोकपालांस्ततो बहिः ।**
**तदस्त्राणि बहिर्जप्त्वा तर्पयित्त्वा विधानतः ॥ ६७ ॥**

उसके बाद ब्राह्मी, माहेश्वरी आदि अष्ट मातृकाओं का, उसके बाहर अष्ट लोकपालों का और उसके बाद लोकपालों के अस्त्रों का पूजन कर साधक विधिपूर्वक उनका तर्पण करे ॥ ६७ ॥

**ततः सम्पूजयेद्देवीं पूर्ववत् साधकोत्तमः ।**
**तर्पयित्वा महादेवीं मन्त्रजापं समाचरेत् ॥ ६८ ॥**

फिर उत्तम साधक देवी का पूर्ववत् पूजन कर उनका भी तर्पण करे । तदनन्तर मन्त्र का जप करे ॥ ६८ ॥

**मातुर्महिषमर्दिन्याः सङ्केतं कथयाम्यतः ।**
**कुलाचारस्य संसिद्ध्यै भुक्तिमुक्तिसुसिद्धये ॥ ६९ ॥**

अब इसके बाद महिषमर्दिनी माता का सङ्केत कहता हूँ । महिषमर्दिनी माता का यह सङ्केत कुलाचार की सिद्धि के लिये तथा भुक्ति-मुक्ति की प्राप्ति के लिये किया जाता है ॥ ६९ ॥

**भान्तं वियत् सनयनं श्वेतो मर्दिनी ठ द्वयम् ।**
**अष्टाक्षरी समाख्याता विद्या महिषमर्दिनी ॥ ७० ॥**

भान्त (म), वियत् (ह), जो सनयन (इ) हो, उसके बाद श्वेत (ष), फिर मर्दिनी पद, इसके बाद दो ठ (स्वाहा) अर्थात् 'महिषमर्दिन्यै स्वाहा'—यह महिषमर्दिनी अष्टाक्षरी विद्या कही जाती है ॥ ७० ॥

**सृष्टिस्थितिविनाशानामादिभूता सनातनी ।**
**न कस्मैचित् प्रवक्तव्या कथिता सिद्धिकारिणी ॥ ७१ ॥**

यह महाविद्या सृष्टि, स्थिति और विनाश की आदिभूता विद्या है और सनातनी है । अतः उनकी यह सिद्धिकारिणी अष्टाक्षरी विद्या किसी को उपदिष्ट नहीं करना चाहिये ॥ ७१ ॥

**अत्यन्तगुरुभक्ताय शुद्धाय सा हि प्रार्थ्यते ।**
**तदाष्टवर्गा दातव्या सफलं तस्य साधनम् ॥ ७२ ॥**

अत्यन्त गुरुभक्त और सदाचार से विशुद्ध व्यक्ति जब बहुत प्रार्थना करे । तब उसे इस अष्टाक्षरी विद्या का उपदेश करना चाहिये । जिससे उसका साधन फलवान् हो जाय ॥ ७१ ॥

**प्रणवाद्यां जपेद्विद्यां मायाद्यां वा जपेत् सुधीः ।**
**वधूबीजादिकां वापि कवचाद्यां जपेत्तदा ॥ ७३ ॥**

सुधी साधक इस महाविद्या के आदि में प्रणव लगाकर अथवा माया (ह्रीं) लगाकर जप करे, अथवा वधू बीज (स्त्रीं) लगाकर अथवा कवच (हुं) लगाकर जप करे ॥ ७३ ॥

**सर्वकालेषु सर्वत्र कामाद्यां प्रजपेत् सुधीः ।**
**वाग्भवाद्यां जपेत् तां तु देवीं वाक्यविशुद्धये ॥ ७४ ॥**

अथवा सर्वत्र सभी कालों में सुधी साधक काम (क्लीं) लगाकर जप करे । वाक्शुद्धि के लिये आदि में वाग्भव (ऐं) लगाकर जप करे ॥ ७४ ॥

**साधारणी प्राणविद्या हृल्लेखा सिद्धिखेचरा ।**
**एतत्पूर्वस्थिता देवी सुरसिद्धिविधायिनी ॥ ७५ ॥**

साधारणी प्राण विद्या (हं), हृल्लेखा (ह्रीं), सिद्धिखेचरा (?) इस विद्या के पूर्व में लगाकर जप करे तो वह देवता विषयक सिद्धि करा देती है ॥ ७५ ॥

**विशेषतः कलियुगे महासिद्धेश्च दायिनी ।**
**गुरूणां कुलनाथानां मायापाशविमोचिनी ॥ ७६ ॥**

यह नवाक्षरी विद्या विशेष रूप से कलि में फलप्रदा है और गुरुजनों एवं

कौलाचार्यों को मायापाश से विमुक्त करने वाली है ॥ ७६ ॥

**तस्माद्यत्नेन सततं गोप्तव्येयं नवाक्षरी ।**
**अष्टलक्षं जपेन्मन्त्रं तद्दशांशं हुनेत्ततः ॥ ७७ ॥**

इस कारण इस नवाक्षरी महाविद्या को प्रयत्नपूर्वक गुप्त रखे । इस मन्त्र का आठ लाख जप करे । तदनन्तर उसका दशांश हवन करे ॥ ७७ ॥

**पुरश्चरणाष्टलक्षं बोद्धव्यं साधकेन च ।**
**यथाशक्ति जपं कृत्वा समाप्याथ स्तुतिं पठेत् ॥ ७८ ॥**

साधक को यह समझ लेना चाहिये कि इसका पुरश्चरण भी आठ लाख का होता है । यथाशक्ति जप कर उसे समाप्त कर इस स्तुति को पढ़े ॥ ७८ ॥

महिषघ्निस्तुति

**जय देवि जगद्धात्रि त्रिपुराद्ये त्रिदैवते ।**
**भक्तेभ्यो वरदे देवि महिषघ्नि नमोऽस्तुते ॥ ७९ ॥**
**रोगविघ्नविनाशाय कुलाचारसमृद्धये ।**
**करालवदने श्यामे नमस्ते सुरसुन्दरि ॥ ८० ॥**
**कुलभक्तप्रसन्नास्ये शङ्करप्राणवल्लभे ।**
**रक्तमांससमाकीर्णवदने त्वां नमाम्यहम् ॥ ८१ ॥**
**इति स्तवने संस्तुत्य शेषं पूर्ववदाचरेत् ।**
**विसर्जनं विधायाथ प्रयोगञ्च ततश्चरेत् ॥ ८२ ॥**

'जय देवि जगद्धात्रि.....................त्वां नमाम्यहम्' (७९-८१) पर्यन्त स्तुति कर शेष पूजन पूर्ववत् सम्पन्न करे । हे देवि ! हे जगत् का पालन करने वाली ! हे त्रिपुराद्ये ! हे त्रिदेवते ! हे महिषासुर का वध करने वाली ! आप भक्तों को वर प्रदान करने वाली हो; आपको नमस्कार है । रोग एवं विघ्न के विनाश के लिए, कुलाचार की समृद्धि के लिए, हे श्यामा! हे सुरसुन्दरि! हे कराल मुख वाली ! आपको नमस्कार है । हे शङ्कर की प्राणवल्लभा ! आपको नमस्कार है । तदनन्तर विसर्जन कर इसका प्रयोग करे ॥ ७९-८२ ॥

**एतद्विद्या महाविद्या न देया यस्य कस्यचित् ।**
**यदि भाग्यवशात् लभ्या कुलदेवी कुलोत्तमैः ॥ ८३ ॥**

यह विद्या महाविद्या है । यदि यह कुलदेवी भाग्यवश कुलाचार्यों को प्राप्त हो जावे तो उसे वह जिस-किसी को नहीं देवे ॥ ८३ ॥

**दीक्षिता कुलजाभिस्तु सिद्धिदा सैव नान्यथा ।**

कुल धर्म में उत्पन्न हुई दीक्षित ललनाओं को यह सिद्धि प्रदान करती है अन्य को नहीं ॥ ८४ ॥

अथ दूतीयजनम्

अथातः सम्प्रवक्ष्यामि दूतीयजनमुत्तमम् ॥ ८४ ॥
शाक्तो वा वैष्णवो वापि शैवो वाऽप्यन्यपूजकः ।
यस्मात् क्षिप्रं भवेत् सिद्धिर्नान्यथा जन्मकोटिभिः ॥ ८५ ॥

**दूतीयजनविधान**—अब सर्वोत्तम दूती याग का विधान कहता हूँ । चाहे शाक्त हो, या वैष्णव, या शैव हो, अथवा अन्य देवता का पूजक हो, वह दूती के पूजन से ही सिद्धि लाभ करता है । अन्यथा करोड़ों जन्म तक उपाय करता रहे फिर भी सिद्धि नहीं मिलती ॥ ८४-८५ ॥

मन्त्रस्य सिद्धिकामस्तु दूतीयजनमाचरेत् ।
किं जपन्यासविधिना ध्यानपूजादिविस्तरैः ॥ ८६ ॥
यावद्दूतीं न पूज्येत तावत् सिद्धिर्भवेत् कुतः ।
गन्धर्वरूपवान् भूत्वा योनौ सम्पूज्य साधकः ॥ ८७ ॥
इहामुत्र सुखी भूत्वा देवीपुत्रो भवेत् क्षितौ ।

अतः मन्त्र-सिद्धि के लिये दूती-यजन अवश्य करना चाहिये । जप, न्यास, विधि, ध्यान और विस्तृत पूजा से कोई लाभ नहीं । जब तक साधक दूती पूजा नहीं करता, तब तक सिद्धि किस प्रकार सम्भव है । साधक गन्धर्व जैसा रूप बनाकर योनि में पूजन कर इस लोक और परलोक में सुखी होकर पृथ्वी में देवीपुत्र बन जाता है ॥ ८६-८८ ॥

त्रिकोणेषु त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥ ८८ ॥
योनिमध्ये यजेन्नित्यं चण्डिकां कुलदेवताम् ।
तत्र विद्यां जगद्धात्रीं कुलामृतैः कुलक्रमात् ॥ ८९ ॥
स भवेत् साधकश्रेष्ठः शिवतुल्यो भवेन्नरः ।
तत्र या क्रियते पूजा जपं वा तर्पणं पुनः ॥ ९० ॥
तदनन्तफलं कर्त्तुर्भवत्येव न संशयः ।
युवतीयोनिमास्थाय सर्वसिद्धिर्भवेद्यतः ॥ ९१ ॥

योनि के त्रिकोण में ब्रह्मा, विष्णु और महेश्वर का निवास है । योनि के मध्य में कौलों की देवता चण्डिका का निवास है अतः वहीं उनका यजन करे । वहाँ जगद्धात्री महाविद्या का कौलमतानुसार कुलामृत से पूजन करना चाहिये । ऐसा साधक शिवतुल्य हो जाता है । उस स्थान पर जो जप, पूजा अथवा तर्पण किया

जाता है उससे कर्त्ता को अनन्त पुण्य प्राप्त होता है; इसमें कोई संशय नहीं। क्योंकि युवती की योनि का सहारा लेने से साधक को समस्त सिद्धियाँ प्राप्त हो जाती हैं ॥ ८८-९१ ॥

**तस्माद्वै योषितां योनौ पूजयेत् साधकोत्तमः ।**
**सर्वालङ्कारसंयुक्तो रक्तवस्त्रविभूषितः ॥ ९२ ॥**
**परमानन्दतो रात्रौ पञ्चतत्त्वेन संयजेत् ।**
**स्वकल्पोक्तं प्रकुर्वीत न्यासादिकं सुसाधकः ॥ ९३ ॥**

इस कारण उत्तम साधक युवती की योनि में पूजा करे। साधक समस्त अलङ्कार धारण कर, रक्त वस्त्र से विभूषित हो, आनन्द में निमग्न होकर, रात्रि के समय युवती की पूजा पञ्चतत्त्व (मद्यादि) से करे और साधक अपने सम्प्रदायानुसार न्यासादि करे ॥ ९२-९३ ॥

**मस्तकं गजदन्तस्य हेमरूप्यादिनिर्मितम् ।**
**अर्घ्यपात्रे प्रतिष्ठानं कार्यं हेतुजलेन च ॥ ९४ ॥**

सुवर्ण तथा रजत निर्मित गणेश की मूर्त्ति अर्घ्यपात्र में स्थापित कर मद्य के जल से उनकी प्रतिष्ठा करे ॥ ९३-९४ ॥

**विशुद्धक्षौमरचितां हूनिकां चात्र योजयेत् ।**
**पुष्पान्यकार्यमध्ये च उपर्युपरि पूजयेत् ॥ ९५ ॥**

विशुद्ध पट्ट वस्त्र प्रदान करे यहाँ हूनिका का योजन करे और गन्धादिक अन्य कार्य करके मध्य में तथा ऊपर पुष्प चढ़ावे ॥ ९५ ॥

**मण्डूकं पूजयेदादौ रुद्रं कालाग्निसंयुतम् ।**
**आधारशक्तिं कूर्मञ्च तथानन्तवराहकम् ॥ ९६ ॥**

सर्वप्रथम मण्डूक की पूजा करे। फिर कालाग्नि से युक्त रुद्र की पूजा करे। फिर आधारशक्ति की, कूर्म की, शेष की और वराह की पूजा करे ॥ ९६ ॥

**पृथिवीञ्च तथा कन्दं नालं वसुदलं तथा ।**
**केशराणि च सम्पूज्य कर्णिकायां यजेत्ततः ॥ ९७ ॥**
**धर्मं ज्ञानञ्च वैराग्यं ऐश्वर्यञ्च क्रमाद्यजेत् ।**
**अपूर्वान् पूजयेदेतान् साधकः सिद्धिहेतवे ॥ ९८ ॥**

फिर पृथ्वी, कन्द, नाल और अष्टदल केशर की पूजा कर कर्णिका में क्रमशः धर्म, ज्ञान, वैराग्य और ऐश्वर्य की पूजा करे। फिर साधक अधर्म, अज्ञान, अवैराग्य और अनैश्वर्य की पूजा अपनी सिद्धि के लिये करे ॥ ९७-९८ ॥

आत्मान्तरात्मपरमज्ञानात्मानं क्रमेण च ।
पूजयित्वा ततश्चैव गुरुरूपान् समर्चयेत् ॥ ९९ ॥
अद्वैताचारसम्पन्नां गुरुभक्तां दृढव्रताम् ।
सदनुष्ठाननिरतां सात्त्विकीभक्तिसंयुताम् ॥ १०० ॥
कुर्यात् पैशुन्यरहितां अमायां भक्तवत्सलाम् ।
चातुर्यौदार्यदाक्षिण्यकरुणादिगुणान्विताम् ॥ १०१ ॥
रूपयौवनसम्पन्नां शीलसौभाग्यशालिनीम् ।
मनोगृहीतविश्वासां यद्वा सङ्केतमागताम् ॥ १०२ ॥
अथवा तत्क्षणायातां मदनानलतापिताम् ।
विलिप्तां रक्तवस्त्रेण रक्तगन्धविभूषिताम् ॥ १०३ ॥
सुगन्धिरक्तकुसुमां सर्वाभरणराजिताम् ।
सुधूपैर्धूपितां तन्वीं दूतीकर्मणि योजयेत् ॥ १०४ ॥

फिर क्रमशः आत्मा, अन्तरात्मा, परमात्मा तथा ज्ञानात्मा की पूजा करे । इनके पूजन के अनन्तर गुरु स्वरूप वालों की पूजा करे । इसके बाद अद्वैत आचार ज्ञान से सम्पन्न गुरु में भक्ति रखने वाली, अपने व्रत में दृढ़, उत्तम आचरण में संलग्न, सात्त्विकी भक्ति से संयुक्त, पिशुनता से रहित, अपने सहेलियों पर कृपा रखने वाली, चातुर्य, औदार्य, दाक्षिण्य, करुणादि गुणों से सम्पन्न, रूप और युवावस्था से परिपूर्ण, शीलवती, सौभाग्यशालिनी, मन से विश्वास रखने वाली, ऐसी युवती जो सङ्केतपूर्वक बुलाई गई हो, अथवा तत्क्षण संयोगवशात् आई हो, मदनाग्नि से सन्तप्त-उत्तम गन्ध का लेप किये हुए रक्त वस्त्र और रक्तगन्ध से विभूषित हो, सुगन्धयुक्त पुष्पों की माला तथा सब प्रकार के आभूषणों से भूषित हो, उत्तम धूप से धूपित हो, ऐसी तन्वी युवती को दूती कर्म में नियुक्त करे ॥ ९९-१०४ ॥

एवम्भूतां यजेद्यस्तु प्रसूनतूलिकोपरि ।
तस्य गात्रे स्वकल्पोक्तं न्यासजालं विधाय च ॥ १०५ ॥

उपर्युक्त गुणसम्पन्ना दूती का पुष्प सुसज्जित रूई के गद्दे पर यजन करे । सर्व प्रथम उसके शरीर में स्वकल्पोक्त न्यास जाल का विधान करे ॥ १०५ ॥

षोडशैरुपचारैस्तु पूजयेत् स्थिरमानसः ।
जप्त्वा च हूनिकामध्ये प्रसूनैश्च सुगन्धिभिः ॥ १०६ ॥
चन्दनागुरुकर्पूरकस्तूरीकुङ्कुमादिभिः ।
समाकीर्णे सुपर्यङ्के पूजयेत् कुलनायिकाम् ॥ १०७ ॥

फिर एकाग्रचित्त हो षोडशोपचारों से उसका पूजन करे । हृनिका के मध्य में जप कर सुगन्ध, पुष्पों, चन्दन, अगुरु, कपूर, कस्तूरी, कुङ्कुमादि से संयुक्त सुन्दर पलङ्ग पर बैठाकर उस कुलनायिका का पूजन करे ॥ १०६-१०७ ॥

**पूजयित्वा सदा भक्त्या स्थिरचित्तः स्थिरेन्द्रियः ।**
**बटुकं गपापं दुर्गां क्षेत्रपालं तथैव च ॥ १०८ ॥**
**पूर्वादिक्रमतो मन्त्री पूजयेत् सिद्धिहेतवे ।**
**त्रिकोणे पूजयेन्मूर्ध्नि कामेशीं तस्य मध्यगे ॥ १०९ ॥**

इस प्रकार कुलनायिका का पूजन कर स्थिर चित्त एवं जितेन्द्रिय साधक बटुक, गणेश, दुर्गा तथा क्षेत्रपाल का पूर्वादिक्रम से अपनी सिद्धि के लिये यजन करे । फिर त्रिकोण में, शिरः स्थान में तथा चक्रमध्य में कामेश्वरी की पूजा करनी चाहिए ॥ १०८-१०९ ॥

**गणेशञ्च कुलाध्यक्षं दुर्गां लक्ष्मीं सरस्वतीम् ।**
**त्रिकोणे पूजयित्वा तु वसन्तं मदनं तथा ॥ ११० ॥**
**स्तनयोः पूजयेत् पश्चात् मुखे तस्याः कलाधरम् ।**
**दक्षपादादिमूर्धान्तं वाममूर्धादिकं तथा ॥ १११ ॥**
**पूजयेत् साधकश्रेष्ठः कला वै कामसोमयोः ।**

कुलाध्यक्ष गणेश, दुर्गा, लक्ष्मी तथा सरस्वती की त्रिकोण में पूजाकर उस दूती के स्तन में वसन्त और कामदेव की पूजा करे । मुख में कलाधर चन्द्रमा की, दाहिने पाद से लेकर मूर्धा पर्यन्त तथा बायें पाद से लेकर मूर्धा पर्यन्त श्रेष्ठ साधक काम और सोम की पूजा करे ॥ ११०-१११ ॥

**श्रद्धा प्रीतीरतिश्चैव दूतिः कान्तिर्मनोरमा ॥ ११२ ॥**
**विमला मोदिनी घोरा मदनोन्मादिनी तथा ।**
**मोहिनी दीपनी चैव शोषणी चैव शङ्करी ॥ ११३ ॥**
**रञ्जनी च क्रमेणैव षोडशी प्रियदर्शना ।**
**षोडशस्वरसंयुक्ता एताः कामकला यजेत् ॥ ११४ ॥**

श्रद्धा, प्रीति, रति, दूती, कान्ति, मनोरमा, विमला, मोदिनी, घोरा, मदना, उन्मादिनी, मोहिनी, दीपनी, शोषणी, शङ्करी एवं रञ्जनी—ये षोडशी कही जाती हैं जो अत्यन्त सुन्दरी हैं । साधक षोडश स्वरों से इन षोडशी कामकलाओं का यजन करे ॥ ११२-११४ ॥

**पूषा रमा च सुमना रतिः प्रीतिस्तथा धृतिः ।**
**ऋद्धिः सौम्या मरीचिश्च तथा चैवांशुमालिनी ॥ ११५ ॥**

अङ्गिरा पावनी चैव छाया सम्पूर्णमण्डला ।
तथा तुष्टामृते चैव कलाः सोमस्य षोडश ॥ ११६ ॥
स्वरैरेव प्रपूज्या हि सर्वकामार्थसिद्धये ।
तस्यास्तु मदनागारे पूजयेद् भगमालिनीम् ॥ ११७ ॥

पूषा, रमा, सुमना, रति, प्रीति, धृति, ऋद्धि, सौम्या, मरीचि, अंशुमालिनी, अंगिरा, पावनी, छाया, सम्पूर्णमण्डला, तुष्टा और अमृता—ये सोलह चन्द्रमा की कलायें हैं, साधक सिद्धि के लिये इनका पूजन स्वरों से ही करे । फिर उसके मदनागार में भगमालिनी की पूजा करे ॥ ११५-११७ ॥

वाग्भवं भगशब्दावते भुगे भगिनि चालिखेत् ।
अथोदरि भगान्ते च भगमाले भगावहे ॥ ११८ ॥
भगगुह्ये भगयोनि ततो भगनिपातिनि ।
सर्वभगवशङ्करि भगरूपे ततः परम् ॥ ११९ ॥
नित्यक्लिन्ने भगप्रान्ते स्वरूपे सर्वाण्यालिखेत् ।
भगानि मे ह्यानयान्ते वरदेऽथ समालिखेत् ॥ १२० ॥
रेते सुरेतेऽथ भग क्लिन्ने क्लिन्नद्रवे ततः ।
क्लेदय द्रावयाऽमोघे भगविच्चे ततः परम् ॥ १२१ ॥
क्षुभः क्षोभयशब्दान्ते सर्वपदं वदेत्ततः ।
सत्त्वान् भगेश्वरि ब्रूयात् वाग्भवं ब्लूं जमादिकम् ॥ १२२ ॥
भें ब्लूं मों ब्लूं प्रदान्ते हें हें क्लिन्ने ततो वदेत् ।
सर्वाणि भगानि मे वशमानय चोद्धरेत् ॥ १२३ ॥
वधू हर्ब्लें भुवनेशीं ततश्च भगमालिनि ।
भगमालाश्च नित्याश्च ङेयुतां मनुमुद्धरेत् ॥ १२४ ॥

**भगमालिनी मन्त्रोद्धार**—वाग्भव (ऐं) 'भग' इसके बाद 'भुगे भगिनि' कहे । फिर भग इसके अन्त में उदरि (=भगोदरि) 'भगमाले भगावहे' फिर भगगुह्ये भगयोनि भगनिपातिनि' फिर 'सर्वभगवशङ्करि भगरूपे' कहे । इसके बाद 'नित्यक्लिन्ने' इसके बाद 'भग' उसके अन्त में 'स्वरूपे' फिर 'सर्वाणि भगानि मे आनय वरदे' इस प्रकार लिखे । फिर 'रेते सुरेते भग क्लिन्ने क्लिन्न द्रवे क्लेदय द्रावय अमोघे भगविच्चे', इसके बाद क्षुभः क्षोभय, इसके बाद 'सर्व', फिर 'सत्त्वान् भगेश्वरि' कहे । फिर वाग्भव (ऐं), ब्लूं, जं ब्लूं भें ब्लूं मों ब्लूं के अन्त में 'हें हें क्लिन्ने' 'सर्वाणि भगानि मे वशमानय' पर्यन्त भगमालिनी मन्त्र का उद्धार करे । फिर 'वधू' (स्त्री) हर ब्लें भुवनेशि भगमालिनी भगमाला नित्यायै' पर्यन्त मन्त्र का उद्धार करे ॥ ११५-१२४ ॥

विमर्श—भगमालिनी नित्या के मन्त्र का स्वरूप इस प्रकार है—ऐं भगभुगे भगिनि भगोदरि भगमाले भगावहे भगगुह्ये भगयोनि भगनिपातिनि सर्वभगवशङ्करि भगरूपे नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मे आनय वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभ क्षोभय सर्व सत्वान् भगेश्वरि ऐं ब्लूं जं ब्लूं भें ब्लूं मों ब्लूं हें हें क्लिन्ने सर्वाणि भगानि मे वशमानय।

**भगमालां महाविद्यां पूजयित्वा च साधकः ।**
**सर्वानन्दमये मध्ये चक्रराजं समर्चयेत् ॥ १२५ ॥**

फिर साधक भगमाला महाविद्या का पूजन कर सर्वानन्दमय के मध्य में चक्रराज की पूजा करे ॥ १२५ ॥

**पूर्वपश्चिमयोगेन निजविद्यां प्रपूजयेत् ।**
**तत्राप्यावाहनं नास्ति जीवन्यासं तथैव च ॥ १२६ ॥**
**विधिवत् पूजनं कृत्वा स्वलिङ्गे तदनन्तरम् ।**
**तारञ्च भुवनेशानीं त्रिपुरायास्त्रयं ततः ॥ १२७ ॥**
**नमः शिवाय विद्येयं दशार्णा परिकीर्त्तिता ।**
**अनेन मनुना मन्त्री स्वलिङ्गे पूजयेच्छिवम् ॥ १२८ ॥**
**यजेत्तत्पुरुषाघोरसद्योवामेशसञ्ज्ञया ।**

पूर्व से पश्चिम पर्यन्त निज विद्या का पूजन करना चाहिए। उसमें आवाहन तथा प्राण प्रतिष्ठा की आवश्यकता नहीं होती। चक्रराज का विधिवत् पूजन कर अपने लिङ्ग में तार (ॐ), भुवनेशी (ह्रीं), इसके बाद तीन त्रिपुरा (क्लीं क्लीं क्लीं), फिर 'नमः शिवाय' यह महाविद्या दश अक्षरों वाली कही गई है इस मन्त्र से साधक अपने लिङ्ग में सदाशिव का पूजन करे और फिर 'तत्पुरुषाय विद्महे' अघोर मन्त्र, सद्योजात और वामदेव और ईशानः सर्व विद्यानाम्' इन मन्त्रों से यजन करे ॥ १२६-१२९ ॥

**निवृत्तिञ्च प्रतिष्ठां च विद्यां शान्तिं ततः परम् ॥ १२९ ॥**
**शान्त्यतीतां च सम्पूज्य षडङ्गावरणं यजेत् ।**
**समग्रविद्यामुच्चार्य तत्त्रिकोणे प्रपूजयेत् ॥ १३० ॥**

फिर निवृत्ति, प्रतिष्ठा, विद्या, शान्ति, शान्त्यतीता का पूजन कर षडङ्गावरण की पूजा त्रिकोण में ही समस्त विद्या मन्त्र का उच्चारण कर करे ॥ १२९-१३० ॥

**पुष्पं धूपादिकं दत्त्वा निर्विकल्पमनाः स्वयम् ।**
**सर्वसङ्क्षोभणीं मुद्रां बद्ध्वा योनिं विचालयेत् ॥ १३१ ॥**

फिर पुष्प धूपादि प्रदान कर स्वयं विकाररहित होकर सर्वसङ्क्षोभणी मुद्रा

बनाकर योनि को चला देवे ॥ १३१ ॥

मध्यमे मध्यगे कृत्वा कनिष्ठाङ्गुष्ठरोधिते ।
तर्जन्यौ दण्डवत् कृत्वा मध्यमोपर्यनामिके ॥ १३२ ॥
एषा तु परमा मुद्रा सर्वसङ्क्षोभणी मता ।
क्षोभयेदथवा मन्त्री गजहस्ताख्यमुद्रया ॥ १३३ ॥
अधोमुखं दक्षपाणिं निधायाऽङ्गुष्ठके समे ।
निःक्षिपेदङ्गुलीः सर्वा गजतुण्डाकृतिर्यथा ॥ १३४ ॥
गजहस्ता महामुद्रा कथिता सिद्धिदायिका ।
उच्चरेद्भगमालाञ्च द्राविणीबीजमुच्चरन् ॥ १३५ ॥
अक्षुब्ध्यमनयोर्योगे महाविन्दुः प्रजायते ।
रजोमयं रजः साक्षात् संविदेव न संशयः ॥ १३६ ॥

दोनों मध्यमा को मध्य भाग में स्थापित कर; कनिष्ठा और अङ्गुष्ठ अङ्गुलियों से रोक कर; तर्जनी को डण्डे के समान खड़ी रखे । (दोनों) अनामिका को मध्यमा पर स्थापित करे । यह परमा सङ्क्षोभणी मुद्रा कही जाती है अथवा मन्त्रज्ञ साधक गजहस्त नामक मुद्रा दिखाकर योनि संक्षुब्ध करे । दाहिने हाथ को अधोमुख कर दोनों अङ्गूठों को समतल रखकर सभी अङ्गुलियों को गजतुण्ड के समान ऊपर उठावे—इसे गजमुद्रा कहा जाता है जो सब सिद्धि प्रदान करने वाली है । फिर द्राविणी बीज का उच्चारण कर भगमाला मन्त्र का उच्चारण करे । इन दोनों मन्त्रों के योग से महाविन्दु उत्पन्न होता है जो भय एवं रज ही संवित् (ज्ञान) है इसमें संशय नहीं ॥ १३२-१३६ ॥

प्रकृतिः परमेशानी बीजं पुरुष उच्यते ।
शिवशक्तिसमायोगो योग एव न संशयः ॥ १३७ ॥

इसकी प्रकृति परमेश्वरी है, पुरुष बीज है । शिव शक्ति का एक में मिलन योग है इसमें संशय नहीं ॥ १३७ ॥

शीत्कारो मन्त्ररूपस्तु वचनं स्तवनं भवेत् ।
आलिङ्गनञ्च कस्तूरी कर्पूरं चुम्बनं भवेत् ॥ १३८ ॥
नखदन्तक्षतादीनि पुष्पमालादिपूजनम् ।
लीलादिकं धूपदीपं कुचमर्दं शिवार्चनम् ॥ १३९ ॥

इस योग की स्थिति में शीत्कार मन्त्र है, वचन स्तुति है, आलिङ्गन कस्तूरी है, चुम्बन कपूर है, पुष्प मालादि से पूजन नखक्षत दन्तक्षतादि है, धूपदान लीलादिक है और शिवार्चन स्तन मर्दन है ॥ १३८-१३९ ॥

**मैथुनं तर्पणं विद्धि वीर्यपातो विसर्जनम् ।**
**कुलद्रव्येण संशोध्य शिवशक्तिमयो भवेत् ॥ १४० ॥**

तर्पण को मैथुन समझना चाहिये और विसर्जन को वीर्यपात समझना चाहिये। कुलद्रव्य से अपने को शुद्ध कर साधक शिवशक्तिमय बन जाता है ॥ १४० ॥

**वीर्यामृतं परंब्रह्म हुनेद्राहु मुखाम्बुजे ।**
**कुण्डे त्रिगुणसम्पन्ने श्रीविन्दुनिलये परे ॥ १४१ ॥**

यह शिवार्चन रूप वीर्यामृत परब्रह्म स्वरूप है इसे राहु के मुख कमल में हवन कर देवे। त्रिगुण सम्पन्न श्री विन्दु का निवास स्थान कुण्ड ही राहु बतलाया गया है ॥ १४१ ॥

**परापरविभागेन कुलीनो विश्वपूजितः ।**
**विविक्तुः कुत्सनपरो जायते गुरुतल्पगः ॥ १४२ ॥**

इस प्रकार परापर के विभाग से कौल विश्वपूजित हो जाता है। ऐसे विवेचक कौल की निन्दा करने वाले को गुरुतल्पगामी होने का दोष लगता है ॥ १४२ ॥

**प्रकृतञ्च समाप्याथ गृहीत्वाद्रव्यमुत्तमम् ।**
**तर्पयित्वा महादेवीं शक्तये दक्षिणां ददेत् ॥ १४३ ॥**

साधक प्रकृत कार्य सम्पादन कर उस उत्तम द्रव्य को ग्रहण कर उससे महादेवी का तर्पण कर शक्ति को दक्षिणा प्रदान करे ॥ १४३ ॥

**सुवस्त्राभरणाद्यैश्च शक्तिञ्च परितोषयेत् ।**
**त्रिविधं त्रिपुरायाश्च कथितं पूजनं महत् ॥ १४४ ॥**

उत्तमोत्तम वस्त्र आभरण देकर शक्ति को सन्तुष्ट करे। इस प्रकार हमने त्रिपुरा की तीन प्रकार की विस्तारपूर्वक पूजा कहा ॥ १४४ ॥

**अतएव महाप्राज्ञो निर्विकल्पः सदा भवेत् ।**
**तदा सुविस्तरैः स्तवैः सर्वाणि परिशोधयेत् ॥ १४५ ॥**

तदनन्तर महाप्राज्ञ साधक अपने मन में किसी प्रकार का विकल्प (शङ्का सन्देह) न करे। उस समय विस्तृत स्तुतियों से सब को प्रसन्न करे ॥ १४५ ॥

**निर्विकल्पतया गात्रयज्ञे दोषो न विद्यते ।**
**अश्वमेधादियज्ञादौ वाजिहत्या कथं भवेत् ॥ १४६ ॥**

इस प्रकार दूती के शरीर में सम्पन्न किया गया याग निर्विकार होने के कारण दोषावह नहीं होता। यदि ऐसा न हो तो अश्वमेधादि यज्ञों में घोड़े की हत्या क्यों

की जाती है ॥ १४६ ॥

सर्वभोज्यवस्तूनामामिषत्वम्

फलं क्षीरं घृतं चैव मधु मौरेयमैक्षवम् ।
पैष्टीभवं धान्यभवं तथा चक्रविनिर्मितम् ॥ १४७ ॥
सहकारभवं चैव विविधं वस्तुभेदतः ।
मादकं धर्मसञ्छेदात् वर्ज्यमाहुर्मनीषिणिः ॥ १४८ ॥
ज्ञानेन संस्कृते तत्तु महापातकनाशनम् ।
ब्रह्महत्यासुरापानस्वर्णस्तेयादिपातकान् ॥ १४९ ॥
नाशयेत् पूजनाच्चैव निर्विकल्पः स मन्त्रवित् ।
विचारयेत् सदा सर्वं सत्तर्केण सुसाधकः ॥ १५० ॥

फल, दूध, घृत, मधु, मैरेय (मद्य), इक्षुरस से, अपूप से तथा धान्य से होने वाले तथा सहकार (आम्र) से होने वाले मद्य—ये वस्तु भेद से अनेक प्रकार के हो जाते हैं। जो मादक होने के कारण धर्मतः प्रतिकूल होने से मनीषियों द्वारा निषेध किये गये हैं। किन्तु वही ज्ञान से संस्कृत हो जाने पर महा पातकों के नाश करने वाले बन जाते हैं। इतना ही नहीं वह विज्ञ साधक पूजा के प्रभाव से सुसंस्कृत होकर ब्रह्महत्या, सुरापान, स्वर्णस्तेय आदि पातकों को भी नष्ट कर देता है। अतः मन्त्रवेत्ता तत्त्वज्ञ सुसाधक सर्वदा सभी वस्तुओं के विषय में सतर्कतापूर्वक विचार विमर्श करे ॥ १४७-१५० ॥

पयः पिबन्तीह देवा गवां नाश्नन्ति शोणितम् ।
मीनं न भुञ्जते हन्त विधवा तत् कथं पयः ॥ १५१ ॥
पिबन्ति संसर्गदुष्टं यथान्यदपि वस्तुषु ।
जलं जलचरं विद्धि घटपूर्णं समानयेत् ॥ १५२ ॥
स्थापितं तद्धि सप्ताहं जलं जीवसमन्वितम् ।
अनामिषं नास्ति किञ्चित् सर्वं क्षीरादिकं तथा ॥ १५३ ॥
शमीवृक्षे यथा वह्निः सदा तिष्ठति नित्यशः ।
सर्वभूतेषु विज्ञानं तथा ज्ञेयं सुसाधकैः ॥ १५४ ॥

ब्राह्मण दूध पी लेते है, किन्तु गोमांस नहीं खाते और मछली भी नहीं खाते। यदि—ये सभी विधवा (अग्राह्य) हैं, तब दूध क्यों ग्राह्य है? उसे क्यों पीते हैं? वह भी तो संसर्ग दुष्ट है? जैसे अन्य वस्तु संसर्ग दुष्ट हो जाते हैं। जल में रहने वाले जलचर मत्स्यादि के अभक्ष्य होने पर विचार कीजिये। यदि घड़ा में जल भर कर रखे, एक सप्ताह के भीतर उसमें जीव पड़ जाते हैं, वही जल पीया जाता है। किन्तु उसमें उत्पन्न होने वाले मत्स्य अभक्ष्य क्यों हैं? जैसे दुग्धादि पदार्थ

आमिष (मांस) नहीं हैं, उसी प्रकार सभी पदार्थ आमिष नहीं है । जिस प्रकार शमी वृक्ष में अग्नि सर्वदा निवास करती है, उसी प्रकार सभी भूतों में विज्ञान निश्चित रूप से रहता है सुधाधक को ऐसा जानना चाहिए ॥ १५१-१५४ ॥

**काष्ठादिघर्षणाच्चैव प्रकटो वह्निरुच्यते ।**
**तत्काष्ठं दह्यते तेन तथा ब्रह्ममयं जगत् ॥ १५५ ॥**

जिस प्रकार घर्षण से काष्ठादि में अग्नि उत्पन्न होती है, फिर उसी अग्नि के द्वारा काष्ठादि जल जाते हैं । इसी प्रकार यह जगत् ब्रह्ममय है, ज्ञानस्वरूप है । उसके उत्पन्न होने से समस्त अज्ञान नष्ट हो जाते हैं ॥ १५५ ॥

**पापपुण्यविनिर्मुक्तं ज्ञानमेतदुदाहृतम् ।**
**यज्ञयुक्तस्य नान्यस्य अन्यथा पातकं भवेत् ॥ १५६ ॥**

इस प्रकार का ज्ञान पाप-पुण्यरहित कहा जाता है । अतः यज्ञयुक्त ज्ञानी को पाप नहीं लगता । अन्य अज्ञानी को तो पाप लगता ही है ॥ १५६ ॥

**सकलं पवित्रं, वासना कुत्सिता**

**मादकं वस्तु सकलं वर्जयेत्कनकादिकम् ।**
**धर्माधर्मपरिज्ञानात् संस्काराच्च पवित्रता ॥ १५७ ॥**

सभी कनकादि (धतूरादि) वस्तु मादक होने से वर्जित किये गये हैं । किन्तु धर्माधर्म के परिज्ञान से अथवा संस्कार से उनमें पवित्रता आती है ॥ १५७ ॥

**विण्मूत्रस्त्रीरजो वापि नखास्थि सकलं तथा ।**
**विचारयेन्मन्त्रवित्तु भ्रान्तिरेव न संशयः ॥ १५८ ॥**

विष्ठा, मूत्र, स्त्रीरज, नख, अस्थि (हड्डी)—ये सभी धर्माधर्म के परिज्ञान से संस्कार से शुद्ध हैं । इनमें अन्य अपवित्रता का विचार तो भ्रान्ति ही है; इसमें संशय नहीं ॥ १५८ ॥

**स्त्रीरजः परमं द्रव्यं देहस्तेन प्रजायते ।**
**कथं तद्दूषणं येन प्राप्यते परमं पदम् ॥ १५९ ॥**
**पुरुषस्य यद् बीजं विन्दुरित्यभिधीयते ।**
**विन्दुस्तु परमं द्रव्यं कायोऽयं शिवरूपकः ॥ १६० ॥**

स्त्री के रज से शरीर का निर्माण होता है । इसलिये वह उत्कृष्ट द्रव्य है । उसी शरीर से मोक्ष की प्राप्ति होती है । फिर वह किस प्रकार दूषित कहा जा सकता है ? पुरुष का वीर्य जिसे विन्दु कहा जाता है, वह विन्दु भी परम द्रव्य क्यों नहीं? जिससे शिवस्वरूप यह शरीर बनता है ॥ १५९-१६० ॥

**शिवतत्त्वेन चास्थ्यादिदूषणं नास्ति वैन्दवे ।**
**पृथिव्यापस्ततो वायुराकाशं चन्द्रसूर्यकौ ॥ १६१ ॥**
**एतैः स्थूलशरीरं तु शुक्रशोणितसम्भवम् ।**
**पितृतस्त्रीणि जायन्ते मज्जास्थिस्नायुरेव च ॥ १६२ ॥**
**मातृतस्त्रीणि जायन्ते त्वङ्मांसशोणितानि च ।**
**षाट्कौषिकमिदं प्रोक्तं शरीरं परमर्षिभिः ॥ १६३ ॥**
**मूलशुद्धिः सर्वशुद्धिरिति न्यायः प्रवर्त्तते ।**
**शरीरं यदि शुद्धं स्यात्तदा तत्र न दूषणम् ॥ १६४ ॥**
**सर्वथा नैव दोषोऽस्ति तथा शुक्रेषु निश्चितम् ।**
**ततः पवित्रं देहस्य कारणं केन दूष्यते ॥ १६५ ॥**

बिन्दु के शिवतत्त्व होने से उससे बनने वाले अस्थि आदि दूषित नहीं कहे जा सकते । पृथ्वी, जल, वायु, आकाश, चन्द्रमा एवं सूर्यात्मक स्थूल यह शरीर है, जो शुक्र और शोणित से उत्पन्न हुआ है । इसमें मज्जा, अस्थि और स्नायु—ये तीन पिता के वीर्य (बिन्दु) से बनते हैं । त्वचा, मांस और शोणित माता के रज से बनते हैं । इस प्रकार महर्षियों ने इस शरीर को षाट्कौशिक (छह कोषों वाला) कहा है । यतः मूल (जड़) शुद्ध है तो सब शुद्ध है । इस न्याय से समस्त शरीर शुद्ध ही मानना चाहिये । फिर इसे दूषित किस प्रकार समझा जा सकता है? जब शुक्र में दोष नहीं है तब शरीर को किस प्रकार दूषित कहा जा सकता है? अतः शरीर सर्वथा पवित्र है । उसे दूषित कहने में कोई कारण नहीं ॥ १६१-१६५ ॥

**ज्ञानमार्गेण सकलं निर्विकल्पं न दूषणम् ।**
**सविकल्पो यदि भवेत् पापभाग्जायते नरः ॥ १६६ ॥**

निर्विकल्पयोगी को ज्ञान मार्ग से कहीं भी दोष दिखाई नहीं पड़ता । किन्तु सविकल्प पुरुष तो इसे न जान सकने के कारण पापी बन जाता है ॥ १६६ ॥

**अन्नं ब्रह्ममयं विद्धि तेन यस्य तु सम्भवः ।**
**नानाजीवमयं तत्तु पुरीषं केन दूष्यते ॥ १६७ ॥**

अन्न ब्रह्ममय है और सब का जीवन है । फिर उस अन्न से बनने वाला पुरीष (मल) किस प्रकार दूषित हो सकता है ॥ १६७ ॥

**नानाविधा हि सततं देवताः सलिले स्थिताः ।**
**तेनोदकेन यज्जातं मूत्रं केन च दूषितम् ॥ १६८ ॥**

जल में अनेक देवताओं का निवास है । उस जल से होने वाले मूत्र को किस कारण दूषित कहा जा सकता है? ॥ १६८ ॥

**गोमूत्रप्राशनं विप्रैर्गोमयस्य च भक्षणम् ।**
**मले मूत्रे च यो दोषो भ्रान्तिरेव न संशयः ॥ १६९ ॥**

ब्राह्मण लोग गोमूत्र और गोमय का भक्षण (प्रायश्चित्त में) करते ही हैं । इसलिये मल मूत्र को सदोष कहना भ्रान्ति ही है ॥ १६९ ॥

**पवित्रं सकलं चैव वासना कुत्सिता भवेत् ।**
**ततो विचार्य मतिमान् साधकस्तर्कशोधितः ॥ १७० ॥**

अतः सब पवित्र ही है । वासना कुत्सित है । इसलिये बुद्धिमान् साधक विचार कर तर्क द्वारा सब को शुद्ध समझे ॥ १७० ॥

परमार्थतः पूज्यपूजकभेदो मिथ्या

**मायामूलमिदं सर्वं ततो जातमिदं जगत् ।**
**पूज्यपूजकभेदश्च मिथ्यैव परमार्थतः ॥ १७१ ॥**

जिससे यह जगत् उत्पन्न हुआ है, उसका मूल माया है । परमार्थ की दृष्टि से पूज्य-पूजक भाव भी मिथ्या ही है ॥ १७१ ॥

**तस्मात् सर्वप्रयत्नेन ज्ञानमार्गेण शोधयेत् ।**
**सर्वं ब्रह्ममयं विद्धि सत्तर्केणससाधकः ॥ १७२ ॥**

इसलिये साधक प्रयत्नपूर्वक ज्ञानमार्ग से सब को प्रयत्नपूर्वक शुद्ध समझे । सत्तर्क से सबको ब्रह्ममय समझे ॥ १७२ ॥

**प्रकृतञ्च समाप्याथ गृह्णीयाद् द्रव्यमुत्तमम् ।**
**तर्पयित्वा महादेवीं शक्त्या यद्दक्षिणां ददेत् ॥ १७३ ॥**

प्रकृत कार्य समाप्त कर साधक उत्तम द्रव्य ग्रहण कर महादेवी का तर्पण करे और अपनी शक्ति के अनुसार उसे दक्षिणा देवे ॥ १७३ ॥

**त्रिविधं त्रिपुरायास्तु कथितं पूजनं महत् ।**
**वक्ष्येऽहं सर्वशाक्तानां दूतीयजनमुत्तमम् ॥ १७४ ॥**

हमने तीन प्रकार से त्रिपुरा का पूजन कहा है । अब सभी शाक्तों के लिये सर्वोत्तम दूतीयजन का विधान कहता हूँ ॥ १७४ ॥

नायिकायजनम्

**पीठपूजाविधिं कृत्वा पूर्ववत् साधकोत्तमः ।**
**संस्थाप्य तत्र शक्तिञ्च पूर्ववदपि पूजयेत् ॥ १७५ ॥**

**दूतीयजन विधान**—उत्तम साधक पूर्ववत् पीठ पूजा की विधि सम्पन्न कर उस पर शक्ति स्थापित कर पूर्ववत् पूजा करे ॥ १७५ ॥

**भक्तिभावेन सम्पूज्य नायिकाञ्च यथोदिताम् ।**
**पूजयेच्च ततस्तस्यां पञ्च कामान् समाहितः ॥ १७६ ॥**

भक्तिभाव से पूर्वकथित नायिका (द्र. १७.१००-१०४) का पूजन कर उसमें समाहित चित्त हो पञ्चकामों का पूजन करे ॥ १७६ ॥

**मायां कामं तथा पूर्वं ब्लूँ स्त्रीञ्च यथाक्रमात् ।**
**काम बीजञ्च कन्दर्प मन्मथञ्च ततः परम् ॥ १७७ ॥**
**मकरकेतनं चैव मनोभवञ्च ङेयुतम् ।**
**प्रणवादिनमोऽन्तञ्च क्रमेण गन्धपुष्पकैः ॥ १७८ ॥**

माया (ह्रीं), काम (क्लीं), पूर्व में इसके बाद 'ब्लूँ' 'स्त्रीं' पुनः कामबीज (क्लीं) से क्रमशः कन्दर्प, मन्मथ, इसके बाद मकरकेतन, फिर मनोभव, इनका चतुर्थ्यन्त, आदि में प्रणव, पुनः अन्त में नमः लगाकर गन्ध एवं पुष्पों से पूजन करे । जैसे—'ॐ ह्रीं कन्दर्पाय नमः' इत्यादि ॥ १७७-१७८ ॥

**अर्चयित्वा चतुर्दिक्षु पूजयेत्तदनन्तरम् ।**
**वटुकं भैरवं चैव दुर्गाञ्च क्षेत्रपालकम् ॥ १७९ ॥**
**तस्या मूर्ध्नि त्रिकोणञ्च यन्त्रमालिख्य साधकः ।**
**महाप्रेतासनं मध्ये बालामेव प्रपूजयेत् ॥ १८० ॥**

पञ्चकामों के पूजा के अनन्तर चारों दिशाओं में वटुक, भैरव, दुर्गा और क्षेत्रपाल का पूजन करे । फिर उस नायिका के शिर के मध्य भाग में त्रिकोण उसमें महाप्रेतासन यन्त्र स्थापित कर केवल यन्त्र लिखकर स्थापित करे । उस यन्त्र के मध्य में बाला की पूजा करे ॥ १७९-१८० ॥

**मौलौ गणेशं केशाग्रे कुलाध्यक्षं ललाटके ।**
**दुर्गां भ्रुवोस्तथा लक्ष्मीं रसनायां सरस्वतीम् ॥ १८१ ॥**
**स्तनद्वये वसन्तञ्च मदनं चैव पूजयेत् ।**
**मुखे सुधानिधिं पृष्ठे ग्लूं बीजानन्तरोदितम् ॥ १८२ ॥**
**दक्षिणांशं समाश्रित्य आशिरश्चरणावधि ।**
**पूज्याः कामकलास्तस्याः नायिकाऽङ्गेषु सर्वशः ॥ १८३ ॥**

फिर उसके शिरःस्थान में गणेश, केशाग्र भाग में कुलाध्यक्ष, ललाट में दुर्गा, दोनों भ्रुवों में महालक्ष्मी, जिह्वा में सरस्वती, दोनों स्तन में वसन्त और कामदेव,

मुख में सुधानिधि चन्द्रमा, पीठ में ग्लूं बीज, फिर उस (नायिका) के शरीर के दक्षिण भाग में शिर से लेकर चरण पर्यन्त तत्त्वज्ञ साधक कामकलाओं का पूजन करना चाहिए ॥ १८१-१८३ ॥

तस्यां षोडशकामकलापूजनम्

श्रद्धा प्रीतिस्तथा तुष्टिर्धृतिश्च तदनन्तरम् ।
भूतिः कान्तिर्मनोज्ञा च विमला मोदिनी तथा ॥ १८४ ॥
मोघा मनोभवकरी प्रमदा मोहिनी तथा ।
दीपनी शोषणी चैव वशङ्करी तथा पुनः ॥ १८५ ॥
रञ्जनी चैव कामस्य कलाः स्वरविराजिताः ।

षोडशचन्द्रकलापूजनम्

ततश्चन्द्रकलाः पूज्या आशिरश्चरणावधि ॥ १८६ ॥
पूषा वशा सुमना च रतिः प्रीतिर्धृतिस्तथा ।
ऋद्धिश्च सौम्या मरीचिर्बहुमाया ततः परम् ॥ १८७ ॥
मदिरा शशिनी छाया तथा सम्पूर्णमण्डला ।
तुष्टिस्तथाऽमृता चैव पूज्याश्चन्द्रकला इमाः ॥ १८८ ॥

श्रद्धा, प्रीति-तुष्टि, धृति इसके बाद भूति, कान्ति, मनोज्ञा, विमला, मोदिनी, मोघा, मनोभवकरी, प्रमदा, मोहिनी, दीपनी, शोषणी, वशङ्करी-रञ्जनी—इन सोलह काम कलाओं का सोलह स्वरों से पूजन करे । फिर साधक शरीर के बायें भाग में शिर से लेकर चरण पर्यन्त विद्यमान सोलह चन्द्रकलाओं का पूजन करे । पूषा, वशा, सुमना, रति, प्रीति, धृति, ऋद्धि, सौम्या, मरीचि, बहुमाया, मदिरा, शशिनी, छाया, सम्पूर्णमण्डला, तुष्टि और अमृता—ये सोलह चन्द्रकलायें कही गई हैं ॥ १८४-१८८ ॥

पूजयेन्मदनागारे रक्तचन्दनभूषिते ।
भगमालामनुं प्रोच्य पूजयेत्तदनन्तरम् ॥ १८९ ॥
वाग्भवं भुवनेशीञ्च कमला वाग्भवं ततः ।
जं ब्लूञ्चैव ततः क्लिन्ने सर्वाणीति ततो वदेत् ॥ १९० ॥
भगानीति ततः पश्चाद्वशमानय तत्परम् ।
स्त्रीं स्फ्रीं क्लेदिनी बीजं क्लीं क्लीं च ततः परम् ॥ १९१ ॥
भगमालिन्यै नमः स्वाहा पूजयेच्चक्रमध्यगे ।
पूजयित्वा ततश्चक्रं निजदेवीं ततो यजेत् ॥ १९२ ॥

फिर रक्तचन्दन से भूषित मदनागार में भगमाला मन्त्र पढ़कर साधक चक्र का

पूजन करे । वाग्भव (ऐं), भुवनेशी (ह्रीं), कमला (श्रीं), वाग्भव (ऐं), इसके बाद जं ब्लूं क्लिन्ने 'सर्वाणि', फिर 'भगानि वशमानय', फिर 'स्त्रीं स्फीं क्लेदिनी क्लीं क्लीं, इसके बाद 'भगमालिन्यै नमः स्वाहा'—इस मन्त्र से पूजन करे । इस प्रकार चक्र का पूजन कर अपनी इष्टदेवी का पूजन करे ॥ १८९-१९२ ॥

**विधिवत् पूजयित्वा च गन्धैः पुष्पैस्तथाऽक्षतैः ।**
**धूपैर्दीपैश्च नैवेद्यैर्विविधैः कुलसाधकः ॥ १९३ ॥**
**विधाय वन्दनं चैव तदुच्छिष्टं स्वयं हरेत् ।**
**अर्चयेद् गन्धपुष्पाद्यैः स्वशिवं तदनन्तरम् ॥ १९४ ॥**

फिर कुल साधक गन्ध, पुष्प तथा अक्षत, धूप-दीप, विविध नैवेद्य से पूजन कर वन्दना करे और उनका उच्छिष्ट स्वयं ग्रहण करे । इसके बाद गन्ध, पुष्पादि से अपने शिव (लिङ्ग) की पूजा करे ॥ १९३-१९४ ॥

**मूलमन्त्रं समुच्चार्य प्रणवं भुवनेश्वरीम् ।**
**नमः शब्दं ततः पश्चात् शिवायेति ततो वदेत् ॥ १९५ ॥**
**यजेत्तत् पुरुषाघोरसद्यो वामेश्वरानपि ।**
**निवृत्तिश्च प्रतिष्ठां च विद्यां च तदनन्तरम् ॥ १९६ ॥**
**शान्तिश्च शान्त्यतीतां च षडङ्गावरणं ततः ।**
**समग्रविद्यामुच्चार्य त्रिकोणं चैव पूजयेत् ॥ १९७ ॥**

मूल मन्त्र का उच्चारण कर प्रणव (ॐ), भुवनेश्वरी (ह्रीं), फिर नमः शिवाय कहे, 'ॐ ह्रीं नमः शिवाय' मन्त्र से पूजाकर तत्पुरुष, अघोर, सद्योजात, वामदेव और ईशान की पूजा करे । फिर निवृत्ति, प्रतिष्ठा, विद्या, शान्ति और शान्त्यतीता की फिर समग्र षडङ्ग आवरण की तथा समग्रविद्या महामन्त्र का उच्चारण कर त्रिकोण की पूजा करे ॥ १९५-१९७ ॥

**अवधूतेश्वरी कुब्जा-कामाख्या समया अपि ।**
**वज्रेश्वरीकालिके च तथा दिक्करवासिनीम् ॥ १९८ ॥**
**महाचण्डेश्वरीतारे पूजयेत्तत्र साधकः ।**
**तदनुज्ञां ततो लब्ध्वा भुक्त्वा ताम्बूलमुत्तमम् ॥ १९९ ॥**
**स्वशिवं तत्र निःक्षिप्य गजहस्ताख्यमुद्रया ।**
**प्रजपेत् क्षोभरहितश्चाष्टोत्तरसहस्रकम् ॥ २०० ॥**

फिर अवधूतेश्वरी, कुब्जा, कामाख्या, समया, वज्रेश्वरी, कालिका, दिक्करवासिनी, महाचण्डेश्वरी एवं तारा का साधक पूजन करे । फिर उनकी आज्ञा लेकर ताम्बूल खाकर अपना शिव उसमें डालकर गजमुद्रा से क्षोभरहित हो आठ हजार

मन्त्र का जप करे ॥ १९८-२०० ॥

**शतमष्टोत्तरञ्चापि अक्षोभस्थिरमानसः ।**
**जपान्ते तज्जपं देव्यै समर्प्य तदनन्तरम् ॥ २०१ ॥**
**क्षुब्ध्वां मनोभवसुखैः पूजयेत् सुचिरं वसेत् ।**
**गलच्चन्द्रद्रवं तस्माद् गृहीत्वा तर्पयेच्छिवाम् ॥ २०२ ॥**

अथवा चाञ्चल्यरहित होकर एक-सौ आठ बार जप करे । जप के अन्त में सारा जप भगवती को समर्पण कर मनोभव (काम) के सुख से क्षुब्ध उस दूती का पूजन करे और सुखपूर्वक उसके साथ निवास करे । उससे टपकते हुये चन्द्रद्रव को लेकर शिवा का तर्पण करे ॥ २०१-२०२ ॥

**स्तुत्वा प्रदक्षिणीकृत्य विसर्जयेदनन्तरम् ।**
**विसर्जनं विधायाथ शक्तिञ्च परितोषयेत् ॥ २०३ ॥**
**विधिवद्दक्षिणां दत्त्वा अन्नपानादिभिस्तथा ।**
**एवं यजनमात्रेण मन्त्रसिद्धिर्न संशयः ॥ २०४ ॥**

देवी की स्तुति करे, फिर प्रदक्षिणा करे, इसके बाद विसर्जन करे । विसर्जन कर उस शक्ति को तत्त्वज्ञ साधक विधिवद् दक्षिणा तथा अन्नपानादि देकर सन्तुष्ट करे । इस प्रकार दूती यजन से निश्चित रूप से मन्त्र सिद्धि हो जाती है; इसमें संशय नहीं ॥ २०३-२०४ ॥

प्रकारान्तरदूतीयागः

**अथान्यत् सम्प्रवक्ष्यामि दूतीयागमनुत्तमम् ।**
**सम्प्राप्य दिवसं पूर्वदेवीञ्च विधिवद्भगे ॥ २०५ ॥**
**पूजयित्वा जपेन्मन्त्रमयुतद्वितयं तथा ।**
**तस्य लक्ष्मीर्महाविद्या भवेच्च भुवि दुर्लभा ॥ २०६ ॥**

अब इसके बाद एक अन्य प्रकार से श्रेष्ठ दूतीयाग का विधान कहता हूँ । पूर्व निर्दिष्ट समय में देवी को प्राप्त कर सविधि भग में उसका पूजन कर दो अयुत (बीस हजार) मन्त्र का जप करे । उसे महामाया लक्ष्मी इतनी प्राप्त हो जाती हैं जो अन्यों के लिये दुर्लभ हैं ॥ २०५-२०६ ॥

**अष्टमीतिथिमासाद्य पक्षयोरुभयोरपि ।**
**आमन्त्र्य विधिवद्योनिं तत्रैव योगिनीं यजेत् ॥ २०७ ॥**

दोनों पक्षों की अष्टमी तिथि प्राप्त होने पर स्त्री का आमन्त्रण कर उसके भग में योगिनियों की विधिवत् पूजा करे ॥ २०७ ॥

**पश्चात् सम्पूज्य देवेशीं मूलमन्त्रञ्च साधकः ।**
**षट्सहस्रं दिवारात्रौ जप्त्वा मन्त्रमनन्यधीः ॥ २०८ ॥**
**सम्प्राप्य महतीं विद्यां देवीपुत्रो भवेद्भुवि ।**

पश्चात् देवेशी का पूजन कर साधक अनन्यधी हो, दिन रात छह हजार मूल मन्त्र का जप करे । विधिपूर्वक पूजा से ऐसा साधक महती विद्या प्राप्त कर पृथ्वी में देवी पुत्र बन जाता है ॥ २०८-२०९ ॥

पुरश्चरणकथनम्

**अथातः सम्प्रवक्ष्यामि प्रकारान्तरमुत्तमम् ॥ २०९ ॥**
**योनौ सम्पूजयेद्देवीं सर्वदुःखनिवारिणीम् ।**
**भगाद्यैर्भगमामन्त्र्य भगे भगवतीं ततः ॥ २१० ॥**
**ततो वै लभते सिद्धिं मन्त्रस्य लक्षमानतः ।**
**द्विलक्षेण महावाग्मी त्रिलक्षेण महाकविः ॥ २११ ॥**

अब इसके बाद अन्य सर्वोत्तम प्रकार कहता हूँ । साधक योनि में भगादि मन्त्र से भग का आवाहन कर भग में सम्पूर्ण दुःखों को निवारण करने वाली देवी भगवती का पूजन करे । फिर एक लाख की संख्या में जप करे, तो वह मन्त्र की सिद्धि प्राप्त करता है और दो लाख के जप से महावाग्मी हो जाता है तथा तीन लाख के जप से महाकवि हो जाता है ॥ २०९-२११ ॥

**वेदलक्षेण वेदस्य साधकः पारगो भवेत् ।**
**वाक्सिद्धिश्च भवेत्तस्य पञ्चलक्षप्रमाणतः ॥ २१२ ॥**

चार लाख के जप से वेद का पारगामी विद्वान् हो जाता है और पाँच लाख जप से उसे वाक्सिद्धि प्राप्त हो जाती है ॥ २१२ ॥

**रसलक्षैर्भवेत्तस्य अणिमादिगुणाष्टकम् ।**
**सप्तलक्षेण वीरेन्द्रो जीवन्मुक्तो भवेन्नरः ॥ २१३ ॥**

छह लाख के जप से उसे अणिमादि अष्टसिद्धियाँ प्राप्त हो जाती हैं । सात लाख जप से वह वीरेन्द्र तथा जीवन्मुक्त हो जाता है ॥ २१३ ॥

**अत ऊर्ध्वं न जानामि शिव एव न संशयः ।**
**विधिवच्छक्तिमासाद्य साधकः स्थिरमानसः ॥ २१४ ॥**
**सम्पूज्य विधिवद्भक्त्या योनौ मूलं न्यसेत्ततः ।**
**रात्रौ जागरणं कृत्वा हविष्याशी जितेन्द्रियः ॥ २१५ ॥**
**योनिं स्पृष्ट्वा जपेन्मन्त्रमेकाकी लक्षमानतः ।**

**जायते मन्त्रसिद्धिस्तु नात्र कार्या विचारणा ॥ २१६ ॥**

इसके बाद जप करने वाला (साधक) और फल तो मैं नहीं जानता, वह साक्षात् शिव हो जाता है । स्थिर चित्त साधक पूर्वोक्त विधिवत् (द्र. १७. १००-१०४) शक्ति को प्राप्त कर, भक्तिपूर्वक विधिवत् पूजा कर, योनि में मूल मन्त्र का न्यास करे । फिर हविष्याशी एवं जितेन्द्रिय होकर रात्रि में जागरण करते हुये, योनि का स्पर्श कर, अकेले एक लक्ष की संख्या में जप करे, तो मन्त्र सिद्ध हो जाता है इसमें सन्देह नहीं ॥ २१४-२१६ ॥

**सर्वसिद्धिः करे तस्य सत्यं सत्यं सुनिश्चितम् ।**
**अथवा विषुवे चैव मासान्तपक्षयोरपि ॥ २१७ ॥**
**अष्टम्याञ्च चतुर्दश्यां चन्द्रसूर्यग्रहे तथा ।**
**श्मशाने वा यथाशक्त्या गुरोर्वा शिवसन्निधौ ॥ २१८ ॥**
**लतामानीय यत्नेन योनौ चक्रं यथाविधि ।**
**लिखनञ्च प्रकुर्वीत कुङ्कुमागुरुचन्दनैः ॥ २१९ ॥**
**मन्त्रञ्च प्रलिखेत्तस्यामावाह्य परमेश्वरीम् ।**
**सम्पूज्य विधिवद् भक्त्या साधकः स्थिरमानसः॥ २२० ॥**

उसके हाथ में समस्त सिद्धियाँ हो जाती है, यह सत्य है, सुनिश्चित सत्य है; अथवा विषुव की सङ्क्रान्ति में, मासान्त एवं उभय पक्ष में; अथवा अष्टमी चतुर्दशी के दिन; अथवा चन्द्र सूर्य के उपराग काल में, यथाशक्ति श्मशान में अथवा गुरु के सन्निधान में; अथवा शिव सन्निधान में, प्रयत्नपूर्वक लता (स्त्री) लाकर उसे योनि में स्थापित कर कुङ्कुम, अगुरु एवं चन्दन से यथाविधि चक्र यन्त्र लिखे । फिर उसी लता में मन्त्र लिखकर परमेश्वरी का आवाहन करे । फिर स्थिर चित्त साधक भक्तिपूर्वक परमेश्वरी का पूजन करे ॥ २१७-२२० ॥

**जपेन्मन्त्रं दिवारात्रौ योषितां योनिदेशतः ।**
**लक्षमेकं तदूर्ध्वं वा दशभिर्होममाचरेत् ॥ २२१ ॥**
**पूजाञ्च विधिवत् कृत्वा यथाविभवविस्तरैः ।**
**परितोष्य गुरुं पश्चान्मन्त्रसिद्धिश्च जायते ॥ २२२ ॥**
**महावाग्मी भवेत् सोऽपि धनवान् राजवल्लभः ।**
**लक्ष्मीस्तस्य सदा गेहे वाणी वक्त्रे सुनिश्चितम् ॥ २२३ ॥**
**भुवि शक्रसमो वीरो जीवन्मुक्तः प्रजायते ।**

फिर योनि के स्थान के सन्निकट बैठकर दिनरात एक लाख अथवा उससे भी अधिक मन्त्र का जप करे और दशांश से होम करे । फिर अपने विभव विस्तार के

अनुकूल विधिवत् पूजा कार्य सम्पन्न कर गुरु को सन्तुष्ट करे। ऐसा करने से मन्त्र सिद्ध हो जाता है। वह महावाग्मी धनवान् और राजवल्लभ हो जाता है। उसके घर में सदैव के लिये महालक्ष्मी का निवास तथा मुख में सरस्वती का निवास निश्चित रूप से हो जाता है। इस पृथ्वी में वह इन्द्र बन जाता है और अन्ततः जीवन्मुक्त हो जाता है ॥ २२१-२२४ ॥

### प्रकारान्तरेण दूतीयजनम्

**अथवान्यप्रकारेण दूतीयजनमुत्तमम् ॥ २२४ ॥**
**तत्र तां स्थापयेद्दूतीं पूजयेच्च यथाविधि ।**
**वस्त्रालङ्करणं चैव दत्त्वा तस्यै यथोचितम् ॥ २२५ ॥**
**धूपयित्वा रक्तवस्त्रं दूतीं कुर्यात् सुलक्षणाम् ।**
**पद्मं भूमौ समालिख्य षट्कोणान्तर्गतं लिखेत् ॥ २२६ ॥**
**तस्योपरि गतां नारीं निर्जने भूषणान्विताम् ।**
**ततस्तां गन्धपुष्पाद्यैर्नानोपहारविस्तरैः ॥ २२७ ॥**
**देवीरूपेण सम्भाव्य पूजयेत्तां यथाविधि ।**
**तस्या गात्रे न्यसेन्मन्त्रं पञ्चबाणान् क्रमेण तु ॥ २२८ ॥**

अथवा अन्य प्रकार से सर्वोत्तम दूती यजन का विधान करना चाहिये। उस दूती को पूर्वोक्त रूई के गद्दे पर बिठाकर पूजन करना चाहिये। उसके अनुकूल वस्त्र और अलङ्कार प्रदान करे, धूप देवे और रक्त वस्त्र देवे। इस प्रकार उस दूती को सुलक्षण युक्त करे। फिर षट्कोण बनाकर कमल बनावे। वहाँ निर्जन स्थान में उस भूषण भूषिता नारी को यन्त्र पर आमन्त्रित कर बैठावे। उनकी गन्ध पुष्पादि पञ्चोपचारों से तथा अनेक प्रकार के विस्तृत उपहारों से देवी रूप की कल्पना कर यथाविधि पूजा करे। उनके शरीर में पञ्चबाणों (द्रां द्रीं क्लीं ब्लूं सः) से क्रमशः मन्त्र न्यास करे ॥ २२४-२२९ ॥

**स्वकल्पोक्तक्रमेणैव न्यासजालं प्रविन्यसेत् ।**
**दीक्षयित्वा तन्मूलेन देवीबुद्ध्या यजेत्ततः ॥ २२९ ॥**

फिर अपने सम्प्रदायानुसार न्यास जाल का विन्यास करे। फिर मूल मन्त्र से दीक्षित कर देवी की बुद्धि से उनका यजन करे ॥ २२९ ॥

**योनौ वा पूजयेद्देवीं यस्माद्योनिमयी शिवा ।**
**योनौ कामेश्वरीं चैव नाभौ वज्रेश्वरीं ततः ॥ २३० ॥**

यतः शिवा योनिमयी है इसलिये योनि में भी देवी का यजन करे। तदनन्तर योनि में कामेश्वरी की और नाभि में वज्रेश्वरी का पूजन करे ॥ २३० ॥

हृद्वक्त्रस्तनमध्येषु पूजयेत् परदेवताम् ।
योनिं सदाऽक्षतां कृत्वा जपेद्विद्यां ततः पराम् ॥ २३१ ॥

हृदय, मुख और दोनों स्तनों के मध्य में परदेवता का पूजन करे। फिर योनि को अक्षत रखते हुये परा विद्या का जप करे ॥ २३१ ॥

अयुतञ्च जपं कृत्वा सर्वसिद्धीश्वरो भवेत् ।
शक्तिमानीय विधिवत् पूजयेद्योनिमण्डले ॥ २३२ ॥

इस प्रकार दश हजार जप करने पर साधक फिर सिद्धीश्वर बन जाता है। फिर शक्ति को बुलाकर योनिमण्डल में पूजा करे ॥ २३२ ॥

सम्पूज्य निजदेवीञ्च सायुधां सपरिच्छराम् ।
भगिनीं भगजिह्वाञ्च भगास्यां भगमालिनीम् ॥ २३३ ॥
भगदन्तां भगाक्षीञ्च भगवर्णां भगत्वचाम् ।
भगस्तनीं भगाङ्गीञ्च भगस्थां भगसर्पिणीम् ॥ २३४ ॥
भगे भगवतीं तस्याः सम्पूज्य भगमालया ।
वाग्भवं कामबीजञ्च कमलाबीजमेव च ॥ २३५ ॥
इति बबीजत्रयं दत्त्वा ङेयुताश्च नमोऽन्तिकाः ।
पूजयित्वा ततः पश्चान्मूलमन्त्रं जपेत्ततः ॥ २३६ ॥

इस प्रकार सायुध एवं सावरण देवी का पूजन कर भगिनी, भगजिह्वा, भगस्या, भगमालिनी, भगदन्ता, भगाक्षी, भगवर्णा, भगत्वचा, भगस्तनी, भगाङ्गी, भगस्था और भगसर्पिणी इन देवियों का उसके भग में इस प्रकार पूजन करे। भगमाला के साथ वाग्भव (ऐं), कामबीज (क्लीं), कमलाबीज (श्रीं) इन तीन बीजों के साथ नाम में चतुर्थ्यन्त लगाकर अन्त में नमः लगाकर पूजन करे। यथा भगमाले ऐं क्लीं श्रीं भगिन्यै नमः इत्यादि। इस प्रकार पूजन करने के पश्चात् मूल मन्त्र का जप करे ॥ २३३-२३६ ॥

एकायुतजपं कृत्वा सर्वसिद्धिपरायणः ।
सर्वशास्त्रार्थवेत्ता च सर्वगः सर्ववित् प्रभुः ॥ २३७ ॥

एक अयुत (दश हजार) जप करने वाला साधक समस्त सिद्धियाँ प्राप्त कर लेता है। वह सिद्धि प्राप्त करने पर सर्वशास्त्रार्थवेत्ता, सर्वगामी, सर्ववित्ता और सामर्थ्य युक्त हो जाता है ॥ २३७ ॥

### दूतीयागमाहात्म्यकथनम्

इदानीं कथ्यते दूतीयागस्य महिमा भृशम् ।

**योषितां योनिमास्थाय सर्वसिद्धिर्न संशयः ॥ २३८ ॥**

**दूतीयाग माहात्म्य**—अब दूतीयाग की विशेष महिमा कहता हूँ । स्त्री की योनि का आश्रय लेने से समस्त सिद्धि हो जाती है इसमें संशय नहीं ॥ २३८ ॥

**एतत् पूजनमम्बायाः सर्वतन्त्रेषु गोपितम् ।**
**इत्थं पूजाविधिं कृत्वा सर्वसिद्धियुतो भवेत् ॥ २३९ ॥**

यह अम्बा भगवती का दूतीयाग के रूप में पूजन सभी तन्त्रों में गुप्त रखा गया है । अतः इस प्रकार पूजन करने वाला साधक सभी सिद्धियों से युक्त हो जाता है ॥ २३९ ॥

**लभते विमलां वाणीं कवीनामग्रणीर्भवेत् ।**
**ऐश्वर्यमतुलं प्राप्य वशीकुर्याज्जगत्त्रयम् ॥ २४० ॥**

वह विमलवाणी प्राप्त कर लेता है । समस्त कवियों में श्रेष्ठ हो जाता है और विपुल ऐश्वर्य प्राप्त कर तीनों लोकों को वश में कर लेता है ॥ २४१ ॥

**सिद्धगन्धर्वदेवैश्च किन्नरैर्दानवैस्तथा ।**
**राक्षसैर्मनुजैर्नित्यं पूज्यो भवति साधकः ॥ २४१ ॥**

वह साधक सिद्ध, गन्धर्व, किन्नर, देव, दानव, राक्षस और मनुष्यों से नित्य पूजित हो जाता है ॥ २४१ ॥

**सर्वेषां वल्लभः सोऽपि योगिनीनां सुदुर्लभः ।**
**अन्ते च रमते देव्या साक्षात् स्मरहरोपमः ॥ २४२ ॥**

